IAL CATALOGUE OF
ANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

1919-20 TO 1921-22

FOR THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

MAHĀMAHŌPĀDHYĀYA S. KUPPUSWAMI SASTRI, M.A.

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS

Prepared under the orders of the Government of Madras

Volume IV—Part I. Sanskrit A

MADRAS
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS

PRICE, 9 *rupees*]	1928

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

1615-36 The Bangalore Press

A TRIENNIAL CATALOGUE OF MANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

1919-20 TO 1921-22

FOR THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

MAHĀMAHŌPĀDHYĀYA S. KUPPUSWAMI SASTRI, M.A.

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS

Prepared under the orders of the Government of Madras

Volume IV—Part I. Sanskrit A

MADRAS
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS

1927

ADDENDA AND CORRIGENDA TO VOL. IV OF THE TRIENNIAL CATALOGUE OF SANSKRIT MSS.

Page	Line	*For*		*Read*
4183	27	योगादिवृत्यङ्गी	...	योगादिवृत्त्यङ्गी
4184	22	कारिणमुश्य	...	कारिणमुद्दिश्य
„	23	बन्धनिवृतिः	...	बन्धनिवृत्तिः
4194	19	or Bṛhaṭṭīkā	...	*omit*
4199	26	गौडपादटिप्पणे	...	गौडपादभाष्यटिप्पणे
4216	16	चौण्डापार्येण	...	चौण्डपार्येण
4234	11	सज्ञारूप	...	संज्ञारूप
4288	25	पूण	...	पूर्ण
4304	11	सिद्धान्तमुष्टः	...	सिद्धान्तमुष्टिः
4309	5	Perumbaur	...	Perumbavore
„	10	Vēdānta: by	...	Vēdānta by
4313	18	स्वगस्स्यात्	...	स्वर्गस्स्यात्
4337	20	अद्वतमुक्तासर	...	अद्वैतमुक्तासर
4343	14	(*b*)	...	(*a*)
4409	27	Vēṅkaṭarāya	...	Vēṅkaṭārya
4417	28	*Add* after "below"	...	"vide R. No. 2931 ante"
4554	16	Same work as that	...	Similar to the work
4581	3	संज्ञिकः	...	संज्ञकः
4594	16	Alaṅkārasūtras	...	Kāvyālaṅkārasaṅgraha
4658	22	श्रीमच्छठकोप	...	श्रीवण्शठकोप
4823	12, 13	*Add* after "philosophy"		"and which work has been described under No. 5086 of the D.C.S. MSS., Vol. X."
4853	5	Do.	...	Do.
4903	18	मुहर्त	...	मुहूर्त
4955	5	Malabar district	...	Cochin State
4958	9	वैश	...	शैव

Page	Line	*For*		*Read*
4959	7	वैश	...	शैव
5013	26	समुद्धरणाख्य	...	समुद्धरणाख्यं
5062	10	Kudalur-mana,	...	Kaimukku-mana
5073	18	Oorakaram	...	Oorakam
5110	13	चत्त्वं	...	चित्त्वं
5123	27	नन्दीश्वरण	...	नन्दीश्वरेण
5134	32	भूर्जल	...	भूर्जाल
5140	5	Nīlakaṇṭha	...	Nārāyaṇa
5207	22	तात्पय	...	तात्पर्य
5208	25	भुवेक(कं)	...	(बुक्क)
5243	17	शास्त्रार्थदीपिका—प्रभा	...	शास्त्रार्थदीपिकाव्याख्या—प्रभा
,,	18	dīpikā : Prabhā	...	dīpikāvyākhyā : Prabhā.
5364	22	मशक्मम	...	मशक्यम
,,	23	चेन्न	...	च न
,,	24	प्राप्तिलक्षणं	...	प्राप्तिलक्षण:
,,	,,	विवक्षः	...	विपाक:
5383	17	*Add* after " Vēdānta "	...	" This work has been described under R. No. 3085(*b*) ante."
5400	8	Paraśivam	...	Paramēśvara
5502	27	3200	...	3002
5523	28	*Add* after " Bhāṣya "	...	" Same work as that described under R. No. 3627 ante."
5539	31	*Add* before the line " complete ".		" It is made out from the Nyāyasiddhāñjana of Vēdāntadēśika that the author of this work is Nārāyaṇārya."
5550	18	(को)	...	(ड्वि)
5597	22	Katpadi	...	Kottapudi
5605	5	Kanmaranallur	...	Kumaranallur
5613	9	Mallapalli	...	Nallapalli

Page	Line	For		Read.
5619	29	महेश्व	...	महेश्वरं
5655	10	Vādhyar	...	Vaidyar
5675	15	चन्द्रादयम्	...	चन्द्रोदयम्
5739	14	*Read* after "Ānanda-pūrṇa"		"alias Vidyāsāgara, who was also the author of Kāśikāvṛttivyākhyā—Prakriyāmañjarī, described under R. No. 2193 and that he was a"
5897	11	*Add* after "son"	...	"of Ṛṣi and brother's son"
5925	5	R. No. 3934	...	R. No. 3984
5979	22	4550	...	4540

TABLE OF TRANSLITERATION.

—	Consonants.	Semi-vowels, Sibilants and Aspirate.	Vowels.	Diphthongs.
Gutturals	k, kh, g, gh, ṅ...	h, ḥ ..	a, ā ...	e, ē, ai.
Palatals	c, ch, j jh, ñ ...	y, ś ..	i, ī ...	
Linguals	ṭ, ṭh, ḍ, ḍh, ṇ ...	r, ṟ, ḻ, ṣ ...	ṛ, ṛi.	
Dentals	t, th, d, dh, n	l, ḷ, s ...	ḷ, ḷī.	
Labials	p, ph, b, bh, m.	v	u, ū ...	o, ō, au

INTRODUCTION.

This is the first part of the fourth volume of the Triennial Catalogue of Manuscripts and it is prepared on the same plan as that of the first volume and as described in the introduction thereto. The numbers of the manuscripts and the pages of this part are in continuation of the similar part of the third volume.

Attention is drawn to a few of the important works described in this part of the catalogue.

Bṛhatī, R. No. 2908.—This is a very old and noteworthy commentary by Prabhākaramiśra, on Śabarasvāmin's Mīmāṁsābhāṣya. Prabhākara is known as the author of two works called Nibandhana and Vivaraṇa, of which the latter seems to be identical with the Bṛhatī. This work should not be confounded with *Bṛhaṭṭīkā*, one of Kumārila's works. The phrase '*or Bṛhaṭṭīkā*' occurring in the description of this manuscript at page 4194 of this volume is a mistake due to oversight. Of the two schools of Pūrvamīmāṁsā, viz., the Bhāṭṭa school and the Prābhākara school, the latter rests chiefly upon the two works of Prabhākara mentioned above. Maṇḍanamiśra, who is presupposed by Śaṁkara, presupposes both Kumārila and Prabhākara; and Śālikanātha, one of Prabhākara's disciples presupposes Maṇḍana. According to tradition, Prabhākara was one of Kumārila's pupils and both Kumārila and Prabhākara quote from Bhartṛhari's Vākyapadīya. For further information about Prabhākara's place in the History of Mīmāṁsā, attention is invited to the two papers on the *Prabhākara-problem* contributed by Professor S. Kuppuswami Sastri, M.A., I.E.S., of Madras, to the second and third Oriental conferences and printed respectively in pages 408 to 412 and 474 to 481 in the two volumes of the Proceedings of the Second Oriental Conference, Calcutta, and the Third Oriental Conference, Madras.

Bhāṣāratna, R. No. 2910.—This is a small work in 90 pages explaining briefly and clearly the seven categories and other principles of the Vaiśēṣika school of Indian Philosophy. The author is Kaṇādatarkālaṅkāravāgīśa whose name is familiar to Vaiśēṣika scholars.

Saṁkṣēpaśārīraka Sambandhōkti, R. No. 2919.—This is a commentary on the Saṁkṣēpaśārīraka of Sarvajñātman.

Sarvajñātman is said to have been a contemporary of King Manukulāditya and a disciple of Surēśvarācārya, the famous disciple of Śaṁkarācārya. The commentator is Vēdānanda, a disciple of Vēdādhyakṣa. The commentator explains the context of every stanza and the connexion of each stanza with the previous one and gives the purport of the stanzas so as to enable students to understand their meaning without any further explanation. There are also five other commentaries on the text all being by different authors and three of them are available in print. One Ānandavēda, who is said to be the preceptor of one of these commentators, viz., Viśvavēda, may be conjectured to be identical with Vēdānanda, the author of the Sambandhōkti.

Āśvalāyanasandhyābhāṣya, *R. No.* 2920.—This is a clear exposition on the Sandhyāvandanamantras of the Āśvalāyana recension. The commentator is Cauṇḍapācārya who speaks of Bhāratītīrthamuni and Vidyātīrthamuni as commentators on the Vēdas and especially the former as his preceptor. Vidyāraṇya, the well-known commentator on the Vēdas, speaks of both Bhāratītīrtha and Vidyātīrtha, apparently his preceptors. Cauṇḍapa also refers to King Bhūpati under whom he was a minister. The author says that Śaunaka wrote ten works and enumerates them by name. Cauṇḍapa also wrote commentaries on some of the works relating to the Āpastamba recension.

Nyāyacandrikā, *R. No.* 2931.—This is a treatise on Advaita Vēdānta. The author is Ānandapūrṇa *alias* Vidyāsāgara, disciple of Abhayānanda. The author herein refutes such principles of the Nyāya and Mīmāṁsā as come into conflict with Advaita principles. The author also has written commentaries on Surēśvara's Bṛhadāraṇyavārtika and Maṇḍana's Brahmasiddhi and quotes herein the Brahmasiddhi, Bhāvanāvivēka and Sphōṭasiddhi in support of his view. The following are among the authors and works quoted herein:—

1. Bhūṣaṇa; probably the Nyāyabhūṣaṇa of Bhāsarvajña, 2. Nyāyamuktāvalī, 3. Nyāyamañjarī, 4. Nyāyalīlāvatī, 5. Nyāyakandalī, 6. Kusumāñjali, 7. Mānamanōhara, 8. Nītitattvāvirbhāva, 9. Bauddhādhikāra, 10. Bhāsarvajña, 11. Vyōmaśiva, 12. Śālikanātha, 13. Vādīndra, 14. Praśastapāda, 15. Bhāskara (Vēdāntin), 16. Vāsudēvasūri and 17. Viṣṇubhaṭṭa.

He salutes God Śiva worshipped at Gōkarṇa in the Malabar District and quotes the Tamil word चोर् சோர்

in the sense of cooked rice. Vidyāsāgara's commentary on Śrīharṣa's Khaṇḍanakhaṇḍakhādya has been completely published in the Chowkhamba Press, Benares.

Nyāyaprakāśikā, R. No. 3031.—This is a commentary on the Nyāyacandrikā mentioned above. The commentator is Svarūpānanda and a disciple of Gōvindānanda, the author of Bhāṣyaratnaprabhā. The commentator refers to several authors and their works. Ānandapūrṇa, the author of the text, is said herein to have written works also on the Mahābhārata and Vyākaraṇa Śāstra. The commentator salutes one Vimalāraṇya, his *Guru*.

Jānakīharaṇa, R. No. 2935.—This is a good Mahākāvya in 20 Sargas. The author Kumāradāsa was a king of Ceylon and is said to have been a contemporary of the famous Kālidāsa. From the concluding stanzas it is understood that he was the son of Kumāramaṇi who was killed in battle soon after the birth of the poet and that he was brought up by his maternal uncles named Mēgha and Agrabōdhi. According to Rājaśēkhara's Kāvyamīmāṁsā, Kumāradāsa was born blind. This manuscript contains the entire work in 20 Sargas. There are two editions of the work, one published in Calcutta in 1893 and the other in Bombay in 1907. The former edition contains Sargas 1 to 14 complete and the 15th incomplete and the latter edition 1 to 10 Sargas complete. The readings found in the manuscript in question mostly differ from those of the two editions referred to above. This manuscript was copied from an old palm-leaf manuscript obtained from Malabar, and according to the tradition prevailing in Malabar, the text of the work as given in the manuscript now described is the correct original text of the poet and the text as given in the printed edition was reconstructed from the commentaries on this work. The last colophon given in the Calcutta edition and the publisher's assumption that the work should contain 25 Sargas are contradicted by this manuscript in which the work seems to be complete in 20 Sargas.

Siddhāntaratna with commentary, R. No. 2989, *and Gōvindabhāṣya, R. No.* 2990.—Like Saṁkara, Rāmānuja and Ānandatīrtha, Gōvinda also wrote a commentary on the Brahmasūtras. The commentator Gōvinda, generally known as Gōvindaikāntin, was also called Baladēva and had a title name "Vidyāvibhūṣaṇa." The commentary was written at the command of Lord Gōvinda and it is called Govindabhāṣya. He refers to Ānandatīrtha and follows his doctrine

of dualism in accordance with Caitanya's view. He quotes passages from the Bhāgavatapurāṇa which was completely ignored by some of the commentators of an earlier age.

In support of the abovesaid Gōvindabhāṣya, he wrote another work named Siddhāntaratna. This is a treatise in 8 chapters on Dvaita Vēdānta in accordance with the school of Caitanya. In this work he refers to Rādhādāmōdara and Pītāmbara, both being his preceptors. The former, Rādhādāmōdara, he says, was a Brāhmaṇa of the Kānyakubja country.

Again to explain the correct meaning of the Siddhāntaratna mentioned above, he himself wrote a commentary thereon. He refers in this commentary to one Pratāparudra Gōpāladāsa, a King of Utkala country, and to one Murāri, one of his ancestors being the fourth from him. This Murāri is said to have been the Guru to King Pratāparudra Gōpāladāsa referred to *supra*. He also refers to one Śrīrūpa and one Sanātana as teachers of his doctrine. Gōvinda further wrote a poem named Kṛṣṇacaitanyāmṛta.

Gaṅgavaṁśānucarita, *R. No.* 3030.—This is a Campu-Kāvya in 10 chapters, describing the genealogy of the kings of the Gaṅga dynasty and giving the period of reign in each case. Vāsudēvaratha, son of Gōvindaratha, and grandson of Śrīnivāsaratha of Atrigōtra, is the author of this work. It is in the form of a dialogue between Vidyārṇava and Līlāvatī. The work was written when the king, Puruṣōttamadēva was ruling in Guḍāri Kaṭaka or Cuttack. The author at the outset describes three groups of kings, with six kings in each, each group being associated with particular surnames, viz., Dēva, Sihṁa and Bhānu. A king named Cūḍāṅga was the first of these 18 kings and he was otherwise called Gaṅga from whom the Gaṅga dynasty sprang. A king named Kajjalabhānu was the last of the 18 kings said above, and during his reign, the Kuḍāri Kaṭaka was made the capital. Puruṣōttamadēva comes last in his genealogy. Puruṣōttamadēva was a well-known grammarian and lexicographer. Puruṣōttamadēva's Bhāṣāvṛtti is now available in print and referred to by Mādhava in his Dhātuvṛtti. He wrote also two other good works, viz., Trikāṇḍaśēṣa and Hārāvali, in lexicography. Nṛsiṁhadīkṣita refers in his Śrīnivāsaratha Vijayanāṭikā, to king Puruṣōttamadēva as the patron of Vāmadēva, one of the ancestors of the former. He further says that by this Vāmadēva, the village Vāmadēvapura was established after his name.

Again one Nityānanda says in his commentary on the Caitanyacaritāmṛta, that the commentary was written under the command of the king Puruṣōttamadēva. In the three works referred to above, namely Bhāṣāvṛtti, Trikāṇḍamaṇḍana and Hārāvali, to the name of the author Puruṣōttamadēva, the title "Mahāmahōpādhyāya" is prefixed.

Vacanamālā, R. No. 3052.—This is a commentary on the Bālakrīḍā of Viśvarūpācārya. The English description of this manuscript as given at page 4458 of this volume is wrong. The Bālakrīḍā itself is a commentary on the Yājñavalkyasmṛti. As the manuscript of Vacanamālā is incomplete, the author's name is not found distinctly stated therein. The author refers to his other works, Gaurīpādādikēśastava, Sētu, Samasyārāmavṛtta and Samasyākṛṣṇalīlā. "Setu" in this group is probably the same as Tristhalīsētu on Dharmaśāstra. The author of the Tristhalīsētu was Nārāyaṇabhaṭṭa, son of Rāmēśvara. Thus the author of the Vacanamālā is perhaps Nārāyaṇabhaṭṭa. No information regarding his other three works is available. The commentator mentions the following commentaries on the Bālakrīḍā by different authors:—

1. Vibhāvanā by Vēdātmayati.
2. Ṭīkā by do.
3. Amṛtasyandinī by Sōmayājin.

Yājñavalkyasmṛti with the Bālakrīḍā was recently published by the late Mahāmahōpādhyāya Gaṇapati Sastriyar as Nos. LXXIV and LXXXI of the Trivandrum Sanskrit Series.

Śṛṅgāraprakāśa, R. No. 3252, *and Bhāvaprakāśa, R. No.* 3636.—These are two of the most important works on Poetics. The author of the first is the famous Bhōjadēva, the King of Dhārā. He quotes as illustrations, passages from many rare and unknown works, such as, Tāpasav atsarāja, Hayagrīvavadha, Abdhimathana, Mārīcavadha, Kuvalayāśvacarita and Lakṣmīsvayaṁvara. The work is divided into 36 Prakāśas each Prakāśa containing about 1,000 Granthas. This work is quoted by Śāradātanaya in his Bhāvaprakāśa and by Kumārasvāmin in his Ratnāpaṇa.

Śāradātanaya also mentions in his Bhāvaprakāśa many rare and unknown works, such as, Rāmānanda, Nalavikrama, Saubhadrikā, and Gaṅgābhagīratha, and closely follows the Śṛṅgāraprakāśa of Bhōjadēva. It is said that Śāradātanaya wrote two other works Śāradīya and a commentary on the Kāvyaprakāśa. Śāradātanaya was a native of the village Māṭharapūjya and studied under Divākara. He was the son

of Bhaṭṭagōpāla and the great grandson of Lakṣmaṇa who is said to have written the work, Vēdabhūṣaṇa, a commentary on the Vēdas. Bhaṭṭagōpāla wrote a commentary on the Kāvyaprakāśa, called Sāhityacūḍāmaṇi.

Sarasvatīkaṇṭhābharaṇa, R. No. 3279.—This is an original work on grammar by Bhōjadēva, the King of Dhārā. The author herein has modified Pāṇini's Vyākaraṇasūtras and made them easily intelligible to students by adding the necessary supplementary words found in Vārtikas and Gaṇapāṭhas. Like the Aṣṭādhyāyī, this work also is divided into eight Adhyāyas, each containing four Pādas. The author Bhōjadēva is the same as the author of the Śṛṅgāraprakāśa, mentioned above. Thus Bhōjadēva was an authority not only in poetics, but also in grammar. A commentary on this work has also been acquired for the Library. The commentary is called Hṛdayahāriṇī and Daṇḍanātha Nārāyaṇabhaṭṭa is its author.

Nyāyaratnamālāvyākhyā, R. No. 3845.—This is the only commentary available on the Nyāyaratnamālā of Pārthasārathi Miśra. The commentator was one Rāmānuja and the commentary is called Nāyakaratna. The author mentions one Jātavedaguru and a place Dharmapuri on the bank of the Gōdāvarī. He further says that he was a follower of Prābhākara school.

ALPHABETICAL SYNOPSIS OF SUBJECT HEADINGS.

[Reference is given to the pages of the subject index.]

SUBJECT INDEX

OF THE

WORKS DESCRIBED IN THE SANSKRIT PART OF THE TRIENNIAL CATALOGUE OF MANUSCRIPTS.

VOL. IV.

[The letters in column 2 are used with the following significance :—
C.C. = no copy of the work is noticed in the Catalogus Catalogorum ;
D.C. = the work has not appeared in any Descriptive Catalogues ;
C.T. = there are not more than 3 copies in the Catalogus Catalogorum ;
L. = there were no copies in the Library ;
P. = the manuscript contains a portion which was not in the Library ;
T. = there were not more than 3 copies in the Library.]

Saṁhitā and Brāhmaṇa.

The Ṛgvēda.

		R. NUMBER
Aitarēyabrāhmaṇabhāṣya	D.C.L.	3806
Aitarēyabrāhmaṇavyākhyā : Ṣāḍguravī : Sukhapradā ...	C.C.L	3682
Aitarēyāraṇyakabhāṣya		3860 (*c*)
Aitarēyāraṇyakavṛtti	T.	3411, 3950
Kauṣitakabrāhmaṇavyākhyā : Sadarthavimarśinī	C.C.L.	3650, 3779
Ṛgvēdabhāṣya	C.C.L.	3649
Ṛksaṁhitāpadapāṭha		3861 (*c*)
Ṛksaṁhitāvyākhyā : Ṛgarthadīpikā	C.C.L.	3076, 3703

The black Yajurvēda.

Kṛṣṇayajurvedāraṇyaka		3163 (*b*)
Taittirīyārthakārikā	L.	3764 (*a*)

The Sāma Vēda.

Sāmasaṁhitā	3157, 3159
Sāmavēdabhāṣya	4144
Samavēdabrāhmaṇa	3989 (*b*)
Sāmavēdagāna : Ūha	4010
Sāmavēdamantrabhāṣya	3484, 4133 (*d*)
Sāmavēdāraṇyaka	3158

Śrautaprayoga.

Dharmaśāstras (Original Smṛtis).

Digest (General).

Digest (Special).

1. *Āhnika.*

2. *Ācāra.*

B.—Nyāya Tracts.

Vēdānta—General.

Advaita Philosophy.

Viśiṣṭādvaita Philosophy.

Dvaita Philosophy.

Vallabha Philosophy.

Religion Caitanyism.

Vrata and Vratakalpa.

Pūjā and Pūjākalpa.

Nāmastōtra.

Praśaṁsāstōtra.

Mahākāvya.

Laghukāvya.

Śṛṅgārakāvya.

Anthology.

Biography.

History.

Kathā.

Rhetoric and Poetic.

R. NUMBER

Medicine.

Mathematics and Astronomy.

Astrology.

Horoscopy.

Proganstigation and Divination.

AUTHOR INDEX

OF THE

SANSKRIT PART OF THE TRIENNIAL CATALOGUE OF MANUSCRIPTS.

A TRIENNIAL CATALOGUE OF MANUSCRIPTS.

1919 - 20 TO 1921 - 22.

VOLUME IV.

PART I—SANSKRIT—A.

R. No. **2895.**

Paper. $10\frac{3}{4} \times 9\frac{5}{8}$ inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūṭalūr Mana, Tritala, Malabar district.

सङ्क्षेपभारतम्.

SAṄKṢĒPABHĀRATAM.

An easy poem in five Sargas narrating briefly the story of the Mahābhārata for beginners: by Vāsudēva, who says that he composed this poem under the orders of the prince, Ravivarman.

Complete.

Beginning:

करीन्द्रमुखभूतेशगिरीन्द्रतनयान्वितम् ।
स्मरामिकु(त)मदोन्माथि स्मरामि तदहं महः ॥

कविलोकमुखाब्जेषु सविलासनिवासिनम् ।
अवलोकथ(यि)तास्म्यन्तरवलेपभरं विधेः ॥

कुन्दकुड्मलमनोहारिमन्दहासविराजितम् ।
नन्दगोपकुलोत्तंसमिन्दिरारमणं भजे ॥

यतस्सत्ता स्फुरत्ता च विश्वस्यैव परात्मनः ।
भारतस्यास्य वंशस्य तं नमामि मुनीश्वरम् ॥

जगदानन्दयन् गोभिः सतां मार्गं सनाथयन् ।
प्रकाशश्रीकरो राजा रविवर्मा विराजते ॥

गिरां देवी रमा चोभे यं समग्रगुणोज्ज्वलम् ।
आश्रित्य स्वप्रियौ देवौ स्मरतो न कदाचन ॥
तस्याज्ञया सुमनसः पार्थानां चरितं शुभम् ।
ब्रूमस्संक्षिप्य सुतरां प्रसीदन्त्विह देशिकाः ॥
सोमवंशेऽभवद्राजा शन्तनुर्नाम धार्मिकः ।
स वसन् हस्तिनपुरे पालयामास मेदिनीम् ॥
गङ्गायां तस्य भार्यायां भीष्मः पुत्रोऽभवद्गुणी ।
ब्रह्मचर्यं व्रतं यस्मिन्नाजीवान्तं प्रतिष्ठितम् ॥

* * * *

Colophon :

इति सङ्क्षेपभारते प्रथमस्सर्गः ॥

End :

यदेतद्वृत्तमेतेषां पाण्डवानां महात्मनाम् ।
सेयमेतादृशी कापि वासुदेवस्य निर्मितिः ॥
इत्येवं हरिचरणैकसाश्रयाणां पार्थानां चरितमशेषपापहारि ।
यश्श्रोता वदति च यस्सुमुक्तिदात्रीं श्रीकृष्णे भगवति भक्तिमाशु लब्ध्वा ॥

Colophon :

इति सङ्क्षेपभारते पञ्चमस्सर्गः ॥

जाताः कान्तारसीम्नि स्वपितृविरहिताः प्राप्तराज्या विशुद्धाः
नीचैर्दुर्योधनाद्यैरसकृदपि पदाद्भ्रंशिताः पाण्डुपुत्राः ।
यत्कारुण्येन राज्यश्रियमखिलजगद्व्यापिनीं कीर्तिलक्ष्मी-
मापुस्स्वेषां च सिद्धिं स भवतु भगवान् भूतये मे मुकुन्दः ॥
सर्वमङ्गल्यजालं मे सर्वज्ञः कुरुतां मुनिः ।
वेदव्यासो मुनिश्रेष्ठः पाराशर्यो महत्तरः ॥

इति सङ्क्षेपभारतं समाप्तम् ॥

Fol. 24*b* is left blank.

R. No. **2896.**

Paper. 10¾ × 9¾ inches. Foll. 122. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of the Raja of Chirakkal, Malabar.

भागवतव्याख्या.

BHĀGAVATAVYĀKHYĀ.

Foll. 1*a*–121*b*. Fol. 122 is left blank.

Same work as that described under R. No. 2465 ante.

Contains 1—16 Adhyāyas in the 11th Skandha.

R. No. 2897.

Paper. 10¾ × 9¾ inches. Foll. 93. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Tekkemaṭam, Trichur.

Fol. 1 contains the table of contents of this work.

तत्त्वशुद्धिः.

TATTVAŚUDDHIḤ.

Foll. 2*a*–93*b*.

An unfavourable criticism of the Dvaita school and written in support of the Advaita-Vēdānta: by Jñānaghanapāda.

Contains 1 to 33 Prakaraṇas as given below, the 1st Prakaraṇa being wanting in the beginning :—

१. अद्वैतप्रकरणम्.
२. निर्गुणत्वप्रतिपादनम्.
३. निर्विकारत्वकथनम्.
४. सर्वज्ञास्तित्वसाधनम्.
५. निमित्तोपादानत्वकथनम्.
६. परमाणुनिराकरणम्.
७. प्रधानकारणवादनिराकरणम्.
८. कार्यान्वयनिराकरणम्.
९. व्युत्पत्तिनिरूपणम्.
१०. प्रवर्तननिरूपणम्.
११. अन्विताभिधाननिरूपणम्.
१२. प्रामाण्यनिरूपणम्.
१३. वाक्यार्थनिरूपणम्.
१४. अखण्डवाक्यार्थनिरूपणम्.
१५. निर्विशेषब्रह्मनिरूपणम्.
१६. मन्त्रादिप्रामाण्यकथनम्.
१७. स्फोटनिराकरणम्.
१८. वेदनित्यत्वप्रकरणम्.
१९. वेदस्य ब्रह्मपारतन्त्र्यकथनम्
२०. प्रपञ्चमिथ्यात्वकथनम्.
२१. तत्त्वावेदकप्रामाण्यनिरूपणम्.
२२. स्वतःप्रामाण्यनिरूपणम्.
२३. अनिर्वचनीयख्यातिकथनम्.
२४. अज्ञानस्य भावरूपत्ववर्णनम्.
२५. अभावसमर्थनम्.
२६. भेदनिराकरणम्.
२७. असत्कार्यवादनिराकरणम्.
२८. क्षणभङ्गवादनिराकरणम्.
२९. भेदाभेदनिराकरणम्.
३०. देहात्मनिरासः.
३१. विज्ञानवादनिराकरणम्.
३२. संसारमिथ्यात्वम्.
३३. स्वयंप्रकाशत्वप्रतिपादनम्.

Beginning:

कठिना पृथिवीत्यादिवत्स्वरूपविशेषणत्वात् कल्पनैव हि द्वैतजातस्य स्वरूपं नापरमस्य विशेष्यं स्वरूपमस्ति, न च सिद्धे वस्तुनि वाक्यमप्रमाणमिति कल्पयितुं युक्तम् । असन्दिग्धाविपर्यस्ताद्वितीयविज्ञानोत्पत्तेः । न चोत्पन्नमपि सिद्धवस्तुविज्ञानं भ्रान्तिमात्रमिति शक्यमाश्रयितुं, कारणदोषबाधबाधकप्रत्ययानुपलम्भात । वृद्धव्यवहारे च शब्दसामर्थ्यावधारणस्य सिद्धकार्ययोरविशिष्टत्वात् ।

* * * *

Colophon:

इति तत्त्वशुद्धौ श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानघनपादविरचितायामद्वैतप्रकरणम् ॥

निश्शेषदोषगुणसङ्गविवर्जितं यन्नित्यं निरञ्जनमनन्तमुशन्ति सन्तः ।
वन्दामहे तमजमेकमनन्यबोधं नारायणं निखिलकारणमादरेण ॥

इदमिदानीं विचार्यते किमानन्दादयो ब्रह्मणो गुणाः किं वा तत्स्वरूपमेवेति ।

End:

एकैकस्य रूपस्यानभ्युपगमात् । एके(ते)न नित्यानुमेयात्मपक्षोऽपि निरस्तो वेदितव्यः । तस्मादात्मा स्वयंप्रकाश एवेति सिद्धम् ॥

इति स्वयम्प्रकाशत्व प्रतिपादनम् ॥

R. No. **2898**.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 191. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of the Raja of Chirakkal, Calicut.

अष्टाङ्गहृदयव्याख्या—हृदयबोधिका.

AṢṬĀṄGAHṚDAYAVYĀKHYĀ: HṚDAYABŌDHIKĀ.

Foll. 4*a*—191*b*. Foll. 1*a*—3*b* give the contents of the work.

A commentary by Śrīdāsapaṇḍita on Vāgbhaṭa's Aṣṭāṅgahṛdaya, which work has been described under No. 13072 of the D.C.S. MSS., Vol. XXIII. It is stated that the author of the commentary was the pupil of Vāsudēva.

Breaks off in the 11th Adhyāya of the Sūtrasthāna.

Beginning :

आयुर्वेदाचार्यान्ब्रह्मादीन्वासुदेवमाचार्यम् ।
नत्वा पण्डितनाम्ना व्याक्रियते हृदयबोधिका टीका ॥

कुतः, इह खलु सर्वेषां प्रेक्षापूर्वकारिणां प्रयत्नस्य पुरुषार्थसिद्धिप्रवणत्वात् तस्य च पुरुषार्थस्य चतुर्विधस्य धर्मार्थकाममोक्षलक्षणस्यारोग्यमूलत्वात्तस्य चारोग्यस्य चिकित्सानिबन्धनत्वाच्चिकित्सायाश्चायुर्वेदतत्त्वावबोधाधीनत्वात्तत्त्वावबोधस्य च तन्त्रार्थविशेषनिश्चयाय तद्विवरणे प्रयतितव्यम् । तस्य तु तन्त्रस्य युक्तयः षट्त्रिंशत् । वक्ष्यति च—"इति तन्त्रगुणैर्युक्तं तन्त्रदोषैर्विवर्जितम्" । इति ।

गुणा युक्तयस्सङ्ग्रहे चोक्ताः—

अलङ्कृतं युक्तिपदैः सद्रत्नैरिव काञ्चनम् ।
षट्त्रिंशतार्थदुर्गेषु भिषजां सङ्क्रमैरिव ॥

* * * *

अथ तन्त्रार्थं व्याकरिष्यामः—

इह तावदादौ वाहटनामा तन्त्रकारो लोकहिताय शास्त्रमारिप्सुर्विघ्नोपशान्तये शिष्टाचारानुरोधादभिलषितार्थसम्पत्तिकारिणीमभिमतां देवतां नमस्करोति—रागादीत्यादिना । यः रागादिरोगान् जघान तस्मा अपूर्ववैद्याय नमोऽस्तु । इति संबन्धः ।

* * * *

Colophon :

इति श्रीदासपण्डितविरचितायां हृदयबोधिकायां प्रथमोऽध्यायः ॥

End :

न स मुह्येद्विकाराणां हेतुलिङ्गोपशान्तिषु । इति । तस्माद्दोषभेषजवशादुपयोज्याः । यथा पवने जेतव्ये मधुरोऽम्लो लवणो वा मधुराम्ललवणो वेति ॥

Colophon :

इति हृदयबोधिकायां दशमोऽध्यायः ॥

पूर्वेऽध्याये ते रसभेदाः दोषभेषजयोर्वशादुपयोज्या इत्युक्तम् । अतः कीदृशस्वरूपास्ते देशा (दोषा) इति तद्विज्ञानार्थमयमारम्भः । अथात इत्यादि ।

दोषा आदयो येषान्ते दोषादयः तेषां विज्ञानं प्राकृतेन वैकृतेन च स्वरूपावगमः तस्मै हितो दोषादिविज्ञानीयः तमध्यायं व्याख्यास्यामः । आदिशब्देन धातवो मलाश्च गृह्यन्ते ।

* * * *

तत्र कार्श्यादीनि लिङ्गानि । कम्पस्सर्वाङ्गचलनमानाहो वायुना जठरापूरः बलादीनां भ्रंशेन संबन्धः । ततः क्षुदादिभिः बलस्य इन्द्रियाणाश्चोपघातो भ्रंशः । निद्रायास्तु नाशः दीनता दीनत्वम् अभ्यङ्गस्नानवसनपानाशन.

R. No. **2899.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 33. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. V. S. Gōpālācāriyar of Villiyaṁbākkam.

(*a*) तत्त्वोपदेशः.

TATTVŌPADĒŚAḤ.

Foll. 1*a*—5*b*.

A short treatise in Jainism explaining the nature of Jīva as well as its division into several kinds and stating that the knowledge of this Tattva leads to salvation: by Bharatarāja.

Complete.

Beginning:

स जीयाद्वृषभो मोहविषसुप्तमिदं जगत् ।
पटविद्येव यद्विद्या सद्यस्समुदतिष्ठिपत् ॥
प्रीत्या भरतराजेन विनयानतमौलिना ।
विज्ञापनमकारीत्थं तत्त्वजिज्ञासुना गुरोः ॥
भगवन्बोद्धुमिच्छामि कीदृशस्तत्त्वविस्तरः ।
मार्गो मार्गफलं चापि कीदृक्तत्त्वविदां वर ॥
तत्प्रश्नावसितावित्थं भगवानादितीर्थकृत् ।
तत्त्वं प्रपञ्चयामास गम्भीरतरया गिरा ॥

End:

दिदीपे लब्धसंस्कारो गुरुतो भरतेश्वरः ।
यथा महाकरोद्भूतो मणिस्संस्कारयोगतः ॥

त्रिदशासुरमर्त्यानां सा सभा समुनीश्वरा ।
पीतसद्धर्मपीयूषा परमाप धृतिं तदा ॥
घनध्वनिमिव श्रुत्वा विभोर्दिव्यध्वनिं तदा ।
चातका इव भव्यौघाः परं प्रमदमाययुः ॥
दिव्यध्वनिमनुश्रुत्य जलदस्तनितोपमम् ।
अशोकविटपारूढाः सस्वनुर्दिव्यबर्हिणः ॥

Colophon:

इति भरतराजस्य तत्त्वोपदेशस्समाप्तः ॥

(*b*) श्रावकाचारग्रन्थः.

ŚRĀVAKĀCĀRAGRANTHAḤ.

Foll. 6*a*—19*b*.

Lays down certain rules of conduct and morals for the guidance of Jainas as laid down by Samastakīrti and others in accordance with the Jainism.

Complete.

Beginning:

अप्रादुर्भावः खलु रागादीनां भवत्यहिंसेति ।
तेषामेवोत्पत्तिः हिंसेति जिनागमस्य सङ्क्षेपः ॥
हिंस्यन्ते तिलनाल्यां तप्तायसि विनिहिते तिला यद्वत् ।
बहवो जीवा योनौ हिंस्यन्ते मैथुने तद्वत् ॥

* * * *

जिनेशं वृषभं वन्दे वृषदं वृषनायकम् ।
वृषाय भुवनाधीशं वृषतीर्थप्रवर्तकम् ॥
भ्रातस्त्वं भज दर्शनं व्रतमतः सामायिकं प्रौषधं
त्यागं चैव सचित्तवस्तुविषये सूर्यास्तमे भोजनम् ।
अब्रह्म त्यज पापदं ग्रहभवं प्रारम्भमेवाञ्जसा
द्रव्यं स्वग्रहकारिणीसुमननं प्रोद्दिष्टभुक्त्यादिकम् ॥

End:

पञ्चाचारं ये चरन्ति स्वयं वै सच्छिष्याणां चारयन्त्येव शुद्धम् ।
मुक्ते रङ्गं नित्यमाचारशुद्ध्यै वन्दे सर्वान्तान्सदा सूरिसिंहान् ॥
ये पठन्ति श्रुतमङ्गपूर्वजं(कं) पाठयन्ति च विनेयमुनीनाम् ।

ज्ञानदं शुभश्रुताय पाठकाः संस्तुवे पदयुगं खलु तेषाम् ॥

* * * *

उपासकाख्यो विबुधैः प्रपूज्यो ग्रन्थो महाधर्मकरो गुणाढ्यः ।
समस्तकीर्त्यादिमुनीश्वरोक्तः सुपुण्यहेतुः जयताद्धरित्र्याम् ॥
न कीर्तिपूजादिसुलाभलोभात् कृतः कवित्वादभिमानतो न ।
ग्रन्थोऽयमत्रैव हिताय स्वस्य परोपकाराय मया विशुद्ध्यै ॥

* * * *

Colophon :

इति श्रावकाचारग्रन्थः समाप्तः ॥

(*c*) भक्तामरस्तोत्रम्, द्राविडटीकासहितम्.

BHAKTĀMARASTŌTRAM WITH TAMIL MEANING.

Foll. 20*a*—32*b*. Fol. 33 is left blank.

Same text as that described under No. 9485 of the D.C.S. MSS., Vol. XVIII, ante; but the Tamil commentary with Ṛddhimantras is given herein in addition.

Complete.

ओं ह्रीं अर्हं णमो अर्हत्ताणं णमो जिणाणं ह्रां ह्रीं ह्रूं ह्रौं ह्रः असि आउस अप्रतिचक्रे फट् विचक्राय झ्रौं झ्रौं स्वाहा—इति ऋद्धिमन्त्रः ।

* * * *

Colophon :

इति भक्तामरस्तोत्रस्य ऋद्धिमन्त्रमूलमन्त्रसंयुक्तविधं सम्पूर्णम् ॥

R. No. **2900.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 144. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Mānavikrama Anujan Kuññuṇṇi Rāja of Paḍiññārekōvilagam.

नैषधव्याख्या—पदवाक्यार्थपञ्जिका.

NAIṢADHAVYĀKHYĀ : PADAVĀKYĀRTHAPAÑJIKĀ.

Same work as that described under R. No. 2729 ante. By Viśvēśvarabhaṭṭa.

Begins in the 11th Sarga and breaks off in the 19th Sarga.

R. No. 2901.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 29. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Tekkemaṭam, Trichur.

अधिकरणार्थश्लोकदीपिका.

ADHIKARAṆĀRTHAŚLŌKADĪPIKĀ.

A summary in verse of each of the Adhikaraṇas or topical subdivisions of the Pūrvamīmāṁsā in accordance with the interpretations of Prabhākara: by Udayapūjyapāda.

Contains only the first Pāda of the first Adhyāya.

Beginning:

आचार्य(?) गुरवे नमस्क्रियामारभेऽहमधुना यथामति ।
तन्मताधिकरणार्थसंग्रहश्लोकदुर्ग्रहतरार्थदीपिकाम् ॥
मीमांसान्यायजातं गुरुसमयरहस्यार्थमार्गाध्वगाभ्यां
नाथाभ्यां तन्मतज्ञैरपि विततदिशा दर्शितं सञ्जिघृक्षुः ।
शास्त्रोपोद्घाततासंगतिजुषि विधिनासङ्गते चाद्यसूत्रे
निर्णीतं न्यायमादौ परिकरसहितं सङ्ग्रहेणाभिधत्ते ॥
मन्त्रादिप्रौढकर्मण्युदितगतिरतीतेहवेदोक्ततत्त्वो
विध्यर्हस्वाङ्गयोग्यं सविधिरभिहितद्वारमाक्षिप्य साङ्गम् ।
सिध्येत्तत्स्थो नृभेदप्रियनिजविषयप्रेरणार्हात्मसिद्ध्यै
विध्यर्थो ह्यन्तरङ्गं विषयफलमुपैत्यग्रहिस्थं नृजातम् ॥ इति ।

अथातो धर्मजिज्ञासेति तावदाद्यमुपरितनाधिकरणतदर्थनिर्णायकन्यायेनोपस्थापकताविरहादशास्त्रान्तर्भूतमपि सर्वस्वाध्यायतात्पर्यनिर्णयजननमुखेन श्रोतृजनजिज्ञासोपस्थापकत्वात् अर्थनिर्णयार्थोत्तरसकलशास्त्रारम्भसमर्थनपरम् ।

End:

विध्येकवाक्यत्वमर्थवादानां श्रौतेषु विस्पष्टं तद्विरुद्धा नित्यार्थप्रतिपादकपरप्रावाहण्यादिगतिनिगमनिरुक्तादिना योगादिवृत्त्यङ्गीकारेण नेया इति । न तान्याख्यायाः कृतिनिमित्तत्वापादानसमर्थानीत्यकृतका वेदा इति चोदना प्रमाणमित्यर्थः ।

Colophon:

इति श्रीमदुदयपूज्यपादविरचितायामधिकरणार्थश्लोकदीपिकायां प्रथमस्याध्यायस्य प्रथमः पादस्समाप्तः ॥

R. No. **2902.**

Paper. 10⅞ × 9⅝ inches. Foll. 147. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1919–20 from a MS. of Tekkemaṭam, Trichur.

अधिकरणरत्नमाला.

ADHIKARAṆARATNAMĀLĀ.

Similar to the work described under R. No. 2901 ante. By Sukhaprakāśa, pupil of Citsukha.

Complete.

A similar work was written by Vidyāraṇya, sometime after.

Beginning:

स्वात्मावबोधविभवद्रुतमोहनिद्रं विद्रावितद्वयकथं वितथादपेतम् ।
सच्चित्सुखोर्मिघनमक्षरमीक्षितारो यं योगिनो नरहरिं तमिमं नताऽस्मः ॥

वादिगन्धकरिदर्पमर्दनप्रस्फुरन्नयकरो(रे)रुहावलिम् ।
आगमस्मृतिनिजारुणेक्षणं चित्सुखाख्यनखरायुधं नुमः ॥

भाष्याम्भोनिधिमध्यादुद्धृत्य न्यायरत्नसम्भारम् ।
अधिकरणरत्नमाला क्रियते मुनिना सुखप्रकाशेन ॥

अथातो ब्रह्मजिज्ञासेत्यनेन सूत्रेण बन्धस्याध्यासात्मकत्वं शारीरकमीमांसया धर्ममीमांस(ा)या गतार्थत्वं विशिष्टाधिकारिसम्भवो विषयसंबन्धप्रयोजनानान्त्वसम्भव इति चत्वारोऽर्थाः शास्त्र(ा)रम्भसिद्धये सूत्रितं(ताः) । तथा हि श्रोतुः प्रवृत्तिसिद्धये अखण्डनिवृत्तिलक्षणं प्रयोजनं, जीवब्रह्मणोरेकत्वलक्षणो विषयस्सूत्रितः । बन्धनिवृत्तिकाममथशब्दोपात्तमधिकारिणमुश्य ब्रह्मज्ञानाय वेदान्तवाक्यविचारविधानात् । विचारसाध्यब्रह्मज्ञानात् बन्धनिवृत्तिः प्रयोजनं भवतीति कथितम् ।

End:

उपासनस्य च विध्यधीनत्वान्निरवग्रहधर्मत्वस्य चोपासनविधानागोचरत्वादनुपासितस्य चाप्राप्तेः निरवग्रहत्वस्य चोक्तरीत्या योगिषु सम्भवादैश्वर्यस्यान्तवत्त्वमात्रसाधने सिद्धसाधनत्वात् मुक्त्यभावसाधने च श्रुतिस्मृतिविरोधेन कालात्ययापदिष्टत्वात् योगिनां श्रुतिस्मृतिभ्यो मुक्तत्वावगमात्सावग्र(ह)मैश्वर्यं तेषामिति राद्धान्तः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचित्सुखमुनिपूज्यपादशिष्यश्रीसुखप्रकाशमुनिविरचितायामधिकरणरत्नमालायां चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः । समाप्तश्चाध्यायः ॥

R. No. **2903.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 54. Lines, 20 in a page. Telugu. Good

Transcribed in 1919–20 from a MS. of M.R.Ry. Kōṭa Rāmamūrti Śāstrulugāru of Pōtinapāḍi.

(*a*) बिम्बदृष्टिः, आन्ध्रटीकासहिता.

BIṀBADṚṢṬIḤ WITH TELUGU MEANING.

Foll. 2*a*—33*a*. Foll. 33*b* and 34 are left blank.

A centum of stanzas by Amarēśvara Śāstrin of Kaṁbhaṁpāṭi family stating that the meditation that the Supreme Brahman is the only reality and that the Jīva or Ātman is but only its reflected image leads one to salvation. In the beginning of the work the author quotes Vācaspatimiśra, a famous commentator on the Brahmasūtrabhāṣya of Śrī-Śaṅkarācārya.

Complete in 100 stanzas.

Beginning :

ब्रह्माण्डदेवालयमध्यसंस्थपिण्डाण्डगर्भालयचित्तपीठे ।
विभासमानं विततं स्वकीयचैतन्यलिङ्गं शिवमाश्रयामः ॥

* * * *

मत्प्राक्तनमहाभाग्यकल्पपादपसत्फलम् ।
प्रत्यग्रूपं परानन्दं दक्षिणामूर्तिमाश्रये ॥

* * * *

यो वेदमणिसञ्छन्नप्रणवोन्नतपीठगे ।
ताभ्यां श्रीदक्षिणामूर्तिपादुकाभ्यां नमो नमः ॥

* * * *

देवस्तत्त्वमसीति बोधयतु मां मुद्रावता पाणिने-
त्येवं प्राञ्जलिना मया सविनयं स्वप्नेऽर्थितस्येशितुः ।
यस्य श्रीकरुणाकटाक्षविभवप्राप्तात्मविद्योऽस्म्यहं
तं वन्दे मुनिवन्दनीयचरणं श्रीदक्षिणास्यं गुरुम् ॥

* * * *

ब्रह्मविद्यासम्प्रदायश्रीगुरुभ्यो निरन्तरम् ।
नमो नमस्सूत्रकृद्भ्यो भाष्यकृद्भ्यो नमो नमः ॥

* * * *

नमो वार्तिककारेभ्यष्टीकाकृद्भ्यो नमो नमः ।
नमः श्रीभामतीकृद्भ्यः ब्रह्मविद्भ्यो नमो नमः ॥

* * * *

अद्वितीयापरिच्छिन्नसच्चिदानन्दमूर्तये ।
दक्षिणामूर्तिरूपाय मह्यमेव नमो नमः ॥

* * * *

यथोक्तसाङ्गश्रवणनिष्ठस्य ब्रह्मवादिनः
बुद्धिशुद्धौ मया सम्यग्बिम्बदृष्टिर्विचार्यते ॥

* * * *

श्रोत्रियं निष्क्रियं शान्तं ब्रह्मानन्दैकनिष्ठितम् ।
श्रीगुरुं परिपप्रच्छ शिष्यश्शिष्यगुणान्वितः ॥

* * * *

यथा स्वामिन्पलायन्ते त्यक्त्वा मां वासनागणाः ।
जातपक्षा यथानीडं शकुन्तास्तदुदीरय ॥

* * * *

श्रीगुरुः—

बिम्बानन्दात्मदृष्टिस्ते यथा(दा)भवति सुस्थिरा ।
तदा ते वासनाजालं समूलं प्रविलीयते ॥

* * * *

त्रिविधा ब्रह्मदृष्टिस्स्यात् सर्वभ्रान्तिविनाशिनी ।
सदात्मदृष्टिश्चिदृष्टिः सुखदृष्टिस्तथापरा ॥

* * * *

पुनस्सा द्विविधा प्रोक्ता वेदान्तार्णवपारगैः ।
आभासदृष्टिराद्या स्यात् बिम्बदृष्टिस्तथापरा ॥

End:

इति स्वसाक्षिकब्रह्मतत्त्वविज्ञानकौशलात् ।
सदेहो वा विदेहो वा विमुक्तस्सन् सुखी भव ॥

Colophon:

* * * *

कंभम्पाटिकुलोद्भूतेनामरेश्वरशास्त्रिणा ।
शतश्लोक्या मनःशुद्ध्यै बिम्बद्दाष्टिर्विचारिता ॥

(b) సురాభాణ్డేశ్వరము (యక్షగానము).

SURĀBHĀṆḌĒSVARAMU (YAKṢAGĀNAMU).

Foll. 35*a*—54*a*. Fol. 54*b* is left blank.

See the Telugu part of the Triennial Catalogue, Vol. IV, Part II.

R. No. 2904.

Paper. 10⅞ × 9⅝ inches. Foll. 99. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Srī Jugala Kishora Ramagrahi, B.A., Teacher, Parlakimedi College, Parlakimedi.

गीतगोविन्दव्याख्या—रसिकरङ्गदा.

GĪTAGŌVINDAVYĀKHYĀ: RASIKARAṄGADĀ.

A commentary on Jayadēva's Gītagōvinda which work has been described under No. 22 of M. Seshagiri Sastri's Report No. 2: by Lakṣmaṇa. At the end, the commentator states that he composed the commentary in the Śaka year 1664 at Śrī-Puruṣōttamakṣētra which is now called Puri.

Complete in 12 Sargas.

Beginning:

अन्योन्यप्रेमपीयूषास्वादनातृप्तमानसौ ।
स्फुरतां हृदि मे नित्यं राधामदनमोहनौ ॥
मद्विधदुर्विधबन्धुः स जयति नीलाचलेन्द्रपूर्णेन्दुः ।
येनाहं बहुकृपया निजाङ्घ्रिसेवामृतैः पुष्टः ॥
संसारातपसन्तप्तं स्वप्रेमरसवर्षणैः ।
विश्वमाप्यायितं येन तच्चैतन्यघनं नुमः ॥
इयं श्रीगीतगोविन्दटीका रसिकरङ्गदा ।
मया सङ्गृह्यते तत्तद्भावलुब्धेन केनचित् ॥

पूर्वैर्विरचितायास्तु टीकास्सर्वार्थबोधिकाः ।
ताभ्यस्स्वारस्यमाकृष्य भ्रश्नाम्यत्र यथारुचि ॥
नाहं व्याकृतिवेत्ता नापि च भावार्थभावनाभव्यः ।
नैवालङ्कृतिकुशलः तथापि केनापि लिखामि लोभेन ॥
रमन्तामत्र सुधियः क्षमन्तां मम चापलम् ।
तुष्यन्ति पितरो यद्वत् बालस्य कलभाषणे ॥

अथ श्रीमान्परमभागवतस्सकलसहृदयमुकुटमणिः जयदेवनामा कविराजराजः परमरसरूपयोः दिव्यादिव्यादिसकलनायिकानेतृमौलिमण्डनभूतयोः नित्यलीलयोः श्रीराधामाधवयोः परमाश्चर्यमाधुर्यमयलीलामृतरसं तत्तच्छास्त्रेभ्यस्स्वयमास्वाद्य तदास्वादनोच्चालितानन्दपूरपरिप्लावितान्तःकरणतया

* * * *

श्रीगीतगोविन्दाख्यं प्रबन्धं विधातुकामः तन्निर्विघ्नपरिसमाप्तये मुख्यतया ग्रन्थप्रतिपाद्यं वस्तूपक्षिपन्नेव तन्निर्देशरूपं मङ्गलमाचरति—मेघैरिति ।

अत्र मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्त इति न्यायेन "वर्णं गणश्च काव्यस्य मुखे कुर्यात्सुशोभनम्" इति

* * * *

Colophon:

इति रसिकरङ्गदाख्यायां गीतगोविन्दव्याख्यायां सामोददामोदरो नाम प्रथमः सर्गस्समाप्तः ॥

End:

आवर्तनाद्यपेक्षत्वात रे माकन्द रसालफल त्वं क्रन्द रोदनं कुरु । त्वगस्थ्यादिहेयांशसाहित्यात् । अरे कान्ताधर धरणितलमसुरालयंगच्छ भक्तिरसास्वादिनो घृणास्पदत्वात्तवात्र स्थितिर्न युक्तेति भावः ।

श्रीराधायाः प्रसाधनेन सुप्रीतोऽतिसन्तुष्टः यत्र तन्नामायं सर्गः ।

Colophon:

इति श्रीगीतगोविन्दव्याख्यायां रसिकरङ्गदासमाख्यायां सुप्रीतपीताम्बरो नाम द्वादशस्सर्गः ।

इयमुज्ज्वलरसपूर्णा वचनततिर्भावसौरभाकीर्णा ।
हरिचरणस्मृतिभाजां निवसतु वदने प्रसूनमालेव ॥

शकाब्दे षोडशगते चतुष्षष्ट्यधिके गते ।
ग्रथिता लक्ष्मणेनासौ टीका श्रीपुरुषोत्तमे ॥

R. No. 2905.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 126. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Tekkemaṭam, Trichur.

शारीरकमीमांसासङ्ग्रहः.
ŚĀRĪRAKAMĪMĀṀSĀSAṄGRAHAḤ.

A summary in verse and prose of the Brahmasūtras as commented upon by Śaṅkara; by Kṛṣṇānubhūtiyati alias Vibudhēndratīrtha, pupil of Ānandānubhūti. The author wrote this work at the time when Rājarāja and Ravivarman were ruling over the country (Kerala).

Complete.

In the beginning of the work the author salutes (1) Vyāsa, (2) Śaṅkara, (3) Ṣaṇmukha (his family God), (4) Kṛṣṇa and (5) Gōpati (who is supposed to be Caturmukha Brahman).

In the colophon the work is called as शारीरकमीमांसाशास्त्रसारसङ्ग्रह.

Beginning:

हेरम्बञ्च सदाशिवं पदगतं वागीश्वरीं शाश्वतीं
व्यासं शङ्करनामधेयगुरुमप्यस्मद्गुरुं षण्मुखम् ।
गोविन्दं च जगद्गुरुं शमनिधिं विद्यागुरुं गोपतिं
वन्दे सर्वनिदानमेकममलं ब्रह्मापि सच्चित्सुखम् ॥

कृष्णानुभूतियतिभिः क्रियते शास्त्रसङ्ग्रहः ।
निर्मत्सरैर्जनैर्नित्यं क्रियतामस्य सङ्ग्रहः ॥

अस्पष्टसङ्गतिपदार्थमिदं हि सूत्रं वैयासिकं तदहमद्य निरीक्ष्य भाष्यम् ।
विस्पष्टसङ्गतिपदार्थयुतं विधास्ये पद्यत्रयानुगतगद्यमयैर्वचोभिः ॥

भाष्यार्थमात्रमिदमस्य न कोऽपि भेदः सङ्गृह्य किञ्चिदुदितं किमनेन पद्यैः ।
इत्येवमादि(यदि) दूषयतीह कश्चित् हन्ताधुनाभिलषितं फलितं मदीयम् ॥

संबन्धोक्तिर्यत्र सूत्रस्य नार्थः यत्राप्यर्थस्सङ्गतिर्नात्र भाति ।
सापेक्षत्वं नापि चैकस्य युक्तं तस्माद्यत्नो मेलनेनोभयोर्मे ॥

* * * *

शास्त्रस्य प्रथमसूत्रम "थातो ब्रह्मजिज्ञासा"
आत्मेत्यत्राविधेयं वा विधेयं श्रवणादिभिः ।
सिद्धत्वाद्दर्शनस्यैतत्तदर्थं न विधीयते ॥
सिद्धस्य भ्रान्तिरूपत्वाद्विधेयं तस्य साधनम् ।
मननध्यानसहितं श्रवणं त्ववघातवत् ॥

* * * *

Colophon:

कृष्णानुभूतियतिभी रचिते शास्त्रसङ्ग्रहे ।
समाप्तः प्रथमः पादः प्रथमाध्यायसंश्रितः ॥

End:

अनावृत्तिश्शब्दात् अनावृत्तिश्शब्दात् ।

अर्चिरादिना ब्रह्मलोकं प्राप्तानां पुनरावृत्तिर्न संभवति। तस्मात्तयोर्ध्वमायन्नमृतत्वमेति । नच पुनरावर्तत इत्यादिशब्दात् । अनावृत्तिश्शब्दादनावृत्तिश्शब्दादिति सूत्राभ्यासश्शास्त्रपरिसमाप्तिं द्योतयतीति ॥

कृष्णानुभूतियतिभिः रचिते शास्त्रसङ्ग्रहे ।
चतुर्थपादस्सम्पूर्णश्चतुर्थाध्याय एव च ॥

कृष्णस्वरूपगुरुपादपयोजपांसुसेवानिबन्धनपचेलिमपुण्यपुञ्जा ।
कृष्णानुभूतियतिवर्यकृतिः कृतीनां सूत्रार्थबोधजननी कृतिनां मुदेऽस्तु ॥
श्रीराजराजरविवर्ममहीश्वराभ्यां राजन्वती वसुमती सकलापि याभ्याम् ।
संशासतोरिह सतोस्तु तयोर्धरित्रीं कृष्णानुभूतिभिरयं रचितो निबन्धः ॥ इति

कृष्णानुभूतियतिभिः + चतुर्थाध्याय एव च ॥

इति श्रीमदानन्दानुभूतिपूज्यपादशिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीमत्कृष्णानुभूतेः विबुधेन्द्रतीर्थापरनामधेयस्य कृतौ श्रीमच्छारीरकमीमांसाशास्त्रसारसङ्ग्रहे चतुर्थस्याध्यायस्य चतुर्थः पादस्समाप्तः ॥

R. No. 2906.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 52. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. D. Sūryabhagavānuḍu Pantulugāru, Vizianagram.

कूर्मक्षेत्रमाहात्म्यम्.

KŪRMAKṢĒTRAMĀHĀTMYAM.

Foll. 1*a*—51*a*. Foll. 51*b* and 52 are left blank.

Deals with the greatness and religious sanctity of Kūrmakṣētra, also called Śvētagiri, a place near Chicacole in the Ganjam district, situated on the shore of the southern sea (Indian ocean).

Contains 1—31 Adhyāyas of the Pādmapurāṇa and the 8th and 9th Adhyāyas of the 4th Pāda of the Brahmāṇḍapurāṇa.

Beginning:

दत्तिल उवाच—

ऋषे कथन्तु हरिणा सर्वपापापहारिणा ।
स्वप्ने ह्यादेशितं क्षेत्रं कूर्मनाम वदस्व तत् ॥
कथं क्षेत्रस्य माहात्म्यं कथं वा हरिरव्ययः ।
कूर्मरूपी निवसति तस्मिन्क्षेत्रे निरञ्जनः ॥
कथं प्रसादमाहात्म्यं तत्सर्वं मां वदस्व भोः ।

ऋषिरुवाच—

साधु पृष्टं हि सुमुने कूर्ममाहात्म्यमुत्तमम् ।
अस्ति कश्चिच्छ्वेतगिरिः दक्षिणस्योदधेस्तटे ॥
तत्र श्वेतमहीपालः कुर्वाणो राज्यमुत्तमम् ।
तत्पत्नी विष्णुपादाब्जभ्रमरायितमानसा ॥
कुर्वाणा विष्णुभक्त्या सा शुद्धैकादशिकाव्रतम् ।
उपासयन्ती गोविन्दं सुन्दरी शुद्धिपूर्वकम् ॥

* * *

Colophon:

इति श्रीपद्मपुराणे श्वेतगिरिमाहात्म्ये वाधूलभावनारायणेन सभक्तिविनयपूर्वकं लिखित्वा श्रीपत्तिपाठ्यन्वयश्यामलरायपण्डिताय समर्पिते प्रथमोऽध्यायः ॥

* * *

Colophon:

इति श्रीवाधूलतिरुवेङ्कटरामानुजस्वामिना सभक्तिविनयपूर्वकं लिखित्वा श्रीपत्तिपाठ्यन्वयश्यामलरायपण्डिताय समर्पिते श्रीपाद्मे श्वेतगिरिमाहात्म्ये पञ्चमोऽध्यायः ॥

* * * *

इत्येकत्रिंशोऽध्यायः ॥

* * * *

एकैकस्मिन्पदे दत्ते कलिङ्गे दक्षिणे तटे ।
पुण्यं क्रतुसहस्राणां कलौ भवति देहिनाम् ॥
कलौ कूर्मपुरीं रम्यां ये गच्छन्ति नरोत्तमाः ।
कुलकोटिशतैर्युक्तास्ते गच्छन्ति हरेः पदम् ॥

* * * *

Colophon:

इति श्रीश्वेतगिरिमाहात्म्ये दूर्वासतीर्थयात्रानामाष्टमोऽध्यायः ॥

ये पूजयन्ति भूपाल माधवे मधुसूदनम् ।
गत्वा कूर्मपुरीं रम्यां ते भवन्ति चतुर्भुजाः ॥

End:

ब्रह्माण्डे यानि तीर्थानि क्षेत्राणि च विशेषतः ।
तानि तीर्थानि राजेन्द्र कूर्मकोटिं समाश्रिताः ॥
कोटिकोटिसहस्राणां तीर्थानां सारपूरितम् ।
श्वेतकुण्डमिति ख्यातं श्वेतद्वीपात्मकं हरेः ॥
श्वेतकुण्डमिदं दृष्ट्वा विष्णुसालोक्यतां व्रजेत् ।
श्वेतकुण्ड नमस्तुभ्यं स्वयं कृष्णेन निर्मितम् ॥
क्षीरोदार्णवसम्भूत निमज्जामि तवाम्भसि ।
कूर्मरूप नमस्तुभ्यं देवैरमृतमन्थने ॥
मन्थरं धारयामास तस्मै कूर्मात्मने नमः ।

* * * *

स्नात्वा वत्ससरस्तीरे दृष्ट्वा वत्सं नरोत्तम ।
सर्वपापविनिर्मुक्तो विष्णुसालोक्यमाप्नुयात् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे चतुर्विंशतिसहस्रे चतुर्थपादे आत्मबलिसंवादे श्रीकूर्ममाहात्म्ये दूर्वासतीर्थयात्रा नाम नवमोऽध्यायः ॥

R. No. **2907.**

Paper. 10⅜ × 9⅝ inches. Foll. 30. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa **Nambūdrippāḍ**, Kūṭalūr, Tritala.

भल्लटशतकव्याख्या.

BHALLAṬAŚATAKAVYĀKHYĀ.

Foll. 1*a*—29*a*. Foll. 29*b* and 30 are left blank.

A commentary on the centum of stanzas of Bhallaṭa dealing with Nīti (morality): by Mahēśvara. The stanzas as found herein are not in the same order as they are found in the printed book.

Complete.

Beginning:

श्यामं महस्तत्कुचभारनम्रं कामप्रदं कामरिपोराचिन्त्यम् ।
करोम्यहं भल्लटसूक्तिटीकां बालप्रबोधाय . . . . . ॥

इह खलु प्रारिप्सितग्रन्थे सदाचारानुष्ठानमनुकुर्वता अस्य व्यपेतान्तरायाभीष्टसिद्धिहेतोरिष्टदेवतानमस्कारस्य अवश्यविधेयत्वात् आचार्येण तावत् . . . . इष्टदेवता नमस्क्रियते ।

तां भवानीं भवानीतक्लेशनाशविशारदाम् ।
शारदां शरदम्भोदसितसिंहासनां नुमः ॥ इति ।

भवानीतक्लेशनाशविशारदां . . . . शनोपनीतानामविद्यादीनां क्लेशानां नाशकरणेन विशारदां समर्थां, शारदाम्भोदसितसिंहासनां शरन्मेघधवलसिंहासनां, शारदानाद्देशान्तरे शारदेति सरस्वती कथ्यते; एवंभूतां तां भवानीं भवस्य पत्नीं नुमः स्तुमः इति । अनन्तरमभिलषितवस्तुन्यासं करोति—युष्माकमम्बरमणेः प्रथमे मयूखा इति । अम्बरमणेः उदयरागभाजः उदयसमयसञ्जातलौहित्यसंश्रयिणः प्रथमे तत्पूर्वोदिताः

* * * *

कविकाव्यप्रशंसापदेशेन चोरप्रमुषितार्थप्रत्याहरणे विमर्दं विना अन्यन्यायान्तरं न विद्यत इत्याह—बद्धाय दर्पणरसेन विमर्दपूर्वमिति ।

End:

महाकुलप्रभूतं यं कश्चित्खलमुपालब्धुमाह—सर्वेत्याहेति । हे कालकूटमहाविष खलोऽपि प्रतीयते सर्वजनाहितकरे सकललोकोपकारिणि मौक्तिकाद्युत्तमवस्तुसद्भावादिति भावः, पुरुषोत्तमस्य विष्णोः सुजनस्य च वासे समाश्रयभूते.

* * * *

विविधोपायेन धनमार्जयित्वा लोभी तेन किञ्चिदपि पुरुषार्थं साधयितुमजानान एव व्यर्थयतीत्याह—आदायेति । अनेन परिदृश्यमानेन दुर्णवेन कर्त्रा

अर्णवस्य दुष्टत्वं वक्ष्यमाणजलक्षारीकरणादिनेति द्रष्टव्यम् । परितः समन्तात् आदाय स्वीकृत्य । किं नाम प्रशस्तं किं साधितमित्यत आह निस्सरणे वक्त्रे प्रारम्भोपाययोरिति विश्वः । वारि सलिलम् । तुशब्दो व्यतिरेके तज्जलं क्षारीकृतं स्वसंबद्धं लवणम् अर्घीकृतं बद्धम्, पातालस्य रसातलस्य कुक्षिः अभ्यन्तरु-प्रदेशः स एव विपदं रन्ध्रं तत्र निवेशितं स्थापितं च अनुनापभोगानर्हं (अनुपभोगार्हं) करोति राजादिभ्यो ददाति अगाधे गर्ते निक्षिपति चेत्यर्थः, तत्र दुः-वस्तु(दुःखं तु) व्यज्यते ।

Colophon:

इति श्रीमन्महेश्वरेण . . . .

R. No. **2908.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 212. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Gaṅgānātha Jha, Principal, Sanskrit College, Benares.

बृहती—शाबरभाष्यटीका.

BṚHATĪ: ŚĀBARABHĀṢYATĪKĀ.

Foll. 3*a*—212*a*. Fol. 1*a* contains the name of the work and the author's name in Sanskrit and English. Foll. 2 and 212*b* are left blank.

A commentary (by name Bṛhatī) or Bṛhaṭṭīkā by Prabhākara on the Mīmāṁsāsūtrabhāṣya of Śabarasvāmin.

Contains up to the end of second Pāda in the VI Adhyāya.

Beginning:

अथातो धर्मजिज्ञासेति ।

लोक इत्यादिभाष्यस्य अथात इत्येतास्मिन्(त्) पदद्वयस्य लौकिकार्था-शङ्कानिवृत्तिः प्रयोजनं, कुत एतत् स्वाध्यायाध्ययनविधेः अविवक्षितार्थत्व-निराकरणात् । कथं पुनरविवक्षाशङ्का स्वाध्यायाध्ययनविधेरधिकाराश्रवणात्, आचार्यकरणविधिप्रयोज्यत्वाच्च । कथं पुनरन्यस्य विधेरन्येन प्रयुक्तिः ? प्रयाजा-दिविधिवदिति चेन्न; तत्र स्वाधिकाराभेदायुक्तं, अत्राप्यधिकारांशो न भिद्यत इति चेन्न ; अङ्गाङ्गिभावाभावात् । कथं पुनरङ्गता नास्ति प्रयोज्यत्वञ्च । न प्रयुक्तिरङ्गत्वे हेतुः । कस्तर्हि ? विनियोगः ।

* * * *

तस्मात्प्रयोज्यत्वादनङ्गत्वाच्च स्वाध्यायाध्ययनस्य भवति संशयः, किं प्रयोज्यत्वादेककार्यत्वम्, उतानङ्गत्वाद्भिन्नकार्यत्वमिति । अत्र पूर्वपक्षवादी प्रयोज्यत्वादेककार्यतां मन्वानः विवक्षां मेने । तन्निराकृतय इदमथात इति पदद्वयमङ्गीकृतवान् सूत्रकारः ।

* * * *

ननु धर्मं जिज्ञासेदिति वक्तव्यं, प्रकृतिप्रत्यययोर्हि प्रत्ययार्थेऽर्थस्य प्राधान्यमित्युत्सर्गः । धर्मजिज्ञासापदे पुनः प्रकृत्यर्थप्राधान्यप्रदर्शनायायं यत्नः । धर्माय हि जिज्ञासा धर्मजिज्ञासा । कथं पुनः प्रकृत्यर्थो ज्ञानार्थः प्रत्ययार्थ इच्छा ईदृश एवार्थे समः(न) स्मर्यते धातोः कर्मण इति । एवं तर्हि ज्ञानस्य प्राधान्यं न धर्मस्य न ह्य[न]न्यार्था क्रिया प्रधानं भवतीति धर्मकर्मिकैव सा प्रधानम् । अतो धर्मार्था जिज्ञासा । तदिदमाह—सा हि तस्य ज्ञातुमिच्छेति

* * * *

Colophon :

इति श्रीमत्प्रभाकरमिश्रविरचितायां शाबरभाष्यटीकायां बृहत्यां प्रथमस्याध्यायस्य चतुर्थः पादस्समाप्तः । समाप्तश्च प्रथमोऽध्यायः ॥ (श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीनां प्राभाकरमीमांसायां प्रथमोऽध्यायः)॥

Colophon:

इति श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीनां प्राभाकरमीमांसायां पञ्चमोऽध्यायस्समाप्तः ॥

End :

ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्येन संयोगात् ।

ननु चा(ना)त्र पूर्वपक्ष उपपद्यते—न हि वचनमदृष्ट्वा पूर्वपक्षः वचने राद्धान्त इति । अत्रोच्यते—यावज्जीवादीनामधि(कार)कल्पनां विश्वजिन्न्यायेन पूर्वपक्षवादी मन्यते का युक्तिः; [न] निष्पन्नस्य वस्तुनो अधिकारिविशेषणभावो नोपपद्यते । कस्मात्? साध्यं सिद्धं वा क्रियायां सम्बध्यते? ततः किम्? इदं ततो भवति सिद्धं निष्पादकतया संबध्यते साध्यं फलतयेति जीवनादिवत्सि(तु सि)द्धं तस्मात्साधनभाव

एव [शापे] युक्तमिति मन्यते । राद्धान्तस्तु ऋणदर्शनं जीवनमधिकरणविशेषण-त्वेन ज्ञापयति,

* * * *

अथवा [यंमन्त्रार्थाद्ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्येन समगातराणां] (ऋण)वाक्ये ब्राह्मणपदश्रवणात् ब्राह्मणस्यैवैतानि कर्माणीति पूर्वपक्षवादी मन्यते। अपिविदोषेना (विध्युद्देशे)धिकारा(न)वगमात् ना(अ)र्थता(वा)दस्य चान्यार्थत्वात् अर्था(यथा)धिकारव्याख्या युक्ता नैतद्दशेनाधिकारः ॥

Colophon:

इति बृहत्यां षष्ठस्याध्यायस्य द्वितीयः पादस्समाप्तः ॥

R. No. **2909.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 549. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Kṛṣṇacakravarti Ācāriyar of Kōtāṇḍapaṭṭi.

Bound in three volumes.

विष्णुपुराणव्याख्या—नरहरीया.

VIṢṆUPURĀṆAVYĀKHYĀ : NARAHARĪYĀ.

A commentary by Narahariyācārya on the Viṣṇupurāṇa which work is described under Nos. 2267 to 2281 of the D.C.S. MSS., Part IV-1. The commentary is called "Naraharīyā" after the name of the commentator and is written in accordance with the Viśiṣṭādvaita-Vēdānta.

Contains Aṁśas 1 to 5, the 5th Aṁśa containing 1 to 11 Adhyāyas only.

Beginning:

सभापर्वणि युधिष्ठिरराजसूयान्ते विशिष्टजनपूजाप्रस्तावे सहदेवेन पृष्टो भीष्मः, 'कृष्ण एव हि भूतानामुत्पत्तिरपि चाप्ययः । कृष्णस्सहकृते भूत-मिदं विश्वं चराचरम्' इत्यादिस्मृत्यन्तराणि च जगतो नारायणात्मकत्वादीनि प्रतिपादयन्ति । एवंजातीयकाः बहवस्सन्ति । विस्तरभयान्न लिख्यन्ते ।

* * * *

श्रीमति वैष्णवे पुराणे अत्रैव सामान्यप्रश्ने विशेषतो विष्णोरेव

जगत्कारणत्वप्रतिपादकमुत्तरं दत्तम् । श्रीभागवते गजेन्द्रस्य कारणवस्त्वाह्वाने विष्णुरेवागत इति श्रीशुकेन वर्णितम् । एतादृशोदन्ताः विष्णुकारणत्ववि-स्फोरकास्सहस्रशस्सन्ति । तस्मादत्र पुराणे निर्विशेषचिन्मात्रवस्त्वादिप्रति-पादनमसङ्गतमिति संक्षेपः । पराशरः । एवं मैत्रेयेण पृष्टो भगवान्पराशरः पुरातनवृत्तान्तं स्मृत्वाह—साध्विति । साधु मैत्रेय धर्मज्ञेति सम्बुध्यते ; विध्युक्तसकलधर्मज्ञानवत्त्वात् धर्मज्ञत्वमित्यर्थः ॥

* * * *

Colophon:

इति श्रीविष्णुपुराणव्याख्यायां नरहरीयाख्यायां प्रथमे अंशे प्रथमोऽध्यायः ॥

End:

धृते गोवर्धने शैले परित्राते च गोकुले ।
मिथ्याप्रतिज्ञो वलभिद्वारयामास तान् घनान् ॥

गोवर्धने शैले धृते सति गोकुले परित्राते सति वलभित् इन्द्रः मिथ्याप्रतिज्ञो भूत्वा मेघान् वारयामास ।

व्यग्रे नभसि देवेन्द्रे वितथात्मवचस्तथा(या) ।
निष्क्रम्य गोकुलं हृष्टं स्वस्थानं पुनरागमत् ॥

नभसि देवेन्द्रे व्यग्रे सति कृष्णस्य वाक्ये सति (इति शेषः) हृष्टं गोकुलं निष्क्रम्य पुनः स्वस्थानमगमत् ।

मुमोच कृष्णोऽपि तदा गोवर्धनमहाचलम् ।
स्वस्थाने विस्मितमुखैर्दृष्टस्तैस्तु व्रजाश्रयैः ॥

कृष्णोऽपि गोवर्धनमहाचलं तदा स्वस्थाने मुमोच । विस्मितमुखैः ॥

Colophon:

इति श्रीविष्णुपुराणव्याख्यायां नरहरीयाख्यायां पञ्चमे अंशे एकाद-शोऽध्यायः ॥

R. No. 2910.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 45. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Narasinga Gantāyet, Ganjam district.

भाषारत्नम्.

BHĀṢĀRATNAM.

A brief treatise explaining the seven categories in accordance with the Vaiśēṣika philosophy: by Kaṇādatarkavāgīśabhaṭṭācārya, pupil of Cūḍāmaṇi. Same work as that described under No. 1532 of the Notices of Sanskrit MSS., by R. Mitra, Vol. IV.

Complete.

Beginning:

चूडामणिपदाम्भोजभ्रमरीभूतमौलिना ।
संक्षिप्य श्रीकणादेन भाषारत्नं वितन्यते ॥

पदार्थो द्विविधः भावोऽभावश्च । तत्र भावपदार्थो वैशेषिकमते षड्विधः, द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् । द्रव्यत्वं च जातिविशेषः । ननु द्रव्यादिसप्तपदार्थोद्देशानन्तरं द्रव्यलक्षणं परित्यज्य द्रव्यत्वस्वरूपकथन(म)सङ्गतिग्रस्तमिति चेत्, द्रव्यत्वाभिसन्धा(ना)देव द्रव्यपदस्य तत्र व्यवहारात्तदज्ञाने द्रव्यव्यवहारो न सिध्येदिति द्रव्यत्वस्वरूपकथनमिति उपोद्घात एवात्र सङ्गतिलक्षणमिति ।

End:

शक्यसम्बन्धो लक्षणा । अस्ति च गङ्गायां घोष इत्यादौ गङ्गापद शक्यस्य प्रवाहस्य सम्बन्धस्तीर इति । सा च लक्षणा द्विधा । गौणी शुद्धा च । सादृश्यात्मकशक्यसम्बन्धाद्गौणी । यथा चन्द्रे तिलकमित्यादौ मुखे, मुखचन्द्रे चन्द्रसादृश्यादिति । तदन्या शुद्धा गङ्गायां घोष इत्यादौ तीरे संयोगरूपगङ्गापदशक्यप्रवाहविशेषसम्बन्ध इति संक्षेपः ॥

Colophon:

इति श्रीकणादतर्कवागीशभट्टाचार्यविरचितं भाषारत्नं समाप्तम् ॥

R. No. **2911.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 60. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Tekkemaṭam, Trichur.

गौडपादीयभाष्यटिप्पणम्.

GAUḌAPĀDĪYABHĀṢYAṬIPPAṆAM.

Foll. 1*a*—59*a* : 59*b* and 60 are left blank.

A gloss by Anubhūtisvarūpācārya on Śaṅkara's Māṇḍūkyōpaniṣatkārikābhāṣya, described under No. 704 of the D.C.S. MSS., Vol. I, Part C.

Complete in four Prakaraṇas.

Beginning :

चित्सत्तामात्ररूपस्य पूर्णस्यैव मम(हा)त्मनः ।
प्रकारास्सर्वे एवैते कल्पनैव द्विचन्द्रवत् ॥
गौडपादीयभाष्यस्य टिप्पणं क्रियते स्फुटम् ।
चिरोज्झितागमाख्यातृचित्तसन्तापशान्तये ॥

ननु अत्राद्यश्लोकद्वयमर्थतः तुरीयब्रह्ममात्रप्रतिपादनपरत्वात् द्वितीये च श्लोके चतुर्थ एव पादेऽक्षराधिक्यात्समवृत्ताद्यसमविषमवृत्तलक्षणाभावात् लक्षणदुष्टत्वादव्याख्येयत्वम् । तत्र न तावत्पौनरुक्त्यम् ; प्रक्रिय विभागप्रदर्शनार्थत्वात। द्विधा खलु वेदान्ते प्रतिपादनप्रक्रिया। कचित्तदर्थत्वेनोपक्रम्य त्वमर्थेनैक्यमुपदिश्यते

* * * *

मन्दाधिकारिणां मध्यमाधिकारिणां च कीदृशः प्रणवो ध्येय इत्यत आह—प्रणवो हीति । उत्तमाधिकारिणां च कीदृशः सम्यक्ज्ञानगोचर इत्यत आह—पूर्व इति । अपूर्वत्वादिविशेषणसिद्धये हेतुमाह—सर्वस्येति । ध्यायिनो हृदयदेशं विधत्ते—प्रणवं हीति । तत्त्वदर्शिनो देशाद्यनवच्छिन्नवस्तुदर्शनादर्थप्राप्तं शोकाभावफलमनुवदति—सर्वव्यापिनमिति। उक्तब्रह्मविदं स्तौति—अमात्र इत्यादिना ।

Colophon :

श्रीमदनुभूतिस्वरूपाचार्यविरचिते गौडपादटिप्पणे प्रथमं प्रकरणम् ॥

End :

यत्पादावाश्रितानामन्येषामपि श्रुतस्य शास्त्रीयज्ञानस्य शमस्य सकलसंशयोच्छेदस्य विनयस्य ब्रह्मण्येव नम्रीभावस्य प्रवेशस्य प्राप्तिरग्र्या सर्वश्रेष्ठा अमोघा सफला भवति। तत एव तेषां पादौ जगतः पावनीयौ संसारनिवर्तकौ सर्वभावैर्वाङ्मनःकायप्रणिधानैः नमस्करोमीत्यर्थः ॥

सत्यं ब्रह्मास्म्यजं शुद्धं निर्भयं भेदवर्जितम् ।
नानवाप्तं मया किञ्चित्कर्तव्यं वा तदात्मना ॥

Colophon:

इति श्रीमदनुभूतिस्वरूपाचार्यविरचिते गौडपादीयभाष्याटिप्पणे चतुर्थ-प्रकरणं समाप्तम् ॥

R. No. **2912.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 84. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of the Raja of Chirakkal, Malabar district.

किरातार्जुनीयव्याख्या—सुखबोधिनी.

KIRĀTĀRJUNĪYAVYĀKHYĀ: SUKHABŌDHINĪ.

Foll. 1*a*—83*b*. Fol. 84*b* gives the name of this work and fol. 84*a* is left blank.

Same work as that described under R. No. 1854(*d*) ante, wherein see for the beginning. By Dēvarājabhaṭṭa, son of Kṛṣṇadvaipāyanabhaṭṭa.

Breaks off in the tenth Sarga.

End:

सा चेष्टाभिमता इष्टा च सत्सखी विदग्धवध्वा विरहविधुरं हृदयमवलम्बते । तद्वदिति । अङ्गनाया इति पाठे जातावेकवचनम् । मालिनीवृत्तम्—वसुमुनिविरतिश्चेन्मालिनी नौ मयौ यः । इति शुभम् ॥

Colophon:

इति श्रीमत्कृष्णद्वैपायनभट्टसूनुना देवराजाचार्येण विरचितायां सुखबोधिन्यां किरातार्जुनीयव्याख्यायां नवमस्सर्गः ॥

अथ परिमलजामवाप्य लक्ष्मीमिति । अथ रात्रिसम्भोगानन्तरम् । ताः सुरस्त्रियः परिमलः सुरतमाल्यमदिराङ्गरागाणां विमर्दोत्थो वासः ।

* * * *

जम्ब्वा विकारः फलं जम्बु जम्ब्वा वेति लुक् । ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वत्वम् । जम्बुफलेति पाठे इको ह्रस्वोऽङ्यो गालवस्येति ह्रस्वत्वम् । अभिभवति मनः कदम्बवायाविति ।

R. No. 2913.

Paper. $10\frac{7}{8} \times 9\frac{3}{8}$ inches. Foll. 50. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. S. Gōpālācāriyar, Villiyambākkam.

रयणसारम्, द्राविडटीकासहितम्.
RAYAṆASĀRAM WITH TAMIL COMMENTARY.

Foll. 1*a*—48*a*.

An epitome explaining the fundamental principles, viz., सत्य, दया and अहिंसा called the three Ratnas of the Jain religion. The work is written in Prākṛtagādhās with Tamil meaning. The author's name is not known.

Complete in 12 Anuprēkṣās containing 160 Gādhās.

Beginning :

णमिऊण वट्ठमाणं परमं पाणंजिणन्ति सुद्धेण ।
बोच्छामि रयणसारं सायारणयारधम्मिण्णम् ॥

* * * *

पुव्वं जिणेहि फणियं जहरिय गणधरेहि विछ्छरियम् ।
पुव्वाइरिय कमज्जं बोल्लइ जो हु संदिठ्ठि ॥

* * * *

मदिसुदणाणबलेणं दुस्सधंबोल्लइ जिणुद्दिठम ।
जो सो होल कुदिठ्ठि णंहोलजिणमंगलं गरयो ॥

* * * *

संमत्तरयणसारं मोखूरवमहारुख्खमूलंमि ।
दिभणिय तज्जो णिज्जउ णिछूछ(य) ववहारस्वरूपदो दोभेमम् ॥

End :

इति सज्जणपुज्जं रयणसारगंधं णिरालसो णिच्चम् ।
जोपल्ल सुणइ वण्णइ भावइ पावइ सासंयठ्ठाणम ॥

Colophon :

इति रयणसारव्याख्यानं संपूर्णमासीत् ॥

Foll. 48*a*—50*a* contain the Dvādaśānuprēkṣā (in Tamil language). Fol. 150*b* is left blank.

R. No. **2914.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Tritala.

दमयन्तीकल्याणम्.

DAMAYANTĪKALYĀṆAM.

A drama describing the story of the marriage between Damayantī and Nala as narrated in the Mahābhārata: by Raṅganātha, who lived on the banks of the river Tāmraparṇī.

Breaks off in the second Act.

Beginning :

श्रृङ्गारार्द्रतया द्रवीकृतनवश्रीवीरचन्द्रोपला
भङ्ग्या भक्तजनावलीकुमुदिनीमोदं मुहुस्तन्वती ।
वैमल्यप्रसरप्रसादितसमस्ताशाचकोराङ्गना
मङ्गल्यं वितनोतु वो मधुरिपोर्मन्दस्मितेन्दुप्रभा ॥

अपि च ।

कल्या कल्याणदाने जगति खलु रमा यस्य कान्तातिकान्ता
लोकालोकाय हेतू बहुलतरतमोमोचने लोचने च ।
सारं सारङ्गचक्रं दरमपि दरहासं दधानः प्रधानं
भूयो भूयोऽपि भद्रं वितरतु स कृपासद्म वः पद्मनाभः ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

मुण्डैराहिण्डमानैर्भ्रमिषु निनदितं वायुसंपूर्यरभ्रै(न्ध्रै)-
र्जातं गङ्गोर्मिजातैः पटुतरपटहध्वानचातुर्यधुर्यैः ।
भूषाभोगीन्द्रभोगस्फुरितमणिगणैर्दीपकृत्यैश्च दीप्तं
यत्रोदारं हि साध्यं नु भवतु भवतो नृत्तमीशस्य चित्रम् ॥

* * * *

सूत्र—अद्य खलु हृद्यतरकृपाविलासनिरीक्षणेन क्षणेन सम्पूरितभक्तलोककामस्य

* * * *

शुचीन्द्राख्यस्य द(पु)रस्य मण्डनत्वेन समुदितस्य मुदितस्य श्रीपरमेश्वरस्य भगवतो वसन्तोत्सवं विलोकयितुमधिकोत्सुकत्वेन समागतानां समस्तविद्यावद्यासञ्चारजुषां विदुषां समाजेन समादिष्टोऽस्मि । यथा अस्ति खलु रङ्गनाथनाम्ना द्विजेन कविनाधुना विरचितं दमयन्तीकल्याणं नाम नाटकम् । तस्य प्रयोगादितरसेनास्माकमानन्दवल्लरीसमुल्लासः कर्तव्यस्त्वयेति ।

नटी—एत्थ मह माणसे संकातरङ्गिणी बहुमुहा पवहइ ।

सूत्र—अन्तरायचिन्ताजननी हि स्नेहप्रवृत्तिः ।

नटी—कहिं देसे सो बम्हणो कई ।

सूत्र—तत्रभवान् द्रमिलदेशे प्रतिवसति ।

नटी—सो देसो विण सुदपुरुवो ।

सूत्र—स खलु देशो महतीनामाश्चर्यसम्पदामावासभूमिरेव । तथाहि—

मुनेरगस्त्यस्य समीपवासान्मुक्तापदो यत्र जना वसन्ति ।
मुख्या सरिद्भाति च ताम्रपर्णी मुक्तापदं भूषणमेव पृथ्व्याः ॥

अपिच ।

यस्मिन् महीसुरवराः महतां महिम्नां सीमान एव नियमैकपराः प्रथन्ते ।
येषां त्रयीजपविधौ भगवान्महेन्द्रो हर्षेण वर्न(र्ष)ति नितान्तमवग्रहेऽपि ॥

नटी—तत्थ मुत्तारयणाणि ।

सूत्र—न केवलं मुक्तारत्नान्येव । कविरत्नान्यपि तत्रैव । तेषां मध्ये विशेषेण स खलु ।

श्रीरङ्गनाथः कविरत्नमत्र तत्कर्म चूडाभरणं विभाति ।
महीयसो यस्य गिरामगम्यं माहात्म्यमत्यन्तपवित्रचित्रम् ॥

* * * *

सूत्र—प्रमाणमस्ति ।

विद्वज्जनाभ्यर्थनयैव लक्ष्यं साधुत्वमेतस्य हि नाटकस्य ।
वैकुण्ठकण्ठासित(क)यानुमेयो गुणप्रकर्षः खलु कौस्तुभस्य ॥

अपि च । अयं कविः स्वयमेव क्वचिदेवमुक्तवान् ।

इयं नवा नैव गुणो नगुवो (रसोऽ)स्यामितीतरेषां वचनैर्न हानिः ।
कुर्वीत चेन्मोदलवं बुधानामसौ कृतिः स्यान्ननु साधुरेव ॥

नटी—अस्स णाडयस्स को णाअद ।

सूत्र—निषधकुलप्रदीपो नलो राजा नायकः । विदर्भकुलवल्लरी सुकृतमञ्जरी दमयन्ती नायिका ।

End:

राजा—(सश्लाघमात्मगतम्) अहो गुणवत्ता जातिविशेषं नापेक्षते ।

श्रुतिसमयमनोज्ञैर्भाविलक्ष्मीनिदानैः सुखयति वचनैर्मामेष हंसः सदैव ।
सरहमिह तथैव स्नेहवानेव यत्नैः समभिलषितसिद्ध्या मोदयेतेति मन्ये ॥

(प्रकाशम्) यदिह त्वं भद्रतरं वदसि तत्सर्वं प्रियतरमेव मे भवति । तदिदानीं पुरमेव गच्छावः । इति व्योमयानेनोभौ निष्क्रान्तौ ।

Colophon:

प्रथमोऽङ्कः ॥

(ततः प्रविशति काञ्चुकीयः) काञ्चु—(निरूप्य) अहो विचित्रमेतत् ।

स्वर्गादागतमात्र एव सहसा देवे द्विषो मालवा
दुर्गर्वप्रसरप्रवेशविवशा राज्यस्य रोधे रताः ।
को वा कान्तमनाः प्रभुः स पुरतो निर्गत्य तीव्रैश्शरै-
र्घोरांस्तानहितानशेषमकरोन्निर्विग्रहान् विग्रहात् ॥

(पुनर्विलोक्य) अथवा एतादृशं कर्म तादृशस्य निषधेश्वरस्य नातिचित्रमेव ।

* * * *

विलोभिका—अच्छेरं एदं । अय्येण करेण चंदोविअ वयणेन पसिद्धावुत्तंतो समाच्छादिओ । काञ्चु—विलोभिके तादृशं वृत्तान्तं प्रव्यक्तमेव ब्रूहि । विलो—अहो एदस्स जाडअस्स विलोक . . . .

R. No. 2915.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Kūḍalūr-mana, Nārēri, Tritala, Malabar district.

(*a*) गौरीकल्याणम्.

GAURĪKALYĀṆAM.

Foll. 1*a*—16*b*,

A poem in three Āśvāsas describing the story of the marriage of Pārvatī with Śiva as narrated in Śivamahāpurāṇa: by Gōvindanātha, pupil of Rāmābhidhāna and a devotee of Śrīkṛṣṇa.

Complete.

Beginning:

नौमि भवानी(कान्तं देवं त्रिपुरादिदानवानीकान्तम्) ।
काञ्चनकान्तालोकं वामोत्सङ्गाधिरूढकान्तालोकम् ॥
श्रुतिनिवहाधाराय स्फुटतरविलसत्कृपामहाधाराय ।
यतिततिकामाहिताय त्र्यक्षाय नमो जगन्निकामहिताय ॥

* * * *

मम धीस्सालङ्कृत्यां शिवयोश्चरितेन धृतरसालं कृत्याम् ।
आमोदादेव तया स्वधिष्ठिता स्याद्गिरां सदा देवतया ॥

* * * *

अस्तु सदा रामाय श्रीगुरवे काव्यवीरुदारामाय ।
प्रणतिरुपेता विद्या यत्कृपया मामभूदपेताविद्या ॥

* * * *

यशसा भुवि राजन्तं वन्देऽहं कालिदासकविराजं तम् ।
यो बुधमोदं तस्य प्रथयति सूक्त्या शिवोत्तमोदन्तस्य ॥
दर्शितधातृपदार्था कृतिर्ममासावमुक्तमातृपदार्था ।
अपि जातार्यावृत्तं यत्कृतिपुत्रीव वपुरितार्यावृत्तम् ॥

* * * *

भक्तिप्रसरचितायां कृत्यां गौरीशवृत्तरसराचितायाम् ।
अघहानिकरो मुष्यान्निखिलान् दोषान् बुधेन्द्रनिकरोऽमुष्याम् ॥
अथ दिशि वैश्रवणस्य स्वचरित्रैर्हारकशिवैश्श्रवणस्य ।
शैलो हिमवान्नाम स्फुरति यथार्थं दधन्महिमवान् नाम ॥

* * * *

Colophon:

इति गोविन्दनाथविरचिते गौरीकल्याणे प्रथम आश्वासः ॥

End:

महेश्वरो नवोढया मुदामतानवोढया ।
अवाप चासदारतिं सह(हो)[सो]मया सदा रतिम् ॥

कृष्णभक्तिसनाथस्य दाक्षिण्यरसभाजनैः ।
श्राव्या गोविन्दनाथस्य क्रियैषा सत्सभाजनैः ॥

Colophon:

इति गौरीकल्याणे तृतीय आश्वासः ॥

(b) निरनुनासिकचम्पुः.

NIRANUNĀSIKACAṀPUḤ.

Foll. 17a—19a. Foll. 19b—20b are left blank.

A short work in prose and verse containing the appeal for help of Śūrpaṇakhā to her brother Rāvaṇa, after her nose and ears were cut off by Lakṣmaṇa. The work contains no nassal letters as she could not pronounce them in her present disabled state: by Nārāyaṇa.

Complete.

Beginning:

आक्रन्दकम्पितसभं पतिता प्रसर्पद्रक्तानतिस्फुटविकृत्तकरालगात्री ।
सम्भ्रान्तयातुगणमध्यगमग्रजं सा नासाक्षयान्निरनुनासिकमेवमूचे ॥

हा हा राक्षसराज दुष्परिभवग्रस्तस्य धिक् ते भुजाः
विद्युज्जिह्वविपत्तिरेव सुकरा क्षुद्रप्रताप त्वया ।
ध्वस्तापत्रप पश्य पश्य सकलैश्चक्षुर्भिरेतादृशी
जाता कस्यचिदेव तापसशिशोश्शस्त्रात्तवैव स्वसा ॥

अस्यास्तिष्ठतु वा विपादितपतेर्दुर्भ्रातृकाया विपत्
सोदर्यास्तव ये खरप्रभृतयो ये चापि रक्षोभटाः ।
सर्वे तच्छरलीलया बत कृता वैवस्वतोपासकाः
स्वस्थो जीव तवापि भोजल(?)गले प्रायोऽस्य हेतिः पतेत् ॥

* * * *

अपि चापरा कापि पराद्भुतोद्भूतिरुपश्रोतव्या भवता तत्र खलु तत्तादृगसौ गात्रश्रीः प्रकाश्येत चेदखिलापि खल्वबलाजातिश्शफरध्वजशैश्शकली भवेदिति कृपाकुलितचेतसेव वेधसा विरचिताटवीगूढवासयोस्तयोरग्रजस्योदग्रशौर्यदुरासदस्य परिग्रहीभूता ।

End:

विश्वविक्षोभसिद्धविद्येव पुष्पसायकस्याधिदेवतेवाद्यरसस्य दृष्टिगोचरगतेव तृतीयपुरुषार्थसारकलाप्राज्यतरप्राच्यसुकृतपरिपाकसुलभा सीतेति कापि कातराक्षी वीक्षिता ।

Colophon:

अनुनासिकरहितानि व्यतनोदेतानि पद्यगद्यानि ।
नारायणाभिधानो द्विजपोतो रविनटेश्वरादेशात् ॥

R. No. 2916.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 86. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippaḍ, Kūtalūrmana, Nareri, Tritala, Malabar district.

Fol. 10*b* is left blank.

गौरीकल्याणव्याख्या — पदार्थवादिनी.

GAURĪKALYĀṆAVYĀKHYĀ : PADĀRTHAVĀDINĪ.

A commentary on the work described under the previous number. The name of the author is not known; but it is clearly stated in the beginning of the commentary that he was a pupil of Nārāyaṇa.

Complete in three Āśvāsas.

Beginning:

तस्माद्भूसुरवरतः शिष्यसभायै वितीर्णभासुरवरतः ।
विद्यापारायणतश्चेतो मा गा गुरोस्तु नारायणतः ॥
गुरुभूतसमादेशात् गौरीकल्याणनामनि ।
काव्ये पदार्थसम्बन्धान् विज्ञातान् कथयाम्यहम् ॥

तत्र तावत् प्रथममिष्टदेवतानव(म)नं कुरुते—नौमीत्यादि । भवानीकान्तमुमापतिम् । त्रिपुरादीनां दानवानामनीकस्यान्तं काञ्चनवत् कमनीयोद्योतं वामोत्सङ्गमधिरूढः कान्ताजनलोकः प्रियाजनो यस्य । अहं भवानीकान्तं देवं नौमीत्यन्वयः ।

* * * *

अथ गजवनग्रामे पारशवान्वयसम्भूतं साहित्यविद्यापरमदेशिकं महदभिरामं रामाभिधानं निजगुरुभूतं प्रति प्रणामं कुरुते—अस्त्वित्यादि । काव्यवीरुधां रामायणकाव्यवीरुधामुपवनभूताय । प्रणतिः प्रणाम । उपेता प्राप्ता ।

यत्कृपया यस्य गुरोः कृपया, अपेताविद्या अपगताज्ञाना साहित्यविद्या इत्यर्थः ।
श्रीगुरवे रामाय सदा प्रणतिरस्तु । यत्कृपया विद्या मामुपेताभूत् ॥

End:

महेश्वर इत्यादि । मुदामतानवोढया सन्तोषाणामनल्पत्वेनोढया-सदारतिमविद्यमानविरामां महेश्वरः नवोढयोमया सह सदा रतिमवाप च ।
कृष्णेत्यादि सत्सभाजनैः गोविन्दनाथस्यैषा क्रिया श्रव्या (गोविन्द)नाथ इति गोविन्दभक्त्यतिशये . . . . . . गोविन्दो नाथो यस्येति विग्रहः ।
एतद्वृत्तश्च शे . . . .
विष्णुर्विपक्षतक्षस्यस्वपदानतयादवः । . . . . वत्यां स्वपदानतयादवः ॥ इति

Colophon:

इति गौरीकल्याणे(णव्याख्यायां) पदार्थवादिन्यां तृतीय आश्वासः ॥

R. No. 2917.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 14. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Bhīmasēna Pāṇigrāhi.

Fol. 14*b* is left blank.

चमत्कारचन्द्रिका.

CAMATKĀRACANDRIKĀ.

This work is described under No. 2150 in Rajendra Lal Mitra's Catalogue, Vol. VI, wherein it is stated that the name of the author is Kavikarṇapuragōsvāmi.

Contains the four Kutūhalas complete.

Beginning:

यत्कारुण्यं शुचिरसचमत्कारवारांनिधीस्तान्
नृम्योरा(बा)धागिरिवरभृतः स्पर्शयेत्तर्षयेन्नः ।
तस्यैवैकं पृषतमचिराल्लब्धुमाशाक्षिदानै-
स्सोऽव्यान्मन्तोर्दशनवितते: कृष्णचैतन्यरूपः ॥
मातः प्रातः किमिह कुरुषे नह्यते पेटिकेयं
यत्नादस्यां किमिह निहितं किं तवानेन सूनो ! ।

ज्ञातव्येन प्रणयाशिशुभिः खेल गेहाद्बहिस्त्वं
जिज्ञासा मे भवति महती ब्रूहि नो चेन्नयामि ॥
अस्यां चन्दनचन्द्रपङ्कजरजःकस्तूरिकाकुङ्कुमा-
द्यङ्गानामनुलेपनार्थमथ तन्नैपथ्यहेतोस्तथा ।
काञ्चीकुण्डलकङ्कणाद्यनुपमं वैडूर्यमुक्ताहरि-
द्रत्नाद्यम्बरजालमप्यतिमहानर्घ्यं क्रमाद्वर्तते ॥
अत्रेदन्निदधासि किं मम कृते रामस्य वा नन्दन !
ब्रूमस्त्वामवधेहि या तु भवतो हेतोः कृता पेटिका ।
सान्यातोऽपि बृहत्यनर्घ्यमणिभागेवं बलस्यापरा
तत्कस्मिंश्चन ते जनन्युरुरियान् स्नेहो यतो दास्यसि ॥

* * * *

Colophon:

इति श्रीचमत्कारचन्द्रिकायां प्रथमकुतूहलम् ॥

End:

सभ्रूविभङ्गकुटिलास्यसरोजशीधुमाद्यन्मधुव्रतविलाससुसौरभाणि ।
सम्प्राप्य जालविवरेभु(षु)जुघूर्णुरेवं प्रेष्ठालयः प्रतिपदं प्रमदोर्मिपुञ्जे ॥

Colophon:

इति श्रीचमत्कारचन्द्रिकायां चतुर्थकुतूहलम् ॥

R. No. 2918.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 234. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of the Raja of Chirakkal, Calicut.

Bound in two volumes. Foll. 233*b* and 234 are left blank.

काव्यकलानिधिः.

KĀVYAKALĀNIDHIḤ.

A treatise on poetics and rhetoric by Kṛṣṇasudhī, son of Śivarāmasūri and grandson of Upadraṣṭṛ Paṇḍitarāya Nārāyaṇa Śāstrin. The author was an inhabitant of Uttaramērūr on the bank of the river Skandha or Kara (Śeyyār, a tributory of the Pālār) near Conjeeveram and was apparently patronized by Ravivarman, king of Kollam (Quilon in Travancore), whose fame furnishes the theme for the illustrative stanzas in the work.

Complete in ten Kusumas treating of the following subjects:—

१. नायकप्रकरणम् ।
२. शब्दार्थनिर्णयः ।
३. अर्थनिर्णयः ।
४. ध्वनिनिरूपणम् ।
५. गुणीभूतव्यङ्ग्यनिरूपणम् ।
६. शब्दार्थचित्रनिर्णयः ।
७. दोषनिरूपणम् ।
८. गुणप्रकरणम् ।
९. शब्दालङ्कारप्रकरणम् ।
१०. अर्थालङ्कारप्रकरणम् ।

Beginning:

श्रियं पुन्नागसर्वाङ्गो नगनाथसुतासुतः ।
विनायकाङ्कादिपूज्यो ददातु स विनायकः ॥
कालिन्दीजलकालीयसर्पदर्पहरो हरिः ।
कादम्बिनीश्यामलश्रीः कल्याणानि करोतु नः ॥

* * * *

काव्यालङ्कारजिज्ञासोः मुदे काव्यकलानिधिम् ।
कुर्वे कृष्णसुधीः कोलभूपालकयशःश्रितम् ॥
न सामान्यः कोलराजो योऽर्जुनश्रीर्धराकरः ।
सुमनोवल्लभः पूर्णकामो गुरुकवीश्वरः ॥

किञ्च—

जलध्यपिहिता भूमिः ध्रियते येन लीलया ।
कोलराजस्य तस्याद्य कीर्तिः किं न कविप्रिया ॥
तद्वंशे रविवर्मेति राजचूडामणिस्सताम् ।
सतामनितरापेक्षं नितरां तनुते श्रियम् ॥

तस्यैव खलु—

पद्मिनीवल्लभः कोलभूपालो रविपार्थिवः ।
इति नामानि कल्पद्रुमीयन्ति विबुधश्रिये ॥

* * * *

काव्यालापांश्च वर्जयेदिति पर्युदासोऽसत्कृतासच्चरित्रकथनकाव्यपरः । अतः कृतं भगवता वल्मीकजन्मना महामुनिना महाकाव्यं रामायणम् । तत्रभवद्भिः भगवद्व्यासकालिदासप्रभृतिभिः महाकविभिः पुराणपुरुषपुण्यकथाप्रतिपादकख्यातिख्यातान्याख्यानानि चेक्रीयन्ते ।

* * * *

कोलोर्वीशगुणान् श्रुत्वा गु(रु)गोकर्णनाथयोः ।
धिषणाहीनता जीवशेषता चाभवद्ध्रुवम् ॥

अहन्तु कोलराजेन्द्रगुणान् स्तोतुं यतेऽधुना ।
धीरास्समर्थता भूयात्तवेत्याशीर्वचोऽस्तु नः ॥

अत्रादौ गुणा गण्यन्ते—

माहात्म्यं दानशौण्डत्वं सुन्दरत्वं कुलीनता ।
भाग्यं तेजस्विता धर्मपरत्वञ्च विदग्धता ॥
प्रियवक्तृत्वपाण्डित्यप्रमुखा महदादयः ।
चिरन्तनैर्ये कथितास्तान्गुणानस्य वच्म्यहम् ॥

* * * *

Colophon:

इति काञ्चीमण्डले स्कन्धसरिद्दक्षिणदिश्युत्तरमेरुग्रामवासिना पण्डितरायोपद्दष्टृपवंशमुक्तामणिशिवरामसुधीसूनुना कृष्णशास्त्रिणा कृतेऽलङ्कारशास्त्रे काव्यकलानिधौ नायकप्रकरणं नाम प्रथमं कुसुमम् ॥

* * * *

Colophon:

इति श्रीमदुत्तरमेरूरुपद्रष्टृपण्डितरायनारायणशास्त्रिगर्भसंभवशिवरामसूरिचिन्तामणिसूनुकविदासकृष्णसुधीकलिते काव्यकलानिधौ ध्वनिनिरूपणं नाम चतुर्थं कुसुमम् ॥

End:

तदाह दण्डी—

न लिङ्गवचने भिन्ने न हीनाधिकते अपि ।
उपमादूषणायालं यत्रोद्वेगो न धीमताम् ॥

तस्मात्सहृदयहृदयानुद्वेगकरो दोषः परिहर्तुमयोग्य इत्यखिलमनवद्यम् ॥

* * * *

कृतं नव्यप्रबन्धे विद्वदादरणीयतापल्लवितेन ।

कल्याणानि करोतु पङ्कजभुवः पत्नी कवीनां श्रियः
भूयासुः कृतयो जयन्तु जगतीनाथाश्च कीर्त्याशयाः ।

धर्मिष्ठा विजयं भजन्तु विबुधानन्दैकहेतुस्सदा
भूयात्काव्यकलानिधी रविकुलक्ष्मापालकीर्त्या सह ॥
यन्नामाखिलराजमौलिरसनारङ्गस्थलीनर्तकी
यन्नारीवचसा कवे(पे)श्च हुतभुङ्गीहारभानुर्बभौ ।
यत्पादाब्जरजः शिलामपि वधूं तेने मुनेः सद्गुण
श्लाघ्यः काव्यकलानिधिर्जयतु मे रामाङ्घ्रिसेवा भुवि ॥
काञ्चीमण्डलमण्डने करनदीनीरोद्भवद्गण्डने
श्रीमत्युत्तरमेरुनामनि पुरे श्रीशैलजेशाकरे ।
वासी काव्यकलानिधिं व्यरचयत्कृष्णः कविर्व्यङ्गचर्धि
सन्मेधाविकलिप्रसिद्धशरदि श्रीमच्छसत्संपदि ॥

R. No. **2919.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 228. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Tekkēmaṭham, Trichur.

Bound in two volumes.

सङ्क्षेपशारीरकसंबन्धोक्तिः.

SAṄKṢĒPAŚĀRĪRAKASAMBANDHŌKTIḤ.

A commentary on the Sarvajñātman's Saṅkṣēpaśārīraka, a work in four Adhyāyas, explaining briefly the principles of the Advaita-Vēdānta as expounded in the Śārīrakabhāṣya of Śaṅkarācārya: by Vēdānanda, pupil of Vēdādhyakṣabhagavatpūjyapāda.

For further details about the work Saṅkṣēpaśārīraka, see page 742 under Nos. 2319 and 2320 in the India Office Library Catalogue, Part IV.

Complete in four Prakaraṇas.

Beginning:

अनुस्मृत्य भगवन्तं प्रणेतारमनुस्मरन् प्रणमति ।

वक्तारमासाद्य यमेव नित्या सरस्वती स्वार्थसमन्वितासीत् ।
निरस्तदुस्तर्ककलङ्कपङ्कं नमामि तं शङ्करमर्चिताङ्घ्रिम् ॥

इदानीं स्वगुरुं महीकुर्वन्ननुस्मरति—

यदीयसम्पर्कमवाप्य केवलं वयं कृतार्था निरवद्यकीर्तयः ।
जगत्सु ते तारितशिष्यपङ्क्तयो जयन्ति देवेश्वरपादरेणवः ॥

वयं कृतार्था इत्यात्मप्रशंसयानाप्तत्वाशङ्कामपनुदन्नाह—

गुरुचरणसरोजसन्निधानादपि वयमस्य गुणैकलेशभाजः ।
अपि महति जलार्णवे निमग्नास्सलिलमुपाददते मितं हि मीनाः ॥

गुरुपादरेणुसम्पर्काद्वयं कृतार्था इति गुरूणां प्रशंसेयमित्याशयः, गुरोर्गुणैकलेशभाजो वयमित्युक्त्या अल्पगुणादन्तरायस्वभावाच्च शारीरकार्थावगमसामर्थ्याभावाशङ्कावाप्ता । तामपनुदन्नाह—

शक्तो गुरोश्चरणयोर्निकटे निवासान्नारायणस्मरणतश्च निरन्तरायः ।
शारीरकार्थविषयावगतिप्रधानं संक्षेपतः प्रकरणं करवाणि हृष्यन् ॥

अतश्शक्तत्वाच्छारीरकप्रयोजनविषयादिनिर्णयप्रधानं संक्षेपेण प्रकरणं करवाणि । अनेन संक्षेपतो निर्गुणभागापेक्षितन्यायानां निर्देशात्प्रकरणमेतदित्यर्थः ।

तथाच लक्षणम्—

शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ॥ इति ॥

* * * *

Colophon:

श्रीमद्वेदाध्यक्षभगवत्पूज्यपादशिष्येण वेदानन्देन विरचितायां संक्षेपशारीरसम्बन्धोक्त्यां प्रथमोऽध्यायः ॥

End:

गुरोः प्रभावतो ममायं प्रभाव इति तदनुस्मरणपूर्वकमात्मनो नाम निर्दिश्य ग्रन्थकरणकालोपलक्षणार्थं तत्कालीनस्य राज्ञो नाम निर्दिशन्नाह—

श्रीदेवेश्वरपादपङ्कजरजःसम्पर्कपूताशयः
सर्वज्ञात्मगिराङ्कितो मुनिवरः सङ्क्षेपशारीरकम् ।
चक्रे सज्जनबुद्धिवर्धनमिदं राजन्यवंशे नृपे
श्रीमत्यक्षतशासने मनुकुलादित्ये भुवं शासति ॥

आदिमध्यान्तमङ्गलानि शास्त्राणि प्रचयं गच्छन्तीति मनसि निधायान्तेऽपीष्टदेवतां प्रणमति—

भुजङ्गमाङ्गशायिने विहङ्गमाङ्गगामिने ।
तुरङ्गमाङ्गभेदिने नमो रथाङ्गधारिणे ॥ इति

सुरासुरात्मसङ्घयोस्सुखेतरप्रदं हरेः ।
वपुर्नृसिंहमद्भुतं नमामि सर्वसाक्षिणम् ॥ इति ॥

Colophon:

श्रीमद्वेदाध्यक्षपूज्यपादशिष्येण वेदानन्देन विरचितायां संक्षेपशारीरकसम्बन्धोक्तौ चतुर्थोऽध्यायः समाप्तः । परिसमाप्ता चेयं श्रीमत्संक्षेपशारीरकसम्बन्धोक्तिः ॥

R. No. 2920.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 46. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from a MS. of Mahāmahōpādhyāya Tāta Subbarāya Śāstrigāru of Vizianagram.

आश्वलायनसन्ध्याभाष्यम्.
ĀŚVALĀYANASANDHYĀBHĀṢYAM.

The original MS. is said to have been restored on the tenth day of bright fortnight in the month of Phālguna of Vibhava year.

A commentary on the Sandhyāvandanamantras intended for the followers of the Āśvalāyanasūtra: by Cauṇḍapārya of Vasiṣṭhagōtra, pupil of Bhāratītīrthamuni and Vidyātīrthamuni and son of Kāmāṁbā and Cinnayārya. His two younger brothers are Āditya and Mañcaka. The work is said to have been written at the request of Cāmuṇḍi who had compiled a treatise on Āśvalāyanaprayōga and whose father Bhānu is stated to have made clear the Vedic law. The commentator also mentions the names of the ten works of Saunaka.

Complete.

Beginning:

वन्दे वन्दारुगीर्वाणकिरीटमणिराजिभिः ।
नीराजितपदाम्भोजं विघ्नेशं सर्वसिद्धिदम् ॥

* * * *

नमामि शौनकाचार्यं वेदवेदान्तवेदिनम् ।
वेदस्य गुप्तये येन ग्रन्थानां दशकं कृतम् ॥
आर्षानुक्रमणी चाद्या छान्दसी दैवती तथा ।
अनुवाकानुक्रमणी सूक्तानुक्रमणी तथा ॥
ऋक्छ[ा]न्दयो(सो)र्विधाने द्वे बार्हद्दैवतमेव च ।
प्रातिशाख्यं शौनकीयं कारिकेति दशैव तु ॥

विविच्य विनियोगं तु कर्तारं सूत्रगृह्ययोः ।
पञ्चमारण्यकस्यापि वन्दे तं बह्वृचाग्रजम् ॥

श्रीभारतीतीर्थमुनिविद्यातीर्थमुनीश्वरौ ।
नमामि भाष्यकर्तारौ त्रयीमयमहार्णवौ ॥

आसीच्छ्रीमच्छौण्डपार्यो वसिष्ठस्य कुले महान् ।
ऋक्शाखा यस्य वेदाद्या सूत्रं यस्याश्वलायनम् ॥

एवमा(चिन्नया)र्यः पिता यस्य कामाम्बा जननी सती ।
आदित्यमश्वकौ स्यातां रविसोमाविवानुजौ ॥

येन दर्शितमन्त्रौघप्रयोगकुशलास्सदा ।
कृतार्थतां प्रयान्त्येव महीसुरमहीभृतः ॥

खिलीकृतः श्रुतेर्मार्गः कलौ दुर्बुद्धिभिर्नरैः ।
स्पष्टीकृतो भानुनाम्ना स जयत्यार्यपूजितः ॥

तदपत्येन चामुण्डिनाम्ना प्रथितकीर्तिना ।
कृतस्सम्यग्विविच्यैव प्रयोगः प्रीतये सताम् ॥

स कदाचित्समभ्येत्य भूसुरैः प्रार्थितस्सुधीः ।
आश्वलायनगृह्योक्तकर्मानुष्ठानसिद्धये ॥

संक्षिप्तत्वाद्विकीर्णत्वाद्गृह्यो भोक्तुं न शक्यते ।
प्रयोगः कर्मणां तस्मान्मया सम्यक् कृतस्त्वयम् ॥

प्रयोगकाले मन्त्रार्थज्ञाने फलविशेषतः ।
तत्तत्कर्मणि मन्त्राणामर्थश्चाख्यायतामिति ॥

अङ्गीकृत्य तथेत्युक्तश्शौण्डपार्यस्सतां प्रियैः ।
श्रीभारतीतीर्थगुरोः कृपादृष्ट्यावलोकितः ॥

ऋग्भाष्यं सूत्रगृह्ये च तद्व्याख्यानानि च स्मृतीः ।
आलोच्य कर्मोपयुक्तमन्त्रार्थान्व्याकरोदयम् ॥

ततस्सम्यग्विदां सर्वसत्कर्मफलसिद्धये ।
सन्ध्याकर्मणि सर्वत्र ब्रह्मभेदः प्रदर्श्यते ॥

तत्प्रकारस्तदर्थश्च तन्मन्त्रार्थविचिन्तनम् ।
विनियोगश्च मन्त्राणां रहस्यमपि वक्ष्यते ॥

अत्राधिकारिकृतस्यैव कर्मणः फलहेतुत्वादादावधिकारी प्रदर्श्यते । अथाधिकारिनिर्णयः—स हि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म। शरीरमेव मातापितरौ जनयत इत्यापस्तम्बोक्तेः ।

* * * *

अथ सन्ध्यावन्दनस्य प्रकृतत्वेन वक्ष्यमाणत्वादादौ सन्ध्याशब्दार्थो निरूप्यते ।

उपास्ते सन्धिवेलायां निशाया दिवसस्य च ।
तामेव सन्ध्यां तस्मात्तु प्रवदन्ति मनीषिणः ॥ इति ॥

* * * *

एवं प्रणवार्थमुक्त्वा व्याहृत्यर्थो वक्ष्यते । भवन्त्यस्यां भूतानीति भूः, भावयति विश्वमवकाशप्रदानेन स्थितिप्रदानेन वा भुवः, सुष्ठु अरणीयं प्राप्यं सुखमस्मिन् त्राप्यं इति वा स्वः, एतेऽर्थाः प्रणवार्था एव ॥

End:

धीमता चौण्डापार्येण सन्ध्यामन्त्रार्थबोधिनी ।
शिवाभिन्नदृशां व्याख्या कृता विश्वसतां मुदे ॥
त्रिसन्ध्यमेवं मन्त्रार्थतत्परास्समुपासते ।
कृतार्थतां भजन्त्येव दूरीकृततमोमलाः ॥
गायत्री वेदजननी चिदाकाराक्षरात्मिका ।
उपासिता मया नित्यं नित्यं मां कुरुतादरम् ॥

ओं ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशऋषिभ्यः परमगुरुभ्यो महद्भ्यः । सर्वोपद्रवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि ॥

R. No. **2921.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 64. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Mahāmahōpādhyāya Tāta Subbarāya Śāstrigāru of Vizianagram.

(*a*) तत्त्वमस्यखण्डार्थनिरूपणम्.
TATTVAMASYAKHAṆḌĀRTHANIRŪPAṆAM.

Foll. 1*a*—44*b*.

A polemical work investigating the meaning of the Upaniṣadic passage "Tat, Tvam, Asi" so as to support the Advaita view of the Vēdānta and to criticise unfavourably the Viśiṣṭādvaita view thereof: by Rāmānandasarasvatī, who was the disciple of Rāmabhadrabhagavatpūjyapāda.

Complete.

Beginning:

कलये मूर्ध्नि कैवल्यकमलोद्वाहवेदिकाम् ।
श्रीरामभद्रभगवत्पादपादाब्जपादुकाम् ॥
अद्वैतासिद्धितद्व्याख्याव्यापितेनैव वर्त्मना ।
तत्त्वमस्यादिवाक्यानामखण्डार्थो निरूप्यते ॥

इह खलु प्राणिमात्रस्य सुखमेव स्वरसत इष्टमिति सर्वानुभवसाक्षिकम्। तच्चात्मैव तस्यैव स्वारसिकेष्टत्वात्। एवं सुखस्यात्मत्वादेव सत्यप्येकत्वे नित्यत्वे निरतिशयत्वे नित्यप्राप्तत्वे चानाद्यनिर्वचनीयाविद्यावृतत्वादतथात्वभ्रमेणैहिकामुष्मिकनानाविधसुखलिप्सया तत्तद्धर्मकलापमनुतिष्ठन् तज्जन्यसुखाभासान् दुःखमिश्राननुभवन् दुरन्तदुर्वारसंसारचक्रे बम्भ्रमीति सर्वो जन्तुः ।

* * * *

आनन्दो ब्रह्मेति व्यजानादिति श्रुतौ पुंलिङ्गेनैवानन्दपदेन ब्रह्मपदसामानाधिकरण्यस्यानन्यथासिद्धत्वाच्च । तदेवं श्रुतिस्मृतियुक्त्यनुभवैरात्मस्वरूपमेव नित्यनिरतिशयस्वप्रकाशसुखमिति सिद्धम् ।

इत्यात्मनस्सुखरूपत्वनिरूपणम् ।

अथ स्वप्रकाशवादः ।

ननु किमिदमात्मनः स्वप्रकाशत्वं स्वस्य प्रकाशः स्वप्रकाशः तत्त्वं चेत् षष्ठ्यर्थस्य कर्तृत्वे स्वजन्यत्वापात्तिः कर्मत्वे स्वविषयत्वापात्तिः ।

End:

तदेवं वाक्यसाक्षात्कारात्सर्वसम्बन्धसमुच्छेदकेवलाखण्डप्रकाशसच्चिदानन्दैकरसप्रत्यक्ब्रह्मस्वरूपावस्थानलक्षणो मोक्ष इति सिद्धम् ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीरामभद्रभगवत्पा(दपा)दपाथोजपरिचर्यापरायणेन श्रीमद्रा(घवा)नन्दसरस्वतीपूज्यपादशिष्येण श्रीरामानन्दसरस्वत्या विरचितमखण्डार्थनिरूपणं समाप्तम् ॥

(*b*) तत्त्वमस्यादिवाक्यार्थविरोधनिरासः.

TATTVAMASYĀDIVĀKYĀRTHAVIRŌDHANIRĀSAḤ.

Foll. 45*a*—58*a*.

A hostile criticism of the Dvaita and Viśiṣṭādvaita interpretation of the Mahāvākya Tat, Tvam, Asi.

Complete.

Beginning:

यस्याः प्रसादलेशेन मूकोऽपि विबुधाग्रणीः ।
कमलासनकान्तां तां वाग्विभूत्यै नमाम्यहम् ॥

तत्र तावत्सदेव सौम्येदमग्र आसीत्, एकमेवाद्वितीयं ब्रह्मेत्यादिश्रुतिप्रतिपन्नमद्वैतं भेदग्राहिप्रत्यक्षादिविरोधादनुपपन्नमिति मन्यमानाः केचिदभेदश्रुतीनामन्यथार्थं कल्पयन्ति । तद्दर्शिनां वैदिकशिरोमणीनामपि मा कदाचिदन्यथा प्रतीतिर्भूदिति तद्विरोधो निरस्यते । तत्रेदमस्माद्भिन्नमिति प्रतीयमानो भेदः धर्मिस्वरूपो वा स्यात् धर्मस्वरूपो वा? तत्र न तावत् धर्मिस्वरूपमात्रं भेदः—इदमस्माद्भिन्नमिति, घटः पटो न भवतीत्यादौ प्रकारतया भासमानस्य धर्मिस्वरूपत्वानुपपत्तेः ।

End:

तत्त्वमस्यादिवाक्यस्य जीवब्रह्माभेदप्रतिपादकस्य न प्रत्यक्षविरोधः, न च प्रत्यक्षस्य वाक्येन बाधो(न)दृष्टचर इति वाच्यम्, रज्जुसर्पभ्रमादौ नायं सर्प इत्याप्तवाक्यात् बाधदर्शनात्, तस्माद्द्वैतश्रुतेः न प्रत्यक्षविरोधभङ्गः ॥

(*c*) अद्वैतश्रुतिभेदनिरासः.

ADVAITAŚRUTIBHĒDANIRĀSAḤ.

Foll. 58*a*—64*b*.

A treatise written in support of the Advaita view of the identity of the individual soul and the Supreme Brahman by condemning the dualistic interpretation of the Śrutis which are apparently in favour of Advaita-Vēdānta.

The original of this MS. is said to have been copied by Jandhyāla Gōpālakṛṣṇa for Pullapaṭṭula Bucci Śāstrin.

Complete.

Beginning :

अथ भेदविचारः—

ननु 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति । अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ।' इत्यादिश्रुतिविरोधान्नाद्वैतासिद्धिरिति चेन्न, द्वा सुपर्णेत्यस्य तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वम् ।

* * * *

वस्तुतो भेदश्रुतयस्सर्वाः मानान्तरसिद्धभेदप्रतिपादनेनाभेदपरा इति न ताभिर्विरोधशङ्का ॥

End :

तस्मादद्वैतश्रुतीनां न प्रमाणान्तरविरोधगन्धोऽपीति सर्वमवदातम् ॥

Colophon :

भेदनिरासप्रकरणं संपूर्णम् ॥

नमस्ते जगतस्सृष्टिस्थितिसंहारहेतवे ।
सच्चिदानन्दबोधाय विभवे शम्भवे नमः ॥
मानाभावान्निषिद्धत्वाल्लक्षणस्यासमन्वयात् ।
फलाभावादसत्यत्वान्न शरीरं हरेर्जगत् ॥
वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः ।
वृक्षान्तरात्सजातीयो विजातीयशिलादिभिः ॥
ऐक्यावधारणाद्वैतप्रतिषेधैः त्रिभिः क्रमात् ।

R. No. **2922.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 12. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from the MS. of the Fort Library of the Mahārāja of Vizianagram.

योगविचारः.

YŌGAVICĀRAḤ.

Foll. 1*a*—11*b*.

This is a portion of Śārṅgadharapaddhati dealing with the Yōga philosophy. This work is edited by P. Peterson, M.A., in the Bombay Sanskrit series No. XXXVII.

Incomplete.

Beginning:

अथ शार्ङ्गधरे योगविचारः—

मन्त्रयोगो लयश्चैव राजयोगो हठस्तथा ।
योगश्चतुर्विधः प्रोक्तो योगिभिस्तत्त्वदर्शिभिः ॥
आसनं प्राणसंरोधो ध्यानश्चैव समाधिकः ।
एतच्चतुष्टयं विद्धि सर्वयोगेषु सम्मतम् ॥

अथ मन्त्रयोगः—

ब्रह्मविष्णुशिवादीनां मन्त्रजाप्यविशारदैः ।
साध्यते मन्त्रयोगस्तु वत्सराजादिभिर्यथा ॥

अथ लययोगः—

कृष्णद्वैपायनाद्यैस्तु साधितो लयसंज्ञितः ।
नवस्वेव हि चक्रेषु लयं कृत्वा महात्मभिः ॥

End:

अथ सप्त धारणाः—

सूक्ष्मास्तु धारणास्सप्त भूराद्या मूर्ध्नि धारयेत् ।
धरित्रीं धारयेद्योगी ततस्सौम्यं प्रवर्तते ॥

*　　*　　*　　*

मनसा सर्वभूतानां मनश्चाविशते यदा ।
मानसीं धारणां बिभ्रत् मनस्सौक्ष्म्यश्च जायते ॥
देवानामसुराणां च गन्धर्वोरगरक्षसाम् ।
देहेषु लयमायाति सङ्गं नाप्नोति च क्वचित् ॥

Colophon:

इति शार्ङ्गधरे सप्त धारणाः ॥

Foll. 11*b* and 12*a* contain the Bhūmikā of Yōgavāsiṣṭha. Fol. 12*b* contains the table of contents of this work.

R. No. 2923.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 208. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from the MS. of Tekkēmaṭham, Trichur.

तार्किकरक्षासारसङ्ग्रहविवरणम्.

TĀRKIKARAKṢĀSĀRASAṄGRAHAVIVARAṆAM.

Foll. 1a—206a.

Varadarāja at first wrote the work Tārkikarakṣā in verse, and then commented on his own original, the name of this commentary being Sārasaṅgraha. Cennubhaṭṭa, son of Viṣṇudēvārādhya, wrote a commentary entitled the Vivaraṇa for a small portion of the Sārasaṅgraha. After the death of Cennubhaṭṭa who adorned the court of Harihara-mahārāja, Cennubhaṭṭa's pupil Rāmēśvarārya completed the Vivaraṇa and called it Sārasaṅgrahabhūṣikā.

Complete.

Beginning :

सकृन्नत्वापि यं लोके(को) लभते शान्तिसम्पदम् ।
स नः पायादपायेभ्यो योगानन्दनृकेसरी ॥
भवसञ्चितपापौघविध्वंसनविचक्षणम् ।
विघ्नान्धकारभास्वन्तं विघ्नराजमहं भजे ॥
पारंगतं सकलदर्शनसागराणामात्मोपदेशचरितार्थितसर्वलोकम् ।
श्रीशार्ङ्गपाणितनयं निखिलागमज्ञं सर्वज्ञविष्णुगुरुमन्वहमाश्रयेऽहम् ॥
पदवाक्यप्रमाणपारदृश्वा वरदराजो नाम विद्वान्

* * * *

स्वेष्टदेवताप्रणामलक्षणमङ्गलमादौ आचरन्नमो ब्रह्मणे नमो विष्णवे नमस्कृत्य . . वसीयांसमुपचरन्तीत्यादिकां श्रुतिमनुकरोति—नमामि परमात्मानमिति । णमु प्रह्वत्वे शब्दे च इत्यस्माद्धातोर्निष्पन्नतया नमामीत्यत्र प्रह्वीभावः प्रतीयते, प्रह्वीभावश्च कायवाङ्मनोभिराराधनीयं प्रति समाराधकस्य न्यग्भावः

* * * *

इयता प्रबन्धेन प्रतिपादितं प्रमाणपदार्थं निगमयति—तस्मादिति । यस्मात् न्यूनाधिकसङ्ख्याव्यवच्छेदः परिच्छिन्नः तस्मादित्यर्थः ।

Colophon :

इति श्रीमद्धरिहरमहाराजपण्डितेन सहजसर्वज्ञविष्णुदेवाराध्यतनूजेन चन्निभट्टेन विरचिते सारसङ्ग्रहविवरणे प्रमाणपदार्थस्समाप्तः ॥

अथ सारसङ्ग्रहे प्रमेयपदार्थनिरूपणम्—

नन्ववसिते प्रमाणपदार्थे तदनन्तरोद्दिष्टस्य प्रमेयपदार्थस्य सामान्यलक्षणमभिधाय विभागोऽभिधानीयः। तद्विहाय प्रमेयमपवर्गार्थमिति प्रयोजननिरूपणमनुपपन्नमित्याशङ्क्य तामिमामनुपपत्तिं परिहरन्नवतारयति—**अथ प्रमेयेति** ।

* * * *

क्रमप्राप्तप्रमेयमूललक्षणपरमेकं पद्यमेकप्रसरेणावतारयति—अथेति । लक्षणमिति जात्यभिप्रायमेकवचनम् ।

व्याख्यायैतावतो ग्रन्थान् चन्निभट्टाह्वयस्सुधीः ।
आकारितस्सुरेन्द्रेण व्याचिकीर्षुः स्वरभ्यगात् ॥
अथ रामेश्वरार्येण तदन्तेवासिना सता ।
व्याख्या विलिख्यते ख्याता सारसङ्ग्रहभूषिका ॥

अनन्तरकारिकया इन्द्रियाणामेव विषयः फलं सहकारिवन्निरूप्यत इत्याशङ्क्यावतारयति—अथेति ।

* * * *

Colophon:

प्रथमः परिच्छेदस्समाप्तः ॥

End:

यथा वरदराजेनाम्भोधेर्दुस्तराद्गम्भीरतरात्प्रवाहानालोड्य सारस्सङ्गृहीतः । सोऽपि पूर्वदेवैः पूर्वदेवविजिगीषुभिर्धृत, तथा वरदराजेन मयाप्यान्वीक्षिकीविद्याप्रबन्धानालोड्य सङ्गृहीतः सारो बौद्धादिबाह्यदर्शनप्रवर्तकासुरविजिगीषुभिस्सुमनोभिरेव धार्य इति रूपकव्यक्तिरिति सकलं समञ्जसम् ॥

आसाक्षात्वनिरुक्तीयमुपाध्यायैर्निरूपिता ।
शिष्टा रामेश्वरार्येण विज्ञेया रचिता मया ॥
पञ्चक्लेशहरो नृणां कवयतां पञ्चाक्षरीतत्त्ववित्
पञ्चास्यः प्रतिवादिदन्तिदलने पञ्चाग्निहोमोद्यतः ।
पञ्चग्रन्थ्यवधारणानिपुणधीः पञ्चद्रुमौदार्यवान्
पञ्चेज्यानिरतोऽन्वहं विजयते श्रीचन्निभट्टस्सुधीः ॥
पारं सद्गुरुनाविकं गतवते विश्वस्य विद्याम्बुधेः
पर्यायामरदेशिकाय रभसाद्गोष्ठीं गरिष्ठां गतः ।

कः स्पर्धेत कणादपाणिनिगुरुव्यासाक्षपादोदित-
ग्रन्थग्रन्थिविभेददक्षिणधिये श्रीचान्निभट्टार्य ! ते ॥

Colophon :

इति रामेश्वरार्यरचिता सारसङ्ग्रहभूषिता(का) परिसमाप्ता ॥

Foll. 207*b*—208*b* give the contents of this work.

R. No. 2924.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 45. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. acquired through Paṇḍit Gōpīnāthānanda Śarma of Parlakimedi.

मुकुन्दविजयप्रशस्तिः.

MUKUNDAVIJAYAPRAŚASTIḤ.

A treatise on astrology composed under the orders of a king named Mukunda, whose genealogy is given thus.

Rāmacandra
|
Puruṣōttama
|
Balabhadra
|
Mukunda.

Complete.

Beginning :

यो रामचन्द्र इव भाति पुरा मुरारेरात्मार्पितैकविभवोऽद्भुतकीर्तिराशः ।
भूयो(यो भू)सुरानसुरकल्पदुरन्तसङ्घादुद्धर्तुमैहत बभूव स रामचन्द्रः ॥
ततोऽभवच्छ्रीपुरुषोत्तमाख्यो विख्यातकीर्तिर्वसुधाधिनाथः ।
ततोऽधिजातो बलभद्रभूपो निवारितानेकरुद(दुर)न्तभूपः ॥
तस्मान्मुकुन्दो नृपतिः प्रजातो बाल्यान्मुकुन्दैकसखोग्रकीर्तिः ।
दुष्टारिनाशार्पितचित्तवृत्तिः भूयो(यो भू)सुराराधनचित्तवृत्तिः ॥
तस्य श्रीविजयप्रशास्तिरचनां कर्तुं मुरारेः पदं
नत्वा कोऽपि कुतूहलाकु(त्स्तु)तित(प)रो होराविदां प्रीतये ।
दृष्ट्वानेकविचित्रवाक्यबहुलान् ग्रन्थान्स्वराज्ञाप्तिवान् (?)
भूयोऽल्पैर्वचनैर्विचित्रबहुलैराह स्वरे पद्धतिम् ॥

विराजन्ते वीरा रणशिरसि तावद्बलयुताः
स्वरे तारुण्याख्ये न यदि निजनामास्त्रसहिताः ।
तथा चाष्टौ नाम्नस्स्वरसमुदयान् कालसहितान्
प्रवक्षो(क्ष्ये)ग्रन्थादौ तदनु सकलांश्च क्रमविधीन् ॥
ह्रस्वाः पञ्च च ये स्वरा अइउएओ(आ)कारकाः प्रस्फुटा-
स्ते ज्ञेयाः स्वरसंज्ञकाश्च सकलाः कालाख्यकानामकाः ।
मात्रार्णग्रहजीवराशिकभपिण्डाख्यास्सयोगा घटो
घस्रः पक्षकमासकात्य(कर्त्व)यनकाब्दा द्वादशाब्दक्रमात् ॥
नाम्ना येन ख्यातिमाप्तो मनुष्यः किं वा जन्तुस्तत्र नामाद्यवर्णे ।
मात्रायाः प्राक् संस्थिता सैव जन्तोर्मात्रासंज्ञस्तेन घव्याख्यकः स्यात्॥

* * * *

वर्गक्रमान्नामगवर्णसंख्यां विलिख्य तत्र स्वरसंख्यकां च ।
अकारकादीनिषुभिर्विहृत्य शेषेऽत्र जीवः खलु मासयोग्यः ॥

* * * *

अथ मुकुन्दमहीपतिशासनात्सकललोकहिताय यशस्विना ।
कृतित(व)रेण सुखेन विरच्यते स्वरविधिः खलु सारसमुद्भवः ॥

End :

पूर्वानुसारत इदं खलु धिष्ण्यभोगं तात्कालिकं तु कुतुकात्प्रकटीकृतं यत् ।
सञ्चिन्त्य तत्त्व इ(म)तितो यदि सारभूतं क्षाम्यन्तु साधव(?)हृदा परिभावयन्तु॥
रेखाद्वयं द्रविणदायि चतस्र एताः कीर्त्यर्थसौख्यभरिताभ्युदयं दिशन्ति ।
साचिव्यमाचरति चाब्दसे(वशे)न पुंसां ष_के महीपतितुलां कथयन्ति चाष्टौ ॥
बिन्दुद्वयं द्रविणदारिचतुष्कमेषां दोषान् विशेषकथितान्वितनोति नूनम् ।
रोगार्थनाशकलहक्षतिदाः षडेते त्वष्टौ मृतं मृतिसमां विवि(द)धात्यवस्थाम् ॥

Colophon :

समाप्तोऽयं ग्रन्थः ॥

R. No. **2925.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 101. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. acquired through Pandit Gōpīnāthānanda Śarma of Parlakimedi.

कविचिन्तामणिः.

KAVICINTĀMAṆIḤ.

Foll. 1a—99b. Foll. 99b—101a contain the Saṅgītaviṣaya. Fol. 101b is left blank.

A work in verse dealing with poetics, rhetoric, music, etc., by Gōpīnāthakavibhūṣaṇa, son of Vasudēva Pātro of Karaṇa family, a poet and doctor in the court of Gajapatijagannāthanārāyaṇadēvamahāraja, a descendant of Gaṅga race at Khimundi State. The author herein quotes from Siṁhabhūpālīya, Gītagōvindaśrutirañjana, etc.

Complete in 24 Kiraṇas dealing with the following subjects:—

१. कविभेदादिनिरूपणम्.
२. गणादिनिरूपणम्.
३. वृत्तनिरूपणम्.
४. काव्यनिरूपणम्.
५. नायकनायिकानिरूपणम्.
६. भावादिसहजालङ्कारनिरूपणम्
७. अनुरागेङ्गितादिनिरूपणम्.
८. उद्दीपनविभावादिनिरूपणम्.
९. शृङ्गारनिरूपणम्.
१०. रसनिरूपणम्.
११. रसाभासनिरूपणम्.
१२. गुणवृत्तिरीतिदशप्राणनिरूपणम्.
१३. दोषनिरूपणम्.
१४. शब्दालङ्कारनिरूपणम्.
१५. अर्थालङ्कारनिरूपणम्.
१६. इवार्थादिशब्दनिरूपणम्.
१७. काव्योचितवर्णननिरूपणम्.
१८. Do.
१९. काव्योचितऋतुवर्णनम्.
२०. काव्योचितबालवर्णनम्.
२१. उपमाननिरूपणम्.
२२. कविसमयनिरूपणम्.
२३. समस्यापूरणोपायनिरूपणम्.
२४. सङ्गीतनिरूपणम्.

Beginning :

श्रीकृष्णं भक्ततृष्णं नवघनवपुषं बर्हिबर्हावतंसं
श्रीराधावक्त्रचन्द्रामृतरसरसिकं मन्दहासानुरक्तम् ।
कालिन्दीतीरकुञ्जाभिलषितविपिने पुष्पगन्धाभिपूर्णे
क्रीडन्तं गोपिकाभिः प्रमुदितहृदयं नन्दसूनुं नमामि ॥
वन्दे सदा व्यासशुकौ महर्षीन्वाल्मीकिसद्गौतमनारदादीन् ।
येषां पुराणादिवचो निशम्य जगज्जना मोक्षपदं लभन्ते ॥

सदा साधुगुणाढ्यानां मधुरालापवादिनाम् ।
अज्ञानकुलहन्तृणां श्रीगुरूणां प्रसादतः ॥
कवित्वेषु रसाढ्येषु गद्यपद्यात्मकादिषु ।
मतिर्मे भवतु ख्याता निर्मलामन्दचेतसः ॥

पूर्वं रामविहारगीतमतुलं राज्ञां सदोमण्डलं
सत्काव्यं सरसोत्कलीयवचनैर्युक्तं मयोक्तं महत् ।
इत्याद्या बहवो रसोक्तिरचिता उक्ता जनैरादृता
ग्रन्थाश्चित्रकवित्वभाववचनालङ्कारिणो राजिताः ॥

अथो बहूनां ग्रन्थानां सारमादाय बुद्धिदम् ।
कविचिन्तामणिं नाम कुर्वेऽहं ग्रन्थमुत्तमम् ॥

ग्रन्थान्तरेषु सूक्तानि यानि पूर्वैर्विचक्षणैः ।
लक्षणान्यर्पितान्यत्र सुबोधान्युच्यते मया ॥

पूर्वग्रन्थानुसारेण कुत्र कुत्र विचार्य च ।
पद्यैर्गद्यैर्बुधोक्तैश्च लक्षणानि विरच्यते ॥

पण्डिताः कवयस्सर्वे शृणुध्वं साधुचेतसः ।
कवीनां कामदातारं प्रबन्धमिममुत्तमम् ॥

मणिरुत्तमसूत्रेण ग्रथितो भुवि राजते ।
दर्पणः पारदेनैव कान्तिमान् जायते परम् ॥

यदा नव्यं काव्यं सरसकविभिश्शोधिततमं
तदा भावं लोके सदसि विदुषां भूपसदसि ।
सदा रामः पुष्पैरधिकसुरवदः कान्तिभरितो
यथा सत्संस्कारैर्भवति जगतां पूजिततमः ॥

* * * *

बालकानां प्रबोधाय सत्कवीनां सुखाय च ।
प्रबन्धोऽयं भवत्वाशु भूदेवानामनुज्ञया ॥

अथ कविः । सिंहभूपालीये—

शुचिर्दक्षश्शान्तस्सुजनविनुतस्सूनृतरतः
कलावेदी विद्वान्मृदुपदकृतिः काव्यचतुरः ।

कृतज्ञो दैवज्ञस्सदयहृदयस्सत्कुलभवः
शुभाकारश्छन्दोगुणगणविवेकी स च कविः ॥

* * * *

अथ श्रीगीतगोविन्दश्रुतिरञ्जनटीकायां कविभेदानाह—

रोचको वाचकश्चार्थशिल्पिको मार्दवानुगः ।
भूषार्थी च विवेकी च कवयस्सप्त कीर्तिताः ॥

* * * *

Colophon:

इति श्रीमत्खिमुण्डिमहाराज्येश्वरगङ्गवंशावतंसवीरश्रीगजपतिजगन्नाथनारायणदेवमहाराजविद्वत्सभाराजितप्रबन्धकविताप्रकाशककरणकुलसम्भवकविभिषग्वरवासुदेवपात्रतनयश्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ कविभेदादिनिरूपणं नाम प्रथमः किरणः ॥

End:

अथ नाट्यसमयः—

याममात्रसमाप्यं च तन्नाट्यं रागवर्धनम् ।
दीर्घं विरागजनकमतो नाट्यं विवर्जयेत् ॥
निद्रया पीडिताङ्गानां रसबोधो न जायते ।
ग्रन्थबाहुल्यभीत्या सङ्गीतलक्षणमतिसंक्षेपमुक्तम् ।
हे राधिके(का) कृष्ण तव प्रसादादयं प्रबन्धस्सुखदो मयोक्तः ।
भवत्वनेकेषु च पण्डितेषु सदादृतो लोकसुखं ददातु ॥
मुदा सद्ग्रन्थाब्धेर्विमलकविचिन्तामणिरसौ
गुणात्यन्तासक्तः कविवचनशाणोत्थितरुचिः ।
मया नीतो लब्ध्वा सुजनकरुणानावमनिशं
सदा विद्वत्कण्ठाभरणवरशोभां जनयतु ॥
यावत्पि(द्वि)ष्टपरक्षणं च कुरुते विष्णुर्मुदा माधवो
यावज्जह्नुसुता सुधाकरकला भूतेशमूर्ध्नि स्थिता ।
यावत्पद्मभुवो मुखेषु विदिता वेदा जगत्कारणं
तावत्काव्यकरप्रसन्नहृदयं ग्रन्थोऽयमालिङ्गतु ॥

ग्रन्थोऽयं रसगर्भवाक्यमधुरः पीयूषधारोपमो
लोकानां बहुगद्यपद्यविसरद्बुद्धिप्रदस्तत्क्षणात् ।
नानाकाव्यकलाविलासचतुराभिज्ञालिकण्ठस्थितः
सत्काव्योचितवर्णनागुणयुतस्सौख्यप्रदो राजतु ॥

श्रीमद्गङ्गाधि(दि)वंशप्रचुरजलधिजः सत्कलामण्डिताङ्गः
साहित्यादिप्रमोदामृतभरिततनू राजते भूपचन्द्रः ।
सत्कारैः प्रीतियुक्तैः कविजनकुमुदामोददाता प्रसन्नो
दुःखध्वान्तस्य हन्ता प्रभुरधिगुणिनां श्रीजगन्नाथनामा ॥

धर्मज्ञो ज्ञानशीलस्सुगुणगणमतिर्वैद्यशास्त्रानुरक्तो
धीरो दक्षो विवेकी सततजनमनःप्रीतियुक्तो रसज्ञः ।
श्रीमत्क्ष्माभृत्सभायामुचितवचनधीः काव्यकर्ता दयाढ्यो
नित्यं साधुस्सुशीलो द्विजगुरुदयया पात्रको वासुदेवः ॥

आयुर्वेदसुधासमुद्रविलसत्सक(त्क)र्णधारो महान्
धर्मज्ञानविवेकभूषणधरो विद्यारसज्ञस्सदा ।
श्रीमद्राजसभानियुक्तवचनव्यापारपारङ्गमः
शास्त्रज्ञः कविभूषणस्य जनकस्तन्वासुदेवस्सुधीः ॥

Colophon:

इति श्रीमत्खिमण्डिमहाराज्येश्वरगङ्गवंशावतंसवीरश्रीगजपति-जगन्नाथनारायणदेवमहाराजविद्वत्सभाराजितप्रबन्धकविताप्रकाशककरणकुलसम्भवकविभिषग्वरवासुदेवपात्रतनयश्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ सङ्गीतनिरूपणं नाम चतुर्विंश[ति]ः किरणः ॥

R. No. 2926.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 16. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Mahāmahōpādhyāya Tāta Subbarāya Śāstrigāru, Vizianagram.

(*a*) रात्रिसूक्तम् , सायनभाष्यसहितम्.

RĀTRISŪKTAM WITH SĀYAAN'S COMMENTARY.

Foll. 1*a*—3*a*. Fol. 3*b* is left blank.

This forms the 127th Sūkta in the tenth Adhyāya of the tenth Maṇḍala of the Ṛgvēda. The repetition of this hymn every night is supposed to be efficacious in preventing the harm caused by illness, evil spirits and enemies. It is followed by a commentary by Sāyaṇācārya.

Complete.

Beginning:

तत्र प्रथमा—रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः । विश्वा अधिश्रियोऽधित ॥

टी ॥ अथ रात्रिसूक्तं प्रारभ्यते । रात्रीत्यष्टर्चं पञ्चदशं सूक्तम् । सोभरिपुत्रस्य कुशिकस्यार्षम् । यद्वा भारद्वाजस्य सुता रात्र्याख्या अस्य सूत्र(क्त)स्य ऋषिका । गायत्रं रात्रिदेवताकम् । तथाचानुक्रान्तम् । रात्री कुशिकः, सौभरो रात्रिर्वा, भारद्वाजी रात्रिस्तवं गायत्रमिति । दुस्स्वप्नप्रदर्शने उपोषितेन कर्त्रा पायसेन होतव्यम् । तत्रैतत्सूक्तं करणत्वेन विनियुक्तम् ।

End:

दिवसस्य तनये! पर्ण(र)मपि छन्दसि (इति) परस्य षष्ठयन्तस्य पूर्वामन्त्रिताङ्गवद्भावात् पदद्वयसमुदायस्य आष्टमिकं सर्वानुदात्तत्वम् । त्वत्प्रसादात् जिग्युषे शत्रून् जिग्युषो मम स्तोमं न स्तोत्रं न स्तोत्रमिव हविरपि गृह्णी(वृणी)ष्व त्वं (भजस्व) । जयतेर्लिटः क्रुत्सुः(क्वसुः) सँल्लिटोर्जेरित्यभ्यासादुत्तरस्य जकारस्य कुत्वम् । षष्ठयर्थे चतर्थी वक्तव्येति चतुर्थी । वसोस्संप्रसारण(मिति संप्रसारणम्) ॥

Colophon:

इत्यष्टमस्य सप्तमे चतुर्दशो वर्गः ॥ इति [श्रीसूक्त]श्रीरात्रिसूक्तभाष्यं समाप्तम् ॥

(*b*) रात्रिसूक्तम्, सभाष्यम्.

RĀTRISŪKTA WITH BHĀṢYAM.

Foll. 4*a*—6*b*.

Same Sūkta as that described above, but with a different commentary.

Complete.

Beginning:

रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः । विश्वा अधि श्रियोऽधित ॥

अथ रात्रिसूक्तस्यापरा व्याख्या—

अथैतद्रात्रिसूक्तम् । रात्रिदेवताप्रतिपादकम् । सा रात्रिदेवता द्वेधा जीवरात्रिरीश्वररात्रिश्च । तत्राद्या प्रसिद्धा, यस्यामस्मदादीनां जीवानां प्रतिदिनं व्यवहारो लुप्यते। द्वितीया तु यस्यामीश्वरव्यवहार[ा]लोपो भवति महाप्रलयकाले तदानीमन्यवस्त्वभावात्केवलं ब्रह्ममायात्मकमेव वस्तु सर्वकारणमव्यक्तपदवाच्यं तिष्ठति सा द्वितीया रात्रिः । तदुक्तं देवीपुराणे—

ब्रह्ममायात्मिका रात्रिः परमेशलयात्मिका ।
तदधिष्ठातृदेवी तु भुवनेशी प्रकीर्तिता ॥ इति

* * * *

समयाभावात्सेश्वरं प्रपञ्चं स्वस्मिन् विलोपयति यावत्फलप्रदानसमयं, ततस्सा रात्रिरूपा चिच्छक्तिः फलप्रदानसमये प्राप्ते महदादिद्वारा प्रपञ्चं निर्माय तत्तत्प्राणिनां तत्तत्कर्माण्यसंकरमवलोकयति । पश्चात्तत्कर्मफलं ददातीत्यहो सर्वज्ञता भगवत्या रात्रेः भुवनेश्वर्याः कियद्वर्णनीयेति, अस्मिन्नर्थे सर्वोऽप्युपनिषद्भागः प्रमाणमिति स्पष्टमेव तद्विदाम् ।

इति प्रथमा ऋक् ॥

End:

परमात्मपुत्री त्वं त्वत्प्रसादात्कामादीन् शत्रून् जिग्युषे । मम स्तोत्रमिव हविरपि यथाशक्ति दत्तं वृणीष्व भजेति ।

इत्यष्टमी ॥

(*c*) रात्रिसूक्तम् , सभाष्यम्.

RĀTRISŪKTAM WITH BHĀṢYA.

Foll. 7*a*—10*a*. Fol. 10*b* is left blank.

The portion given below is found in Sāyaṇa's commentary. The remaining portion is from the work described in (*b*) above from याभावात् to the end.

Wants the beginning.

Beginning:

रात्रिदेवता व्यख्यत् । (विचष्टे) विशेषेण पश्यति, रात्रेश्चाजसाविति ङीप् । ख्यातेश्छान्दसे लुङ् (ङि) अस्यतिवक्तिख्यातीत्यादिना च्लेरङादेशः ।

अपिचैषा विश्वाः सर्वाः श्रियः शोभाः अध्यषि(धि)त अधिधारयति । तथा दधातेर्लुङि स्थाघ्वोरिच्चेतीत्त्वम् । सिचः कित्वम् ह्रस्वादङ्गादिति सिचो लोपः ।

(*d*) देवीसूक्तम् , सायणभाष्यसहितम्.

DĒVĪSŪKTAM WITH SĀYAṆA'S COMMENTARY.

Foll. 11*a*–15*a*. Foll. 15*b* and 16 are left blank.

This forms the 125th Sūkta in the tenth Adhyāya of the tenth Maṇḍala of the Ṛgvēda. It is in praise of the goddess Dēvī. This Sūkta is followed by a commentary by Sāyaṇācārya.

Complete.

Beginning:

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥

अस्य सूक्तस्य सर्वे वै देवा देवीमुपतस्थुरिति देव्यथर्वशिरासि देवीप्रतिपादकत्वेनोक्तत्वाद्देवीसूक्तमिति व्यवहारः । अहमित्यष्टर्चं त्रयोदशं सूक्तम् । अंभृणस्य महर्षेर्दुहिता वाङ् ब्रह्मी(नाम्नी) ब्रह्मविदुषी स्वात्मानमस्तौति(त्) ।

अतः साऋषि(सर्षि)रसच्चित्सुशा(खा)त्मकः सर्वगतः परमात्मा देवता तेन हि एषा तादात्म्यमनुभवन्ती सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाह (मेव) सर्वं भवामीति स्वात्मानं स्तौति ।

End:

सर्वजगदात्मनाहं सम्भूतास्मि, महच्छब्दादिमनिचि टेरिति टिलोपः' ततस्तृतीया(या)मुदात्तनिवृत्त(त्ति)स्वरेण तस्या उदात्तत्वम् । छान्दसो मलोपः ।

Colophon:

इत्यष्टमस्य सप्तमे द्वादशो वर्गः ॥ इति श्रीदेवीसूक्तभाष्यं समाप्तम् ॥

R. No. 2927.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 9. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. acquired through Paṇḍit Gōpīnāthānanda Śarma of Parlakimedi.

साङ्ख्यक्रमदीपिका.
SĀṄKHYAKRAMADĪPIKĀ.

A short commentary by the name Kramadīpikā on the Sāṅkhya aphorisms of Kapila. The name of the commentator is not known.

Complete.

Beginning:

ओं नमो भगवते कपिलाय ।

पञ्चविंशतितत्त्वेषु जन्मना ज्ञानमाप्तवान् ।
आदिसृष्टौ नमस्तस्मै कपिलाय महर्षये ॥

अथातस्सूक्ष्मस्वरूपेण समासतः साङ्ख्यसूत्राणि व्याख्यास्यामः । इह कश्चित् ब्राह्मणः त्रिविधेन दुःखेनाभिभूतस्साङ्ख्याचार्यं कपिलमहर्षिं शरणमुपागतः । अथ कुलनामगोत्रस्वाध्यायं निवेद्याह—भगवन् किमिह परं किं याथातथ्यं किं कृत्वा कृतकृत्यस्स्यामिति । कपिल उवाच—अष्टौ प्रकृतयः, षोडश विकाराः, पुरुषः कर्ता, त्रैगुण्यम्, सञ्चरः, प्रतिसञ्चरः, अध्यात्मम्, अधिभूतम्, अधिदैवतम् ।

* * * *

इति साङ्ख्यसूत्राणि समाप्तानि ॥

अथ कास्ता अष्टौ प्रकृतयः ? ।

अव्यक्तम्, बुद्धिः, अहंकारः, पञ्च तन्मात्राणि । तत्राव्यक्तं तावदुच्यते ।

End:

अधिभूतेभ्यो भवमाधिभौतिकम् । मनुष्यपक्षिमृगसरीसृपेभ्यो यद्दुःखमुत्पद्यते तदाधिभौतिकम् । अधिदेवेभ्यो भवमाधिदैविकम् । शीतोष्णवर्षाद्युद्वेगनिमित्तं यद्दुःखमुत्पद्यते तदाधिदैविकम् । अनेन त्रिविधेन दुःखेनाभिभूतस्य जिज्ञासा समुत्पन्ना । ज्ञातुमिच्छा जिज्ञासा । यथा तृषितस्य पातुमिच्छा पिपासा । एतत्समासतो निःश्रेयसं ज्ञानम् । यत् ज्ञात्वा पुनर्जन्म न स्यादिति ॥

एतन्महर्षेर्विज्ञानं कपिलस्य महात्मनः ।
तच्छ्रुत्वा ब्राह्मणश्रेष्ठः कृतकृत्योऽभवत्तदा ॥
साङ्ख्यसूत्रक्रमेणैषा व्याख्याता क्रमदीपिका ।
अनुष्टुप्छन्दसामत्र ज्ञेयं श्लोकशतत्रयम् ॥

Colophon:

इति साङ्ख्यचक्रमदीपिका समाप्ता ॥

R. No. **2928.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 68. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Narasimhācārlugaru, Vizianagram.

शैवशैलाशनिः.

ŚAIVAŚAILĀŚANIḤ.

A condemnation of the Śaiva religion which upholds that Śiva is the Supreme Brahman. The author has apparently written this work in accordance with the Dvaita school of the Vēdānta and adduces reasons to show that the expression Nārāyaṇa is wrongly interpreted to mean Śiva but that it really denotes God Viṣṇu who is the Supreme Brahman. The title of the work means that it is a thunderbolt against the hill of Śaivism. By Maṅgalagiri Narasiṁha, disciple of Kṛṣṇācārya of Raghūttamapura.

Contains the first Paricchēda only.

Beginning:

लक्ष्मीब्रह्मशिवेन्द्रादिवन्द्यपादाम्बुजद्वयम् ।
जयप्रदं मे श्रीलक्ष्मीनरसिंहं समाश्रये ॥

विष्णुरेव परं ब्रह्म जगज्जन्मादिकारणम् ।
वाच्यश्च सकलैश्शब्दैः परिपूर्णाखिलैर्गुणैः ॥

सर्वोत्तम इति प्राहुर्वैदिकास्तत्त्वदर्शिनः ।
दुरागमस्थितान् केचित् तत्परत्वधृताक्षमाः ॥

शिवमेतादृशं मत्वा द्विधादद्यत्वनिश्चयात् (?) ।
प्रवदन्तितरां वाच्यमपि नारायणाख्यया ॥

तन्निरासप्रकारोऽतिसंक्षेपेणोपपाद्यते ।
शैवशैलाशनावत्र विदांकुर्वन्तु सूरयः ॥

रघूत्तमपदाम्बुजाश्रयणजस्य(न्य) सद्युक्तियु
ममा(हा)जन[स्य] सुषेवणादधिकलब्धसन्मानयुक् ।

सुमङ्गलगिरिप्रसिद्धकुलनारसिंहेरिता
सतां मुद इयं कृतिर्भवतु चेशसन्तुष्टये ॥

ते खल्वेवमाहुः—"शिव एव परं ब्रह्मे"ति । युक्तं ब्रह्मशब्दप्रवृत्तिनिमित्तस्यानन्तकल्याणगुणपूर्णत्वस्य तत्रैव सद्भावत् । बृहबृहि वृद्धाविति धातोः ब्रह्मशब्दस्य तन्नि(नि)ष्पन्नस्य(त्वात्)

* * * *

न च,

वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च विष्णुस्सर्वत्र गीयते ॥ इति ॥

End:

तस्माच्छिवस्य संज्ञारूपनारायणशब्दवाच्यत्वं विनापि गौर्या नारायणीशब्दवाच्यत्वस्योपपादितत्वेन न [तेन] शिवस्य सञ्ज्ञारूपनारायणशब्दवाच्यत्वं सिध्यति । गौर्या नारायणीशब्दवाच्यत्वे(न) कथंचिन्नारायणशब्दवाच्यत्वलाभेऽपि शिवस्य न कृत्स्ननारायणशब्दवाच्यत्वं सिध्यतीति शिवस्य न सर्वशब्दवाच्यत्वम्; किन्तु विष्णोरेव । अतो ब्रह्मशब्दप्रवृत्तिनिमित्तं गुणपूर्णत्वमपि तस्यैवेति विष्णुरेव परब्रह्मेति सिद्धमिति सन्तोष्टव्यमायुष्मतेति सङ्क्षेपः ॥

Colophon:

इति श्रीमङ्गलगिरिवंशोद्भवेन श्रीरघूत्तमपुरकृष्णाचार्याणां शिष्येण नरसिंहेन विरचिते शैवशैलाशनौ प्रथमः परिच्छेदस्समाप्तः ॥

R. No. 2929.

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 92. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Tekkēmaṭham, Trichur.

तैत्तिरीयोपनिषद्भाष्यवार्तिकम्, सङ्गतिसाहितम्.

TAITTIRĪYŌPANIṢADBHĀṢYAVĀRTIKAM WITH SAṄGATI.

Foll. 1*a*—92*a*. Fol. 92*b* is left blank.

The Taittirīyōpaniṣadbhāṣyavārtika of Surēśvara, disciple of Śaṅkara, which is a metrical commentary on the Taittirīyōpaniṣadbhāṣya of Śaṅkarācārya which work has been described under No. 505 of the D.C.S. MSS., Vol. I, Part III. It is followed by a commentary by Viśvānubhava, pupil of Pratyagbōdhabhagavatpūjyapāda.

Complete.

Beginning :

यस्मादेतदनादिमध्यनिधनाद्धातुस्समुत्थं जग-
द्यस्मिंस्तिष्ठति शाश्वते सुरपतौ प्रज्ञातनौ मायिनि ।
यस्मिंश्चास्तमुपैति शुभ्रवपुषि स्रक्सर्पवत्कल्पितं
तं रामं जगदार्तिहन्तृवपुषं वन्दे मुकुन्दं हरिम् ॥

वेदार्थविभ्रमं दृष्ट्वा वादिनां मुग्धचेतसाम् ।
वेदार्थस्थापनायैव न्यायचक्रं चकार यः ॥

अथात इत्यादि दृढं मायावादव्यपाश्रयम् ।
अद्वैते निरतं नित्यं तं वन्दे व्यासमञ्जसा ॥

यो वादिनो वशीकृत्य महतो वेदयुक्तितः ।
वेदार्थस्थापनं चक्रे तं वन्दे शङ्कराभिधम् ॥

येनेह दारितास्सर्वे वादिनो न्यायपात्रिभिः ।
वेदान्तं धनुरारोप्य कपिलप्रमुखा अमी ॥

मुमुक्षुसार्थवाहेन वेदतर्कवपुर्दृ(र्भृ)ता ।
शत्रवो ब्रह्मविद्यायास्सुरेशाख्यं नमामि तम् ॥

बोधध्वनिः प्रत्यगादिर्येषु साक्षाद्यथार्थकम ।
तानहं सर्वदा वन्दे गुरून्मन्मोहभेदिनः ॥

तैत्तिरीयकोपनिषद्भाष्यवार्तिकसङ्गतिम् ।
करोमि श्रद्धया भक्त्या न तु बह्वर्थवत्त्वतः ॥

सत्यं ज्ञानमित्यादिनाद्यश्लोकेन श्रोतॄणां सुखप्रबोधार्थं नमस्कारव्याजेन उपनिषदर्थं संक्षेपतो दर्शयति । किमिति नमस्कारव्याजेन उपनिषदर्थः संक्षेपतो दर्शित इति चेत्, नमस्कारस्यापि किञ्चित्प्रयोजनं दर्शयितुम्,

किं तत्प्रयोजनमिति चेत्, चिकीर्षितग्रन्थस्याविघ्नेन सिद्धिः प्रचय . . . . । एवं श्लोकस्य तात्पर्यमुक्तं नमस्कारप्रयोजनश्च । इदानीं प्रतिपदं, व्याख्यायते ।

सत्यं ज्ञानमनन्तमेकसकलं (ध्वस्तान्धकारं परं)
निर्द्वैतं हृदि पद्ममध्यनिलयं निःशेषधीसाक्षिणम् ।
वेदान्तोपनिविष्टबोधविषयं प्रत्यक्तया योगिनां
भक्त्या तं प्रणिपत्य वेदशिरसो वक्ष्यामि सद्वार्तिकम् ॥

सत्यमवितथम्, ज्ञानं चिद्रूपम्, अनन्तं देशतोऽनवच्छिन्नम् । एकसकलं कालतो वस्तुतश्चानवच्छिन्नम् । ध्वस्तान्धकारमविद्यारहितम् । परमुत्कृष्टम् । निर्द्वैतं निर्विशेषमेकरसं न कपित्थफलवदनेकरसम् ।

End:

ध्यानैकताननिबिडाहितचेतसोऽ[यम]जं
प्रध्वस्तकृत्स्ननिजमोहसमस्तदोषम् । इति ॥

ध्यानस्यैकतानः एकविस्तारः स एव निबिडं तत्र आहितं चेतो येषान्ते ध्यानैकताननिबिडाहितचेतसः । यमजं प्रविशन्तीति सम्बन्धः । स एवाजो विशेष्यते—प्रध्वस्तकृत्स्ननिजमोहसमस्तदोषमिति । निराकृतस्वाविद्यातत्कार्यमित्यर्थः । केन मार्गेण प्रविशन्त्येवंपरमित्यत्राह—

प्रत्यक्पथा शुभधियो यतयोऽभ्युपेत्य
यं देवमेकममलं प्रविशन्ति सोऽव्यात् ॥ इति ॥

आत्माख्यमार्गेणेत्यर्थः । के प्रविशन्तीत्यत्राह—शुभधिय इति । निर्मलान्तःकरणाः परमहंसा इत्यर्थः । अभ्युपेत्येति । सामीप्यं गत्वेत्यर्थः । देवमिति स्वयंप्रकाशमित्यर्थः । अमलमिति नित्यमुक्तमित्यर्थः । सोऽव्यात् रक्षतु । मामात्मप्रदानेनेत्यर्थः । उत्तरं वार्तिकद्वयमतिरोहितार्थम् ॥

तैत्तिरीयकसारस्य वार्तिकामृतमुत्तमम् ।
मस्करीन्द्रप्रणीतस्य भाष्यस्यैतद्विवेचनम ॥
मुमुक्षुसार्थवाहस्य भवनामभृतो यतेः ।
शिष्यश्चकार तद्भक्त्या सुरेशाख्यो महार्थवित् ॥

Colophon:

इति श्रीमत्प्रत्यग्बोधभगवत्पूज्यपादशिष्येण भगवता विश्वानुभवाख्येन दशरथनन्दनमात्मत्वेन स्मरता विरचिता तैत्तिरीयवार्तिकव्याख्या ॥

The scribe adds—

ब्रह्मानन्दमुनीन्द्रस्य प्रीतये करुणात्मनः ।
ग्रन्थोऽयं लिखितस्सम्यक् सुब्रह्मण्याद्विजन्मना ॥

इत्थं मया विलिखिते मतिविभ्रमाद्वा
दोषादथाङ्गुलिभवादपि पुस्तकेऽस्मिन् ।
यद्वर्णपङ्क्तिपतनं तदशेषमत्र
सन्तस्समादधतु सम्भ्रममन्तरेण ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि युक्तमयुक्तं वा मम दोषो न विद्यते ॥

आदर्शदोषान्मतिविभ्रमाद्वा श्रुत्यर्थहीनं लिखितं मया यत् ।
तत्सर्वमार्यैः परिशोधनीयं प्रायेण मुह्यन्ति हि ये लिखन्ति ॥

R. No. **2930.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 291. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of the Raja of Chirakkal, Malabar district.

Bound in two volumes.

नाट्यशास्त्रम्.

NĀṬYAŚĀSTRAM.

Foll. 1*a*—290*b*. Fol. 291 is left blank.

Same work as that described under No. 12999 of the D.C.S. MSS., Vol. XXII.

Contains 36 Adhyāyas dealing with the subjects given below :—

१. नाट्योत्पत्तिः.
२. प्रेक्षागृहलक्षणम्.
३. रङ्गदैवतपूजाविधानम्.
४. ताण्डवलक्षणम्.
५. पूर्वरङ्गविधानम्.
६. रसविकल्पः.
७. भावव्यञ्जनम्.
८. उपाङ्गविधानम्.
९ हस्ताभिनयः.
१०. शरीराभिनयः.
११. चारीविधानम्.
१२. मण्डलविधानम्.

१३. गतिप्रचारः.
१४. . . . . .
१५. छन्दोविधानम्.
१६. छन्दोविचितिः.
१७. वागभिनयः.
१८. भाषाविधानम्.
१९. वागङ्गाभिनयकाकुस्वरव्यञ्जनम्.
२०. दशरूपकविधानम्.
२१. सन्ध्यङ्गविकल्पः.
२२. वृत्तिविकल्पः.
२३. आहार्याभिनयः.
२४. सामान्याभिनयः.
२५. बाह्योपचारः.
२६. चित्राभिनयः.
२७. सिद्धिव्यञ्जनम्.
२८. आतोद्यविधिः.
२९. ततातोद्यविधानम्.
३०. सुषिरातोद्यविधानम्.
३१. तालव्यञ्जनम्.
३२. ध्रुवाविधानम्.
३३. वाद्याध्यायः.
३४. प्रकृतिविचारः.
३५. भूमिकापात्रविकल्पः.
३६. नाट्यावतारः.

Beginning :

प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् ॥
समाप्तजप्यं व्रतिनं स्वसुतैः परिवारितम् ।
अनध्याये कदाचित्तं भरतं नाट्यकोविदम् ॥
मुनयः पर्युपास्यैनमात्रेयप्रमुखाः पुरा ।
पप्रच्छुस्ते महात्मानः नाट्यवेदसमुद्भवम् ॥

* * * *

एतस्मिन्नन्तरे देवैस्सर्वैरुक्तः पितामहः ।
कारयत्वत्र भगवानयनं नाट्यमण्टपे ॥
बलिप्रदानैर्होमैश्च मन्त्रौषधिसमन्वितैः ।
जप्यैर्भक्ष्यैश्च पानैश्च बलिस्समुपकल्प्यताम् ॥
मर्त्यलोकेष्वयं वेदश्शुभं पूजामवाप्स्यति ।
अपूजयित्वा रङ्गं तु नैव प्रेक्षां प्रवर्तयेत् ॥
अप्रपूज्याथ रङ्गं तु यः प्रेक्ष्यं कल्पयिष्यति ।
तस्य तन्निष्फलं ज्ञानं तिर्यग्योनिश्च यास्यति ॥

यज्ञेन सम्मितं (विद्या)द्रङ्गदैवतपूजनम् ।
तस्मात्सर्वप्रयत्नेन कर्तव्यं रङ्गपूजनम् ॥

नर्तको नृपतिर्वापि यः पूजां न करिष्यति ।
कारयिष्यति वा नैव प्राप्स्यत्यापदमेव सः ॥

यथाविधि यथादृष्टं यस्तु पूजां करिष्यति ।
स लप्स्यते शुभानर्थान् स्वर्गलोकञ्च यास्यति ॥

एवं भवत्विति प्राह द्रुहिणस्सह दैवतैः ।
नाट्यपूजां कुरुष्वेति मामेवं समचोदयत् ॥

Colophon:

इति भारतीये नाट्यशास्त्रे नाट्योत्पत्तिर्नाम प्रथमोऽध्यायः ॥

End:

य इदं शृणुयात्प्रोक्तं नाट्यशास्त्रं स्वयंभुवा ।
प्रयोगं यश्च कुर्वीत प्रेक्षते चावधानवान् ॥

या गतिर्वेदविदुषां या गतिर्यज्ञयाजिनाम् ।
यं गदे . . . . ॥

नृपधर्मेषु सर्वेषु कीर्त्यते स महाफलम् ।
प्रेक्षणीयप्रदानं तु सर्वदानेषु पूज्यते ॥

न तथा गन्धमाल्येन देवास्तुष्यन्ति पूजिताः ।
यथा नाट्यप्रयोगज्ञै . . . . ॥

गान्धर्वं चैव नाट्यं च यस्सम्यगनुपश्यति ।
लभते स गतिं पुण्यां समं ब्रह्मर्षिभिर्नरः ॥

एवं नाट्यप्रयोगे बहुविधविहितं कर्म शास्त्रप्रणीतं
न प्रोक्त . . कादनुकृतिकरणं तच्च कार्यं विधिज्ञैः ।
किञ्चान्यत्सत्यपूर्वं भवतु वसुमती शाश्वती नष्टरोगा
शान्तिर्गोब्राह्मणानां नरपतिरवनिं पातु चेमां समग्राम् ॥

Colophon:

इति भारतीये नाट्यशास्त्रे नाट्यावतारो नाम षट्त्रिंशोऽध्यायः ॥

R. No. 2931.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 156. Lines, 20 in a page. Dēvanāgarī' Good.

Transcribed in 1919-20 from a MS. of Tekkēmaṭham, Trichur.

न्यायचन्द्रिका.

NYĀYACANDRIKĀ.

A treatise written in support of the view of the Advaita-Vēdānta that Brahman alone is real and the phenomenal world is unreal. The Nyāya and Mīmāṁsā systems of philosophy are criticised herein. By Ānandapūrṇamunīndra alias Vidyāsāgara, pupil of Ānandābhayānandapūjyapāda.

Complete in four Paricchēdas.

Beginning:

आविरस्तु महस्तन्नो गौरीसन्ध्याघनोदितम् ।
अन्तरायतमोहन्तृ नरस्तम्बेरमाकृति ॥
स्वप्रामाण्यविभूषणा श्रुतिवधूः प्रान्वेषमाणापि यं
दृष्ट्वा लक्षणतो न वक्तुमशकत्सर्वप्रमाणातिगम् ।
शुद्धानन्दचिदद्वयात्मवपुषं द्वैतेन्द्रजालास्पदं
वन्दे चन्द्रविभूषणं गिरिसुतादत्तार्धदेहं हरम् ॥

अथ किमिदं प्रमायाः स्वतस्त्वं नाम । किं स्वजन्यत्वं प्रमाजन्यत्वं वा ज्ञानजन्यत्वं वानुभवजन्यत्वं वा प्रमाकारणजन्यत्वं वा ज्ञानकारणजन्यत्वं वा अनुभवकारणजन्यत्वं वा प्रमाकारणव्यतिरिक्ताजन्यत्वं वा ज्ञानकारणव्यतिरिक्ताजन्यत्वं वा अनुभवकारणव्यतिरिक्ताजन्यत्वं वा प्रमाकारणजन्यत्वे सति तद्व्यतिरिक्ताजन्यत्वं वा ज्ञानकारणजन्यत्वे सति तद्व्यतिरिक्ताजन्यत्वं वा अनुभवकारणजन्यत्वे सति तद्व्यतिरिक्ताजन्यत्वं वा अन्यद्वा । न तावदाद्यः कल्पः आत्माश्रयप्रसङ्गात् । न द्वितीयः संप्रतिपत्तेरनुमेयादिप्रमाणानां लिङ्गादिप्रमाजन्यत्वात्सर्वप्रमाणानामीश्वरप्रमाजन्यत्वाच्च ।

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकानन्दाभयानन्दपूज्यपादशिष्येण भगवता आनन्दपूर्णमुनीन्द्रेण विद्यासागरापरनामधेयेन विरचितायां न्यायचन्द्रिकायां प्रथमः परिच्छेदः ॥

End:

यदपि कश्चिन्मीमांसकम्मन्यो मन्येत कतकचूर्णस्य चूर्णान्तरनाशकत्वं स्वरूपाभावकर्तृत्वमधःपतनं वा । नाद्यः रजोन्तरस्य कतकरजसश्चाधोवस्थानात् । न द्वितीयः । रजोन्तरस्याधःपाते कतकरजो हेतुः, तस्याधःपाते तद्गुरुत्वमिति । तदयुक्तम् । गुरुत्वस्याधःपाते गुरुत्वान्तराभावात् । स्वहेतुवत् द्रव्यपातो निमित्तमिति चेन्न । सहैव पतनाद्गुरुत्वस्य गुरुत्वान्न पतनक्रियेति चेत् नूनम् । वैशेषिकैर्विप्रलब्धोऽसि । रजसः पतनं नास्ति द्रव्यत्वादिति ब्रुवाणः कथमपरथा वार्येत तस्मात् ब्रह्मात्मतत्त्वसाक्षात्कारान्निखिलानर्थनिदानाज्ञानीनवृत्तौ परमानन्दसंवेदनप्राप्तिः कैवल्यमिति सकलमतिमङ्गलम् ॥

परापरस्वरूपेण परं यत्तत्प्रकाशितम् ।
श्रीमन्महाबलं देवं वन्दे गोकर्णमण्डनम् ॥
विद्यासागरसम्भूतन्यायचन्द्रस्य चन्द्रिका ।
व्याप्य दिङ्मण्डलं जीयादियमाचन्द्रभास्करम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यभयानन्दपूज्यपादशिष्येण भगवता आनन्दपूर्णमुनीन्द्रेण विद्यासागरापरनामधेयेन विरचितायां न्यायचन्द्रिकायां चतुर्थः परिच्छेदः ॥

R. No. 2932.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 28. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. acquired through Paṇḍit Gōpīnāthānanda Śarman of Parlakimedi.

अलङ्कारशेखरम्.

ALAṄKĀRAŚĒKHARAM.

Fol. 3*b* is left blank.

A commentary on the Kāvyālaṅkārasūtras of Śauddhōdani which is a work on poetics and rhetoric. Same work as that printed in No. 50 of the Kāvymālā series, Bombay, but with variations in the readings.

The commentary is attributed to Kēśava, who composed it under the orders of the famous Māṇikyacandra of Delhi, the author of

"Saṅkēca", a commentary on the Kāvyaprakāśa of Mammaṭa. The genealogy of Māṇikyacandra is given thus—

Suśarman
|
Rāmacandra
(who conquered the
king of Kavila)
|
Dharmacandra
|
Māṇikyacandra.

Complete in eight Ratnas.

Beginning:

प्राणान् कृशोदरीणां राधानयनान्तसर्वस्वम् ।
तेजस्तमालनीलं शरणागतवज्रपञ्जरं वन्दे ॥
(यत्र विशेषणद्वारा विशेषलाभः सा सुधर्मता)

स्वप्रकाशचिदानन्दमयाय परमात्मने ।
अविद्यानिबिडध्वान्तभास्कराय नमोऽस्तु ते ॥
ग्रन्थाः काव्यकृतां हिताय विहिता ये सप्त पूर्वं मया
ते सप्तार्णवसम्प्लवव्यसनिभिश्शक्याः परं वेदितुम् ।
इत्यालोच्य हृदा मदालसवधूपादारविन्दक्वणन्-
मञ्जीरध्वनिकोमलोऽयमधुना प्रस्तूयते प्रक्रमः ॥
आसीत्प्रत्यर्थिपृथ्वीरमणकमलिनीबृन्दहेमन्तमासः
कीर्तिभ्राजस्सु(त्सु)शर्मान्वयकुमुदवनीयामिनीजीवनाथः ।
राजद्राजन्यराजीमकुटमणिगणप्रोल्लसत्पादपीठः
प्रोद्यत्साम्राज्यलक्ष्मीशिथिलितनहुषो रामचन्द्रोऽवनीन्द्रः ॥

* * * *

क्षीराम्भोधेश्शशीव श्रुतिरिव वदनाद्वेधसो रामचन्द्रा-
दस्मादुद्यत्प्रतापस्समजनि सुमना धर्मचन्द्रो नरेन्द्रः ।
यस्याद्यापि प्रसन्नास्स्मितसुभगमुखाः स्विद्यदश्वत्कपोला
रोमाश्चस्तम्भभव्यास्त्रिदशयुवतयो हन्त गायन्ति कीर्तिम् ॥

* * * *

प्रत्यर्थिभूपनिरवग्रहराज्यलक्ष्मीधम्मिल्लमाल्यसुरभीकृतपादपद्मः ।
तस्मादजायत समस्तगुणाभिरामो माणिक्यचन्द्र इति राजकचक्रशक्रः ॥

काव्यालङ्कारपारङ्गममतिरखिलक्ष्माभृतां चक्रवर्ती
सर्वेषामस्तु काव्ये मतिरतिनिपुणेत्याशयं सन्निदेश्य ।
वेदान्तन्यायविद्यापरिचयचतुरं केशवं सन्नियोज्य
श्रीमन्माणिक्यचन्द्रः क्षितिपतितिलको ग्रन्थमेतं विधत्ते ॥

* * * *

अलङ्कारविद्यासूत्रकारो भगवान् शौद्धोदनिः परमकारुणिकः स्वशास्त्रे प्रवर्तयिष्यन् प्रथमं काव्यस्वरूपमाह—

काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत् ।

आदिपदेनालङ्कारादिपरिग्रहः । तथाच तदुभयान्यतरत्वं लक्षणम् ।

End:

श्रुतमेवान्यथाकारमक्षराणि कियन्त्यपि ॥
काव्यालङ्कारविद्यायां शौद्धोदनिरसूत्रयत् ।
उपक्रमो दोषगुणावलङ्कारोऽथ वर्णकः ॥
सम्प्रदायं कवेस्तस्य सामर्थ्यमथ विश्रमः ।
अष्टौ रत्नानि दीप्तानि सन्त्यलङ्कारशेखरे ॥
चत्वारस्स्युरलङ्कारे संप्रदाये मरीचयः ।
सामर्थ्ये द्वौ परस्मिंस्तु पञ्चके स्युस्त्रयस्त्रयः ॥
मामकीनां कृतिमिमां द्विषन्तो दूषयन्ति ये ।
काव्यवार्तां न जानन्ति नूनं ते पांसुलीसुताः ॥
आस्ते यद्यपि पूर्वपण्डितकृता व्याख्यैव संख्यावता-
मानन्दाय तथापि केशवकवेर्वाचामियं गुम्भना ।
व्याख्या सौष्ठवशब्दलाघवमिथस्सम्बन्धपूर्वापर-
प्रत्यर्थप्रतिबन्धनिर्मलगुणा कुत्रान्यतो लभ्यताम् ॥
तर्कप्रौढमतिः प्रशस्तकविताबल्लीवसन्तोत्सवः
कोशव्याकरणप्रपञ्चचतुरोऽलङ्कारपारङ्गमः ।
श्रीमत्केशवमिश्रमद्भुतगुणावासं नियुज्य स्वयं
चक्रे शक्रसमः प्रतापरुचिरो माणिक्यचन्द्रो नृपः ॥

Colophon :

इति श्रीकेशवमिश्रकृते अलङ्कारशेखरे विश्रमरत्नमष्टमम् ॥
समाप्तश्चायं ग्रन्थः ॥

R. No. **2933.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 104. Lines, 20 in a page. Dēvanāgarī Good,

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūtalūrmana, Narēi, Malabar district.

अमरकोशव्याख्या—सुभूतिचान्द्रिका.
AMARAKŌŚAVYĀKHYĀ ; SUBHŪTICANDRIKĀ.

Foll. 1*a*—103*a*. Foll. 103*b* and 104 are left blank.

A commentary called Subhūticandrikā on the Amarakōśa which is described under Nos. 1620 to 1685 of the D.C.S. MSS., Vol. III : by Subhūticandra.

Contains the first Kāṇḍa complete and the second Kāṇḍa incomplete.

Beginning :

वैवस्वतो मनुर्नाम यमौ च यमु(मलौ)समौ ।
नासत्यदस्रे . . . . रवेस्सुताः ॥ इति ॥

एते वयं वृत्ररिपू तथोभौ नासत्यदस्रौ वरुणस्तथेति । वायुपुराणम् । इह पुनर्भूणां द्वे च, सप्तमी शौण्डैः, छत्रिणो यान्तीत्यादि, तत्सहचरितस्य तच्छब्देनावधानात् द्विवचनम् । यथा भारते—

उभावेतौ न सोत्साहौ नासत्याविति मे मतिः ।

यथा च माघे—

अनुमस्वतुस्तमथ दस्रयोस्सुतौ ।

शृङ्गारप्रकाशे तु । विरूपे एकशेषो यदुदाहृतः । तस्य च ।सिद्धिरभि-(पि)धर्मकोशटीकायां संस्कृता धर्मा इत्यत्र गुणो यङ्लुकोरिति ज्ञापकात् यशोमिश्रेणोक्ता । तत्र द्विवचनोपपत्तिं प्रति न्यायान्वेषणप्रयासादन्यन्न किंचित्फलं पश्यामः । उर्वशीमुखाः उर्वश्याद्या अप्सरसः स्वर्वेश्याश्चोच्यन्ते । अपसारयन्ति स्खलयन्तीत्यनेहोऽङ्गिरसोऽप्सरसः इति निपातनादसन्प्रत्ययादिरौ(न्त औ)णादिकः । वरुणप्रभवत्वाद्वा अब्भ्यस्सृता इत्यसुन्(र्थः) । अप्सरसः

जातौ व्यक्त्याश्रयं बहुत्वम्। व्यक्तौ तु तदवयवाश्रयम्। तथा च भट्टिमतम्—दारादिशब्दः कदाचित् जातौ प्रयुज्यते ।

* * * *

वामनादिमतमेतत् । तथाहि—'बहवश्च समास्सिकता वर्षास्सुमनोजलौकसाप्सरसः' इति वामनः ।

वासो दशाप्सरसो वर्षापः कृत्तिका मघाः ।

बहुत्वञ्च सदैकत्वमानवतेश्च विंशतेः ॥ इति चन्द्रगोमी च ॥

अन्ये तु नाद्रियन्ते । तथा चात्वसोरित्यत्राप्सरा इत्युदाहृतम् ।

प्रयुक्तश्च कप्फणाभ्युदये—

'सान्द्रकाण्डपटसंवृतमूर्तेर्दन्तिदन्तशयनीयशयस्य ।

मानिनः कुलवधूरिव रागादप्सरा व्यधित पार्श्वमशून्यम्' ॥

* * * *

Colophon:

इति सुभूतिचन्द्रकृतायां अमरकोशटीकायां प्रथमः काण्डः ॥

End:

सीदन्ति अत्र सदनम्, भवन्ति तिष्ठन्त्यत्र भवनम्, अगान् वृक्षान् स्तम्भादिभूतान् राति गृह्णातीति कः अगारम् । अन्येषामपीति प्रकृतेरन्त्यस्य दीर्घत्वम्, 'वेश्मनिशान्तमगार'मिति नाममालायामार्याछन्दः ।

स त्वं प्रशस्ते महिते मदीये वसंश्चतुर्थोऽग्निरिवाग्न्यगारे । इति रघुश्च । तिमिरवन्मन्देरिव(:किरच्)शकटं पीठं क्रोडं रसनन्तुन्नगां मन्दरपुर्यावित्यरुणेन स्त्रीक्लीबयोर्मन्दिरं पठ्यते। बाणप्रयोगप्रजातिप्रथिम्नमन्दरातस्तपारित्युदाहृतश्च(?)। तेनैवास्त्रियाम् . . . . . ॥

R. No. **2934.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 131. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Tekkēmaṭham, Trichur.

कैवल्यदीपिका, सव्याख्या.

KAIVALYADĪPIKĀ WITH COMMENTARY.

Fol. 48*b* is left blank.

The Kaivalyadīpikā is a work by Bōdhānanda, dealing with the attainment of soul-emancipation according to the Advaita-Vēdānta. It is followed by a commentary called Snēha by Nārāyaṇapriyayati, pupil of Rāmatīrtha.

Complete in four Adhyāyas.

Beginning:

श्रीमत्पुण्यपरागघर्षणकृतत्यागाघमालिन्यस-
च्चित्तश्रीमुकुरे श्रुतश्रुतिशिरस्तात्पर्यतो युक्तिभिः ।
उक्ताभिर्गुरुणा विरोधशमनात्सम्भावनाबुद्धिम-
च्छिष्यस्याहृतसाधनस्य सुसुखं यत्संस्फुरेत्तं भजे ॥

* * * *

तावाद्रिये परकृपामयदिव्यदेहौ दुःखाब्धिगाखिलसमुद्धरणैकदीक्षौ ।
नारायणं परशिवं परमात्मभूतं व्यासाभिधं जगति शङ्करसंज्ञकञ्च ॥
बोधानन्दाय यतये बोधानन्दैकहेतवे ।
आविर्भूतब्रह्मबोधानन्दरूपाय वा नमः ॥

इह खलु मन्दमतीन् बहुग्रन्थप्रवृत्तिश्रद्धाबुद्धिविहीनान् प्रायेण जनानस्मिन् कलियुगे उपलभ्य परमकृपालुः बोधानन्दयतीश्वरः कथन्नु नामैषां दुःखसागरतरणं भवेदित्युपदेशग्रन्थं ग्रन्थतो . . मनल्पार्थगर्भितं कैवल्यदीपिकाख्यं चकार । तस्य,

तन्द्र्या निरुद्धगमनो निद्रयालिङ्गितो भृशम् ।
शास्त्रार्थाटनहीनोऽतो व्याकर्ता स्यामहं कथम् ॥

तथापि कृपानिमित्तगुर्वीश्वरप्रसादवशाद्यथामति संक्षेपतो विवरणं करिष्ये ।

क्षिपामि स्नेहममलमाधिकैवल्यदीपिकम् ।
अस्यास्सन्धुक्षणायास्तु सज्जनोऽनुगुणानिलः ॥

तत्र तावच्चिकीर्षितस्य ग्रन्थस्याभिमतसकलप्रयोजनसिद्धये सकलदेवतास्वरूपं परब्रह्म नमस्करोति । अर्थात् विषयप्रयोजनसम्बन्धाधिकारिणश्च ग्रन्थारम्भे अपेक्षितान् दर्शयति—जगन्निर्वाहकेति ।

जगन्निर्वाहकाज्ञानमायावैभवसाक्षिणे ।
सच्चिदानन्दरूपाय जिष्णवे विष्णवे नमः ॥

अज्ञानमेव माया सैव वैभवम् । जगन्निर्वाहकमज्ञानमायावैभवं यस्य सः । जगन्निर्वाहकाज्ञानमायावैभवः स चासौ साक्षी चेति विग्रहः ।

* * * *

Colophon:

इति नारायणप्रिययतिविरचिते कैवल्यदीपिकास्नेहे प्रथमोऽध्यायः ॥

End:

समर्पितो मया ग्रन्थस्सर्वकल्याणकारणे ।
विष्णौ भक्तजनस्वान्तलालिते परमे पदे ॥

अथ वा "तद्विष्णोः परमं पद"मिति श्रुतेः पद्यत इति पदं निरुपाधिकं रूपम्, परमञ्च तत्प्रकृष्टतमं तस्मिन्परमे पदे समर्पितो न्यस्त इत्यर्थः । तदर्थत्वाद्ग्रन्थस्य तत्समर्पणमुचितमेव । ईश्वर एव प्रचयगमनं कर्तुं प्रभवति, ततोऽपि तत्र समर्पणमुचितम् । 'करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत्' इति पुराणवचनाच्चेति ॥

सन्मार्गैकगतिः खलेषु विसृजन् गा उष्णरूपा जनैः
पूज्योऽधृष्यतनुर्विपक्षपत(तप)नः सूर्याख्यया चादृतः ।
सल्लोकान्मधुरैस्सदाप्यमृतगोजालैस्सुखाढ्यान् जनान्
कुर्वाणो जयतीनचन्द्रसदृशश्श्रीरामतीर्थो गुरुः ॥
वैकुण्ठपुष्पाणि यदर्चनायां पाणिच्युतान्यच्छतराणि नित्यम् ।
गङ्गातरङ्गावलिवत्प्रथन्ते वन्दे वृषक्षेत्रगतं तमीशम् ॥
वल्यङ्कितः पूर्वप(व ?)कारशोभी द्विरूपतोपेतठवर्ण एषः ।
प्रवक्ति येषां खलु नामधेयमगस्त्यक[:] ग्रामभुवं गतानाम् ॥
गृहेषु यो दक्षिणभागसंज्ञे तेषूपजातात्मकलेबरोऽथ ।
मोक्षाश्रमी जात इयं हि टीका तेन प्रबन्धो भवबन्धमुक्त्यै ॥

Colophon:

इति नारायणप्रिययतिविरचिते कैवल्यदीपिकास्नेहे चतुर्थोऽध्यायः ॥ समाप्ता चेयं व्याख्या ॥

The scribe adds—

भवत्रातेन लिखितमिदम् ॥

R. No. 2935.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 82. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Tippan Nambūdirippāḍ, Ponnūrkottamana, Travancore State.

जानकीहरणम्.

JĀNAKĪHARAṆAM.

Foll. 1*a*—81*b*. Fol. 82 is left blank.

A poem in twenty Sargas describing the story of the Rāmāyaṇa.

The work is printed in Bombay under the editorship of G. R. Nandargikar with English notes, etc. This edition contains only ten Sargas. There is another edition by Haraprasāda Śāstri of Calcutta containing fifteen Sargas of the text. The MS. now under notice contains twenty Sargas, and seems to be a true copy, from the Sanskrit original.

Complete in twenty Sargas.

Beginning:

आसीदवन्यामतिभोगभाराद्दिवोऽवतीर्णा नगरीव दिव्या ।
क्षत्रानलस्थानशमी समृद्धा पुरामयोध्येति पुरी पराध्या ॥
यत्सौधशृङ्गाग्रसरोजमालारत्नप्रभाविच्छुरितश्शशाङ्कः ।
जगाम रोषादिव लोहितत्वं पौराङ्गनावक्त्रकृतावमानः ॥

* * * *

Colophon:

इति कुमारदासकृतौ जानकीहरणे प्रथमस्सर्गः समाप्तः ॥

End:

ईर्ष्यामोहस्मयमदधनप्रेमहीनान् महीनान्
कृत्वा भ्रातॄन् महति विभवे न्यस्तदासस्तदा सः ।
रामोऽरक्षत्कृतपरि(र)[नि]हितस्सोदयायां दयायां
स्थित्वा पृथ्वीमविचलतया तत्समस्तां समस्ताम् ॥
नित्यं सद्गुणभक्तिरिन्द्रियदमश्श्रीसंयतस्संयत-
श्शस्त्रद्योतितमूर्ध्नि मुक्तहृदयोऽभीसङ्गतस्सङ्गतः ।

विद्वानस्य कवेः पितार्थहृदयं धीमानितो मानितो
लङ्कैश्वर्यभुजः कुमारमणिरित्यासन्नयस्सन्नयः ॥
येनान्यः प्रकृतिं निराकृतवता सम्मानितो मानितो
यस्य स्वाङ्गमभिन्नतो रिपुभृशं नाशोभितश्शोभितः ।
श्रीमेघोऽस्य कवेरसौ किल बृहद्धामातुलो मातुलो
दृष्टत्रासजडं द्विषामविगतत्रासेन या सेनया ॥
श्रीमानेकश्शरण्यः परिभवविपदाभाजनानां जनानां
रूपेणानुप्रयातो दिवमतिसुभगं रञ्जयन्तं जयन्तम् ।
भ्राता तन्मातुरन्या शशिधवलयशःकारणानां रणानां
कर्तुं पुत्रोऽग्रबोधिर्जनशिरसि लसद्भासुराज्ञस्सुराज्ञः ॥
आदायैनं दशायां स्थितमपि तदहस्त्रस्तनाभ्यां स्तनाभ्यां
तुष्टे तस्मिन् गदानामरिहतपितृके पारयन्तौ रयन्तौ ।
आत्मापत्याविशेषं पुपुषतुरहतप्रेमदान्तौ मदान्तौ
यत्सानाथ्यात्स काव्यं व्यरचयदसुरद्विण्महार्थं महार्थम् ॥

Colophon :

इति सिंहलस्य कुमारदासस्य कृतौ जानकीहरणे महाकाव्ये विंशस्सर्गः परिसमाप्तिमगमत् ॥

R. No. 2936.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 118. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919-20 from a MS. of the Sanskrit Library, Bobbili Samsthanam, Bobbili.

मार्कण्डेयसंहिता (पाञ्चरात्रान्तर्गता).
MĀRKAṆḌĒYASAṀHITĀ (PĀÑCARĀTRĀNTARGATĀ).

Foll. 1*a*—118*a*. Fol. 118*b* is left blank.

One of the Saṁhitās of the Pāñcarātrāgama. The subjects dealt with herein are apparent from the names of the Adhyāyas given below. This Saṁhitā is stated to have been at first narrated by Mārkaṇḍēya to the famous emperor Pṛthu, who is said to have ruled this earth in the beginning of the Kṛtayuga.

Contains 1 to 30 Adhyāyas complete and 31st incomplete.

Deals with the following subjects :—

१. तन्त्रानुक्रमणविधानम्.
२. भूपरीक्षाविधानम्.
३. शिलासङ्ग्रहणम्.
४. विमानलक्षणम्.
५. मृत्संस्कारविधिः.
६. शूलस्थापनविधिः.
७. बालस्थानविधिः.
८. प्रतिमालक्षणविधानम्.
९. बेरादिलक्षणविधानम्.
१०. देव्यादिमूर्तिलक्षणम्.
११. समाराधनोपकरणविधानम्.
१२. आचार्यलक्षणदीक्षाविधिः.
१३. अङ्कुरार्पणम्.
१४. प्रतिष्ठाविधानम्.
१५. नित्यार्चनविधिः.
१६. अग्निकार्यविधानम्.
१७. नित्योत्सवविधानम्.
१८. पञ्चशुद्धिविधानम्.
१९. मण्डलविधानम्.
२०. चतुष्षष्टिपूजा.
२१. ध्वजारोहणविधिः.
२२. उत्सवविधानम्.
२३. पवित्रारोपणविधानम्.
२४. डोलारोपणविधानम्.
२५. दीपारोपणविधिः.
२६. प्रायश्चित्तविधानम्.
२७. Do.
२८. स्नपनविधानम्.
२९. उत्पातशान्तिविधानम्.
३०. अन्तर्यागविधानम्.
३१. मुद्राविधानम्.

Beginning :

आदौ कृतयुगे पूर्वं पृथुर्वैनः प्रतापवान् ।
शशास वसुधां नित्यं प्रजा धर्मेण पालयन् ॥
नीतिशास्त्रविधानोक्त्या नित्यं स्वाध्यायतत्परः ।
जितेन्द्रियो जितक्रोधो जितारिस्सत्यसंश्रयः ॥
त्रिवर्गस्य फलं प्राप्य मनसा चिन्तयन्नृपः ।
मुक्त्युपायं कथं मे स्यादिति नित्यं शुचिव्रतः ॥

*   *   *   *

अरण्यं नैमिशं नाम ययौ मित्रपुरस्सरम् ।
मण्डलं तत्र दृष्ट्वाथ ऋषीणामूर्ध्वरेतसाम् ॥

*   *   *   *

भगवन् कुशलं कच्चित्सर्वत्र नियमेषु वः ।
चिरार्जितानां तपसां प्रत्यूहो नेह विद्यते ॥

इति राज्ञो वचश्श्रुत्वा मार्कण्डेयोऽब्रवीन्नृपम् ।

* * * *

मार्कण्डेय उवाच—

कारणं तव वक्ष्यामि मुक्त्युपायस्य साधनम् ।
शृणुष्वावहितो राजन् संसाराम्बुधिपारगम् ॥

* * * *

Colophon:

इति पाञ्चरात्रे मार्कण्डेयसंहितायां तन्त्रानुक्रमणाविधानं नाम प्रथमोऽध्यायः ॥

* * * *

Colophon:

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां अन्तर्यागविधानं नाम त्रिंशोऽध्यायस्समाप्तः ॥

End:

श्रीमार्कण्डेयः—

अन्यग्रामे स्थितान् बिम्बानपूजानक्रमस्थितान् ।
तद्बिम्बाद्यश्च संयोज्य ध्वजनित्योत्सवादिकम् ॥
कारयेद्देवदेवस्य उत्सवन्तु न दोषभाक् ।
पूर्वं वैखानसे बिम्बं भगवद्विग्रहस्थिते ॥
पश्चात्तु पञ्चरात्रेण कुर्यात् . . . . . ।

R. No. 2937.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 318. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Tekkēmaṭham, Trichur.

Bound in two volumes.

संक्षेपशारीरकम्, तत्त्वबोधिनीसहितम्.

SAṄKṢĒPAŚĀRĪRAKAM WITH TATTVABŌDHINĪ.

Foll. 1*a*—317*b*. Fol. 318 is left blank.

Same work as that described under R. No. 2290 ante, but this manuscript contains the beginning and the end. The commentator Narasiṁhāśrama herein salutes Vyāsa, Saṅkarācārya, Jagannātha-yatīndra, Gīrvāṇēndrasarasvatī, and Sarvajñātman.

Contains the Adhyāyas one and four complete.

Name of the scribe: Vāsudēva, disciple of Brahmānandayatīndra.

Beginning:

यस्याज्ञानविभूतिरम्बरमरुद्दह्यम्बुभूतोद्भवा
स्वाभाभासितभास्वदादिवपुषा येनेदमाविष्कृतम् ।
यस्मिन् सत्यसुखानुभूतिमहिमन्यारोपिता वादिभिः
विष्णुश्शङ्कर आत्मभूरिति भिदा तत्सान्निधत्तां महः ॥

अव्यासुरव्याजकृपानृसिंहपदरेणवः ।
यन्नामनिगमाधीतिरर्थितार्थसमर्थिनी ॥

* * * *

वेदान्तार्थसरोजेषु सहस्रांशुरिवापरः ।
भासते व्याससंज्ञो यः तं वन्दे हरिमीश्वरम् ॥

नमश्श्रीशङ्कराचार्यगुरवे शङ्करात्मने ।
शरीरिणां शङ्कराय शङ्करज्ञानहेतवे ॥

श्रीमज्जगन्नाथयदीन्द्रपादपद्मद्वयं चेतसि चिन्तयामि ।
स्वनद्विचित्रागमशिष्यभृङ्गजुष्टं विसृष्टावधिसारराशिम् ॥

गीर्वाणेन्द्रसरस्वत्याश्चरणं शरणं भजे ।
यो भवक्लेशखिन्नानां मूर्तं ब्रह्मापरं बभौ ॥

शारीरकार्थान्सकलान् गभीरान्समुद्दिधीर्षुः कृपया चकार ।
संक्षेपशारीरकनामकं यस्सर्वज्ञमात्मोत्तरमाश्रयेऽहम् ॥

संक्षेपशारीरकसंज्ञकेऽस्मिन्निश्शेषवेदार्थनिधानकोशे ।
कर्तुं यथार्हं विवृतिं कृपातः श्रीमज्जगन्नाथगुरोर्यतेऽहम् ॥

श्रीमच्छारीरकार्थमनुभवप्रधानमाविष्कर्तुं किञ्चित्प्रकरणमारभमाणः सर्वज्ञात्माचार्यः तस्य ग्रन्थस्याविघ्नपरिसमाप्त्यादिप्रयोजनकमविगीतशिष्टाचारानुमितश्रुतिप्रमितकर्तव्यताकं तत्त्वानुकीर्तनलक्षणं स्मृतिरूपं मङ्गलं मुखत

प्रेक्षावत्प्रवृत्त्यङ्गभूतविषयप्रयोजने चार्थाद्विल(व)क्षंस्तदर्थं स्वकृतमङ्गलं ग्रन्थतो निबध्नाति—

अनृतजडविरोधिरूपमन्तस्त्रयमलबन्धनदुःखताविरुद्धम् ।
अतिनिकटमविक्रियं मुरारेः परमपदं प्रणयादभिष्टवीमि ॥ इति ॥

मुरारेः परमपदं प्रणयादभिष्टवीमीति सम्बन्धः । मुरस्य अरिः मुरारिः । मुरशब्देन असुरविशेषनाम्ना असुरमात्रं लक्ष्यते ; असुरश्चात्र अविद्याकृतेन्द्रियाणि स्वकीयत्वेन मन्यमानोऽहङ्कारो विवक्षितः ॥

* * * *

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमज्जगन्नाथाश्रमश्रीचरणपरिचरणपरिप्राप्तविद्यनिखिलविद्वज्जनमनोहरश्रीनृसिंहाश्रमश्रीचरणविरचितायां संक्षेपशारीरकव्याख्यायां तत्त्वबोधिनीसमाख्यायां समन्वयाख्यः प्रथमोऽध्यायः ॥

The scribe adds—

अस्ति चेल्लिखितेऽस्माभिर्यत्किञ्चिदसमञ्जसम् ।
अनुग्रहेण साधूनां सर्वं भवतु मङ्गलम् ॥

अथ चतुर्थोऽध्यायः—

एवं साधनस्वरूपनिर्णयानन्तरं साध्यस्वरूपविषयिणीं जिज्ञासां दर्शयति—

End :

इदानीं मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते बहुमङ्गला ग्रन्थाः फलाय भवन्तीति न्यायेन मध्येऽपि हरिशङ्करादिपदग्रहणेन मङ्गलं सिद्धवत्कृत्यान्तेऽपि विष्णुं नमस्कुरुते ॥

* * * *

श्रीमज्जगन्नाथगुरोरनुग्रहः प्रविश्य मायोजयदत्र कर्मणि ।
. . . . . . मनुष्यवर्त्मनां प्रवृत्तिरेवेति बुधाः क्षमध्वम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यजगन्नाथाश्रमश्रीचरण(परि)चरणप्राप्तविद्यनिखिलविद्वज्जनमनोहरश्रीमन्नृसिंहाश्रमश्रीचरणविरचितायां संक्षेपशारीरकव्याख्यायां तत्त्वबोधिनीसमाख्यायां फलाख्यश्चतुर्थोऽध्यायः ॥

समाप्ता च संक्षेपशारीरकतत्त्वबोधिनी ॥

The scribe adds—

ब्रह्मानन्दयतीन्द्राणां पादाम्बुरुहमन्वहम् ।
भजता वासुदेवेन लिखिता तत्त्वबोधिनी ॥
अनेन भगवान् साक्षान्नरसिंहवपुर्हरिः ।
सुप्रसन्नोऽनुगृह्णातु श्रीदक्षिणमठाधिपः ॥

R. No. 2938.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūtalūrmana, Narēri, Tritala, Malabar.

कारिकावलीव्याख्या—मुक्तावतंसः.

KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVATAṀSAḤ.

Foll. 1*a*—15*b*. Fol. 16 is left blank.

A commentary on the Kārikāvalī of Viśvanāthapañcānana which work has been described under No. 3928 of D.C.S. MSS., Vol. VIII: by Dēvīsahāya, son of Kṛṣṇakaurava of Ṭiṅkaṇa race and a resident of Lavapura.

Complete.

Beginning:

गणेशानं नमस्कृत्य सर्वप्रार्थितसिद्धिदम् ।
न्यायसद्युक्तिमुक्ताभिरवतंसो विरच्यते ॥

इह खलु परमकारुणिकश्श्रीविश्वनाथपञ्चाननभट्टाचार्यः न्यायशास्त्रविवित्सुमाणवकहेतवे सकलन्यायशास्त्रप्रक्रियारहस्यं कारिकावल्या सङ्गृह्य प्रणिनीषुरादौ निर्विघ्नपरिसमाप्त्यादिफलकं स्वेष्टदेवताप्रणतिलक्षणं मङ्गलमाचरति—नूतनेति । तस्मै अलौकिकैश्वर्यादिगुणवत्त्वेन सामान्यतः प्रसिद्धाय कृष्णाय नमः ।

End:

शब्दोत्पत्तौ मतद्वयमाह--वीचीति । आद्ये दशादिग्व्यापिनः एकस्य शब्दस्य, द्वितीये दशादिग्व्यापिनां शब्दानामुत्पत्तिः । शब्दनित्यत्ववादि-

मतमाह—उत्पन्न इति । प्रत्यभिज्ञा(या)मप्ययमिति । सोऽयमिति दर्शनात्प्रत्यभिज्ञाम(या अ)नुभवादित्यर्थः ॥

श्रीकृष्णकौरस्य सुतेन देवीसहायनाम्ना रचितोऽवतंसः ।
कणादशास्त्रार्थबुभुत्सुबालश्रुती सदा सम्यगलङ्करोतु ॥

Colophon:

इति श्रीलवपुरवासिटिङ्गणजातिद्विजराजिविराजमानश्रीकृष्णकौरवमिश्रसुतदेवीसहायविरचितमुक्तावतंसः समाप्तः ॥

The scribe adds—

अशेषशास्त्रोपनिषत्पुराणशब्दार्थशास्त्राम्बुधिपारगा ये ।
श्रीसङ्गमाख्यालयमत्र सन्तो देवा गुणाढ्या अवतंसयन्ति ॥

R. No. 2939.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 88. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Tekkēmatam, Trichur.

नीतितत्त्वाविर्भावव्याख्या.
NĪTITATTVĀVIRBHĀVAVYĀKHYĀ.

Foll. 1*a*–87*b*. Fol. 88 is left blank.

A commentary on the Nītitattvāvirbhāva of Cidānandapaṇḍita, son of Śrīdhara. The work explains the Pūrvamīmāṁsā in accordance with the interpretations of Kumārila. By Mukundānandayati.

Incomplete.

Contains the following Vādas :—

१. अध्ययनविधिवादः.
२. कार्यवादः.
३. स्वतःप्रामाण्यवादः.
४. कालप्रत्यक्षतावादः.
५. अन्यथाख्यातिवादः.
६. साक्षात्प्रतीतिनिरासवादः.
७. कल्पनापोढनिरासवादः.
८. योगरूढिवादः.
९. इन्द्रियवादः.
१०. मनोवैभववादः.
११. अजसंयोगवादः.
१२. पवनाकाशप्रत्यक्षतावादः.
१३. भेदवादः.

The first two Vādas are arranged irregularly.

Beginning:

नमामि स्थाणुसम्भूत . . . . ।
. . . . नृसिंहं च गणाधिपम् ॥
वन्दे वागीश्वरीं देवीं यदीयकरुणावशात् ।
विलसन्ति कवेर्वक्त्रे वाचो वीचीविलासवत् ॥
नमःपदजुषां नृणां मनस्तिमिरहारिणे ।
अरूपालोकदीपाय गुरवे पूर्वभानवे ॥
मुकुन्दानन्दयतिना मुदे सुमनसामिदम् ।
मननं नीतितत्त्वाविर्भावाख्यार्थस्य तन्यते ॥

* * * *

नीतितत्त्वाविर्भावाख्यं प्रकरणं कर्तुकामस्तदविघ्नपरिसमाप्त्यादिप्रयोजनाय महदाचारमूलं मङ्गलमाचरति—वन्दे कल्याणयोरिति ।

* * * *

ननु प्रमाणे सत्यप्यलौकिकस्य तस्य लक्षणं वक्तव्यमिति । तदाह—कृत्या साध्यं तत्प्रधानश्च कार्यमिति । स्वतस्सिद्धवस्तूनां व्यावृत्त्यर्थं कृत्यादिव्यावृत्त्यर्थश्च कृतिसाध्यत्वविशेषणम् ।

* * * *

यदिदं गुरुमते कार्यरूपो वेदार्थ इति द्वितीयसूत्रार्थविनिगमनं तन्मन्दम् । प्रकृतधर्मस्य लक्षणादिपरतया तदर्थत्वाल्लोकाख्यप्रमाणेन सामान्यतोऽवगतस्य विशेषविप्रतिपत्त्या सन्दिह्यमानस्य श्रेयस्साधनरूपस्य धर्मस्यैव अथातो धर्मजिज्ञासेति स्वशब्देनोपादाय जिज्ञास्यत्वेन सूत्रितत्वात् वेदार्थस्य वा(चा)नुपात्तत्वादप्रकृतत्वाच्च ।

End:

कुत इत्यत आह—स्तम्भात् कुम्भ इति । अयमर्थः—इयमनवस्थितिर्मूलक्षयकरी भवत्येव । यत इति सम्बन्धः । तदुपपादयति—स्तम्भादित्यादिना ।

* * * *

अत्रायं श्लोकार्थः—लिङर्थं कार्यं तच्च भावार्थसार्थादुत्तीर्णाङ्गमित्याहुर्ये इति सम्बन्धः । इतिशब्दः प्रकारवाची (भावः) क्रिया स एवार्थो भावार्थः तस्य सार्थ(ः) सङ्घातः, तस्मादुत्तीर्णशरीरमिति व्यतिरिक्त . . . . ।

R. No. 2940.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 28. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of the Raja of Chirakkal, Malabar district.

(*a*) पञ्चकल्याणचम्पूः.

PAÑCAKALYĀṆACAMPŪḤ.

Foll. 1*a*—19*a*.

A work in prose and verse called Pañcakalyāṇacampū, narrating the story of the marriage of (1) Rāma, (2) Kṛṣṇa, (3) Subrahmaṇya, (4) Viṣṇu and (5) Śiva; by Cidambarakavi, son of Anantanārāyaṇa, grandson of Sūryanārāyaṇa. In the beginning the author praises Vālmīki, Vyāsa, Kālidāsa and Bhōja for their excellent and wonderful composition.

Contains two Stabakas complete.

Beginning:

वाचं द्राग्वदने स रङ्गसदने वल्गत्पदां वो मदा-
दाचन्द्रार्कमुदश्चदञ्चितरसां तन्याद्विभुश्श्रीमतीम् ।
यो हारी रुचिहारिपुष्करकरो योग्यार्पितार्घ्यः पुरो
भास्वान् कर्मसु भामिनी भवति सा यस्य प्रभा वल्लभा ॥

* * * *

स देवसेनासरसान्तरङ्गस्सुजातशक्तिर्वसुदेवसूनुः ।
कुर्वीत दर्वीकरवैरिवाहः कूलंकषं वः कुशलं कुमारः ॥

* * * *

वल्मीकभूर्विजयतां स वरः कवीनामुन्मीलदुन्नतिमतिप्रतिभातिभारः ।
स्वाद्यावतारपदमत्र सुगन्धिलोके स्वाद्या सुवागकृत वागधिदेवतायाम् ॥
व्यासं गिरां मनसि वासमकृत्रिमाणामासङ्गिनं तपसि वासितमादधामि ।
हृद्यापि भारतकथा सहपादलक्षपद्या यतोऽजनि सपादचतुष्कपद्या ॥
कल्यः कविस्सविजयः कविताविकासः व्यासङ्गवासपदमस्तु स कालिदासः ।
कौमारसम्भवमहे कुतुकेन यश्श्रीसीमारसं भवहरिप्रतिमस्सिषेवे ॥
भूयात्स भूरिविजयो भुवि भोजराजो भूयानुदारकवितारसवासभूमिः ।
अस्याब्जदर्शनमभूद्गुरुरङ्गभाजां लास्याय यस्य वदने ललिताय वाचाम् ॥

* * * *

सद्भाविभ्रमरीतिकाक्षरतया सालङ्क्रिया तारया
मृद्वीकारुणभावधीमदधरा माधुर्यमृष्टाकृतिः ।

एषा चम्पुमणी चिदम्बरकृता योषावरेवोज्ज्वला
भूषा कर्णयुगस्य कस्य न मनस्तोषाय भाषा परा ॥

* * * *

बिम्बोल्लासिरसाधरादुदितहृत्पद्मा सुहृद्भीष्मकात्
सम्बोधाञ्ज(ज्ज)नकाच्चतः क्षितिभृतस्सारेण गौरीडिता ।
आसीद्देवविभोः प्रभो रनुभुवं(तनुभवा)श्रीदेवसेना महा-
भासीता रमणी महाम्बुनिधितः कन्यामणी रुक्मिणी ॥
सौभाग्यं शुभमनुभूय सीतयोच्चै-
राभान्त्या स तदनु देवसेनयालम् ।
रुक्मिण्या हिमरुचिरम्यया कुचास्ये
सादृश्यं सरसिजनेत्रया वहन्त्या ॥

* * * *

Colophon:

सूनोः कौशिकभूषणस्य मखिनः श्रीसूर्यनारायण-
क्षोणीन्दोरजनिष्ट कोविदमणेर्योऽनन्तनारायणात् ।
अस्याद्यस्तबकश्चिदम्बरकवेः श्रीचम्पुरत्ने कृतौ
पर्याप्तस्सुरसप्रपञ्चसरलश्श्रीः पञ्चकल्याणके ॥

End:

सैषा सुरमहर्षिणा समनुवर्णितानि कर्णामृतानि तानि वरस्य कल्याणगुणजातानि समवकर्ण्य वरवर्णिनी सञ्जातरोमहर्षहर्षातिशयादाशये तदनुरागमतनुरागबिम्बाधरा सम्बाधरामणीयका नितरां बिभराम्बभूव ।

* * * *

सूनोः कौशिकभूषणस्य मखिनः श्रीसूर्यनारायण-
क्षोणीन्दोरजनिष्ट कोविदमणेर्योऽनन्तनारायणात् ।
तस्यार्थ(यं)स्तबकश्चिदम्बरकवेश्श्रीचम्पुरत्ने कृतौ
तस्यागात्प्रथमोत्तरस्ततपदश्रीः पञ्चकल्याणके ॥

(*b*) पञ्चकल्याणचम्पूव्याख्या—शब्दशाणोपला.

PAÑCAKALYĀṆACAMPŪVYĀKHYĀ: ŚABDAŚĀṆŌPALĀ.

Foll. 19*a*—26*a*. Foll. 26*b*—28*b* are left blank.

A commentary called Śabdaśāṇōpalā on the work described in the previous subdivision: by the author of the original.

Contains the commentary on the first eight stanzas only.

Beginning:

मालत्या मृदुमञ्जुलं पदमित(ता)शृङ्गारतुङ्गारसा
हृद्यालङ्कृतिरीतिरुद्यदुपमा पद्यानि प(ग)द्यानि च ।
अर्थव्यक्तिरनर्घयुक्तिरनघा यत्सूक्तिरत्यद्भुता
चित्ते कस्य मुदं चिदम्बरकवेः (तन्यात्) न तत्तादृशम् ॥

* * * *

श्रीराममाधवशिखावलवाहलक्ष्मीनाथत्रिलोचनविवाहपदावदानाम् ।
वाचां चिदम्बरकवेर्वशितासवाचां मोचापयोरसमुचां जगदप्यमूल्यम् ॥

* * *

उल्लेखीदमनन्यवृत्तमुदिते शाणोपले पाणिनेः
फुल्लेक्ष्यातिरसप्रपञ्चसरणिः श्रीपञ्चकल्याणकम् ।
कर्णालङ्करणं . . गुणिपदं वर्णावलेरत्रस-
चित्रं व्याकुरुते चिदम्बरकविः श्रीचम्पुरत्नं परम् ॥

* * * *

शब्दशाणोपलाख्यायां व्याख्यायां व्यक्तशक्तयः ।
पद्ये पद्ये विलिख्यन्ते पण्डितानां निघण्टवः ॥

* * * *

वाचमिति । सः विभुः, वः युष्माकम् । वदने रङ्गसदने रङ्गमण्टपे । व्यस्तरूपकम् । उदञ्चन्तः अञ्चिताः पूजिताः, अञ्चेः पूजायामिति इडागमः । नाञ्चेः पूजायामिति नलोपप्रतिषेधः ।

End:

अपरत्र । नालीकाक्षः पद्मलोचनः । श्लाघना नर्मदा श्रीः लक्ष्मीः यस्य स तथोक्तः । भालीकेलीप्राशुः.

R. No. 2941.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 26. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Aṁbalakkāṭ Karuṇākara Menon, B.A., B.L., Chalapuram, Calicut.

सिद्धान्तपञ्जरम्.

SIDDHĀNTAPAÑJARAM.

A treatise in verse explaining the principles of the Advaita-Vēdānta, in the form of a question put by a disciple and answered by his Guru; by Vināyaka. The author salutes in the beginning Rāghavānanda and quotes Kēraḻavarman and Vighnarāja.

Complete in eight Upadēśas.

Beginning :

विश्वात्मनावतीर्णेन राघवानन्दयोगिना ।
मदीयचित्तरङ्गेऽस्मिन्नृत्तलीला विधीयताम् ॥
परम्परायाः प्रकृतेरनादिं द्वन्द्ववर्जितम् ।
जनानां हृदयाकाशे जीवरूपेण संस्थितम् ॥
सर्वेषामालयत्वेने सर्वदा समवस्थितम् ।
सर्वात्मकमहं शम्भुं प्रपद्ये शरणं सदा ॥

* * * *

विनायकोऽहं शास्त्राणि विमृश्य परया धिया ।
करिष्याम्यात्मशुद्ध्यर्थं शास्त्रं सिद्धान्तपञ्जरम् ॥

* * * *

शमादिसाधनयुतस्स्वगुरुं परिपृच्छति ।
भगवन् ज्ञातुमिच्छामि कस्संसारे परिभ्रमन् ॥
इति संसारसम्बन्धस्तस्य संसरतः कथम् ।
इति शिष्येण संपृष्टो विरक्तेन मुमुक्षुणा ॥
सर्वशास्त्रार्थतत्त्वज्ञः केवलस्वानुभूतिमान् ।
स्वस्वरूपप्रवक्ता च लोकानुग्रहकाम्यया ॥
विज्ञाय शिष्यहृदयं देशिकस्तमभाषत ।
माता पिता च पुत्रश्च बान्धवास्सुहृदस्तथा ॥
भार्यादयश्च ब्रह्माद्या गृहं क्षेत्रादयस्तथा ।

* * * *

Colophon :

इति सिद्धान्तपञ्जरे प्रथमोपदेशः ॥

* * * *

शिष्यः—

दृश्यं समस्तं संसारः संसारी जीव एव हि ।
तयोस्तादात्म्यसम्बन्धो माययेत्यवधारितम् ॥
यस्संसारीति सम्प्रोक्तस्त्वया नाथ कृपावशात् ।
श्रोतुमिच्छामि योग्यश्चेदहं तस्य च लक्षणम् ॥

* * * *

शिष्यः—

अवधारितमेतन्मे स्वात्मनो लक्षणत्रयम् ।
कथं मुच्येत बध्येत संसारी केन कर्मणा ॥

* * * *

शिष्यः—

स्वामिन्विश्वेश भगवन् सर्वसिद्धान्तसङ्ग्रहम् ।
श्रोतुमिच्छाम्यहं सर्वं कारुण्यात्कथयाशु मे ॥

गुरुः—

लोके विचारशास्त्राणि द्विविधानि निरूपणे ।
वैदिकावैदिकश्चेति भेदादित्यवधारय ॥
तर्कश्च साङ्ख्यमिति च मीमांसेति त्रिधा स्थितम् ।
वैदिकं वेदमूलत्वादेव सूक्ष्मनिरूपणे ॥
लोकायतश्चार्हतश्च बौद्धश्चावैदिकं त्रिधा ।

End:

शिष्यः—

स्वामिन् प्रसीद विश्वेश जय कारुण्यविग्रह ।
कारुण्यादेव भवतश्चात्मानं भावयाम्यहम् ॥
दृश्यवर्जितचिन्मात्ररूपोऽहं परमेश्वर ।
कृतार्थोऽस्मि कृतार्थोऽस्मि भवत्पादाम्बुजार्चनात् ॥
भोक्तुं प्रारब्धसिद्धान्तपञ्जरं . . . . . ।
शास्त्रकर्माणि लोकेषु . . . . . ॥
. . . . . . शास्त्रं केरलवर्मणः ।
सन्निधौ मठिकेन्द्रस्य विघ्नराजमुखोदितम् ॥

Colophon:

इति सिद्धान्तपञ्जरेऽष्टमोपदेशः ॥

R. No. **2942**.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of the Raja of Chirakkal, Malabar district.

बुद्धभटीयम्--रत्नशास्त्रम्.

BUDDHABHAṬĪYAM : RATNAŚĀSTRAM.

Foll. 1*a*—14*b*. Foll. 15 and 16 are left blank.

A work explaining the distinguishing characteristics of the nine gems, the tests for ascertaining their degrees of excellence or quality and for ascertaining their value: by Buddhabhaṭa.

Complete.

Contains the following subjects:—

१. वज्रपरीक्षा.
२. मौक्तिकपरीक्षा.
३. पद्मरागपरीक्षा.
४. मरतकपरीक्षा.
५. इन्द्रनीलपरीक्षा.
६. वैडूर्यपरीक्षा.
७. कर्केतनपरीक्षा.
८. स्फटिकपरीक्षा.
९. विद्रुमपरीक्षा.

Beginning:

रत्नत्रयाय भुवनत्रयवन्दिताय कृत्वा नमस्समवलोक्य च रत्नशास्त्रम् ।
रत्नप्रवेकमधिकृत्य विमुच्य फल्गून् संक्षेपमात्रमिति बुद्धभटेन दृष्टम् ॥

भुवनात्रितयाक्रान्तप्रकाशीकृतविक्रमः ।
बलो नामाभवच्छ्रीमान् दानवेन्द्रो महाबलः ॥

असकृत्संयुगे येन भज्यमाने दिवस्पतौ ।
नोद्वा(दुवा)ह शची वीरपत्नीगर्वोन्नतं शिरः ॥

अशक्नुवद्भिर्निर्जेतुं तं युद्धे युद्धशालिनम् ।
वरव्याजेन पशुतां प्रार्थितस्स सुरैर्मखे ॥

* * * *

तस्य जातिविशुद्धस्य परिशुद्धेन कर्मणा ।
कायस्यावयवास्सर्वे रत्नबीजत्वमाययुः ॥

* * * *

महाप्रभावं विबुधैः यस्माद्वज्रमुदाहृतम् ।
वज्रपूर्वा परीक्षेयमतोऽस्माभिर्निगद्यते ॥
तस्यास्थिलेशो निपपात येषु भुवः प्रदेशेषु कथञ्चिदेव ।
वज्राणि वज्रायुधनिर्जिगीषोर्भवन्ति नानाद्युतिमन्ति तेषु ॥

End:

प्रसन्नकोमलं स्निग्धं सुरागं विद्रुमं हि तत् ।
धनधान्यकरं आ(ना)गविषादिभयनाशनम् ॥
तत्र पुरा इह सूनुना समासोक्तिः ।

मणिशास्त्राणां मरुता बुद्धभटक्षयेणेयम् (?) । इति । वज्रमौक्तिकपद्मराग-मरतकेन्द्रनीलवैडूर्यकर्केतनपुलकरुधिराक्षस्फटिकविद्रुमाणां बीजाङ्कुरगुणदोष-कृत्रिममूल्यपरीक्षा धारयितुं दोषगुणानां महन्नियोगश्च विस्तरतोऽसौ बुद्धभटेन निर्दिष्टा ॥

Colophon:

इति बुद्धभट(टीय)न्नाम रत्नशास्त्रं समाप्तम् ॥

R. No. **2943.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 38. Lines, 20 in a page. Telugu and Grantha. Good.

(*a*) अमरपदपारिजातपाठान्तराणि.

AMARAPADAPĀRIJĀTAPĀṬHĀNTARĀṆI.

Foll. 1*a*—9*b*. Fol. 10 is left blank.

Contains the different readings relating to the work described under No. 1696 of the D.C.S. MSS., Vol. III.

(*b*) शब्दखण्डसारमञ्जरिपाठान्तराणि.

ŚABDAKHAṆḌASĀRAMAÑJARĪPĀṬHĀNTARĀṆI.

Foll. 11*a*—14*b*.

Contains the different readings of the work described under R. No. 1882 (*b*) ante.

(*c*) काव्यप्रकाशविवरणकाव्यकौमुदीपाठान्तराणि.

KĀVYAPRAKĀŚAVIVARAṆAKĀVYAKAUMUDĪPĀṬHĀNTARĀṆI.

Foll. 15*a*—25*b*. Fol. 26 is left blank.

Contains the different readings of the work described under No. 819 ante.

(*d*) परमशिवाद्वैतकल्पलतिकापाठान्तराणि.

PARAMAŚIVĀDVAITAKALPALATIKĀPĀṬHĀNTARĀṆI.

Foll. 27*a*—30*b*.

Contains the different readings of the work described under R. No. 386 (*a*) ante.

(*e*) स्मृतिभास्करपाठान्तराणि.

SMṚTIBHĀSKARAPĀṬHĀNTARĀṆI.

Foll. 31*a*—37*b*. Fol. 38 is left blank.

Contains the different readings of the work described under No. 2786 of D.C.S. MSS., Vol. V.

R. No. **2944.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 128. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Śrī Jugulakiśōra Pāṇigrāhī, B.A., Parlākimedi.

स्मृतिसारसङ्ग्रहः.

SMṚTISĀRASAṄGRAHAḤ.

Similar to the work described under No. 2810 of the D.C.S. MSS., Vol. V. By Viśvanāthamiśra.

Complete.

Beginning:

मन्वादिशास्त्राणि पु(गु)रोरधीत्य सम्यक् तथा भूम्य(र्थ)चिरं प्रतीत्य ।
दृष्ट्वा च शिष्टाचरणं करोमि श्रीविश्वनाथस्स्मृतिसारसङ्ग्रहम् ॥

अथ प्रमाणतास्सिद्धं तावच्चोदनायाः धर्मे प्रामाण्यम् । तन्मूलत्वात्स्मृतिपुराणानामपि प्रामाण्यं सिद्धम् । चोदना च विधिवाक्यम् । विधिश्च द्विविधः—अनुष्ठाननिष्ठो निवृत्तिनिष्ठश्च । यथा अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीति । स्मृतिश्च—

दर्शे स्नात्वा पितृभ्यश्च दद्यात्कृष्णतिलोदकम् ।
अन्नश्च विधिवद्द्यात्स (पू)तस्तेन वर्धते ॥

* * * *

तिथिनिर्णयः—

तिथिशब्दः तनु विस्तारे इति धातोर्निष्पन्नः । सिद्धान्तशिरोमणौ—

तिथ्य(तन्य)न्ते किल ता यस्मात्तस्मात्तु तिथयः स्मृताः । शतानन्दरत्नमालायाम्—

तिथिनैकेन दिवसश्चान्द्रो(न्द्रे)माने प्रकीर्तितः ।
अहोरात्रेण चैकेन सावनो दिवसः स्मृतः ॥ इति ॥

* * * *

मासिकश्राद्धनिर्णयमाह ऋश्यश्रृङ्गः—

एकोद्दिष्टे तु संप्राप्ते यदि विघ्नस्तु जायते ।
मासे यस्मिन् तिथौ तस्यां कुर्यादन्तरितं तदा ॥ इति ॥

एकोद्दिष्टं पदमुभयमासिकोपलक्षणम् अन्तरितमासि तदुत्तरमाससम्बन्ध(न्धि)च मासिकमुत्तरमासमृताहे कुर्यादित्यर्थः । कण्वोऽपि—

नवश्राद्धं मासिकं च यद्यदन्तरितं भवेत् ।
तदुत्तरस्य स्वातन्त्र्यादनुष्ठेयं प्रचक्षते ॥

End:

यत्तु वसिष्ठेनोक्तम्—

पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा । इति । यत्तु त्रीनतीत्य मातृतः, पञ्चातीत्य पितृत इति पैठीनसिना तदप्यर्वाङ्निषेधार्थं न पुनस्तत्प्राप्त्यर्थमिति सर्वस्मृतीनामविरोध इति विज्ञानेश्वरः । कल्पतरौ असमानजातीयकन्याविषयमित्युक्तां(क्त)म् । विद्याकरपद्धतौ अत्यन्तासम्भवतरमिति व्याख्यातम् । ब्राह्मणानामेव दानपात्रत्वात् । तत्र दानविधिः । इतरेषु विवाहविधिमात्रं न दानविधिरिति ॥

Colophon:

इति श्रीविश्वनाथमिश्रविरचितः स्मृतिसारसङ्ग्रहः समाप्तः ॥

R. No. **2945.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 304. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from a MS. of the Saṁsthānam Library, Bobbili.

Bound in two volumes.

श्रीभागवततात्पर्यचन्द्रिका.

ŚRĪBHĀGAVATATĀTPARYACANDRIKĀ.

Foll. 1*a*—303*a*. Foll. 303*b* and 304 are left blank.

Similar to the works described under R. Nos. 2131 and 2164, ante. By Vēṅkaṭakṛṣṇa, son of Kṛṣṇārya of Kauśikagōtra.

Contains five to nine Skandhas complete.

Beginning:

श्रीराजा, प्रियव्रत इति । हे मुन श्रीशुक, आत्मारामः भागवतः प्रियव्रतः कथं गृहे अरमत । कर्मबन्धः पराभवश्च यन्मूलः यादृशगृहमूलः । नेति । हे महामुने मुक्तसङ्गानां तादृशानां गृहेष्वयमभिनिवेशः न भवितुमर्हति ।

महतामिति । हे विप्रर्षे उत्तमश्लोकपादयोः भगवच्चरणारविन्दयोः छायानिर्वृतचित्तानां छायासुखितमानसानां महतां कुटुम्बे स्पृहा प्रीतिः तद्विषयकबुद्धिश्च न भवति ।

* * * *

Colophon:

इति श्रीवेङ्कटकृष्णविरचितायां श्रीभागवततात्पर्यचन्द्रिकायां पञ्चमस्कन्धे नरकवर्णनं नाम षड्विंशोऽध्यायः ॥

End:

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः इति श्रुतिप्रतिपादितं परमपदाख्यं धाम समगात् ॥

Colophon:

इति श्रीमत्कौशिकवंशजलधिश्रीचन्द्रस्य श्रीकृष्णार्यस्य सूनुना श्रीवेङ्कटकृष्णाख्येन बुधेन विरचितायां श्रीभागवततात्पर्यचन्द्रिकायां नवमस्कन्धे सोमसूर्यराजवंशानुवर्णनं नाम एकविंशोऽध्यायः ॥

R. No. **2946.**

Paper. $10\frac{7}{8} \times 9\frac{4}{8}$ inches. Foll. 8. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Tekkematam, Trichur.

(*a*) आत्मज्ञानोपदेशविधिः.

ĀTMAJÑĀNŌPADĒŚAVIDHIḤ.

Foll. 1*a*—4*a*.

A work on Advaita-Vēdānta inculcating the realization of the self: by Śaṅkarācārya.

Complete in four Khaṇḍas.

Beginning:

आत्मज्ञानोपदेशविधिं व्याख्यास्यामो मुमुक्षवे श्रद्दधानाय यतये वीतरागाय । आत्मलाभात्परलाभाभावात् द्रष्टुर्दृश्योऽन्य इति प्रसिद्धो लोके । अथ क आत्मेति । देहस्तावदात्मा न भवति रूपादिमत्त्वेनोपलभ्यमानत्वात् घटादिवत् , यथा घटादयो रूपादिमन्तश्चक्षुरादिकरणैरुपलभ्यन्ते एवं देहोऽपि रूपादिमान् चक्षुरादिकरणैरुपलभ्यते । यथा दाह्यप्रकाश्यकाष्ठादिव्यतिरिक्तो दाहकः प्रकाशकोऽग्निस्तथा दृश्याद्देहाद्द्रष्टा व्यतिरिक्त आत्मा सिद्धः ।

End:

नन्वागमेनात्मा परिच्छिद्यते । न आगमोऽपि आत्मन्यध्यारोपितस्तद्धर्मनिवर्तनद्वारेण ब्रह्मात्मनोरेकत्वप्रतिपत्तिं प्रति मानत्वं प्रतिपद्यते । निर्ज्ञातपदार्थद्वयस्य निर्ज्ञातार्थाभिव्यञ्जकमेतत्स्वतस्सिद्धत्वादात्मनस्सोऽहमिति स्मृत्या प्रतिसन्धानात्पुण्यापुण्यसम्बन्धाभावात् । स्थानत्रयव्यतिरिक्तत्वं नित्यत्वं शुद्धत्वं मुक्तत्वं बुद्धत्वमविक्रियत्वमसुखदृक्स्वरूपत्वमेकत्वं चात्मनस्स्वानुभवेनैव मम सिद्धमिति जानाति । विद्वानाचार्यप्रसादादज्ञाननिद्राप्रबुद्धस्संसारविनिर्मुक्तो विद्वान् । एष आत्मज्ञानोपदेशविधिः । एवं ज्ञात्वा कृतकृत्यो भवति नान्यथेत्येवं वेदान्तानुशासनं वेदान्तानुशासनमिति ॥

Colophon:

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशङ्करभगवतः कृतौ आत्मज्ञाने चतुर्थः खण्डः ॥

(*b*) पञ्चीकरणवार्तिकम्.

PAÑCĪKARAṆAVĀRTIKAM.

Same work as that described under No. 4⁶3˴ of the D.C.S. MSS., Vol. IX. By Surēśvarācārya.

The colophon at the end of the MS. and a few stanzas at the end are not connected with this work.

Complete.

Beginning:

ओङ्कारस्सर्ववेदानां सारस्तत्त्वप्रकाशकः ।
तेन चित्तसमाधानं मुमुक्षुणां प्रकाश्यते ॥
आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियम् ।
तत्स्वमायासमावेशाद्बीजमव्याकृतात्मकम् ॥
तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकम् ।
स्पर्शात्मकस्ततो वायुस्तेजो रूपात्मकं ततः ॥
आपो रसात्मिकास्तस्मात्ताभ्यो गन्धात्मिका मही ।
शब्दैकगुणमाकाशं शब्दस्पर्शगुणो मरुत् ॥

End:

तस्मात्सर्वं परित्यज्य तत्त्वनिष्ठो भवेत्सदा ॥
यः पश्येत्सर्वगं शान्तमानन्दात्मानमद्वयम् ।
न तस्य किञ्चिदाप्तव्यं ज्ञातव्यं वावि(व)शिष्यते ॥
कृतकृत्यस्सदा विद्वान् जीवन्मुक्तो भवेदसौ ।
कदाचिद्व्यवहारे तु द्वैतं यद्यपि पश्यति ॥
बोधात्मव्यतिरेकेण न पश्यति चिदन्वयात् ।

* * * *

इदं प्रकरणं यत्नात् ज्ञातव्यं भगवत्तमैः ।
अमानित्वादिनिलयै(यमै)र्गुरुभक्तिप्रसादतः ॥
श्रीकृष्णरामपादानां शिष्येण रचितं मया ।
अन्तरारामयतिना ब्रह्मवित्प्रवरेण तु ॥
वेदशास्त्रेषु निर्णीता व्यासादिगुरुसम्मता ।
निःश्रेयसममु . . . . ॥

Colophon:

इति श्रीकृष्णारामपूज्यपादशिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्यान्तराराभगवतः कृतिस्समाप्ता ॥

R. No. **2947.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 112. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from a MS. of Kaṇḍavelli Narasiṁhācārlugāru, Vizagapatam.

(*a*) भगवत्कल्याणविधिः.

BHAGAVATKALYĀṆAVIDHIḤ.

Foll. 1*a*—71*b*.

Deals with the celebration of the marriage festival of God Viṣṇu in temples, as laid down in the Vaikhānasāgama.

Complete.

Beginning:

यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नान्निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥

अयं मुहूर्तस्सुमुहूर्तोऽस्तु ।

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥

* * * *

शुभे शोभने मुहूर्ते श्रीमहाविष्णोराज्ञया प्रवर्तमानस्याद्य ब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे कलियुगे प्रथमपादे जम्बूद्वीपे भारतवर्षे भरतखण्डेऽस्मिन्वर्तमानव्यावहारिकचान्द्रमानसंवत्सरेऽयने ऋतौ मासे पक्षे शुभे मुहूर्ते मम समस्तदुरितक्षयार्थं भगवत्कल्याणमहोत्सवं कर्तुमधिकारयोग्यताफलसिद्ध्यर्थं प्रत्यब्दक्रियमाणपाञ्चाह्निकध्वजारोहणादिकल्याणमहोत्सवान् करिष्यमाणः तदङ्गसर्वमङ्गलाकरणैकोनपञ्चाशत्पदविभागस्थापितद्वादशपालिकाविधानेनाङ्कुरारोपणं करिष्यमाणः तदादौ शुद्ध्यर्थं वृद्ध्यर्थं शान्त्यर्थमभ्युदयार्थञ्च महाजनैस्सह स्वस्तिपुण्याहवाचनं करिष्यमाणः आदौ भूशुभवा(द्य)दिकं करिष्यमाण इदानीमुपक्रमितस्याविघ्नपरिसमाप्त्यर्थं विष्वक्सेनपूजां करिष्ये ।

* * * *

Colophon:

इति श्रीवैखानसमरीचिप्रोक्ते प्रथमपत्ने आघारविधिश्चत्वारिंशः पटलः ॥

* * * *

कल्याणोत्सवः ।

एवंगुणविशेषणविशिष्टायां शुभतिथौ अस्य देवदेवस्य भगवतो नारायणस्य पाञ्चाह्निकध्वजारोहणमहोत्सवाङ्गत्वेन कल्याणोत्सवं करिष्यमाणः ।

अथ विवाहप्रयोगः ।

कन्यावरयोर्गृहयोर्यथोक्तपुण्याहमङ्कुरार्पणमभ्युदयकौतुकबन्धनमपि करोति । ततो वरः शङ्खभेर्यादिनादैस्सुमङ्गलद्रव्यैः पुण्यस्त्रीभिः विद्वद्ब्राह्मणैरन्यैः पित्रादिभिस्सह स्वस्तिसूक्तशकुनसूक्ते जपन् रथादिवाहनारूढः कन्यागृहं गच्छेत् ।

End:

ब्रह्मशङ्करदैवत्यं तदालयादिदेवानां मूर्तिहोममन्त्रान् त्रिकालं जुहुयादुत्तमम् । वैष्णवं श्रीभूमिदैवत्यं भृगुं मार्कण्डेयं ब्रह्मदैवत्यं द्विकालं जुहुयान्मध्यमम् । वैष्णवं श्रीभूमिदैवत्यं प्रातःकाले मध्याह्ने वा जुहुयादधमम् । इत्येकं पक्षमङ्गीकृत्य जुहुयात् ॥

Colophon:

इति श्रीवैखानसदिव्यागमे भगवत्कल्याणविधिः समाप्तः ॥

(*b*) भगवत्प्रतिष्ठाविधानम्.

BHAGAVATPRATIṢṬHĀVIDHĀNAM.

Foll. 72*a*—111*b*. Fol. 112 is left blank.

On the mode of consecrating the image of Viṣṇu, as laid down in the Vaikhānasāgama. Similar to the work described under No. 5302, D.C.S. MSS., Vol. XI.

Complete.

Beginning:

अयं मुहूर्तस्सुमुहूर्तोऽस्तु ।

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥

* * * *

एवंगुणविशेषणविशिष्टायां शुभतिथौ मम समस्तदुरितक्षयार्थं भगवत्प्रतिष्ठां कर्तुमधिकारयोग्यताफलसिध्यर्थमङ्गुलिन्यासं सर्वाङ्गन्यासं द्वादशपञ्जरन्यासं करिष्ये ।

* * * *

एवंगुणविशेषणविशिष्टायां शुभतिथौ अस्मिन् प्रतिष्ठाकर्मणि तत्तत्कर्मकरणार्थमाचार्यादिषोडशर्त्विग्वरणं करिष्ये ।

End :

देवं नित्यार्चनविधिनाभ्यर्च्य पायसान्नं निवेद्य नित्यहोमं हुत्वा बलिं निर्यात्य ब्राह्मणयजनं च कृत्वा उत्सवपुष्पयागं च कुर्यात् । शूद्रस्य कुलं श्रेष्ठं प्रजावान् तेजस्वी पशुमान् चिरं भोगान् प्राप्य विष्णोर्लोकं गच्छति ? । तद्ग्रामस्यायुरारोग्यधनधान्यसमृद्धिस्सम्पूर्णमनोरथान्(:) सर्वोपद्रवरहितो भवेत्? ॥

Colophon :

इति श्रीवैखानसमतानुसारेण श्रीभगवत्प्रतिष्ठाविधिः समाप्तः ॥

R. No. **2948.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 7. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from a MS. of Śri Śivānandayōgīśvarasvāmigāru of Fazulluegpet, Chicacole post, Ganjam.

नाथनवरत्नमाला, मञ्जूषाव्याख्यासहिता.

NĀTHANAVARATNAMĀLĀ WITH THE COMMENTARY MAÑJŪṢĀ.

The Nāthanavaratnamālā is a eulogy by Mahēśanātha on the Śāktagurus. It is followed by a commentary by Bhāsurānandanātha, son of Gambhīrarāyasūri.

Complete.

Beginning :

श्रीनाथादित्रितयं नत्वा गम्भीररायसूरिसुतः ।
नाथनवरत्नमालागूढार्थव्यावृतिं तनुते ॥

इह खलु निखिलोपासनाः गुरुप्रसादलभ्याः, "गुरुमूलाः क्रियास्सर्वा" इति वचनात् । तत्प्रसादश्च तत्स्वरूपोपास्तिमन्तरा दुर्लभः । तद्रूपन्तु त्रिविधम्—स्थूलं सूक्ष्मं परञ्चेति । तेष्वाद्यं सहस्रदलपङ्कजे सकलशीतरश्मिप्रभमित्यादिना करचरणाद्यवयववैशिष्ट्येणो(ष्ट्येनो)क्तं प्रसिद्धम् । द्वितीयं गुरुपादुकामन्त्ररूपम् । तृतीयं वासनात्मकम् । तच्च रहस्यत्वात्सङ्केतभाषयोपासकानुजिघृक्षया विवृणोति ।

हंसस्सोऽहं मन्त्रमयश्वासनिकायैः या गायत्री जन्तुषु सर्वेषु पिनद्धा ।
तद्रूपस्सन्नाविरभूद्भासनया यस्तं सन्मार्गे मत्तमयूरं गुरुमीडे ॥

हंस इति—

End :

महेशनाथकृतस्य नाथनवरत्नमालानाम्नः स्तवस्योपसंहारपूर्वतदर्थानुसन्धानपूर्वकपाठपराणां गुरुभक्तानां श्रीविद्योपासकानां सद्यः परशिवभावप्राप्तिः फलतीत्याह—इत्थमिति । मालास्तोत्रयो रूपकानुगुण्याय प्रबन्धरचनमालारचनोभयवाचिग्रथिधातुः प्रयुक्तः । नाथरहस्यं परं रूपम् । अत्र जनुष्येव अस्मिन्नेव जन्मनि । महेशाः परमशिवरूपाः । उक्तश्च तन्त्रराजे—

एवंविधां वासनां यो भावयेत्स महेश्वरः । इति सर्वं शिवम् ॥

Colophon :

इति श्रीमन्नाथनवरत्नमालाभिधास्तुतेः ।
मञ्जूषा भासुरानन्दनाथेनाकारि गुप्तये ॥

The scribe adds—

इदं नाथनवरत्नमालाग्रन्थं शिवानन्दयोगीश्वरेण लिखितम् ॥

R. No. **2949.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 52. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. D. Sūryabhagavānuḍu Pantulugāru, Vizianagram.

(*a*) उड्डामरेश्वरतन्त्रम्.

UḌḌĀMARĒŚVARATANTRAM.

Foll. 1*a*—46*b*.

Deals chiefly with the various Mantras addressed to certain deities, together with the manner of repetition for the accomplishment of one's desires. This is also called Vīrabhadrēśvarīmahātantra.

Taken from Rudrayāmala.

Complete in Paṭalas 1 to 16 only.

Beginning :

उड्डीशेन समाकीर्णे योगिवृन्दसमाकुले ।
प्रणम्य शिरसा देवी गौरी पृच्छति शङ्करम् ॥
ईश्वर श्रोतुमिच्छामि लोकनाथ जगत्प्रभो ।
प्रसादं कुरु देवेश ब्रूहि धर्मार्थसाधनम् ॥

वशीकरणमुच्चाटं मोहनं स्तम्भनं तथा ।
शान्तिकं पौष्टिकं वाथ कारणानि बहूनि च ॥
चक्षुर्हानिं मनोहानिं श्रुतिहानिं तथैव च ।
ज्ञानहानिं क्रियाहानिं कीलकञ्च तथापरम् ॥
कायस्तम्भं सुरेशान शोषणं पोषणं तथा ।
मन्त्रध्यानं विशेषेण तत्सर्वं वद मे प्रभो ॥
अन्यच्च विविधं कार्यं प्रसादाद्ब्रूहि भैरव ।
यस्य विज्ञानमात्रेण मनुष्यो भुवि दुर्लभः ॥

* * * *

प्रथमं भूतकरणं द्वितीयोन्मादनं तथा ।
तृतीयं द्वेषणञ्चाथ तुर्यमुच्चाटनं तथा ॥
ग्रामोच्चाटनकञ्चाथ(टं पञ्चमं च) षष्ठं च जलस्तम्भनम् ।
वह्नेस्स्तम्भनकञ्चाथ(म्भं सप्तमं च) वशीकरणमष्टमम् ॥
अन्यानपि प्रयोगांश्च बहून् शृणु वदाम्यहम् ।
शिवेन कथिता योगा उड्डीशे शास्त्रनिश्चये ॥
अन्धीकरणं मूकीकरणं बधिरीकरणं तथा ।
भूतज्वरस्य करणमस्त्रशस्त्रस्य दूषणम् ॥

* * * *

निम्बकाष्ठं समादाय चतुरङ्गुलमानतः ।
शत्रुविष्ठासमालिप्तं तथा नाम समालिखेत् ॥
चिताङ्गारेण तन्नाम्नो धूपं दद्यान्महेश्वरि ।
चित्तान्तं भूषितो भूत्वा यस्य गोत्रमुदाहरेत् ॥
कृष्णाष्टम्यां चतुर्दश्यां नामाष्टोत्तरशतं जपेत् ।
भूतो गृह्णाति तं शीघ्रं मन्त्रेणानेन मन्त्रयेत् ॥

* * * *

Colophon:

इत्युड्डामरेश्वरे महातन्त्रे प्रथमः पटलः ॥

End:

Colophon:

इति श्रीवीरभद्रेश्वरीमहातन्त्रे महादेवपार्वतीसंवादे मन्त्रकोशकथनं नाम पटलः पञ्चदशः (?) ॥

* * * *

तथैव शुष्कगोमयखण्डेऽपि मृगमकरमष्टवर्जुरकमठभुजङ्गमगरुडशिखिकां(?) रुद्रस्य मुखाश्चान्येऽपि(?) मनोहराः शकुनाः लघुदारुकानिलप्रभृतिदारुणमसृण-कर्पटतन्त्वजिनपूर्वयात्रादिभिर्निर्मितासु घटनया मनोहरीकृतानन्तरसिभ्र(?)दुग्धं करतलमृदित(त)ला लड्केव जातः वैदग्ध्येन तेषां नलः ॥

Colophon :

इति श्रीरुद्रयामिले उड्डामरेश्वरतन्त्रे श्रीमहादेवपार्वतीसंवादे उड्डीशास्समाप्तः ॥

(*b*) उलूककल्पम्.

ULŪKAKALPAM.

Foll. 46*b*—51*b*. Fol. 52 is left blank.

Gives certain details regarding the bird Ulūka (owl) and its usefulness. In the making of certain medical and magical preparations: by Śukrācārya.

Complete.

Beginning :

पूर्वं दैवासुरे युद्धे विष्विरे चाभिचोदिता । ?
तस्य वाहनमित्युक्तमुलूको नाम पक्षिराट् ॥

तस्य पृष्ठमथारुह्य दानवाश्च निकृन्तिताः ।

शुक्र उवाच—

कथमुत्पद्यते देव किमाहारश्च स स्मृतः ।
कीदृशं कर्म कुरुते साधनं तस्य कीदृशम् ॥

अल्पायुषस्तथा मर्त्या अल्पवीर्यास्तथैव च ।
तेषां वीर्याय चाख्याहि प्रसादात्परमेश्वर ॥

श्रीमहादेव उवाच—

साधु साधु महाभाग साधकानां हिताय च ।
शृणु शुक्र प्रवक्ष्यामि कल्पं चोलूकसंज्ञकम् ॥

पर्वताग्रे समारूढो वने दुर्गसमाकुले ।
शुभ्रं पिबति पानीयं श्वभ्रश्च दुर्गमं भवत् (?) ॥

तत्र स्थाने स्थितस्सोऽपि ह्युलूको नाम पक्षिराट् ।
बिडालसदृशे नेत्रे कर्णावपि तथैव च ॥
दिवसे तिष्ठते दर्यां रात्रौ सञ्चरते दिशः ।
अधुना संप्रवक्ष्यामि प्रभावं तस्य कीदृशम् ॥
सौभाग्यकरणं तद्धि विद्वेषकरणं तथा ।
ऐकाहिकं द्व्याहिकञ्च ज्वरं त्र्याहिकमेव च ॥

End:

उलूकस्य जिह्वां गृहीत्वा गोरोचनानागवल्लीदलाभ्यां दीपमालिकामहानिशायां यो भक्षयति सः भूतभविष्यद्वर्तमानकालज्ञो भवति ॥

Colophon:

इति श्रीमहादेवशुक्राचार्यविरचितं उलूककल्पं सम्पूर्णम् ॥

Foll. 51*b* contains a hymn in Hindustani.

R. No. 2950.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 184. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of Tekkematam, Trichur.

शब्दभूषणम्.
ŚABDABHŪṢAṆAM.

Foll. 1*a*—183*a*. Foll. 52*a*—56*b* contain Pāṇinīyaliṅgānuśāsanasūtravṛtti by the same commentator. Foll. 103*a*—105*b* contain the Phiṭsūtra of Śāntanavācārya. Foll. 183*b* and 184 are left blank.

A commentary on the Aṣṭādhyāyī-Sūtras of Pāṇini. Similar to the Kāśikāvṛtti. By Nārāyaṇa Sudhī of Gōvindapura. He says that he has well studied and kept in his mind the Mahābhāṣya of Patañjali before writing this commentary. This is also called Savārtikāṣṭādhyāyīpradīpa.

Contains from the first Pāda of the first Adhyāya to the end of the third Pāda of the second Adhyāya and 31 Sūtras in the fourth Pāda of the second Adhyāya, and from the fifth Adhyāya to the end of the eighth Adhyāya.

Beginning:

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

* * * *

गुरुं नत्वा परं ब्रह्म ध्यात्वा नारायणस्सुधीः ।
पर्यालोच्य महाभाष्यं कुरुते शब्दभूषणम् ॥

* * *

वृद्धिरादैच् । आदैच् वृद्धिसंज्ञः स्यात् । वृद्धिरेचीत्यादयः संज्ञाप्रदेशाः, तदुदाहरणमेव संज्ञासूत्राणामप्युदाहरणम् ।

अदेङ् गुणः । अदेङ् गुणसंज्ञस्स्यात् । आद्गुण इत्यादिः प्रदेशः ।

इको गुणवृद्धी । गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इक इति षष्ठयन्तं पदमुपतिष्ठते । चेता । अचैषीत् ।

End:

अ अ । विवृताकारस्य संवृताकारस्स्यात् । अस्य चाष्टाध्यायीं प्रत्यसिद्धत्वात् शास्त्रदृष्ट्या विवृत एवाकारः प्रयोगे तु संवृतः । विवृतेन दीर्घप्लुतयोर्न ग्रहणम् तेनानयोः प्रयोगेऽपि विवृतत्वमेव ।

Colophon:

इति श्रीगोविन्दपुरवास्तव्यनारायणसुधीविरचिते सवार्तिकाष्टाध्यायीप्रदीपे शब्दभूषणे अष्टमस्याध्यायस्य चतुर्थः पादः ॥

R. No. **2951.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of the Raja of Chirakkal, Calicut.

भद्रकाल्युत्पत्तिः.

BHADRAKĀLYUTPATTIḤ.

Foll. 1*a*—35*a*. Foll. 35*b* and 36 are left blank.

This forms part of the Mārkaṇḍēyapurāṇa which work has been described under Nos. 2255 and 2256 of the D.C.S. MSS., Vol. IV, Part I, and deals with the origin of Bhadrakālī as the daughter of Rudra and is in the form of a conversation between Sutīkṣṇa and Brahman.

Complete in nine Adhyāyas, as found in the Mārkaṇḍēyapurāṇa.

Beginning:

अथातस्संप्रवक्ष्यामि भद्रकाल्यास्समुद्भवम् ।
अद्भुतानि च कर्माणि मत्तश्शृणु महीसुर ॥
रुद्रस्य तनया साध्वी भद्रकाली महेश्वरी ।
भद्राणि जगतां देवी यानि यानि सनातनी ॥
कर्माणि चक्रे कल्याणी कल्यानि सुमहान्ति च ।
तानि तानि शृणु श्रीमन् शिवशर्मन् द्विजोत्तम ॥
काश्मीरनाम्नि नगरे राजासीत् धार्मिको बली ।
चन्द्रसेन इति ख्यातश्चन्द्रबिम्बमुखस्सुखी ॥
स्वसैन्यैरन्वितो धन्वी रथारूढो महारथः ।
दण्डकारण्यमापेदे मृगयाकर्मकर्मठः ॥

* * * *

भो भो महाभूत महानुभाव त्वं भद्रकाल्याः किल किंकरोऽसि
अज्ञानतो राज्ञ इदन्तु कर्म क्षमस्व धीमन्नयमञ्जलिस्ते ॥

मार्कण्डेय उवाच—

इति श्रुत्वा सुतीक्ष्णस्य मुनेर्वचनमुत्तमम् ।
प्रणम्य प्रययौ भूयो भद्रकालीं प्रति क्षणात् ॥
पप्रच्छ चन्द्रसेनस्तं सुतीक्ष्णं मुनिपुङ्गवम् ।
को(का)नाम भद्रकालीति श्रोतुमिच्छामि तत्त्वतः ॥

* * * *

सुतीक्ष्णः—

* * * *

पुरा कदाचित्सञ्जाते सुरासुरमहामृधे ।
मुरारिर्भगवानेत्य सुराणां पक्षमाश्रितः ॥
चक्रेण दानवान् सर्वान् चक्रे दलितमस्तकान् ।
निर्मूलिते ततो वंशे दानवानामशेषतः ॥

* * * *

ब्रह्मोवाच—

अहो हि खलु गर्वस्ते दिव्या स्त्री त्वां वधिष्यति ।

* * * *

Colophon:

इति भद्रोत्पत्तिप्रकरणे प्रथमोऽध्यायः ॥

अथादौ भगवान् ब्रह्मा ससर्जेति वराङ्गनाम् ।
ब्राह्मीति नामधेयं च मातृसंज्ञाश्च दत्तवान् ॥
माहेश्वरीति विज्ञातां विससर्ज महेश्वरः ।

End:

सेयं भगवती देवी कण्ठेकाली महेश्वरी ।
चण्डिका चण्डदोर्वीर्ये चन्द्रसेनमहीपते ॥

* * * *

इदं चरित्रं महदद्भुतं वरं समस्तपापामयदिव्यभेषजम् ।
स्वयं विदित्वार्चय चण्डिकामिमामतस्त्वयि प्रीतिमती भविष्यति ॥

* * * *

इदन्तु यस्मिन् भवने तु पुस्तकं तदास्थित स्त्रीयुववृद्धबालकाः ।
न जातु रोगैरभिभूतिमाप्नुयुर्मसूरिकाद्यैरपि किन्ततोऽपरैः ॥
शृण्वतीनामिदं स्त्रीणामवैधव्यं फलं शुभम् ।
सन्ततिश्चार्थसंप्राप्तिरन्ते मुक्तिश्च सिध्यति ॥

Colophon:

इति मार्कण्डेयपुराणे भद्रोत्पत्तिप्रकरणे नवमोऽध्यायः ॥

R. No. **2952.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 58. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from a MS. of the Sanskrit Library, Bobbili.

भागवतव्याख्या—बुधरञ्जनी.

BHĀGAVATAVYĀKHYĀ : BUDHARAÑJANĪ.

Foll. 1*a*—57*b*. Fol. 58 is left blank.

A commentary called Budharañjanī on the work described under Nos. 2161 to 2198 of the D.C.S. MSS., Vol. IV, Part I.

Contains 1 to 3 Skandhas complete, and from the 9th Skandha to the end of the 81st Adhyāya of the 10th Skandha. Foll. 25*b*—30*b* contain certain portions of the 4th to 8th Skandhas. Breaks off in the 82nd Adhyāya of the 10th Skandha.

Beginning:

परव्याख्यां स्वज्ञया(?)ये प्रवदन्ति नराधमाः ।
अन्यस्याप्यथ चान्यस्य ब्रह्मघ्नास्ते गुरुद्रुहः ॥

स्वीया व्याख्या कदाचिच्चेत् सदृशी परकीयया ।
न तत्र दूषणं चास्ति तामश्रुत्वा कृता यतः ॥
नमश्चैतन्यचन्द्राय सर्वाज्ञानतमोनुदे ।
यत्कृपालेशमात्रेण तरन्ति विषयार्णवम् ॥
यशोदानन्दनः कृष्णो जातश्शच्यास्सुतो हरिः ।
तं वन्दे परमात्मानं गौररूपं कृपालयम् ॥

* * * *

श्रीमद्भागवताभिधस्य विषमश्लोकावलीनां मुदा
टीकां वै बुधरञ्जनीं वितनुते श्रीवासुदेवाभिधः ।
श्रीव्यासप्रतिमं प्रणम्य शिरसा तातं बुधानां मुदे
दृष्ट्वा स्वामिमतं पितुश्च सुपथं श्रीन्यायवागीश्वरः ॥

अथ भागवतशब्दस्य व्युत्पत्तिः । भगवत इदं भागवतम् । ननु भगवत्या इदं भागवतमिति कालिकापुराणादेर्भागवतत्वं कथं नायातीति चेन्न, अम्बरीषं प्रति गौतमवचनम्—

अम्बरीष शुकप्रोक्तं नित्यं भागवतं शृणु ।
पठस्व स्वमुखेनैव यदीच्छसि भवक्षयम् ॥ इति ॥

पद्मपुराणोक्तवचनेन शुकप्रोक्तत्वाभावात् कथं भागवतत्वमिति वाच्यम्, अत्र कालिकापुराणस्य भागवतत्वबाधकं सूतशौनकसंवादाध्यायानाञ्च भागवतत्वप्रतिपादकं वचनमस्ति मत्स्यपुराणे ।

End:

इति नवमः ॥

नत्वा कृष्णपदद्वन्द्वं वासुदेवेन यत्नतः ।
क्रियते दशमस्कन्धटीकेयं बुधरञ्जनी ॥

* * * *

यद्यपि दशमस्कन्धे सूर्यवंशवर्णनानन्तरं सोमवंशवर्णनं, तथापि सोमवंशे श्रीकृष्णावतारात्तस्य प्रधानत्वात्प्रथमत उपन्यासः ।

* * * *

तत्र पौनरुक्त्यापत्तिः बहुव्रीहिं विना भूरिपरं न भवति । भूरि यथा स्यात्तथा न स्मरेदित्यलं पल्लवितेन ॥

एकाशीतितमः ॥

पीत्वामृतं पयस्तस्याः पीतशेषं गदाभृतः । अमृततुल्यं पयः पीत्वा । पयः कीदृशं, गदाभृतः पीतशेषम्, पीतं पानं शेषो यत्र पयसि तत् । गदाभृतापीत्यर्थः । अमृततुल्यता स्वादुत्वे । (?) स्वामीष्वमृततुल्यत्वे हेतुः । गदाभृतः पीतशेषम् । तथा च जन्मकाल एव श्रीकृष्णेऽपि(न पी)तमिति भावः । तथा च जन्माष्टम्यां यश्चापि बालकं सुप्तं . . . . स्तन्यपायिनमित्यादिश्रवणात् ॥

R. No. **2953.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 56. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Bhāgavatam Vēṅkaṭabhāgavata Śāstrigāru, Vizianagram.

विश्वामित्रसंहिता.

VIŚVĀMITRASAṀHITĀ.

This forms one of the Saṁhitās of the Pāñcarātrāgama.

Complete in 32 Adhyāyas dealing with the following subjects :—

१. शौचविधिः.
२. स्नानविधिः.
३. माध्याह्निकस्नानविधिः.
४. मृत्तिकास्नानविधिः.
५. दर्भविधिः.
६. आचमनप्रकरणम्.
७. प्राणायामविधिः.
८. मार्जनविधिः.
९. अस्त्रप्रयोगः.
१०. उत्पत्तिन्यासविधिः.
११. स्थितिन्यासः.
१२. लयन्यासविधिः.
१३. न्यासध्यानविधिः.
१४. महाचम्पकन्यासविधिः.
१५. मन्त्रोद्धारकथनम्.
१६. शुभविधिकथनम्.
१७. औपासनविधिः.
१८. ब्रह्मयज्ञविधिः.
१९. तर्पणविधिः.
२०. वैश्वदेवकथनम्.
२१. पञ्चमहायज्ञविधिः.
२२. अतिथिपूजाविधिः.
२३. गायत्रीयन्त्रोद्धारः.
२४. मन्त्रोद्धारः.
२५. बीजोद्धारकथनम्.
२६. भूशुद्धिविधिः.
२७. भूतशुद्धिकथनम्.
२८. प्राणप्रतिष्ठाविधिः.

२९. अन्तर्मातृकान्यासविधिः.	३१. गायत्रीकवचविधिः.
३०. बहिर्मातृकान्यासविधिः.	३२. मन्त्रसाधनकथनम्.

Beginning:

स्वगुरुं पूजयेद्देवमुपचारैस्तु पञ्चभिः ।
भक्तिश्रद्धानुसारेण विश्वामित्रं प्रकल्पयेत् ॥
अस्य मन्त्रस्य हंसस्य प्राणापानौ निरुन्धयेत् ।
प्राणापानौ नियम्याशु गुरुपूजापुरस्सरम् ॥
प्रातरुत्थाय हि . . . स्नात्वा मूलस्थकुण्डलीम् ।
प्रबोधी सुप्रभातायां गायत्रीं तत्र चिन्तयेत् ॥
अष्टधा कुण्डली ज्ञेया द्वात्रिंशद्वर्णसंख्यया ।
चतुरक्षरसंयुक्ता क्रमेण वसुसंख्यया ॥

End:

यत्र यो विनियुक्तस्स्यान्मन्त्रो वेदचतुष्टये ।
तत्सर्वं मनसा कार्यमिति शास्त्रार्थसंग्रहः ॥
प्राच्यामापरिषेकेभ्यः कृत्वान्ते भास्करं ततः ।
आवाह्याभ्यर्च्य गन्धाद्यैर्होमान्ते विनिवेदयेत् ॥
साग्निप्रदक्षिणं कृत्वा प्रणम्य प्रार्थयेत्फलम् ।
प्रणम्योद्वासयेद्देवमिति साधारणा(णं म)न्मतम् ॥

Colophon:

इति विश्वामित्रप्रोक्तमन्त्रसाधनकथनं नाम द्वात्रिंशोऽध्यायः ॥

R. No. 2954.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 92. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Mahāmahōpādhyāya Nārāyaṇa Nambūdirippāḍ, Manager, Sabhāmaṭam, Kunnanguḷam post.

अर्जुनरावणीयम्, सव्याख्यम्.

ARJUNARĀVAṆĪYAM WITH COMMENTARY.

Foll. 1*a*—91*a*. Foll. 91*b* and 92 are left blank.

A poem describing the battle between the king Kārtavīryārjuna and Rāvaṇa, the work being intended to illustrate the Sūtras of the Aṣṭādhyāyī of Pāṇini. The work is followed by a commentary by Vāsudēva.

Contains Sargas 19—27 complete.

Beginning:

स्तोकाद्गतं वैरमनार्यचित्तं दूरादुपेतं भृतयुद्धबुद्धिम् ।
ततोऽन्तिकादुष्टमनिष्टचेष्टं दशाननं दर्शितभीमकायम् ॥
तमोजसानिर्जितदेवराजं दृष्ट्वा रथस्थं तपसा प्रसिद्धिम् ।
जग्राह राजा सहसात्तकोपश्चापानि चारूणि ससायकानि ॥

ततो राजा तं दशाननं दृष्ट्वा सहसात्तकोपः चारूणि स्थिराणि । चापानि धनूंषि । जग्राह दधार । चापबहुत्वं बाहूनां बहुत्वात् । कथंभूतं वैरं स्तोकाद्गतमल्पेनैव हेतुना विरोधं प्राप्तम्, अनार्यं दुष्टं चित्तं यस्य तम् । दूरादुपेतं चोरेभ्यः कार्तवीर्यैश्वर्यं श्रुत्वा लङ्काया आगतम् तत्र हेतुः भृतयुद्धबुद्धिमिति ।

* * * *

स्तोकान्तिकदूरशब्देभ्यः स्तोकान्तिकेति समासः । स्तोकशब्दस्य स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्येति करणे पञ्चमी च । पञ्चम्यास्स्तोकादिभ्य इत्यलुक्, अलुगुत्तरपद इति वर्तते । द्विवचनबहुवचनान्तानामनभिधानात्समास एव न भवति । तेन कदाचिदप्यैकपद्यमैकस्वर्यञ्च न भवति । ओजसानिर्जितः सहसात्तकोप इत्यत्र च ओजस्सहोऽम्भस्तमसस्तृतीयाया इत्यलुक् । रथस्थ इत्यत्र नेन्सिद्धबध्नातिषु चेत्यधिकृत्य स्थे च भाषायामिति (अ)लुगभावः ।

* * * *

Colophon:

इति अर्जुनरावणीये अलुक्पादे एकोनविंशस्सर्गः ॥

End:

सम्राट्छ्रियं समुपभुज्य मरुज्जवेन मालावलीनमधुलिट्छ्रुतिनिर्भरेण ।
आदित्यमार्गचरितेन स पुष्पकेण शय्याधिरूढगुरुणा प्रययौ दशास्यः ॥

सम्राट्छ्रियमुपभुज्य राज्ञां राजा सम्राट् कार्तवीर्यः । तस्य श्रियमैश्वर्यमनुभूय पुष्पकेण विमानेन । प्रययौ जगाम । कथं भूतेन मरुज्जवेन वायुवेगेन । मालावलीनां मधुलिहां भृङ्गाणां श्रुतिभिः स्वरैः निर्भरेण परिपूर्णेन । आदित्यमार्गमाकाशं तत्र चरितेन । शय्याधिरूढो गुरुः पुलस्तिर्यस्मिन् । सम्राट्छ्रियमित्यत्र [यणो मयो द्वे भवतः] (शच्छोऽटि) इति छकारः । शय्येत्यत्र हलो यमां यमि लोप इति यमि परतो यमां लोपो भवति । शय्येत्यत्र

द्वौ यकारौ क्रमजौ तृतीयः क्रमजो द्वित्वेन कृतः । तत्र मध्यमस्य यमो लोपो भवति । आदितेरपत्यमादित्यः । दित्यदित्येत्यादिना ण्य एको यकारः यणो मय इति क्रमजो द्वितीयः तत्र मध्यमस्य लोपः ॥

Colophon:

इति अर्जुनरावणीये रषाभ्यां पादे सप्तविंशस्सर्गः ॥

अर्जुनरावणीयं समाप्तम् ॥

वासुदेवैकमनसा वासुदेवेन निर्मिताम् ।
वासुदेवीयटीकां तां वासुदेव्य(वो)नुमोदताम् ॥

R. No. 2955.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 74. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdiri of Kūḍalūrmana, Trittala, Malabar district.

प्रत्यभिज्ञास्तुतिः, सव्याख्या.

PRATYABHIJÑĀSTUTIḤ WITH COMMENTARY.

Foll. 1*a*—73*b*. Fol. 74 is left blank.

A treatise in 20 Stōtras dealing with the following subjects: by Utpaladēva.

It is followed by a commentary called Śivānubhavadīpikā:

१. भक्तिविलासस्तोत्र.
२. सार्वात्म्यपरिभावनास्तोत्र.
३. प्रणयप्रकाशनस्तोत्र.
४. ईश्वरसोद्बलनास्तोत्र.
५. स्वबलनिवेशस्तोत्र.
६. अध्वविष्फारणानामस्तोत्र.
७. विधुरजयस्तोत्र.
८. अलौकिकोद्बलनास्तोत्र.
९. स्वातन्त्र्यविजयस्तोत्र.
१०. अवच्छेदभङ्गस्तोत्र.
११. औत्सुक्यविलिसितस्तोत्र.
१२. रहस्यनिवेशनस्तोत्र.
१३. प्रयोगरूढिस्तोत्र.
१४. जयस्तोत्र.
१५. भक्तिस्तोत्र.
१६. भक्तिबहुमानस्तोत्र.
१७. दिव्यक्रीडाबहुमानस्तोत्र.
१८. आविष्कारस्तोत्र.
१९. उद्योगस्तोत्र.
२०. चर्वणस्तोत्र.

Complete.

Beginning:

उद्धरत्यन्धतमसाद्विश्वमानन्दवर्षिणी ।
परिपूर्णा जयत्येका देवी चिच्चन्द्रचन्द्रिका ॥
अभ्यर्थितोऽस्मि बहुभिर्बहुशो भक्तिशालिभिः ।
व्याकरोमि मनाक् श्रीमत्प्रत्यभिज्ञाकृत्स्तुतीः ॥

ईश्वरप्रत्यभिज्ञाकारो वन्द्याभिधानश्श्रीमदुत्पलदेवाचार्योऽस्मत्परमेष्ठी सततसाक्षात्कृतस्वात्ममहेश्वरस्वरूपं तथात्वेन पराम्रष्टुमर्थिजनानुजिघृक्षया सङ्ग्रहस्तोत्र-जयस्तोत्र-भक्तिस्तोत्राण्याह्निकस्तुतिसूक्तानि च कानिचिन्मुक्तकान्येव निबबन्ध । अथ कदाचित् तानि तद्व्यामिश्राणि लब्ध्वा श्रीराम आदित्यराजश्च पृथक् पृथक् स्तोत्रशय्यया न्यवेशयत् । श्रीविवर्तकस्तु विंशत्या स्तोत्रैः स्वं स्वं नामभिर्व्यवस्थापितवानिति किल श्रूयते । तदेतानि सङ्ग्रहादिस्तोत्राणि सूक्तान्येव प्रसिद्धानि चावान्तरशय्योपारूढानि स्पष्टं व्याकुर्मः । तत्र मोक्षलक्ष्मीसमाश्लेषरसास्वादनमयस्य परमेश्वरसमावेशस्यैव परमोपादेयतां दर्शयितुं परमेश्वरस्वरूपाविभिन्नतत्समाविष्टभक्तजनस्तुतिमुखेनैतदभिन्नं महेश्वरमेवालौकिकेन स्तुतिक्रमेण स्तोतुमाह—

न ध्यायतो न जपतस्स्याद्यस्या विधिपूर्वकम् ।
एवमेव शिवाभासस्तं नुमो भक्तिशालिनम् ॥

यस्यैवमेव मार्थीयोपायं विना शिवाभासश्शिवस्वरूपस्वात्मप्रथा स्यात् । तं भक्त्यैव समावेशमय्या शालिनं श्लाघमानं तदतिरिक्तफलाकाङ्क्षाकलङ्करहितं नुमः । भक्तिचमत्कारवशप्रथितशिवभट्टारकाभेदभक्तिमन्नतिमुखेन तदभिन्नशिवावेशमया भवाम इति यावत् । एवमेवेत्यनेन सूचितमलौकिकं क्रमं स्पष्टयति—न ध्यायत इत्यादिना ।

End:

आरब्धा भवदभिरतिरमुना येनाङ्कन मम शम्भो ।
तेनापर्यन्तमिमं काल दृढमखिलमेव भविषीष्ट ॥

क्वचिदपि अदृष्टशैथिल्यादनार्ष इवायं श्लोकः । तथापि व्याख्यायते । अमुना चिदद्वयसमावेशोत्कर्षप्रदर्शिना येनाङ्केन सर्वजनसंलक्ष्येण शम्भो तव स्तुतिरारब्धा । तेन प्रकारेणापर्यन्तमिममखिलं दृढमविचलं कृत्वा मे भविषीष्ट प्राप्नुयात् । भू प्राप्ताविति एतस्यैतदिति शिवम् ॥

Colophon :

चर्वणस्तोत्रैकदेशो विंशतिः ॥

श्रीमदुत्पलदेवपादाचार्यकृतिस्तोत्रावलीयं शिवानुभवदीपिका सम्पूर्णा ॥

R. No. 2956.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 142. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Tekkematam, Trichur.

त्रय्यन्तभावदीपिका—ऋजुविवरणव्याख्या.

TRAYYANTABHĀVADĪPIKĀ : ṚJUVIVARAṆAVYĀKHYĀ.

Foll. 1*a*—141*a*. Fol. 141*b* contains something about Adhyāsa. Fol. 142 is left blank.

Wants the beginning.

Śaṅkara wrote a Bhāṣya on the Brahmasūtras of Vyāsa. Padmapāda commented on the Bhāṣya and called the commentary Pañcapādikā. Prakāśātman wrote a commentary called the Vivaraṇa on the Pañcapādikā. Viṣṇubhaṭṭa wrote a commentary called the Ṛjuvivaraṇa on the Vivaraṇa. Rāmānanda, pupil of Bhāratītīrtha, commented on the Ṛjuvivaraṇa under the name Trayyantabhāvadīpikā. The author salutes Śaṅkara, Padmapāda, Prakāśātman and Viṣṇubhaṭṭa.

Beginning :

तेन देहेन्द्रियादिष्वित्यादिना देहाद्यभिमानवत एव प्रमातृत्वादिकं नान्यस्येत्येतावन्मात्रमुत्तरत्र वक्ष्यते । नाध्यासात्मतेत्युक्तम् । विवरणे तु अन्यस्यान्यात्मतावभासो विद्यत इत्येतावन्मात्रमुपरिष्टाद्वक्ष्यते । नाध्यासात्मकतेत्युक्तमतः परस्परविरोध इत्याशङ्क्य टीकार्थं स्फुटयन् शङ्कां दर्शयति—उच्यत इत्यनेनेति । अयमर्थः—उच्यते न देहेन्द्रियेत्यनेनोपरिष्टाद्वक्ष्यमाणं प्रमाणमेवाभिधीयते न प्रमेयम् । एतदुक्तं भवति—देहेन्द्रियादिष्वभिमानवत एव प्रमातृत्वादि घटते नान्यस्येत्यनेन वक्ष्यमाणेनार्थापत्तिप्रमाणेनाध्यासात्मकता सिध्यतीति ।

* * * *

अत्र सङ्ग्रहः—

स्मृतिरूपा परत्रार्थे पूर्वदृष्टार्थधीर्भ्रमः ।
इति भाष्यं प्रसन्नार्थमवबाध्यान्यथोच्यते ॥
परस्मिन्भासमानोऽर्थः स्मर्यमाणसमोऽपरः ।
पूर्वदृष्टसमोऽध्यास इति टीकाकृता स्फुटम् ॥

टीकाभाष्यविरोधोऽतः स्फुटमेव प्रतीयते ।
श्रुतार्थहानिस्तत्र स्यादश्रुतार्थपरिग्रहः ॥ इति ॥

एतदनुपपत्तिपरिहारतया च स्पष्टार्थ इत्यनेनाभिप्रायभेदस्सूचितः । सोऽधुनास्माभिर्यथाश्रुतमभिधीयते ।

*   *   *   *

गभीरतरभावेयमस्मत्पक्षपथानुगा ।
विवृतिर्विष्णुभट्टस्य लघुभावेन लक्ष्यते ॥
त्रिलोकीप्राभृतं यद्वदासाद्य कुपरीक्षकम् ।
. . . . पि चिन्ताश्म भवेत्काणवराटकः ॥

*   *   *   *

Colophon:

इति त्र्यन्तभावदीपिकायां लक्षणभाष्यं समाप्तम् ॥

*   *   *   *

इत्थं निरस्य निखिलानुपपत्तिजाल-
मध्याससम्भवपथश्च मनोऽनुनीय ।
प्रत्येकशस्तमुपपादयितुं त्विदानीं
सोपानपर्वग इवाधरभूमिमाप ॥
कर्तृत्वादिरनर्थोऽयं यन्निमित्तश्चिदात्मनि ।
अहङ्कारस्य तस्यादौ साध्यतेऽध्यासरूपता ॥

*   *   *   *

Colophon:

क बाह्यगोचरास्माकं चपलाचपला मतिः ।
क चातिगहनार्थोऽयं प्रकाशात्मैकविग्रहः ॥
महामोहावलम्बे तु कस्य किं ब्रूत दुष्करम् ।
प्रभाकरसहस्राणि खद्योतोऽपि प्रकाशयेत् ॥
(ऋजुविवरणभावस्य रचिता भावदीपिका ।
भारतीतीर्थशिष्येण रामानन्दाभिधेन च) ॥

*   *   *   *

नमस्त्र्यन्तसर्वस्वसारासारविवेकिने ।
गुरवे पर(म)हंसाय विश्वाराध्याय विष्णवे ॥

End:

ननु यदि चिन्मात्रेऽध्यस्यते किमर्थं तर्हि नित्यशुद्धेत्यादि कथितमित्याशङ्क्य प्रयोजनमाह—नित्यशुद्धेत्यादिना . . . . सिन् बन्धा-

सम्भवः पूर्वमप्यत इति तत्राह—तादृशेति । ज्ञानस्य बन्धनिवर्तकत्वं सम्भावयितुमेवं कथितमिति भावः । व्यावर्तकत्वेनापीति . . . . वेऽपि ज्ञानव्यावर्तकतया विषयोऽपि . . . . र्थः । शिष्टं स्पष्टम् ॥

नित्यानन्दादिरूपा चितिरियमहमाद्यात्मना भासमाना
स्वर्भासा लीढभासा कृतिवदनिशमेवाविभक्तेव भाति ।
किं ते बुद्धेऽपि . . . तदपि तु निजानाद्यविद्यामहिम्ना
तस्मात्सत्या . . . क्यस्फुरणमिदमतोऽध्यास एवास्त्वनादिः ॥
भूतपञ्चकमिवोत्तरोत्तरं पूर्वपूर्वगतपाकजृम्भितम् ।
वायुपञ्चकमिवात्मपोषकं पूज्यपञ्चकमहं समाश्रये ॥
द्वैपायनं शङ्कर(पद्म)पादान् श्रीमत्प्रकाशात्मपदं मुनीन्द्रम् ।
वन्दामहे तच्च गभीरभावं विष्णुं प्रपञ्चप्रथितानुभावम् ॥

R. No. 2957.

Paper. $10\frac{7}{8} \times 9\frac{3}{8}$ inches. Foll. 268. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Tekkematam, Trichur.

ऋजुविवरणम्—पञ्चपादिकाविवरणव्याख्यानम्.
ṚJUVIVARAṆAM : PAÑCAPĀDIKĀVIVARAṆA-VYĀKHYĀNAM.

Foll. 1*a*—267*b*. Fol. 268 is left blank.

A commentary on the Pañcapādikāvivaraṇa, which is itself a commentary by Prakāśātman on the Pañcapadikā of Padmapādācārya : by Viṣṇubhaṭṭōpādhyāya, son of Janārdanasarvajña, pupil of Svāmīndrapūrṇa. The author quotes Triṇētra.

Complete.

Beginning :

असितजला(लद)रूपं सच्चिदानन्दरूपं
निजभुजजितराज्यं निर्जरेशेज्यपूज्यम् ।
नतजनहितरामं संश्रये स्वात्मरामं
जगदवनकृतं तं भासयन्तं नितान्तम् ॥
जगन्निर्माणनिपुणमोहनिर्वाहहेतवे ।
नमोऽनन्तसुखप्रत्यग्बोधरूपाय विष्णवे ॥

यत्प्रसादसमावाप्तधीविकाससमन्वितः ।
समर्थो वदितुं सम्यक् तां नमामि सरस्वतीम् ॥

* * * *

शमादिसेना(नं)निजरूपजैत्रीं(त्रं) सङ्गृह्य मोहं परिपन्थिदैत्यम् ।
मयोक्तिसीतां समवाप जित्वा तमि(स्वामी)न्द्रपूर्णं प्रणतोऽस्मि रामम् ॥

* * * *

गुरुवरकरुणाप्तं भावबोधं समीक्ष्य
ग्रहणा(ण) कृतिरू(सरू)पं सम्प्रदायानुरूपम् ।
ऋजुविवरणसंज्ञं ख्यापनार्थं परेषां
विवरणगतभावं बोद्धुमेतत्प्रवृत्तम् ॥

* * * *

शास्त्रारम्भेऽभिमतप्रयोजनसिद्ध्यर्थं परदेवतात्वेन प्रतिपाद्यमानं ब्रह्मादौ नमस्करोति—पालने विमलसत्त्ववृत्तय इति । विमलसत्त्ववद्वृत्तिर्यस्येति विग्रहः । स्थितिहेतुत्वात् । यद्वा सतो वर्तनं यस्येति वृत्तिवद्वृत्तिरिति चोत्तरार्धसामर्थ्यान्निश्चीयते । इतरत्राप्येवम् ।

* * * *

Colophon:

स्वामीन्द्रपूर्णपूज्यपादशिष्यसर्वशास्त्रविशारदजनार्दनात्मजसर्वज्ञविष्णुभट्टोपाध्यायकृतौ ऋजुविवरणे अध्यासभाष्यं समाप्तम् ॥

उत्तरावध्यनिर्देशात् कियत्प्रतिपादकमिति न ज्ञायते । तदर्थमाह—सर्वलोकेति । अध्याससिद्धिपरमित्यनेन तात्पर्यमुक्तम् । अवान्तरव्याख्यानन्तु तत्र तत्र भविष्यति । अतः तत्रापि पुनरुक्तमित्याशङ्क्याह—इदानीं विभज्येति ॥

* * * *

Colophon:

स्वामिन्द्र(पूण)पूज्यपादशिष्यस्य जनार्दनात्मजगुरुकुमारिलनयपारावारपारगसर्वज्ञविष्णुभट्टोपाध्यायस्य कृतौ ऋजुविवरणे लक्षणभाष्यं समाप्तम् ॥

End:

ननु फलवचनसामर्थ्यादेव मोक्षे बन्धनिवृत्तिरूपे ब्रह्मप्राप्तिरूपे वा सम्भवति सति किं मिथ्यात्वनिवृत्तिसिद्ध्ये साध्यत इत्याशङ्क्याह—फलवचनानामीति । ननु ब्रह्मात्मज्ञानात्सर्वव्यवहारनिवृत्तौ संवादो दर्शनीयः । अत्र कार्या-

भावप्रामाण्यं च लौकिकस्योक्तं, न तु व्यवहारनिवृत्तिः । यद्वा प्रकाशत एव सर्वदा ब्रह्म सर्वेषामात्मत्वादतः कथं तज्ज्ञानाभावात्कृत्याभाव इत्याशङ्क्योक्तमप्यर्थं श्लोकारूढं करोति— अद्वितीयेत्यादिना ।

विख्यातो यस्त्रिणेत्रो विदितनिखिलगी स्तत्सुतो यस्य नाम
मीमांसापारगन्तुर्जनरणनयुतो(यो ऽ)र्दनस्तत्सुतेन ।
बीजं यन्नाम सिद्धं तदिह वननिधेरद्वितीयेन युक्तं
वायोष्षष्ठं विधातुर्युतमिह दशनात्पञ्चमेनेशयुक्तम् ॥
मेये सुसूक्ष्मे मतिराविरासीद्गुरोः प्रसादेन कृता हि तेन ।
वेदान्तसिद्धान्तविवेचनाय टीका च सर्वैः परिभावनीया ॥
मद्देहगेहं समुपैति राम हृत्कञ्जपीठेन युतं निरीह ।
आराधये तत्र भवन्तमीशं भावोपचारैरखिलात्मरूपम् ।
आराधये राम कथञ्चिदात्मन्निस्साधनो ऽहं सकलं त्वमेव ॥
क्रिया विनेया विषयीकरोति कर्तापि चाहं न हि भिन्नरूपः ।

Colophon:

स्वामीन्द्रपूर्णपूज्यपादशिष्यसर्वशास्त्रविशारदजनार्दनात्मजगुरुकुमारिलनयपारावारगसर्वज्ञविष्णुभट्टोपाध्यायकृतौ ऋजुविवरणे समन्वयसूत्रं समाप्तम् ॥

R. No. 2958.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 142. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Payyūr Patteri, Payyūr.

ऋजुविमलापञ्जिका— बृहतीव्याख्या.
ṚJUVIMALĀPAÑJIKĀ: BṚHATĪVYĀKHYĀ.

Same work as that described under R. No. 2682 ante.

Contains only the sixth Adhyāya complete.

Beginning:

द्रव्याणां कर्मसंयोगे । यदि वृत्तेन सह सम्बन्धोऽस्ति तदासौ किमिति न कीर्तितः अथ न तदास्मिन्नेव स्थाने किमित्यधिकारलक्षणस्यारम्भ इत्यने

नाभिप्रायेणाह—अथ वृत्तेन सह सम्बन्धकथनं किमिति न क्रियते। सर्वत्र कृतस्य सम्बन्धकथनस्यात्राकरणे हेतुर्वर्णनीय इत्यर्थः। उत्तरम्—सम्बन्धाभावादिति ब्रूमः। कथन्तर्ह्यस्मिन्नेव स्थाने अधिकारलक्षणारम्भः अत्राह—पञ्चलक्षणापेक्षो ह्यधिकारः। पञ्चानां प्रमाणादीनां लक्षणमपेक्षतेऽधिकारचिन्तारम्भाय न पुनर्हेतुतयेति।

* * * *

Colophon:

इति ऋजुविमलायां षष्ठस्याद्यः पादस्समाप्तः ॥

End:

न च सामान्यं विशेषेऽवस्थाप्यमानं शब्दार्थतां जहाति। यद्यपि विनियोगेन विरोधस्तथापि तस्य कार्यानुगुण्याद्विशेषावस्थितिरेव न्याय्या। अनुष्ठानानुगुणोऽभि(हि)विनियोगः अनुष्ठानार्थत्वात्। अनुष्ठानं च मन्त्रान्वितमिति तद्वशेन विशेषावस्थापनमेव न्याय्यम्। न च रूढौ सम्भवन्त्यां यौगिकत्वं सम्भवतीत्युक्तम्। तस्मात्सुष्ठूच्यते—छागो वा मन्त्रवर्णादिति। शेषमुक्तम् ॥

Colophon:

इति पञ्चि(ञ्जि)कायां षष्ठस्याध्यायस्य अष्टमः पादस्समाप्तिमगात् ॥

R. No. 2959.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 33. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūrmana, Nareri, Trittala, Malabar district.

भरतचरितम्.

BHARATACARITAM.

A poem narrating the story of the marriage of Śakuntalā with the King Duṣyanta and the birth and reign of Bharata as narrated in the Mahābhārata: by Kṛṣṇa, who in the beginning praises Kālidāsa, Kuntalēśa, Bhāravi, (Guṇādhya) the author of Bṛhatkathā, Subandhu and Bhāṇa.

Breaks off in the tenth Sarga.

Beginning:

स्वस्तिप्रसूरस्तु रसोत्तराणां छायाम(म्म)नोज्ञामुपसेदुषीणाम् ।
सञ्चारिणीनां महिताङ्गभाजां गवां नियन्त्री परदेवता नः ॥
आदेशिकौ पद्यपथोद्यतानां रत्नाकरौ सूक्तिमहामणीनाम् ।
सन्मार्गसन्दर्शनपुष्पवन्तौ वन्दे कवीनां प्रथमौ मुनीन्द्रौ ॥
अस्पृष्टदोषा नलिनीव हृष्टा हारावलीव ग्रथिता गुणौघैः ।
प्रियाङ्कपालीव विमर्दहृद्या न कालिदासादपरस्य वाणी ॥
जलाशयस्यान्तरगाढमार्गमलब्धबन्धं गिरि चौर्यवृत्त्या ।
लोकेष्वलं कान्तमपूर्वसेतुं बबन्ध कीर्त्या सह कुन्तलेशः ॥
प्रदेशवृत्त्यापि महान्तमर्थं प्रदर्शयन्ती रसमाददाना ।
सा भारवेस्सत्पथदीपिकेव रम्या कृतिः कैरिव नोपजीव्या ॥
बृहत्कथाकारसुबन्धुबाणाः केषामिवाश्चर्यपदं न ते स्युः ।
यतः प्रसिद्धैरपि गद्यबन्धैश्श्लोकानसङ्ख्यान् भुवने वितेनुः ॥

* * * *

आसीदनल्पोपलहेमशिल्पा पुरी प्रतिष्ठानमिति प्रसिद्धा ।
स्वर्वाहिनीसूत्रगृहीतपार्श्वा या रत्नभूषेव भुवो बभासे ।

* * * *

तस्यां नगर्यां निजपादपातैस्सम्भावयन्भूमिभृतां शिरांसि ।
आसीत्त्रिलोक्यामिव तिग्मधामा दुष्यन्तनामा नरपालमौलिः ॥

* * * *

Colophon:

इति भरतचरिते कृष्णरचिते काव्ये प्रथमस्सर्गः ॥

* * * *

अवेहि कण्वस्य मुनेर्नियोगादभ्यागतं मां कपिशाभिधानम् ।
अस्त्यत्र किञ्चिद्गुरुणानुशिष्टमात्तैस्सह श्रोष्यसि मन्त्रिभिस्त्वम् ॥
आस्ते कुमारी कुलशीलयुक्ता शकुन्तलेत्याहितनामधेया ।
सा मेनकाकौशिकयोरपत्यमस्माकमङ्के परिवर्धिता च ॥

* * * *

तदाश्रमं प्राप्य शकुन्तलां त्वं गृहाण पाणौ करणेन साध्वीम् ।

* * * *

अथ तां महिषीं महीभुजस्तनयान्दोलितपाणिपल्लवाम् ।
करिणीमिव पोतलालितां मुनिरूचे नयशालिनीं गिरम् ॥
नगरीं व्रज सम्पदाश्रयामचलोत्सङ्गविहारिणी सती ।
त्वमवाप्तकुमारसम्भवा भज गौरीव तमीश्वरं पतिम् ॥

* * * *

अशृणोदशरीरिणीं गिरं जनसन्तापहरां नराधिपः ।
घनघोषमनोहरस्वरां नभसो वृष्टिमिवाथ तां नवाम् ॥
प्रतिबिम्बमिवात्मसम्भवं निजसादृश्यधरं महीपते ।
बिभृहि त्वममुं कुलाङ्कुरं तव सत्यं महिषी शकुन्तला ॥

End:

इति भरतचरिते नवमस्सर्गः ॥

अथ नाम्ना सुतं चक्रे भरणाद्भरतं नृपः ।
किन्नरीव यशो यस्य वाणी गायत्यकृत्रिमा ॥

* * * *

तदा शुकवयः प्राप्य बध्नन्तो मधुरां गिरम् ।
कणिकादनलुब्धेन निरस्ताश्शालिशालिना ॥
नाम्ना राजापि नक्षत्रैश्शुशुभे दिवि चन्द्रमाः ।
भरतस्तु महाराजः क्षत्रैरुर्व्यामराजत ॥
इत्थं शरदमालक्ष्य दीप्तां शक्तित्रयीमिव ।
यावान्सर्व . . . . ॥

R. No. **2960.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 61. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. K. C. Tirunārāyaṇa Rāja, B.A., L.T., Raja of Kōṭṭakal.

कादम्बरीसारसङ्ग्रहः.

KĀDAMBARĪSĀRASAṄGRAHAḤ.

Foll. 1*a*—59*b*. Fol. 60 contains ten stanzas on Gōlaviṣaya. Foll. 17*b*, 18*a* and 61 are left blank.

A poem narrating briefly the story of Kādambarī, a well-known romance in prose: by Trivikrama, son of Rājarāja and pupil of Vidyādhara Cakravartin. In the beginning the author praises Kālidāsa.

Contains 1 to 12 Sargas complete and one and a half stanzas in the 13th Sarga.

Beginning:

अप्रबुद्धमपि सर्वतोमुखं मां प्रबोधितवते परात्मकम् ।
अक्रमस्फुरितसर्वशक्तये चक्रवर्तिगुरवे नमो नमः ॥
उपशमयिता चिन्ताग्रन्थेर्निबर्हयितांहसः
परिणमयिता कल्याणस्य प्रकारयिता श्रियः ।
प्रतिजनयिता दुःखोच्छित्तेः प्रदर्शयितात्मनः
मनसि भविता नित्यं श्रीचक्रवर्तिकवीश्वरः ॥

* * * *

द्राक्षापाकमनोहरा सुमनसां चेतश्चमत्कारिणी
पीयूषद्रववर्षिणी श्रवणयोरानन्दनाडिन्धमा ।
सर्वालङ्कृतिशालिनी कवयितुः कस्यापि शिक्षावतः
वैदर्भी जयति प्रसादमधुरा क्षोदक्षमा भारती ॥
परशुनिशितधारा बुद्धितत्त्वप्रभावाः
कति कति न महान्तः पण्डिताः कुत्र सन्ति ।
अभिनवमधुधारा शुद्धवाणीविलासा
इह जगति कवीन्द्राः पञ्चषाः प्राञ्च एव ॥
श्रीकालिदासादिमहाकवीनां काव्यं सतां श्रोत्रसुधाप्रवाहम् ।
श्रुत्वा सलज्जो रसभावशून्यं को वा प्रबन्धं कुरुते प्रबन्धः(न्द्धा) ॥

* * * *

काव्यं गद्यमयं हृद्यं पद्यबन्धेन निर्मितम् ।
क्षीरमातञ्चनेनेव यास्यत्येव रसान्तरम् ॥
आसीत्सर्वगुणोपेतश्शूद्रको नाम भूपतिः ।
गन्धर्वैरभवद्गीता यत्कीर्तिस्त्रिदशालये ॥

* * * *

Colophon:

इति श्रीमत्सकलविद्याधरचक्रवर्तिचरणारविन्दशेखरस्य श्रीराजराजसूनोस्त्रिविक्रमस्य कृतौ कादम्बरीसारसङ्ग्रहे प्रथमस्सर्गः ॥

End:

ततस्स पित्रानुमतः कुमारः प्रयाणतूर्याहृतराजलोकः ।
निष्पत्य पुर्याश्शुकनाससूनुं प्रेम्णा दिदृक्षुस्सहसा जगाम ॥

* * * *

कस्मिन्प्रदेशे मतिमान् सखेति पृच्छन्तमन्तर्गतभावदोषम् ।
नरेन्द्रमालोकयतां जनानां मनो बभूव प्रतिपत्तिमूढम् ॥

* * * *

तेषां मुखात्तच्चरितं निशम्य दुःखासहिष्णुश्श्रुतिदुस्सहं सः ।
मन्थाचलोद्धृत्त इवाम्बुराशिश्चिरेण चिन्ताकुलितो बभूव ॥
तेनानुभूतान्यतिदुस्सहानि जन्मान्तराणीव दशान्तराणि ।
सञ्चिन्तयन्नात्मविनाकृतानि धीरोऽपि पर्यश्ररभूत्कुमारः ॥

* * * *

इति विपदि निमग्ने दूरसंस्थे कुमारः
सुहृदि श(ग)तमनस्कै(स्क)स्सैन्यबृन्दार(नु)यातः ।
ग्रहगणपरिपीतः क्षीणकान्तिर्दिनादौ
विधुरिव चरमाद्रिं राजधानीं जगाम ॥

Colophon:

इति श्रीचक्रवर्तिचरणारविन्दशेखरस्य श्रीत्रिविक्रमस्य कृतौ कादम्बरीसार सङ्ग्रहे द्वादशस्सर्गः ॥

स तत्र पुञ्जीभवतः पुरस्तादुद्भिन्नबाष्पप्रसराविलाक्षः ।
ददर्श दीनार्तिहरोऽपि दीनः पौरान् परिम्लानमुखप्रसादान् ॥
अग्रे प्रयातौ शुकनासगेहं निशम्य मातापितरौ कुमारः ।

R. No. **2961.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 44. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Cheralayam Rāja, Kunnankulam, Malabar district.

पारिजातहरणम्.

PĀRIJĀTAHARAṆAM.

Foll. 1*a*—42*b*. Foll. 43 and 44 are left blank.

A poem describing the story relating to the forcible transplantation of the Pārijāta plant by Kṛṣṇa from Indras' gardens, as narrated in the Śrī-Bhāgavata: by Kavirājapaṇḍita who wrote this work at the instance of Kīrtinārāyaṇa of Kadamba family, who reigned at Vānavāsi, now called Belgaum, probably in 1120 A.D.

Complete in ten Sargas.

Beginning:

तलांशुताम्रां स्फटिकाक्षमालां समुल्लसद्दाडिमबीजबुद्ध्या ।
शुकार्भके चुम्बति सस्मिता वस्सरस्वती वाक्प्रसराय भूयात् ॥
अस्ति प्रजास्वस्तिकरस्त्रिलोक्यामस्तोकविस्तारितकीर्तिपूरः ।
द्विजोत्तमो गौतमगोत्रधुर्यः श्रीकीर्तिनारायणनामधेयः ॥
यो वानवासी विषयेश्वराणां राज्ञां कदम्बान्वयसम्भवानाम् ।
दिगीश्वराणामिव कार्तिकेयस्सेनाधिपत्यं सततं बिभर्ति ॥
प्रसिद्धतीर्थाधिगतेर्विपक्षं जिगीषतो जुष्टसदासनस्य ।
विभक्तपञ्चाङ्गविधेस्सुगुप्ताः फलन्ति मन्त्रा उभयेऽपि यस्य ॥

* * * *

मनस्विनी यस्य च धर्मपत्नी पतिव्रतानां श्रवणीयकीर्तिः ।
समग्रसौभाग्यनिवासभूमिर्नाम्ना श्रुता चन्द्रमुखीति लोके ॥
तस्योदधेरिन्दुरिवानुवेलमुल्लासयन् कीर्तितरङ्गमालाम् ।
बभूव कश्चित्प्रवरो द्विजानां कलाभिरामः कविराजनामा ॥
स पारिजाताहरणाभिधानं मन्दोऽपि काव्यं कविकर्णसेव्यम् ।
चकार नारायणदण्डनेतुर्विनोदहेतोर्दुरितापनोदि ॥
स्तुवन्तु निन्दन्त्वथवा मितज्ञा गुणागुणव्यक्तिबहिर्मुखा ये ।
अपामिवागस्त्यमयूखपुञ्जाः शि(गि)रांसि(हि)नैर्मल्यनिनाद(दान)मार्याः॥

* * * *

अथाजिभूमौ भुवनैकभीमं विजित्य भौमं सहसत्यभामः ।
सुरप्रसूतिर्मणिकण्डलाभ्यान्देवीं परिष्कर्तुमियेष शौरिः ॥

* * * *

गाङ्गं पाथास्त्रि(स्त्रि)दिवपदवीपान्थपाथेयभूतं
नित्यानन्दप्रसवि मुनिभिस्सेव्यमानं दधानम् ।

आब्रह्माण्डावधि परिलसत्कीर्तिनारायणस्य
प्रत्युत्कर्षः किमपि विदधे भूभृताञ्चक्रवर्ती ॥

Colophon :

इति पारिजातहरणे महाकाव्ये प्रथमस्सर्गः ॥

End:

एवं ब्रुवन् प्रियतमामवतीर्य ताक्ष्यात्सानन्दशंकिरदृशां यदुपुङ्गवानाम् ।
सन्दर्शनप्रणति . . . कौतुकानि सम्भावयन् स्वभवनं हरिराससाद ॥
तत्राभिवन्द्य गुरुवर्गमनर्गलश्रीस्तत्तोषबाष्पसलिलोक्षितनम्रमौलिः ।
सो(स्वो)द्यानमाहितसुरद्रुममङ्गनानामानन्दनं व्यधित नन्दननिर्विशेषम् ॥

* * * *

इत्थं जित्वा युधि परबलं बाहुवीर्येण नीतं
स्वं धामासौ भुवन . . . कीर्तिनारायणेन ।
उत्साहानामिव समुदयस्तुङ्गकोटिस्तदीय-
स्वस्ताराशावल . . मरव . . सौरभैः पारिजातः ॥

Colophon :

इति श्रीमद्गौतमगोत्रचूडामणिमहामन्त्रिमुख्येन समुपनतमुख्येन . . . कुलजनसङ्कल्पपारिजातेन . . . तपारिजातेन निखिलविद्याविनोदबादरायेण? मतिबलतुलितयौगन्धरायेण श्रीकीर्तिनारायणेन प्रोत्साहितस्य कविराजपण्डितस्य कृतौ पारिजातहरणे दशमस्सर्गस्समाप्तः ॥

R. No. **2962.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Tekkematam, Trichur.

केनोपनिषद्व्याख्या—शङ्करहृदयङ्गमा.

KĒNŌPANIṢADVYĀKHYĀ : ŚAṄKARAHṚDAYAṄGAMĀ.

A commentary called Śaṅkarahṛdyaṅgamā on the Kēnōpaniṣad, which work is described under No. 386 of the D.C.S. MSS., Vol. I, Part III : by Kṛṣṇalīlāśukamuni.

Complete.

Beginning :

तत्त्वं किमपि कृष्णस्य समुत्तीर्णजगद्भ्रमम् ।
स्वप्रभं सुखसाम्राज्यं स्वादते स्वादिमावधि ॥

वन्दे भगवतीं गङ्गां तुङ्गां भगवतस्तनुम् ।
उन्मज्जन्ति निमज्जन्ति यस्यां भुवनवीचयः ॥
केनेषितोपनिषदः कृष्णलीलाशुको मुनिः ।
आचार्यवचसां चार्थमाह वीक्ष्य विवक्षितम् ॥
कामं वयं बहुविदो भवेम न भवेम वा ।
कृतिरेषा विशेषज्ञान् किन्तु कण्ठे ग्रहीष्यति ॥

* * * *

सङ्कलितसकलसारां शङ्करहृदयङ्गमामिमां विवृतिम् ।
अङ्कुरितबहुलपुलकालङ्कृतयः शृणुत शृणुत बुधाः ॥
वयमप्यनुगृह्येमहि कर्णावपि वः कृतार्थतां लभताम् ।
अपि च भुवनाद्भुतेऽस्मिन् सुखसाम्राज्ये मुहुर्मतिः प्लवताम् ॥

तथा हि "आत्मा वा इदमेक एवाग्र आसीत् । नेह नानास्ति किञ्चन । अनन्ते स्वर्गे लोके ज्ञेये प्रतितिष्ठति । यो वै भूमा तत्सुख"मित्येवमा(दि) ज्ञानतस्तावदात्मसुखसाम्राज्यमेवाऽस्ति ।

* * * *

Colophon:

इति श्रीकृष्णलीलाशुकमुनिविरचितायां शङ्करहृदयङ्गमाख्यायां केनोपनिषद्व्याख्यायां निर्गुणकाण्डस्समाप्तः ॥

End:

तदेवं तत्त्वविद्यावाप्तनिजपदाभिषेकस्य न द्वैतानुबन्धगन्धोऽप्यस्ति किन्तु अनन्तानन्दसाम्राज्यमेव निजमात्मप्रभमप्रतिबद्धञ्चकास्तीति समस्ताभीष्टसीमसिद्धिः ॥

तत्त्वं जयति कृष्णस्य तद्विष्णोः परमं पदम् ।
अद्वयं यद्वयं शश्वदास्वाद्यास्वाद्य निर्वृताः ॥

अपि च ।

गुरुणा करुणानिरीक्षणक्षणनिर्वासितसर्वसञ्ज्वराः ।
निजनिर्वृतिपर्व सर्वतः कलयामः कथयामहे कियत् ॥

* * * *

तामेनां विवृतिं तं च शाश्वतं शिवमच्युतम् ।
तच्चैतत्सहजाह्लादस्वाराज्यमधिगच्छत ॥ स्वाराज्यमधिगच्छतोभिति ॥

The scribe adds—

द्रमिडभुवायिदिषु(?) (हि)परासङ्गादुपेत्य मलयभुवम् ।
हरिचरणे धृतमनसा सुन्दरनाम्ना व्यलेखि कविनेदम् ॥

R. No. 2963.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūrmana, Nareri, Malabar.

मयूरसन्देशः.

MAYŪRASANDĒŚAḤ.

Foll. 1*a*—21*a*. Foll. 21*b* and 22 are left blank.

A love message sent by a lover to his beloved through a peocock. The name of the author is not known.

Complete.

Beginning:

अविरतमदधाराधारणाप . . . . . .
न्मदमधुकरमालाकूजितोद्घोषिताशम् ।
मम मनसि समिद्ध(न्द्ध)ां सिन्धुरेन्द्राननं त-
त्किमपि कनकशैलप्रस्थसच्छायमोजः ॥
श्रीकण्ठोर्वीपतिबहुमतं मारचेमन्तिकाख्यं
मारस्यास्त्रं महितमधिकृत्याधुना साधु बद्धम् ।
हृष्यन्मल्लीमधुरमधुनिष्यन्दिसन्देशकाव्यं
नव्यं विद्वत्कविपरिषदामस्तु कर्णातिथेयम् ॥
स्वर्गारामद्रुमनवलतासूनसौरभ्यलाभ-
ग्रामं(मे) पुष्पन्धयकलकलध्वानवाचालिताशे ।
सौधे साधीयसि (प)रिलसच्चन्द्रपादाभिरामे
रेमे व्योमस्पृशि मथितया लालितः कोऽपि का(मी) ॥
कुर्वन्निच्छाविहातिमुमया सङ्गतः स्फाटिकाद्रा-
वास्ते चिल्लीचलनकणिकाक्लृप्त . . . . स्थः(?) ।
श्रीकण्ठोऽयं स्वयमिति धृतभ्रान्तिरेनं कदाचित्
प्रक्रान्तो . . . . . तिमुखः खेचरीघस्सिषेवे ॥

हा हन्तासौ हतविधिविपर्यासितात्मा तदीयं
दृष्ट्वा जाड्यं मुहुरपि मिलद्धस्ततालं जहास ।
सेयन्दूरीभवदसुसमो मासमासेति तस्मै
शापं प्रादान्मह(द)वमतिः कस्य नार्तिं प्रसूते ॥

तेनावासो मम मधुजितस्सन्निधौ क्वापि पुण्ये
क्षेत्रे स्यादित्यथ सविनयं प्रार्थ्यमानस्तथेति ।
प्राप्य प्रायादयमपि समैक्षिष्ट सद्यस्सुदूरे
स्यानन्दूरे विगतदयितादीन(मा)त्मानमेव ॥

दैत्याराति दलितशतमन्यूपलोदारशोभं
पश्यन्नेनं भुजगशयने कल्पितस्वापसौख्यम् ।
तापोद्रेकन्दधदपि मुहुः प्रेयसीविप्रयोगा-
दच्छश्वासक्षणमिव शनैरेष सञ्जातसंज्ञः ॥

सोऽयं कान्ताविरहजलधौ वीतपारे निमग्नः
स्वं वृत्तान्तं सरसिजदृशो हन्त सन्देष्टुकामः ।
विद्युद्वल्लीकवचितनवाम्भोदनीरन्ध्रिताशे
काले कान्तं कमपि शिखिनं सम्पतन्तं ददर्श ॥

* * * *

आश्चर्याणामतिशयवतां जन्मभूमिस्त्रिलोक्यां
ख्यातः श्वेतच्छदतटगिरा सौम्य ते गम्यदेशः ।
कामस्यात्माभिमतघटनासाहसत्यक्तमूर्तेः
प्रीत्या नित्यं निवसति पुरे यत्र शैलेन्द्रकन्या ॥

End:

विश्लेषार्तां मम सहचरीमित्थमाश्वास्य युक्त्या
पश्चादच्छाशय परिपत भ्रातराशामभीष्टाम् ।
स्मर्तव्योऽहं प्रियसख पुनस्तत्र तत्रान्तरे ते
माभूत्कान्ताविरहघटना किञ्च जन्मान्तरेऽपि ॥

Colophon:

इति मयूरसन्देशस्समाप्तः ॥

R. No. **2964.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūrmana, Nareri, Malabar district.

मारुतसन्देशः.

MĀRUTASANDĒŚAḤ.

Foll. 1*a*—21*a*. Foll. 21*b* and 22 are left blank.

A love message sent by a lover to his beloved through Marut, the god of wind. It is similar to the Mēghasandēśa of Kālidāsa. The author is not known.

Complete.

Beginning :

आनन्दाब्धौ सह दयितया कोऽपि खेलद्विलासी
हर्म्ये रम्ये सुरभिसमये मन्मथाज्ञानुवर्ती ।
ईर्ष्यावेगादिव कुचतटात्तूर्णमाकृष्य तस्याः
निन्ये दूरं कनककटकं नाम शैलं नियत्या ॥
तत्पूर्वं तज्झटिति विरहः कान्तया सम्प्रयात-
स्तस्मिन्वासन्तिकतरुवृते सर्वरत्नाद्रिशृङ्गे ।
भूयस्यासौ कबलितधृतिश्चिन्तया क्रान्तचेताः
मन्दं वान्तं मलयमरुतं चैत्रमित्रं ददर्श ॥

* * * *

त्वय्यभ्याशं गतवति सखे साम्प्रतं दैवयोगात्
चित्तं मत्कं(त्तं) विरहविधुरं हन्त निर्वाणमेति ।
किञ्चाकाण्डे हहह नितरां जातविस्रम्भयोगो
मामर्थित्वे भवति विषये विश्वबन्धो नियुङ्क्ते ॥
स्वप्रासादे विहृतिविरतौ वल्लभालिङ्गितोऽहं
सुप्तश्श्रान्त्या सुखमिह हहा शैलसानावबुध्ये ।
बुद्धश्चावैक्षिषि दयितया शून्यमात्मानमारा-
दातिष्ठन्तं कमपि पुरुषं त्वाञ्चित . . चिह्नैः ॥
आख्यच्चासावथ हतदशावाप्तिपर्याकुलं मां
सौम्यातङ्कं त्यज निशमयैताञ्च तथ्यां गिरं मे ।

हेतोः कस्याप्यहरमहमेवात्मगेहाद्भवन्तं
तत्त्वं हेतोः(तुं)मम च नचिरादेव वक्तास्म्यहं त्वाम् ॥
गन्तव्या नो वसतिरमुतो मन्नियोगं विना ते
कार्यात्रैव स्थितिरपि सखे यावदेष्याम्यहं त्वाम् ।
तुभ्यं भद्रं भवतु कृतिने मात्र ते द्वापरोऽभू-
दित्याभाष्य त्रिदिववसतिर्मां दिवञ्चोत्पपात ॥

* * * *

यातव्या ते पुनरिह पुरी कामदत्ताभिधाना
सौदत्तानां भुवनविदिता वासभूमिर्नृपाणाम् ।
यस्यां प्रीत्या हिमगिरिसुतापूर्णवामाङ्गभागो
नित्यं देवस्त्रिपुरविजयी विश्वनन्दाख्ययास्ते ॥

End:

आनन्दोत्थानथ कबलयन् शीतलानश्रुबिन्दू-
न्मन्दास्मित्या सुरभिलतनुस्स्मेरपद्माननायाः ।
तामापृच्छ्य त्वमपि विचर स्वेच्छया देवलोकान्
भूयश्चामुं जनमनुगृहाणात्मसौभाग्यलक्ष्म्या ॥

Colophon:

इति मारुतसन्देशः समाप्तः ॥

R. No. 2965.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 78. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Paravastu Veṅkaṭaraṅganāthācāriyar, Vizagapatam.

ब्रह्मसूत्रवृत्तिः.

BRAHMASŪTRAVṚTTIḤ.

Foll. 1*a*—78*a*. Fol. 78*b* is left blank.

A brief commentary called Vṛtti on the Brahmasūtras of Vyāsa in accordance with the Viśiṣṭādvaita-Vēdānta. The name of the commentator is not known.

Complete in four Adhyāyas.

Beginning:

सम्यङ्न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥

तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥

सू । अथातो ब्रह्मजिज्ञासा ।

त्रिपदमिदं सूत्रम् । अथ कर्मज्ञानानन्तरम् । अतः कर्मज्ञानस्य वृत्तत्वाद्धेतोः । ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा ब्रह्मज्ञानेच्छा । ब्रह्म ज्ञातव्यमित्यर्थः ॥

सू । जन्माद्यस्य यतः ।

त्रिपदम् ।

* * * *

Colophon :

इति शारीरकमीमांसासूत्रार्थे प्रथमस्याध्यायस्य चतुर्थः पादः ॥ अध्यायश्च समाप्तः ॥

End :

सू । अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॥

परमपुरुषं प्राप्तस्य मुक्तस्यानावृत्तिः पुनरावृत्तिः पुनस्संसारं प्रत्यावृत्तिरागमनं नास्ति । कुतः शब्दात् स खल्वेवं वर्तयन्नित्यारभ्य न च पुनरावर्तत इत्यादिश्रुतेः, मामुपेत्येत्यादिस्मृतेश्चेत्यर्थः ॥

Colophon :

इति श्रीशारीरकमीमांसासूत्रव्याख्याने चतुर्थाध्यायस्य चतुर्थः पादः ॥ समाप्तं शास्त्रम् ॥

R. No. 2966.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 94. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdrippāḍ of Kūḍalūrmana, Nareri, Trittala, Malabar district.

महाभाष्यप्रदीपविवरणम्.
MAHĀBHĀṢYAPRADĪPAVIVARAṆAM.

Same work as that described under R. No. 39 ante. The commentary is called Nārāyaṇīya after the name of the commentator.

Contains from the fifth Sūtra of the first Pāda of the first Adhyāya in the fourth Āhnika and breaks off in the end of the seventh Āhnika of the same Pāda and the first Āhnika of the third Pāda of the first Adhyāya.

Beginning:

गो(आङ्गे)षु तात्येषु(कार्येषु) कृतेषु साधुत्वस्य सिद्धत्वात् पुनराङ्गतात्यं (कार्यं) न भवतीतीष्टं सिद्धमिति । क्ङिति च ।

क्ङितीति परसप्तम्यां सत्यां तन्निमित्तग्रहणस्य कर्तव्यता इति प्रतिपादयितुं तत्सम्भवमाह—इक इत्यनुवर्तत इति । ननु वचनसामर्थ्याद्व्यवहितस्यापि भवतु निषेध इत्याशङ्कानिरासायाह—चितं स्तुतमित्यादावेवेति । ननु गुणवृद्धिविशेषणपक्षेऽपि क्ङिति परतो ये गुणवृद्धी विहिते ते न भवत इत्येव सम्भवत्येव परसप्तमीत्यत आह—नहीति ।

* * * *

Colophon:

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे प्रथमाध्यायस्य प्रथमे पादे चतुर्थमाह्निकम् ॥

* * * *

Colophon:

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकम् ।

सू । इग्यणः । ननु पूर्वोच्चरितस्संज्ञीति (इ) कस्संज्ञित्वनिश्चयात्सन्देहाभावात्प्रश्नानुपपत्तिरित्यत आह—पक्षद्वयस्यापीति ।

* * * *

आदेः परस्येति । सर्वनाम्न इति षष्ठी । मन्यत इति । आनन्तर्यसम्बन्धे च षष्ठी । सर्वनाम्नोऽनन्तरस्य जसश्शीति । नपुंसकादिति च विहितविशेषणमिति नपुंसकाद्विहितयोर्जश्शसोश्शिरिति । ततश्च तस्मादित्युत्तरस्येति परस्येति परस्य विधानाभावात्तद्विषये विधीयमानमादेः परस्येतदपि न प्रवर्तत इत्यन्यः ।

End:

ननु गङ्गाशब्दो लक्षणया तीरे वर्तते । तस्य च मुख्यमाधारत्वमित्यनुदाहरणमेतदित्यत आह—गङ्गाशब्दोऽत्रेति । अनेन योगेन गौणस्याप्याधारस्याधिकरणत्वे सिद्धे गङ्गाशब्दस्य मुख्यार्थवृत्तित्वमाविहतामिति लक्षणा नाश्रयणीयेत्यर्थः । यदि स्वरितत्वप्रतिज्ञानेन पूर्वो विधिः परं बाधते इत्यादि भाष्ये अधिकारगतिसूत्रे इत्युक्त्वार्थसङ्ग्रहश्लोकः । विशेषायेति । साङ्काश्यकेभ्यः पाटलीपुत्रका अभिरूपतरा इत्यादिविशेषविषयेऽपि सिद्ध्यर्थमित्यर्थः । यद्वा अविशेषाय गौणमुख्ययोरविशेषेण कार्यप्रवृत्त्यर्थमित्यर्थः ॥

Colophon:

इति श्रीनारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥

R. No. **2967.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed Adhyāyas 1 to 5 in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Puliyanūr-mana, Tiruppanattura, Cochin State, and Adhyāyas 6 to 12 were transcribed from a MS of M.R.Ry. Nambiyathan Bhaṭṭatirippāḍ, Āvūr-mana, Porakam, Cochin State.

सिद्धान्तमुष्टिः.

SIDDHĀNTAMUṢṬIḤ.

Foll. 1*a*—17*a*. Foll. 17*b* and 18 are left blank.

A treatise in verse briefly indicating the conclusions arrived at, in the Adhikaraṇas of the Pūrvamīmāṁsā.

Complete.

Beginning:

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
जैमिनीयन्यायमाला श्लोकैस्सङ्गृह्यते स्फुटम् ॥

मीमांसाध्यायपादानां न्यायानामप्यनुक्रमः ।
क्रियते येन शास्त्रार्थस्सहसा स्मर्यतेऽखिलः ॥
धर्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्र लक्षणैः ।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः ॥

* * * *

धर्मो विचार्यः प्राक् स्नानात्स च विध्येकमानतः ।
परीक्ष्या तत्र मास्माकं न दृष्टाद्यत्र मा भवेत् ॥
वेदोऽनपेक्षो मैवात्र दृष्टं ग्राह्याक्षयोगजम् ।
धियस्सालम्बनास्सर्वास्स्वीयांशालम्बना न च ॥

* * * *

वायुर्वा इति पादेन पुमर्थस्स्तूयते विधेः ।
ऊर्जोऽवरुध्या इत्येष विधेरुन्नायकस्स्तवः ॥
तेन ह्यन्नं न हेतुस्स्यात्किन्तु स्तावक एव सः ।
अनुष्ठेयस्मृतिर्मन्त्रैश्चत्वारोऽर्था विचारिताः ॥

अष्टकादिस्मृतिर्मानममानं वेष्टनस्मृतिः ।
वैसर्जनस्मृतिस्तद्वत्क्रमादाचमनं बलि ॥

* * * *

Colophon :

इति सिद्धान्तमुष्टौ पथमोऽध्यायः ॥

End :

जाघनीनां विकल्पः स्यान्नित्योख्यं काम्यबाधितम् ।
काम्यो नाहवनीयोऽसौ तत्राधानादिकं न हि ॥
उख्यस्य धारणं न स्यात् शुक्रस्पर्शादि कस्यचित् ।
कोऽप्यहीनेऽपि शुक्रस्पृक् सत्रे गृहपतिस्तथा ॥
अञ्जनादीनि सर्वेषामृत्विक् स्याद्विप्र एव हि ॥
अर्थाः षोडश पादेऽस्मिन् मिलित्वा सप्ततिर्भवेत् ॥

Colophon :

इति सिद्धान्तमुष्टौ द्वादशस्याध्यायस्य चतुर्थः पादः ॥
समाप्तश्चाध्यायः ॥

R. No. 2968.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala, Malabar district.

बृहत्संहिता, परिमलव्याख्यासहिता.

BṚHATSAṀHITĀ WITH COMMENTARY PARIMALĀ.

Foll. 1*a*—19*b*. Fol. 20 is left blank.

Same work as that described under No. 13585 of the D.C.S. MSS., Vol. XXIV.

R. No. 2969.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 8. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala, Malabar district.

सङ्क्षेपरामायणम्.

SAṄKṢĒPARĀMĀYAṆAM.

Foll. 1*a*— 8*a*. Fol. 8*b* is left blank.

A poem in three Sargas narrating briefly the story of the Rāmāyaṇa for the beginners: by Vāsudēva, a recent author. He has also written the Saṅkṣēpabhārata—vide R. No. 2895 ante.

Beginning:

श्रीमन्तं सीतया सार्धमासीनं परमासने ।
सानुजं सर्वलोकेशं रामचन्द्रमुपास्महे ॥
रामस्य चरितं पुण्यं सङ्क्षिप्य वदतो मम ।
वाल्मीकिमुख्या गुरवः प्रसीदन्तु दयालवः ॥
राजा दशरथो नाम सूर्यवंशेऽभवत्पुरा ।
अयोध्यायां स निवसन्पालयामास मेदिनीम् ॥
तिस्रस्तस्याभवन्भार्याः प्रेयस्यो गुणभूषणाः ।
कौसल्या चैव कैकेयी सुमित्रा च सुमध्यमा ॥

* * * *

Colophon:

इति वासुदेवविरचिते सङ्क्षेपरामायणे प्रथमस्सर्गः ॥

End:

ततः प्रकृतयस्सर्वास्समागम्य मुदान्विताः ।
अभ्यषिञ्चन्नयोध्यायां रामं दाशरथिं नृपम् ॥
सर्वान्यथार्हं सम्भाव्य रत्नैराभरणैश्च सः ।
वानरान् राक्षसांश्चैव विससर्ज सुसत्कृतान् ॥
गते वानरराजे च राक्षसे च विभीषणे ।
ममुदे राघवो राजा सानुजस्सह बान्धवैः ॥
विधाय कार्यं विबुधेश्वराणां विशालयन्धर्मपथं चिराय ।
रराज रूप रघुवंशकेतुर्महीतले मङ्गलकीर्तिलक्ष्मीः ॥

Colophon:

इति वासुदेवविरचिते सङ्क्षेपरामायणे तृतीयस्सर्गस्समाप्तः ॥

R. No. **2970.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 10. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Trittala, Malabar district.

मङ्खुकसूत्रोदाहरणम्.

MAṄKHUKASŪTRŌDĀHARAṆAM.

Foll. 1a—9a. Foll. 9b and 10 are left blank.

A work on poetics and rhetoric : by a pupil of Maṅkhuka. Herein the author gives his own illustrations to the Sūtras of Maṅkhuka. He also quotes Cakravartin, the author of the Sampradāyaprakāśinī, a commentary on the Kāvyaprakāśa.

Incomplete.

Beginning :

प्रणिपत्य गणेशानं वाणीमाचार्यमात्मनः ।
वक्ष्ये मङ्खुकसूत्राणि सोदाहरणसङ्गतम् ॥

तत्र तावदादावखिलसूरिजनोपलालितमतिकौशलेनास्मदाचार्येण प्रणीतानि दुरवबोधकाव्यालङ्करणसरणिनिरूपणोपकारीणि विभागसङ्ग्रहसूत्राणि लिख्यन्ते । तानि यथा—शब्दार्थोभयवर्णपौनरुक्त्ये यमकानुप्रासपुनरुक्तवदाभासलाटानुप्रासचित्राणि । प्राधान्ये भेदाभेदयोस्साधर्म्ये चोपमानन्वयोपमेयोपमास्मरणानि । अभेदस्य त्वारोपे रूपकपरिणामसन्देहभ्रान्तिमदुल्लेखापह्नुतयः ।

* * * *

अथ श्रीमान् मङ्खुकाचार्यः प्रतिपिपादयिषितमलङ्कारस्वरूपं बुद्धौ सङ्गृह्य प्रागेव तदेकदेशपीठिकाभूतं पौनरुक्त्यप्रकारमुद्दिशति—

इहार्थपौनरुक्त्यं शब्दपौनरुक्त्यं शब्दार्थपौनरुक्त्यञ्चेति त्रयः पौनरुक्त्यप्रकाराः ।

इहेति । त्रयः पौनरुक्त्यप्रकारा इति सम्बन्धः । इहेति शास्त्रे प्रस्थान इत्यर्थः । इतिशब्दः प्रकारे ।

विभागाधिगतं त्रित्वं त्रिशब्देन समाप्यते ।
त्रिप्रकारत्ववचन इतिशब्दस्ततो मतः ॥

इति श्रीमच्चक्रवर्ती । प्रकारत्रयं विवृणोति—

अर्थपौनरुक्त्यं शब्दपौनरुक्त्यं शब्दार्थपौनरुक्त्यञ्चेति । पुनरुक्तिरेव पौनरुक्त्यम् ।

* * * *

एवं व्यञ्जनमात्रगतं शब्दपौनरुक्त्यं द्विप्रकारमुपवर्ण्येदानीं स्वरव्यञ्जनगतं लक्षयति—

स्वरव्यञ्जनसमुदायपौनरुक्त्यं यमकम् । यथाक्रमं पदद्वितयेनोद्देश्यविधेयभागो दर्शितः । उदाहरणम्—

यो यः पश्यति तन्नेत्रे रुचिरे वनजायते ।
तस्य तस्यान्यनेत्रेषु रुचिरेव न जायते ॥

अत्र द्वितीयतुरीयपादयोः स्वरव्यञ्जनसमुदायस्वरूपयोस्साद्दश्यादुक्तरूपयमकावकाशतापत्तिः । इदं सार्थकत्वे ।

* * * *

एवं पौनरुक्त्यमूलतया शब्दालङ्कारान् लक्षयित्वा तत्प्रसङ्गेनार्थगतमुभयमूलञ्च वैचित्र्यं प्रदर्श्य प्राप्तावसरतया अर्थालङ्काराननुवर्णयिष्यन्नादौ तावदलङ्कारवर्णमूर्धाभिषिक्तामुपमामाह—

उपमानोपमेययोस्साधर्म्ये भेदाभेदतुल्यत्वे उपमा ।

* * * *

एवमुपमानादिलोपेऽष्टविधत्वं यथा—

फणधरभुजस्याजौ यस्य प्रतापविभावसौ
शलभति रिपुस्तोमस्तुल्यो नयस्य दयाविधौ ।।
वसु च वितरन्नर्थिभ्यो यस्सहस्रकरीयति
त्रिजगति भवेत्को नामास्योपमा रविवर्मणः ॥

End:

सेयं प्रकारवैचित्र्येणानेकालङ्कारबीजभूता । तथाहि—मुखं चन्द्र इवेत्युपमा । मुखं मुखमिवेत्यनन्वयः । मुख . . . . मुखमिवेत्युपमेयोपमा । दृष्ट्वा मुखं चन्द्रमनुस्मरामीति स्मरणम् ।

* * * *

इत्थं प्रकारवैचित्र्येण सादृश्यविच्छित्तिविशेषात्मना यतोऽनेकालङ्कारबी . . . . ।

. . भेदतुल्यावृत्तौ साधर्म्यमुपमोच्यते ।
धर्मविच्छित्तिवशतस्त्रैविध्यमुपयाति सा ॥

R. No. 2971.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 130. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Tippan Nambūdirippāḍ, Ponnūrkōṭṭa-mana, Perumbaur post, Travancore State.

Fol. 62 is left blank.

इष्टसिद्धिव्याख्या.

IṢṬASIDDHIVYĀKHYĀ.

A commentary on the Iṣṭasiddhi which is a treatise in Advaita-Vēdānta: by Vimuktātman, a disciple of Avyayātmabhagavatpūjyapāda. The commentator is Jñānōttama, son and pupil of Jñānōttama, and a resident of Maṅgalam village in the Cōla country. He has also written a commentary on the Naiṣkarmyasiddhi of Surēśvarācārya.

Incomplete.

Beginning:

यश्शिक्षयन्मुनीनाद्यान् आस्ते वटतरोरधः ।
तस्मै तेजस्त्रिणेत्राय कस्मैचिद्गुरवे नमः ॥
तर्कोदग्रनखोद्भिन्नवावदूकमहासुरः ।
श्रुतीः प्रह्लादयन् जीयाद्विमुक्तात्मा नृकेसरी ॥

चोलेषु मङ्गलमिति प्रथितार्थनाम्नि ग्रामे वसन् पितृगुरोरभिधां दधानः ।
ज्ञानोत्तमस्सकलदर्शनपारदृश्वा व्याख्यामिमां वितनुते स्फुटमिष्टसिद्धेः ॥

प्रारिप्सितस्य प्रकरणस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय चेष्टदेवतां नमस्यन्नर्थाद्विषयादिकं दर्शयति—यानुभूतिरिति । महदादिजगत्कारणेन ब्रह्म(णा) प्रत्यगात्मन एकत्वाभिधानाद्विषयसूचनं, प्रतिपाद्यस्वा(स्या)नन्दस्वभावत्वाभिधानात्प्रकरणश्रवणजनितज्ञानेन तत्साक्षात्कृतवतस्तदाविर्भावः प्रयोजनमिति सूचितम् । इदानीं श्लोकात्मकं प्रकरणं व्याख्यास्यन्नाचार्यस्तद्गताविघ्नादिसिद्ध्यर्थमिष्टदेवतां प्रणमति—इष्टानिष्टेति ।

End:

ज्ञानान्मोक्षश्रुत्यनुपपत्त्यापि बन्धस्य मिथ्यात्वमवगम्यत इत्याह—ज्ञानमात्रेति । मोक्षस्य स्वर्गवत्सुखरूपस्य कर्मसाध्यत्वाज्ज्ञानान्मुक्तिश्रुतेरर्थवादतयापि उपपन्नत्वान्न ज्ञानमात्रापनोद्यत्वं बन्धस्येत्यत आह—हेतुर्नान्य इति । पूर्वार्धं व्याचष्टे—निचाय्येत्यादिना । उत्तरार्धं व्याचष्टे—ज्ञानादिति ।

नियोजकवाक्यान्येव दर्शयति—तमेकमित्यादिना । धर्मात्सुखश्च ज्ञानश्चेति काम्यधर्मानुष्ठानात्सुखं नित्यं नैमित्तिकधर्मानुष्ठानात्सत्यशुद्धिद्वारेण .

R. No. 2972.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 14. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Naṁbūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala, Malabar district.

कल्याणनैषधम्.

KALYĀṆANAIṢADHAM.

Foll. 1*a*—13*b*. Fol. 14 is left blank.

A poem based on the story of the marriage between Damayantī and Nala, as narrated in the Mahābhārata. It is written in the Anuṣṭup metre throughout (excepting the concluding stanzas of each Sarga) and it is stated that the work was composed for the delectation of Ravivarman, a prince of probably the Kērala country.

Complete in seven Sargas.

Beginning:

लक्ष्मीमाबिभ्रते कान्तां साक्षात्कल्याणहेतवे ।
नमस्सत्याय शान्ताय पुण्यश्लोकाय शार्ङ्गिणे ॥

अस्ति देववरश्लाघ्यो भीमभूपजयाहृतः ।
प्रकाशराजो धर्मात्मा रविवर्मानलोज्वलः ॥

वश्याक्षहृदयो दि . . . धूतपुष्करशात्रवः ।
रक्षिता हि कुलश्रेष्ठो यस्य(स्स)रूपः प्रकाशते ॥

तत्प्रीत्यै कलिदोषघ्नं नलस्य चरितं महत् ।
सञ्जिघृक्षोः प्रसीदन्तु व्यासाद्या गुरवो मम ॥

श्रीमानासीन्नलो नाम निषधेषु महायशाः ।
वीरसेनसुतो राजा सर्वराजगुणास्पदम् ॥

सूदशास्त्रेऽश्वशास्त्रे च निपुणो रूपवान्बली ।
स शशास महीं वीरः सत्योद्यः प्रियदेवनः ॥

* * * *

विदर्भराजप्रियनन्दनाद्भुतस्वयंवराकर्णनजातकौतुकैः ।
द्विजैर्धनायद्भिरदभ्ररंहसा समापतद्भिस्समपूरि सा पुरी ॥

Colophon:

इति कल्याणनैषधे प्रथमस्सर्गः ॥

* * * *

तां बालां प्रवणां साध्वीमनुगृह्य सुरेश्वराः ।
वैलक्षण्यं नलात्तस्यै दर्शयामासुरात्मनाम् ॥

छायास्वेदरजोहीनान् चतुरस्स्तब्धलोचनान् ।
अम्लानमालानद्राक्षीत्सा तानस्पृशतो महीम् ॥

अभिज्ञाय नलं प्राज्ञा लक्षणैर्मानुषोचितैः ।
शनैरुपेत्य सव्रीला तस्यांसे निदधे स्रजम् ॥

* * * *

तेऽनुगृह्य नलं प्रीत्या प्रातिष्ठन्त दिवं प्रति ।
विवाहं विधिवच्चक्रे दमयन्त्यास्स पार्थिवः ॥

* * * *

अथ भीमो महीपालो राज्यभ्रष्टं नलं पतिम् ।
अनुयातां सुतां श्रुत्वा बभूव भृशदुःखितः ॥

आनीय निपुणान्विप्रान् धनैस्सन्तोष्य भूपतिः ।
अन्वेष्टुं प्राहिणोद्दिक्षु दमयन्तीं नलं तथा ॥

End:

पौरजानपदान्सर्वाननुनीय महायशाः ।
पालयामास जगतीं न्यायेन जगतीपतिः ॥

दमयन्तीं सपुत्रां तामानाय्य परमादृतः ।
शुशुभे नैषधश्श्रीमान्पुण्यश्लोकस्तया सह ॥

पुण्येन तस्य यशसा पुरुषे पुराणे गौरीकृते कृतयुगप्रतिपत्तिभाजः ।
स्थाने तथा खलु वृषस्य चतुश्चरण्या मन्ये सुखेन भुवि सञ्चरणं चिराय ॥

अवहितहृदयस्स्थितस्स्वधर्मे विभुरनुरूपतरैश्शुभः स्वदारैः ।
व्यहरत कलिदोषहारिहारी त्रिभुवनमङ्गलतुङ्गकीर्तिलक्ष्मीः ॥

Colophon:

इति कल्याणनैषधे सप्तमस्सर्गः ॥

कल्याणनैषधं समाप्तम् ॥

R. No **2973.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 46. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Velliyaṭ-mana, Uraham post, Cochin State.

मीमांसासूत्रवृत्तिः.

MĪMĀṂSĀSŪTRAVṚTTIḤ.

Foll. 1*a*—45. Fol. 46 is left blank.

A commentary written in accordance with the views of Kumārila, on the Mīmāṁsāsūtras of Jaimini, described under Nos. 4466–4467 of the D.C.S. MSS., Vol. IX. The name of the commentator is not given.

Contains from the first Pāda of the first Adhyāya to the 22nd Sūtra of the first Pāda of the third Adhyāya and from the first Pāda of the fourth Adhyāya to the 16th Sūtra of the third Pāda of the same Adhyāya.

Beginning:

जैमिनिबादरायणशबरस्वामिशङ्कराचार्येभ्यो नमः ।

अथातो धर्मजिज्ञासा ।

अथ अध्ययनानन्तरम् । अतः अध्ययनाद्धेतोः । अधीत्य स्नायादिति स्मृत्यविरोधाच्च । धर्मजिज्ञासा धर्मस्य विचारः कर्तव्य इत्यर्थः । ततश्चानेन सूत्रेण स्वाध्यायोऽध्येतव्य इत्यत्र प्रतीयमानाया भावनायाः अर्थज्ञानं भाव्यमिति सूचितम् । एवञ्च निश्चयरूपार्थज्ञानस्य विचाराधीनत्वादनया श्रुत्या विचारोऽप्यर्थाद्विहित इत्यनेन सूत्रेणार्थादुक्तमित्येषा श्रुतिरनेन व्याख्यातेति बोध्यम् ।एवं सर्वत्र विषयश्रुतिः सूत्रैर्व्याख्यायत इति द्रष्टव्यम् ॥

*   *   *   *

अथातश्शेषलक्षणम् ।

अथ भेदलक्षणानन्तरं पूर्वप्रकृतं कर्मभेदमपेक्ष्य वा । अतः कर्मभेदाद्धेतोः । शेषलक्षणमवशिष्टान्यङ्गादिलक्षणानि अङ्गलक्षणं वा दशाध्याय्यां वक्ष्याम इत्यर्थः ।

* * * *

सन्दिग्धे तु व्यवायाद्वाक्यभेदः स्यात् ।

सन्दिग्धे उपव्ययत इति विहितोपवीते सामिधेनीमात्राङ्गत्वेन दर्शपूर्णमासमात्राङ्गत्वेन च सन्दिग्धे । ब्रूमः वाक्यभेदः उपव्ययत इत्यस्य सामिधेनीप्रकरणैकवाक्यत्वाभावः स्यादिति । कुतः व्यवाया . . . . व्यवायात्सामिधेनीप्रकरणनिवृत्तेरित्यर्थः तस्मान्न सामिधेनीमात्राङ्गं किन्तु दर्शपूर्णमास-(मात्र)ाङ्गमुपवीतमिति ।

गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात् ।

* * * *

Colophon :

इति जैमिनीयमीमांसासूत्रवृत्तौ चतुर्थाध्यायस्य प्रथमः पादः समाप्तः ॥

End :

स स्वर्गस्स्यात्सर्वान्प्रत्यवशिष्टत्वात् । प्रत्ययाच्च ।

सः विश्वजिदादेः फलविशेषः स्वगस्स्यात्कुतः, सर्वान् पुरुषान्प्रति अविशिष्टत्वात्, प्रीतिरूपस्य सर्वेषामिष्टत्वादित्यर्थः । प्रत्ययात्प्रसिद्धत्वाच्चेत्यर्थः । लोके ह्यनिर्दिष्टफलानां कूपारामादिकर्मणां स्वर्गफलत्वं प्रसिद्धमिति भावः ॥ २६ ॥

क्रतौ फलार्थवादमङ्गवत्कार्ष्णाजिनिः ।

R. No. 2974.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 14. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Tippan Nambūdirippāḍ, Ponnūrkoṭṭai-mana, Travancore State.

रुक्मिणीस्वयंवरचम्पूः.

RUKMIṆĪSVAYAṀVARACAṀPŪḤ.

Same work as that described under R. No. 2455 ante.

Complete.

R. No. **2975.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 62. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Dāmera Cina Bucci Vēṅkaṭa Rāyaniṅgāru of Palteru, Vizagapatam district.

(*a*) गोपालक्षेत्रमाहात्म्यम्.

GŌPĀLAKṢĒTRAMĀHĀTMYAM.

Foll. 1*a*—54*a*.

On the greatness and religious sanctity of Gōpālakṣētra in which the city of Bhōgilā or Bobbili (Vizagapatam district) is said to be situated between the rivers Gōstanī and Vēgavatī and wherein God Gōpāla is worshipped. The work was composed by Rāmasūri, son of Kṛṣṇagōpāla of Ātrēyagōtra and is stated to have been based on the Bhaviṣyōttara-purāṇa.

Apparently complete in 13 Adhyāyas.

Beginning:

श्रीलक्ष्मीशं शिवमजं रमां गौरीं सरस्वतीम् ।
ध्यात्वा गणानामधिपं प्रणम्य ग्रहनायकम् ॥
भविष्योत्तरपौराणकीर्त्यं चरितमुत्तमम् ।
गोपालस्येदमात्रेयरामसूरी करोत्यसौ ॥
व्यासं स्निग्धाम्बुदाभासं निगमावासमानसम् ।
ज्ञानानन्दकलाभ्यासं तं वन्देऽजिनवाससम् ॥
पुण्ये नैमिशकारण्ये नानामुनिसमाश्रिते ।
कथाकथनविख्यातं सूतं पप्रच्छ शौनकः ॥

* * * *

गोपालो निवसत्यत्र गोपालक्षेत्रसंज्ञिते ।
भोगवज्जनसंवासात्सार्था सा भोगिला पुरी ॥
त्रियोजनमिदं क्षेत्रं पञ्चक्रोशमिदं पुरम् ।
असीवरणयोर्मध्ये यथा काशी पुरी भवेत् ॥
गोस्तनीवेगवत्योश्च मध्यगा भोगिला पुरी ।
वेगवत्युत्तरतटे स्थलदुर्गमसाध्यवत् ॥

* * * *

तस्माद्दुर्ग(सु)सम्पन्ना पुरी देशीयभाषया ।
बोब्बिलीति प्रसिद्धा सा दक्षिणार्धेन भोगिला ॥

विशालायां दुर्गवता चैकभागेन निश्चिता ।
यथा चोज्जयिनी सा स्यात्तथासौ बोब्बिली पुरी ॥
महाकालं यथा तत्र पृथग्गोपालमन्दिरम् ।
गोस्तन्या गो(उ)त्तरे कक्ष्ये भवेदत्रापि भोगिला ॥
जगन्नाथालयस्याभूदिन्द्रद्युम्नकृतं पुनः ।
तथाभूद्गोस्तनीकक्ष्ये पुनर्गोपालमन्दिरम् ॥

* * * *

Colophon :

इति श्रीमदात्रेयगोत्रवता कृष्णगोपालधीमत्पुत्रेण रामसूरिणा विरचिते गोपालक्षेत्रमाहात्म्ये प्रथमोऽध्यायः ॥

End :

लावण्यवार्धिनिचितेन्दुसगर्भवक्त्रं मायूरपिञ्छरचनामयकुन्तलाढ्यम् ।
वंशानुगीतकलितामृतपल्लवोष्ठं सस्मेरभाषितदृशं यदुराजमीडे ॥

Colophon :

इति श्रीमदात्रेयगोत्रवता कृष्णगोपालधीमत्पुत्रेण रामसूरिणा विरचिते गोपालक्षेत्रमाहात्म्ये त्रयोदशोऽध्यायः ॥

The author gives the date of the work thus :

व्ययाब्दाश्वयुजान्तामारवारेऽलिखदात्रिजः ।
गोपालक्षेत्रमाहात्म्यं रामसूरिस्स्वयंकृतम् ॥

(*b*) भावमञ्जरी.

BHĀVAMAÑJARĪ.

Foll. 54*a*—68*b*.

A composition of witty stanzas: by the same author as that of the above.

Contains one to three Adhyāyas.

Beginning :

श्रीरामो माधवस्फूर्तिः पायान्नो भावमञ्जरीम् ।
चन्द्रालोकोज्ज्वलन्नेत्रं गात्रं यत्र प्रभासते ॥

शरणार्थिमनःपूर्तिश्शरण्यैर्न भवेद्यदि ।
शोणधामसुधाधाम्नो निर्धामत्वं न किं भवेत् ॥
नवबिन्दुकन्दलानां ग्रहणार्थं चातकाः प्रवर्तन्ते ।
करकाशनिरासितानां समुदयकारणमहो घनाभ्युदयम् ॥
हंसानां जलदध्वानमपि त्रासकरं वरम् ।
ह्रदास्तदम्बुपूर्णा हि पुरा पद्मश्रियंवहाः ॥
कविचन्द्रकिशोराणां पूर्णता स्यात्प्रजापतेः ।
जाते वसुकलावृत्ते क्रमादिनपुरोगमैः ॥

* * * *

Colophon:

इति श्रीमदात्रेयगोत्रस्य कृष्णगोपालकधीमत्पुत्रस्य देवगुरुविधेयस्य रामाभिधेयस्य कृतौ भावमञ्जरीकाव्ये कोरकप्रायः प्रथमोऽध्यायः ॥

End:

हृदम्बुजे बिन्दुमरन्दतुन्दिले कलारुचिस्फीतसुषुम्नमन्दिरे ।
स्फुरन्महानादविनोदबम्भरं नमामि विश्वम्भरमिन्दिरापतिम् ॥
आनन्दामृतसिन्धुवीचिनिचितं प्राणानिलोच्चालितं
हृत्कोशाम्बुजकुट्मलं लसदधोगामिस्वकीलोज्ज्वलम् ।
नाभेरूर्ध्वगतं महोभिरखिलं व्याप्य स्थितैरञ्चितं
तस्यान्तर्गतसूक्ष्मरन्ध्रकलितं ब्रह्मोज्ज्वलं मन्महे ॥

Colophon:

इति श्रीमदात्रेयगोत्रस्य कृष्णगोपालधीमत्पुत्रस्य देवगुरुविधेयस्य रामाभिधेयस्य कृतौ भावमञ्जरीमहाकाव्ये कोरकप्रायः तृतीयोऽध्यायः ॥

The scribe adds—

अक्षयसंवत्सर कार्तिक गुरुवारं तिरुमाविडि सीतारामस्वामि [गोपालक्षेत्रमाहात्म्ये] भावमञ्जरी समाप्ता (?) ॥

R. No. **2976.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 68. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdrippāḍ of Kūḍalūr-mana, Narei, Trittala, Malabar district.

Fol. 68*b* is left blank.

आशौचदीपकम् , सव्याख्यानम्.

ĀŚAUCADĪPAKAM WITH COMMENTARY.

The text is a treatise on pollution arising from birth and death, etc., as observed by the Nambūdiri Brahmins of the Malayalam country. It is followed by a commentary written by a prince of Kōṭiliṅgapurī (Cranganore) who states that the text was compiled by a Nambūdiri Brahmin of the Mahiṣamaṅgalam family.

Complete.

Beginning:

वन्दे गुरूणां चरणारविन्दं वन्दारुलोकाभिमतार्थकन्दम् ।
येषां कृपालेशसुधाभिषेकादेषा ममोदश्चति सूक्तिवल्ली ॥

प्रीत्यै सतां महिषमङ्गलनाम्नि गेहे जातेन भूसुरवरेण पुरा कृतं यत् ।
आशौचदीपकमिदं विवरीतुमद्य श्रीकोटिलिङ्गनिलयो नृपतिस्समीहे ॥

नाहं पाण्डित्यगर्वेण व्याख्यां कर्तुं समुद्यतः ।
किन्तु द्विजानां केषाश्चित्साफल्यं नेतुमर्थिनाम् ॥

प्रसीदतु ततस्सर्वे . . . . भूसुराश्च मे ।
देवद्विजार्चिता देवी शर्वजाच(या) प्रसीदतु ॥

तत्र तावदयमाचार्यः प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिसिद्ध्यर्थमनुबन्धचतुष्टयगर्भं मङ्गलमाचरति —

यतो वा जन्मास्य स्फुरति च यतो वा तादितरत्
द्वयेनाप्येतेन प्रकटितनिदानाघमखिलम् ।
व्यतीयास्ते शुद्धो निरघ इव यस्यावगमना-
दुपासे तत्त्वं प्रशमितविकल्पं विदमिदम् ॥

* * * *

अथ जननमरणनिमित्ताशौचकालस्यापि वक्तव्यत्वेन त्रयमपि वक्तुकामः कविस्तत्र दिवसगुणानामावश्यकतया तदर्थं दिवसारम्भकालमवसानकालं च प्रदर्श(य)ति —

आशौचार्तवसम्भवेऽन्तिमनिशात्र्यंशः पराहस्सम-
श्चण्डांशावुदिते विशुद्धिरुदिता स्वाशुद्ध्यहोभ्यः परम् ।
पुष्पोद्भेददिनात्तृतीयकनिशायास्त्वन्त्यवेदांशकेऽ-
प्याप्लावं वितनोतु वा कुसुमितेत्याहुर्बुधाः केचन

End:

ब्रह्मचारिणः पित्रोर्मरणे तस्योदकदानादिकाले आशौचवत्त्वादुक्तवदेव त्रिरात्रादिपरिपूर्तिर्बोध्या । ब्रह्मचारिण आशौचाभावेऽपि उदकदानादिकाले आशौचमस्त्येव । तथाचोक्तम्—

ब्रह्मचारी यदा कुर्यात्पिण्डनिर्वपणं पितुः ।
तावत्कालमाशौचं स्यात्ततस्स्नात्वा विशुध्यति ॥

इति । अत्र पितृशब्देन मातापि गृहीतेति सर्वं समञ्जसम् ।

एवं मया विरचितं भूसुराणामपेक्षया ।
आशौचदीपकग्रन्थस्यैकदेशाविवेचनम् ॥
अनुक्तश्च दुरुक्तश्च तत्र स्याद्यदि किश्चन ।
विमृश्य सर्वं विद्वद्भिः परिवर्त्य विशोध्यताम् ॥
आशौचविधिपर्यन्तकार्यमेव विवेचनम् ।
इत्येव भूसुरापेक्षा तदेतावद्विवेचनम् ॥
यस्याः प्रसादलेशेन मयैतावद्विवेचितम् ।
अपि मन्दधियां देवी सा भूयोऽपि प्रसीदतु ॥

R. No. **2977.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 134. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Naṁbūdirippāḍ of Kūḍalūr-mana, Nareri, Trittala, Malabar district.

रघूदयव्याख्या—पदार्थदीपिका.

RAGHŪDAYAVYĀKHYĀ: PADĀRTHADĪPIKĀ.

Foll. 1*a*—133*b*. Fol. 134 is left blank.

A commentary by Rudramiśra on the Raghūdaya which is an alliterative poem by Śrīkaṇṭha narrating the leading incidents in the life of Rāma.

One to eight Āśvāsas complete.

Beginning:

श्रियेऽस्तु श्रुतिसर्वस्वं परं वस्सिन्धुराननम् ।
अशेषसत्क्रियाविघ्नविघातमाहितं महः ॥

प्रवृत्तिश्च निवृत्तिश्च जगतो यत्प्रसादतः ।
वेदाद्यनन्तरूपां तां परां वाणीमुपास्महे ॥

श्रीकण्ठरचितस्याहं काव्यस्य यमकात्मनः ।
पदार्थमात्रोपकारि व्याख्यानं कर्तुमारभे ॥

श्रुतं कविमुखादेव यदर्थं ब्रूमहे वयम् ।
प्रयासोऽयमतोऽस्माकं केवलं शब्दगुम्भने ॥

मन्दानां दुर्गमतया चित्रकाव्यं न दुष्यति ।
यदुत्सवस्तत्सुधियां भामहस्य वचो यथा ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थमाशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति प्रबन्धमुखलक्षणश्चानुसन्दधानो भगवदनुस्मरणमुपपादयति— श्रीमदित्यादिना । श्रीमत्, उदारं, भवतः, शाम्भवम्, अव्यात, वपुः, सदारम्, भवतः, तस्य, सदा, अरम्, भवतः, स्मरणैकपराः, स्मरार्तिदारम्, भवतः । शं भवत्यस्मादिति शम्भुः । मितद्वादीनामु(मितद्वादिभ्य उ)पसंख्यानमिति डुः । शिवः तत्सम्बन्धि वपुः अङ्गं भवतः युष्मान् । भवतः संसारात्, अव्यात् रक्षतु । कीदृग्वपुरित्यत्राह—श्रीमत शोभावत् ।

* * * *

Colophon :

इति रघूदयव्याख्यायां पदार्थदीपिकायां प्रथम आश्वासः ॥

End :

कृतिरिति । सम्पद्य, मिता, आश्वासाष्टमविरतिम्, उतरसं, पद्यम्, इता, साहससम्पत्, यमिता, शम्भोः, मम, च, एतु, मानसं पद्यमिता इति । आश्वासेष्वष्टमस्य विरतिं सम्पद्य प्राप्य मिता कृतिः यमिता । कीदृशी साहससम्पत् ममेति शेषः । उतरसं युक्तरसं, पद्यमिता जातावेकवचनम् । प्रबन्धनिर्माणान्ते अभीष्टदेवताविषयं स्वाभिमतमाशास्ते । शम्भोः पत् पादः मम मानसमेतु । चकारो भिन्नक्रमः । यमिता संयमत्वं च मम मानसमेतु ॥

श्रीर्मङ्गल्यात्प्रभवति प्रागल्भ्यात्सम्प्रवर्तते ।
दाक्ष्यात्सङ्कुरुते रूपं संयमात्प्रतितिष्ठति ॥

इति हि श्रीमहाभारतवचनम्.

Colophon :

इति रघूदयव्याख्यायां रुद्रमिश्रविरचितायां पदार्थदीपिकायामष्टम आश्वासः ॥

R. No. **2978.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 276. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. obtained from Neḍumpullimana, Cochin State.

(*a*) वाधूलकल्पसूत्रव्याख्या—कल्पागमसङ्ग्रहः

VĀDHŪLAKALPASŪTRAVYĀKHYĀ : KALPĀGAMASAṄGRAHAḤ.

Foll. 1*a*—189*a*.

A commentary by Āryadāsa on the Vādhūlakalpasūtra which is a work on the sacrificial rites intended for the followers of the Yajur-Vēda.

The following subjects are treated herein :—

१. आधानम्.
२. पुनराधानम्.
३. दर्शपूर्णमासौ.
४. याजमानम्.
५. आग्रयणादि.
६. चातुर्मास्यम्.
७. पशुबन्धः.
८. अग्निष्टोमः.
९. अग्निकल्पः.
१०. वाजपेयः.
११. राजसूयः.
१२. अश्वमेधः.
१३. द्वादशाहः.
१४. औपानुवाक्यम्.
१५. अहीनः.
१६. बृहस्पतिसवादि.
१७. ऋषभसवः.

Breaks off in the Ṛṣabhasavaprakaraṇa.

Beginning :

. . . . प्रमाणं वेदः । स च पुरुषार्थश्चोदयति । वेदशब्दश्च मन्त्रब्राह्मणयोः प्रसिद्धः । तस्याङ्गानि षट् । तद्यथा— शीक्षा व्याकरणं निरुक्तञ्छन्दोविचितिर्ज्योतिषामयनं कल्प इति । तत्र स्वराक्षरोच्चारणसम्पच्छीक्षया क्रियते । तत्संस्कारयुक्त्या(क्ता)हि मन्त्राः कर्मणो गुणत्वेनाभ्युदयाय भवन्ति । यथा प्रयोगे प्रत्यवायो न भवति

तत्सम्प्रयोगे । तथाचोक्तम्—एकश्शब्दस्सम्यक् ज्ञातस्सुष्ठु प्रयुक्तस्स्वर्गे लोके कामधुग्भवति । मन्त्रो हीनस्स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुस्स्वरतोऽपराधादिति । व्याकरणमपि साधुशब्दापशब्दविवेकव्यवस्थया रक्षोहादिनोपकारकम् ।

* * * *

अथायमपि वाधूलेनाचार्येण रचितः कल्पः तस्य सुखज्ञानार्थमस्माभिर्निगदसिद्धवर्जमस्मद्बुद्ध्यागमानुरूपं व्याख्यायते । तत्र यदाहवनीये जुहोतीत्यादिभिर्वाक्यैराहवनीयादिमतः फलवत्कर्मस्वधिकार इति कृत्वा आहवनीयशब्दानाञ्च संस्कारनिमित्तत्वादाधानस्य च संस्कारत्वादग्नीनामग्न्याधेयं पूर्वमाम्नातमाचार्येण । तस्येदमादि(म)वाक्यम्—'अग्नीनाधास्यमानस्सम्भारान्सम्भरत इति' ।

* * * *

Colophon :

इत्यार्यदासस्य कल्पागमसङ्ग्रहे प्रथमोऽनुवाकः ॥

* * * *

सन्तिष्ठतेऽग्निष्टोमः । अभ्यासप्रयोजनमुक्तम् ॥

Colophon :

इत्यार्यदासस्य कृतौ कल्पागमसङ्ग्रहे अग्निष्टोमाख्यं काण्डं समाप्तम् ॥

End :

अथात ऋषभसवः ।

ऐश्वर्यमीशि(तृ)त्वमप्रतिहताज्ञत्वमाधिपत्यं स्वामित्वं श्रैष्ठ्यं प्राग्य(ज्ञ)त्वम्, उभयत आरम्भणा उभयोर्मूलाग्रयोरारम्भणयोग्यावयववति वनिष्ठुसवस्य दर्वीहोमत्वादग्द्वयमुक्त्वा स्वाहाकारेण होममन्त्रान्तस्य साहाय्येन वर्तमाना उभयतो बहवः समारभ्य संप्रणुदन्ति । वदिष्यामहे यतिष्यामहे । यते आत्मनेपदं प्रत्युपवसथे उपवसथकर्म(सु)परिसमाप्तेषु यज्ञपरिसमाप्तिः । प्रतियाश्रवा साध्यन्त क्रमा सहोवाच ? . . . . . . ॥

(b) वाधूलप्रयोगक्लृप्तिः.

VĀDHŪLAPRAYŌGAKLPTIḤ.

Foll. 189a—249b.

A treatise on the ritualistic procedure to be adopted in the sacrifices mentioned below as based on the Vādhūlakalpasūtra : by Śivaśrōṇa.

He states that Āpastamba was the disciple of Vādhūla's pupil, and that Agnivēśya was the pupil of Vādhūla.

The following subjects are herein treated :—

आधानम्.	ब्रह्मत्वम्.
पुनराधानम्.	पितृयज्ञः.
दर्शपूर्णमासौ.	पशुबन्धः.
याजमानम्.	ज्योतिष्टोमः.

Breaks off in the end of the Jyōtiṣṭōmaprakaraṇa.

Beginning :

. . . . वा भवन्त्यस्मै नमो वाधूलकास्तु ते ।
आपस्तम्बः प्रशिष्योऽभूद्यस्य वाधूलकस्य तु ।
अग्निवेश्यगुरुस्सोऽयमृषिरस्मानिहावतु ॥
स्थित्युत्पत्तिलया भवन्ति जगतो यस्येच्छया सर्वदा
यद्रूपं ह्यभवच्चराचरमिदं यश्चापि सर्वालयम् ।
यस्माद्यान्ति परां गतिं पटुधियो . . . . . दुर्लभां
सोऽस्मासु प्रतिपत्तिमर्थवचसोः प्रज्ञाञ्च दिश्यात्प्रभुः ॥

कल्पसूत्रकाराणां वीतकल्मषाणां विदितवेदितव्यानां वेदार्थान्प्रतिशेरते मतयः । किमङ्ग पुनरल्पधियां मादृशामतोऽस्मद्विधैः प्रयोगक्लृप्तिरेकान्ततो निश्चेतुमशक्या । तथा तु मा व्यवहारोच्छित्तिरिति वाधूलकाचार्यसन्दर्भं नमस्कृत्य यथामत्याधानादीनां प्रयोगक्लृप्तिर्विक्ष्यते न तु ज्ञानाभिमानेन । अतो नास्माकमपराधः । अभिहितोऽपि प्रयोगो नास्माभिरेकान्ततो निश्चीयते । अतः पुनरपि सद्भिस्सम्यग्विचार्यानुष्ठेयम् । मन्त्रब्राह्मणसमानतन्त्रचरतन्त्रन्यायशास्त्रग्रन्थादिष्वभिहितान्यविशेषाद्यथाबुद्ध्यस्माभिरुपसंह्रियन्ते । तत इदानीं प्रयोगक्लृप्तिः प्रस्तूयते—अग्नीनाधास्यमानः प्रायश्चित्तादिभिः पूर्वमेव वीतकल्मषमात्मानं कुर्वीत । येनास्य विरोधः केनचित्कारणेन तेन चाविरोधमापादयेद्येन केनचिदुपायेन ।

* * * *

Colophon :

इति शिवश्रोणस्य प्रयोगसन्दर्भे प्रथमः ॥

* * * *

Colophon :

इति षष्ठ आधानाख्यः प्रपाठकः समाप्तः ॥

* * * *

शोभनश्रुतिशरीरशिल्पवित्कल्पसूत्रकृदनल्पबन्धवे ।
श्रोत्रियाय शिवशब्दसमुदि(ङ्ग)तश्रोणनामपरिशोभिने नमः ॥

अथ पितृयज्ञः प्रारभ्यते—.

शिशिरादौ वनमुपोष्य तेषु तरुणदर्भेषु सञ्जातेषु फाल्गुनशुक्लचतुर्दश्यामग्निहोत्रोच्छिष्टमातच्य निदधातीत्यादि प्रतिपद्यन्त इति केचित् ।

End:

अथाच्छावाके अच्छावाक सीदेति प्रेषार्थ . . . सर्वैः क्रियते । अच्छावाको यथाक्रमं स्वे धिष्णिये उपसीदेत् नेष्टा तु पत्नीमपरस्य द्वारस्य दक्षिणदोर्बाह्वोर्दक्षिणतः पन्नेजसी(नी)स्सादयति । पत्नी सादनकर्त्री असदित्यमीत् ब्रूयात् ॥

Colophon:

इत्यार्यशिवश्रोणस्य कृतिः प्रयोगकल्पना ॥

(c) वाधूलपूर्वापरप्रयोगव्याख्या.
VĀDHŪLAPŪRVĀPARAPRAYŌGAVYĀKHYĀ.

Foll. 249*b*—276*b*. Foll. 249*b*—251*a* contain some matters on Baliharaṇa, etc.

A commentary on the Vādhūlapūrvāparaprayōga which deals with the procedure relating to the performance of religious rites and ceremonies in relation to a follower of the Vādhūlasūtra, both during life time and after death.

Complete.

Beginning:

अथ ऋतुसंवेशनम्—

ऋतुसंवेशनमेवात इति नामधेय . . . . तत्रैतत्क . . . तेन संवत्सरपक्षे संवत्सरान्त ऋतौ त्र्यहे पर्यवेत इति पुष्पादिवसादारभ्य त्रीण्यहानि गृह्यन्ते । तेषु गतेषु स्नातां तां शुद्धवाससीमिति । अरजस्कवाससीमित्यर्थः । दक्षिणत उपवेश्य जुहोतीति पत्नीं तां हुतशेषं प्राशयतीत्याज्य- . . . . गृह्यते तामिष्ट्वोपह्वयेतामूहमस्मीति । उपह्वानं रात्रौ व्यवायं गत्वा तस्य च दिवा प्रतिषेधात् । अमूहमस्मीति प्रतिग्रहणं जुषः संवेशनमेव कुर्यादिति ।

End:

उपनयनाख्यं कर्म आरभ्यते । तस्य गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनयनम् । वसन्ते ब्राह्मणमुपनी(नयी)तेत्यादिकालविधानं वर्णव्यवस्थया प्राप्तमनु-

जानाति । सर्वकर्मणां, स्मृतिशास्त्रापेक्षत्वात् यज्ञोपवीतवाससोः मेखलाजिनदण्डानां तत एवागमनम् ।

* * * *

द्रव्याणामपि ग्रहणस्येहानाम्नानात्तेषामवश्योपादेयत्वात् तद्गुणानां मन्त्राणां ग्रहणे नास्ति दोषः । कुमारस्समित्पाणिः ब्रह्मचर्यमागामिति वदति । ततः को नामासीत्याचार्यः ततोऽसौ नामास्मि ॥

Colophon:

इति वाधूलकल्पसूत्रव्याख्या समाप्ता ॥

R. No. **2979.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 14. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Ācaṇṭa Vēṅkaṭaraṅgam of Pārvatīpuram.

विभक्तिविलासः, दर्पणव्याख्यासहितः.

VIBHAKTIVILĀSAḤ WITH THE COMMENTARY DARPAṆA.

Foll. 1*a*—13*b*. Fol. 14 is left blank.

A work in 31 stanzas eulogising king Vijayarāmanṛpāla of Pūsapāṭi family: by Maṅgalēśa of Naḍimiṇṭi family and also of Kauṇḍinyagōtra. The stanzas are so written as to illustrate the grammatical Sūtras of Pāṇini, relating to declensional endings.

The work is followed by a commentary by the same author, who praises Pāṇini and Patañjali in the beginning.

Complete.

Beginning:

श्रीपाणिनिव्याहृतसूत्रजालप्रोतस्ववाग्रत्नमहाप्रभाभिः ।
निवारयामास तमांसि यस्तं पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥

टीका । श्रीपतिचरणद्वितयं नत्वा प्रत्यूहशान्तये नित्यम् ।
स्वकृतिविभक्तिविलासव्याख्यां कुर्वेऽद्य दर्पणाभिख्याम् ॥

अथ सर्वमङ्गलेश्वराख्यः पण्डितजनहृदयानुरञ्जनाय विभक्तिविलासाख्यं ग्रन्थं चिकीर्षुस्तदविघ्नपरिसमाप्तये अस्य ग्रन्थस्य व्याकरणसाध्यत्वेन शब्दानुशासनकृत्पाणिनिस्मरणपूर्वकं भगवद्भाष्यकारनमस्कारं वितनोति–श्रीपाणिनीति ।

*   *   *   *

कविरिदानीं स्वगोत्रनामनिर्देशपूर्वकं ग्रन्थनाम निर्दिशति ।

श्रीकौण्डिन्यसगोत्रश्रीमन्नाडिमिण्ठिमङ्गलेशोऽहम् ।
सर्वविभक्तिविलासं कुर्वे नन्दन्तु पण्डितप्रवराः ॥

*   *   *   *

कविरिदानीं स्वग्रन्थनायकस्य देवानाञ्च सर्वोत्कृष्टतामाशासानः सुजसोर्वचनं वदन्नेकवचनेन राजानं बहुवचनेन देवांश्च विशिनष्टि—

श्रीपूसपाटिकुलराड्विजयाभिराम (राम) क्षितीट् भवितुमर्हति नायकोऽस्य ।
साहित्यलोचनवतां मुकुरोपमस्य ग्रन्थस्य यद्विबुधमण्डलनायकस्य ॥

*   *   *

षष्ठीबहुवचनप्रथमैकवचनयोर्विलासमाह—

श्रीमन्निजभुजाक्रान्तविश्वविश्वम्भरे त्वयि ।
अहीनान्नरसदानन्दस्फूर्तिरेव निरन्तरम् ॥

End:

प्रथमैकवचनबहुवचनद्वितीयैकवचनबहुवचनसप्तम्येकवचनानां विलासमाह—तदेति ।

तदेत्य भूरेणुकरेणुदानवारीह गाते दृढकर्दमत्वम् ।
नक्षत्रतां शत्रुरिते शशाङ्के तुरङ्गफेनेषु ततेषु युद्धे ॥

. . . .
. . . .

श्रीपूसपाटिकुलभास्वदपांपतिश्रीराकाधिपं विजयरामनृपालमेत्य ।
ग्रन्थो विभक्तिरचनारचनैकरूप्यात्संख्यावतामपि मनांसि चमत्करोतु ॥

R. No. **2980.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 102. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Ampalakat Karuṇākara Menon, B.A., B.L., Chalapuram, Calicut.

खण्डनखण्डखाद्यटीका—खण्डनमण्डनम्.

KHAṆḌANAKHAṆḌAKHĀDYAṬĪKĀ; KHAṆḌANA-MAṆḌANAM.

Foll. 1*a*—102*a*. Fol. 102*b* is left blank.

Similar to the work described under R. No. 2762 ante. By Varadapaṇḍita, pupil of Vidyānandapūjyapāda.

Contains from the Śabdapramāṇakhaṇḍana of the first Paricchēda to the end of the second Paricchēda.

Beginning:

प्रमाणदृष्टवादी तद्वाक्यस्य माता वन्ध्येत्यादिकस्यायथार्थस्यापि ख्यापनात्तत्र मातेत्यंशे यथाप्रमाणदृष्टवादित्वमंशान्तरे चान्यथा। नन्वेतद्व्यावृत्तये यावद्यथाप्रमाणदृष्टवाद्याप्त इति निरुक्तिः क्रियते इत्यत्राह—यावदिति। अंशे तथाभूतस्यान्यथावादस्तु न यावद्यथाप्रमाणं दृष्टं तावतस्तथा। अपि तु अवन्ध्यात्वस्य न प्रमाणदृष्टस्यापी।ति तन्निवृत्तिः। तदव्याप्तेः तेष्वव्याप्तेः। बाहुल्येनातथाभूतत्वं लक्ष्याणामुपपादयति—नहीति॥

* * * *

सिद्धान्तसक्तबुधधन्विजनप्रक्लृप्ततीक्ष्णप्रमाणगणबाणविदारणानि।

एता।नि दुस्सहतराणि महाबलानि श्रीहर्षमिश्रविहिता।नि जयन्ति भूयः॥

Colophon:

इति श्रीमद्विद्यानन्दपूज्यपादशिष्यवरदपण्डितकृतौ खण्डनमण्डने प्रथमः परिच्छेदः॥

End:

एतेन साध्यसाधनभागभेदविवक्षया ततोऽस्य भेदेन कथनं शिष्यव्युत्पत्त्यर्थमन्यथा निग्रहस्थानमित्येवास्तु किन्तद्भेदप्रतिपादनेनेत्यपि प्रत्युक्तम्। शिष्यव्युत्पादनार्थमेव हेतुहान्यादिनिग्रहान्तरप्रसक्तेरेव दत्तोत्तरावसरस्य वादिनो निग्रहस्थानमिति सूचनमपि हेतुहानेः पृथक्करणेना।पि शक्यमित्यलम्। इत्थमर्थान्तरादिष्वपि दूषणं द्रष्टव्यम्। निग्रहनिरुक्तिरिति। परिच्छेदस्य ग्रन्थसन्दर्भस्य तत्करणात्तन्नामभाक्त्वम्॥

Colophon:

इति श्रीमद्विद्यानन्दपूज्यपादशिष्यवरदपण्डितकृतौ खण्डनमण्डने द्वितीयः परिच्छेदः॥

R. No. 2981.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 56. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Puliyannūr-mana, Tiruppanattura, Cochin State.

पदार्थतत्त्वनिर्णयः, सव्याख्यः.

PADĀRTHATATTVANIRṆAYAḤ WITH COMMENTARY.

Foll. 1*a*—55*a*. Foll. 55*b* and 56 are left blank.

A work explaining the Padārathas or categories in accordance with the Advaita-Vēdānta. It criticises unfavourably the other systems of philosophy such as Nyāya, Vaiśēṣika, etc. By Ānandānubhava, pupil of Nārāyaṇajyōtis. The author quotes Iṣṭasiddhivivaraṇa and Ratnadīpāvalī.

Complete.

Beginning:

(स) जयति सिन्धुरवदनो देवो यत्पादपङ्कजस्मरणम् ।
वासरमणिरिव तमसां राशिं नाशयति विघ्नानाम् ॥
प्रणम्य विश्वसाक्षिणं गुरूंस्तदात्मनस्तथा ।
पदार्थतत्त्वनिर्णयः प्रवक्ष्यते प्रबोधकृत् ॥

शिष्टाचारप्राप्तेष्टदेवतागुरुनमस्कारच्छलेन प्रारब्धग्रन्थार्थं तत्प्रयोजनश्चाह —प्रणम्येति । विषयप्रयोजनकथनेनार्थात्सम्बन्धोऽधिकारी च दर्शितः । विश्वस्य साक्षी विश्वसाक्षी । अथवा विश्वश्चासौ साक्षी चेति विग्रहः । स्वाध्यस्तं विश्वं तादात्म्यसम्बन्धात्साक्षादीक्षत इति विश्वसाक्षी । अतः स्वयञ्ज्योतिरद्वितीयश्चेत्युक्तं भवति । न हि तटस्थस्य ज्ञानवतस्साक्षादीक्षणमुपपद्यते । ज्ञानार्थयोस्संयोगाद्यसम्भवात् । न हि तटस्थे सर्वज्ञे किञ्चिज्ज्ञानमस्ति । सर्वञ्चैतत्सिद्धान्तपरिच्छेदे स्फुटं वक्ष्यामः ।

* * * *

द्रव्यादयः पदार्थाः षट् प्रसिद्धा लोकमानयोः ।
तस्माद्वास्तवमद्वैतं मनोराज्यविजृम्भितम् ॥

इह ते पदार्थाः बालव्युत्पत्त्यर्थं सङ्क्षेपतः प्रदर्श्यन्ते । तथाहि—द्रव्यगुणकर्मसामान्य(विशेष)समवायाख्याः षडेव पदार्थाः अभावस्तु पदार्थनिषेधरूपत्वान्न पदार्थत्वेनास्थीयते ।

* * * *

षडेवेत्थं पदार्था हि कारणादेवोपवर्णिताः (कणादेनोपवर्णिताः) ।

त एते गौतमेनोक्ता मानमेयादिरूपिणः ॥
षोडशैव हि ते बुद्धिद्रव्यादिषु निवेशिनः ।
तथान्यैरपि मानेन स्वमतं स्थापितं स्फुटम् ॥

कणादाक्षपादवन्मीमांसकादिभिरपि स्वमतं मानत एव स्थापितम् । तथाहि भट्टमते तावत् द्रव्यादयस्तेषां तादात्म्यं शक्तिश्चातीन्द्रिया षट् प्रमाणानि शब्दनित्यत्वादि च प्रमाणतो निरूपितम् । प्रभाकरनये तु पञ्च प्रमाणानि प्रमाणत एव स्थापितानि । साङ्ख्यपातञ्जलयोरपि सत्त्वाद्याश्रयणम् । अन्ये तु क्षणिकान्यनन्तभेदभिन्नानि तत्त्वानि मानतो मन्यन्ते । शून्यमेव तत्त्वमपरे । चार्वाकैः पुनर्भूतान्येव चत्वारि देहा एवात्मानोऽनन्ताः स्वीक्रियन्ते । दिगम्बरैस्तु पृथिव्यादीनि भूतानि चत्वारि तत्कार्याणि शरीरादीन्यनन्तानि तत्त्वानि शरीरपरिमिताश्चात्मानोऽनन्ता ईश्वरश्चैकस्सर्वज्ञस्स्वीकृतः । किं बहुना तीर्थकैरतीर्थकैश्च भिन्ना एव पदार्थाः प्रमाणतः स्वीक्रियन्ते । तस्मान्न तात्त्विकमात्माद्वैतम् । नापि विश्वं स्वप्नप्रपञ्चवन्मायाविलास इति सिद्धमिति ।

इति पूर्वपक्षपरिच्छेदः ॥

स उच्यते त्वतो नैवं पदार्थस्य विनिश्चयः ।
प्रमाणसम्भवात्तस्मादद्वैतं तत्त्वमिष्यताम् ॥

यत्तावद्भिन्ना द्रव्यादयः पदार्था इति मतं तदविचारसुन्दरव्यवहारगोचरमभ्युपेयं न तत्त्वगोचरम् ।

End:

नेह नानास्ति किञ्चन, मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति । यत्र हि द्वैतमिव भवति । तदितर इतरं पश्यति, इन्द्रो मायाभिः पुरुरूप ईयते, वाचारम्भणमित्याद्यागमहतत्वात् जडत्वादिहेतुभिश्च प्रपञ्चितश्चैतदिष्टसिद्धिविवरणे रत्नदीपावल्याञ्चेत्यलमतिविस्तरेणेति ॥

पदार्थतत्त्वनिर्णयः प्रतिपक्षातिशातनः ।
श्रेयोहर्म्यारुरुक्षूणां दत्तहस्तावलम्बनः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्नारायणज्योतिश्शिष्येण भगवता आनन्दानुभवेन विरचितोऽयं पदार्थतत्त्वनिर्णयस्समाप्तः ॥

R. No. 2982.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 114. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Śrīmān Nīlamaṇi Parīkṣa Mahāśayo, Śrī-Rasikarāja Maṭhādhikāri, Parlakimedi.

भक्तिरसराट्.

BHAKTIRASARĀṬ.

Foll. 1*a*—113*b*. Fol. 114 is left blank.

A work on rhetoric containing illustrations which are taken from Lalitamādhava, Uddhavasandēśa, etc., and intended to inculcate the necessity of devotion (Bhakti) to God Kṛṣṇa. The author, whose name is not given, says that Bhakti is the most important of all the Rasas and forms a separate Rasa in itself.

Incomplete.

Deals with the following subjects :—

नायकभेदः.
नायकसहायभेदः.
नायिकाभेदः.
दूत्ययुक्तिः.
उद्दीपनविभावः.
सात्त्विकभावः.
व्यभिचारिभावः.

Beginning:

नामाकृष्टरसज्ञः शीलेनोद्दीपयन् सदानन्दम् ।
निजरूपोत्सवदायी सनातनात्मा प्रभुर्जयति ॥

मुख्यरसेषु पुरा यस्सङ्क्षेपेणोदितो रहस्यत्वात् ।
पृथगेव भक्तिरसराट् सविस्तरेणोच्यते मधुरः ॥

वक्ष्यमाणैर्विभावाद्यैः स्वाद्यतां मधुरा रतिः ।
नीता भक्तिरसः प्रोक्तो मधुराख्यो मनीषिभिः ॥

तत्र विभावेष्वालम्बनाः ।

अस्मिन्नालम्बनाः प्रोक्ताः कृष्णस्तस्य च वल्लभाः ।

तत्र श्रीकृष्णः पूर्वरागवतीं प्रणमन्तीं राधां प्रति पौर्णमास्याशीर्वादः

पदद्युतिविनिर्धुतस्मरपरार्थरूपौद्धतिः(ती)
दृगञ्चलकलानटीपटिमभिर्मनोहारिणी ।
स्फुरन्नवघनाकृतिः परमदिव्यलीलानिधिः
क्रियात्तव जगत्रयीयुवतिभाग्यसिद्धिर्मुदम् ॥

* * * *

इत्यादयोस्य मधुरै(रा)गुणाः कृष्णस्य कीर्तिताः ।
उदाहृतिरमीषान्तु पूर्वमेव प्रदर्शिता ॥

पूर्वोक्तधीरोदात्तादिचतुर्भेदस्य तस्य तु ।
पतिश्चोपपतिश्चेति प्रभेदाविह विश्रुतौ ॥

तत्र पतिः ।

उक्तः पतिस्स कन्यायाः यः पाणिग्राहको भवेत् ।

यथा द्रौपदीं प्रति सुभद्रासख्याः कस्याश्चिदुक्तिः ।

रुक्मिणं युधि विजित्य रुक्मिणीं द्वारकामुपगमय्य विक्रमी ।
उत्सवोच्चलितपौरमण्डलः पुण्डरीकनयनः करेऽग्रहीत् ॥

* * * *

अथोपपतिः ।

रागेणोल्लङ्घयन् धर्मं परकीयाबलार्थिना(तः) ।
तदीयप्रेमसर्वस्वं बुधैरुपपतिस्स्मृतः ॥

End:

तत्र मोदनः—

मोदनः स द्वयोर्यत्र सात्त्विकोद्दीप्तिसौष्ठवम् ।

यथा ललितमाधवे—

आतन्वन्कलकण्ठनादमतुलस्तम्भश्रियोज्जृम्भितो
भूयिष्ठोच्चलदङ्कुरः फलितवान्स्वेदाम्बुमुक्ताफलैः ।
उद्यद्बाष्पमरन्दभागविचलोऽप्युत्कम्पवान्विभ्रमैः
राधामाधवयोर्विराजति चिरादुल्लासकल्पद्रुमः ॥

हरेर्यत्र सकान्तस्य विक्षोभभरकारिता ।
प्रेमोरुसम्पद्विख्यातकान्तातिशयितादयः ॥

राधिकायूथ एवासौ मोदयेत(त्र)तु सर्वतः ।
यः श्रीमान् ह्लादिनीशक्तेः सुविलासं प्रिये वचः ।
तत्र हरेः सङ्क्रान्तस्य क्षोभं कारिता यथा ॥

R. No. 2983.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 254. Lines, 20 in a page. Malayalam. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Vaidyan Vāriyar, Tirappanattura, Cochin State.

निरन्तरपदव्याख्या—चरकसंहिताव्याख्या.

NIRANTARAPADAVYĀKHYĀ: CARAKASAṀHITĀ-VYĀKHYĀ.

Foll. 2*a*—251*b*. Foll. 1*b*, 253*b* and 254 are left blank. Fol. 1*a* contains the name of the work and author. Foll. 86, 87, 100, 101, 102*a*, 126, 127, 128*a*, 130, 135*b*, 136, 137, 166*b*, 167, 168*a*, 170, 171. 180*b*, 181*a*, 185*a*, 213*b*, 214*a* and 252*a* are left blank. Foll. 252*b*, 253*a* contain the commentary of one or two stanzas at the end of the same work.

A commentary on the Carakasaṁhitā, which work has been described under No. 52 of M. Seshagiri Sastri's Report No. I; by Jajjhaṭa, pupil of Bāhaṭa.

Begins from the middle portion of the Rasāyanapāda of the first Adhyāya of the Cikitsāsthāna and breaks off in the middle of the seventh Adhyāya of the Siddhisthāna.

Beginning:

कथं समोऽयं प्रयोग उच्यते। प्रयोगसमासाद्गुणा दोषाः न भवन्ति। इह हि प्रयोगशब्दे विप्रतिपत्तिर्व्याख्यातॄणां प्रयोग उपयोगोऽन्यैः . . . . समासाद्गुण्यभावो यथा वृद्धिस्तथैवापकर्षः । एवमत्युपयोगभावोऽब्लवणवत । लवणं हि सदोपयुज्यते . . . . त(उल्)बणे संवत्सराच्चात्युपयो(गः) यथा वा रसायनप्रयोगादृते नेष्यत इति प्रयोगं परिकल्प्य वापवादविषयमुत्सर्गो हि निविष्टो य . . . . कृत्वा ततोऽपवादं विदधीत वा क्षीरघृताभ्यासो

रसायनानामित्येवं पिप्पलीष्वप्यवेहि । एवं स्थिते चोदयन्ति यद्येता दोषवत्यो गुणापहा . . . . रसायनेऽप्य परिज्ञानाद्द्रव्यान्तरसम्पर्कात्युपयोगादिभ्यो दोषावहत्वं, रसायने पुनर्द्रव्यान्तरयुक्ता नैव दोष . . . .

* * * *

अपरस्तु ।

तिस्रस्तिस्रस्तु पूर्वाह्णे भुक्त्वाग्रे भोजनस्य च ।
पिप्पल्यः किंशुकक्षा(क्षी)रभाविता घृतभर्जिता ॥

इति । भुक्त्वाग्रे भोज(नस्य) . . . . वाच्यमेवं परिचोद्य समाधानमाहुर्नह्येकस्य प्रयोक्तुर्यः क्रमः किन्तर्हि प्रयोक्तन् भिन्नानपेक्ष्य दोषादिविशेषात् केनचित्पूर्वा . . . .

* * * *

Colophon:

इति श्रीवाहटशिष्यस्य जज्झटस्य कृतौ निरन्तरपदव्याख्यायां करप्रचितीयो नाम रसायनपादस्तृतीयस्समाप्तः ॥

* * * *

तत्र स्नेहस्वेदादिचिकित्साक्रम इति । . . . . . . छस्येति कफं पित्तञ्च मरुच्च व्यापत्क्रमं करोति । यद्यपि तत्र गौरवादयस्तथापि क्लमं प्रधानं बहुत्वश्चेति क्लमेऽपि तत्र लङ्घनादिभेषजमिति सङ्ग्रहो यथोक्तः । द्वितीयं वस्तु(स्ति) ।

Colophon:

इति सिद्धिस्थाने षष्ठोऽध्यायः ॥

वस्तिव्यापत्सिद्धिसम्बन्धस्सङ्ग्रहपाठादुद्देशप्रयोजनपूर्वकाद्वमनविरेचनव्यापत्प्रतीकारानन्तरमास्थापनव्यापत्साधनकथनं कर्मानुपूर्वी निर्देशसामर्थ्यात् ।

End:

वातमूत्रपुरीषाणां दत्ते वेगान्निगृह्णतः ।

दत्ते वस्तेन वातादिविनिग्रहात् । अति(ती)वापीडितो वस्तिरिति । मुखप्राप्तेन वस्तेर्निर्गम एवं सर्वस्येति अथवातिपीडितो वेगवान् ॥

R. No. 2984.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 138. Lines, 20 in a page. Grantha, Dēvanāgarī and Malayalam. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala, Malabar district.

स्कन्दशारीरकम्, सव्याख्यम्.

SKANDAŚĀRĪRAKAM WITH COMMENTARY.

Foll. 1*a*—137*a*. Foll. 137*b* and 138 are left blank.

A work in eight Adhyāyas on Palmistry. Neither the name of the author nor that of the commentator is given.

Deals with the following subjects :—

१. संज्ञाध्यायः.
२. रेखालक्षणम्.
३. रेखाफलम्.
४. प्रतिनियतावगतरेखालक्षणम्.
५. संज्ञान्तरलक्षणम्.
६. रेखानिम्नभागलक्षणम्.
७. विप्रकीर्णलक्षणम्.
८. प्रेक्ष्यादिवर्णनम्.

Complete in eight Adhyāyas.

Beginning:

इदमन्धं तमो हित्वा यज्ज्योतिर्भासतेतमाम् ।
नमोऽस्तु तस्मै सूर्याय जगज्जन्मादिहेतवे ॥

इति । अनेन सर्वकामभुक्त्वात्सर्वप्रकाशकत्वाच्च सूर्यनमस्कारः क्रियते । ततश्चाविघ्नपरिसमाप्त्यादिफलं भविष्यति । सूर्यस्य च परमात्मत्वं श्रुतिसिद्धमतश्च जगत्कारणत्वमप्युपपन्नम् । इदानीमभिधेयस्य स्वरूपमाह—

धर्माधर्मपरीपाको रेखाभिर्व्यज्यते नृणाम् ।
इति प्रकाशिका तासां लक्षणं प्रविविच्यते ॥

इति ।

* * * *

तत्र तावत् संज्ञाः कथ्यन्ते । तदवलम्बनेनैव लक्षणकथनस्यारूपत्वात् ? । तत्र—

मण्डला वर्तुला संज्ञा वासन्ती पिङ्गला स्मृता ।
शेफालिका हेमन्तिका धामिणी हेमसप्रजा ॥

महाजवा दैवगतिः कान्तिः कृष्णा च भारती ।
मानुष्यगा गतिस्सूक्ष्मा धनिष्ठा कम्बुकारणे ॥

* * * *

अथ द्वितीयोऽध्यायः—

एवन्तावत्स्वरूपसिद्ध्यर्थं सर्वासां रेखाणां संज्ञास्तास्ताः पिटकादिलक्षणानाञ्च यथासम्भवमुक्त्वा स्वरूपं तावत्प्रदर्श्यते । तत्रैतावानर्थसंक्षेपः । प्रेक्षातस्तावत् प्रथमं स्वं नियममाचरन् सर्वं प्रेक्ष्यलक्षणं तटस्थलक्षणञ्चावलोक्य स्वहृदयेऽवधार्य स्वमात्मानं नित्यसिद्धपरमेश्वरैकरूपतया सङ्कल्प्य ततो वदेत् ।

End:

तदिदानीं सिद्धमित्युपसंहरति—

रेखाणां विविधानां या देहस्थितिरनन्तरा ।
प्रकाशिता विधात्रा सा(चा)स्माभिः कथिता भृशम् ॥

या विविधा रेखाणां स्थितिरुपायभूता इष्टानिष्टप्राप्तिपरिहारोपायभूतानां देहगा स्थितिः प्रकाशिता परमकारुणिकेन स्वयं विधात्रा । सास्माभिः भृशं लक्षणादिकथनेन विचारेण च सह कथिता इति शिवम् ।

छन्दोभङ्गो लिङ्गभेदस्समासस्यापि संयतिः ।
नात्र प्रकरणात् ज्ञेयो दोषः केनापि हेतुना ॥

नामाख्या तु क्वचित् कश्चिदिति हेतुः स्वयं स्थितः ।
अन्योऽपि हेतुरत्रास्ति लक्षणानां निरोधनम् ॥

वैचित्र्यं फलमत्रापि यदुक्तं लक्षणैर्न तत् ।
आचारादेव संसिध्येत्तस्मात्तस्मै नमो नमः ॥

Colophon:

इति स्कन्दशारीरके प्रेक्ष्यादिवर्णनं नाम अष्टमोऽध्यायः ॥

निरूप्य वस्तु सर्वस्वं यत्स्फुरेत्तद्वदेदिह ।
प्रमाणं वृत्तिरेवात्र न प्रत्यक्षादिसम्भवः ॥

R. No. 2985.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 104. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala, Malabar district.

(*a*) अद्वैतमुक्तासरः.

ADVAITAMUKTĀSARAḤ.

Foll. 1*a*—25*b*.

A short treatise in verse in support of the Advaita-Vēdānta: by Lōkanātha, son of Sarvajñanārāyaṇa and the great grandson of Nṛsiṁhāśramin of Ālaṅguḍi.

Complete in three Paricchēdas.

Beginning:

अस्त्वात्मबोधाङ्कुरवृद्धिहेतोरन्याद्दशः श्रीपतिकालमेघः ।
आविर्भवन्यो हृदयाम्बरे द्रागाध्यात्मिकं तापमपाकरोति ॥
श्रीमन्नृसिंहाश्रमिपुत्रपौत्रस्सर्वज्ञनारायणसूरिसूनुः ।
सौत्राद्वयब्रह्मविचारयुक्तीश्श्रीलोकनाथो विवृणोति पद्यैः ॥
नन्वद्वयत्वं कथमस्य सिध्येदैक्यस्य जीवेश्वरयोरसिद्धेः ।
नेशोऽहमस्मीति धिया विरुद्धाद्वाक्यादभेदप्रतिपत्त्ययोगात् ॥

*   *   *   *

अत्रोच्यते तत्त्वमसीति वाक्यात् ब्रह्मैक्यतात्पर्यधियोपपन्नात् ।
जीवेशभेदस्य मृषात्वबोधः स्यात्तत्प्रतीतेर्भ्रमतामतिश्च ॥

End:

नित्याद्वयब्रह्मतयापि मुक्तेस्तत्त्वप्रतीतेस्तदकारणत्वात् ।
वृथैव तस्यात्ममतिस्तदर्था शास्त्रे प्रवृत्तिश्च मुधेति चेन्न ॥
मुक्तेस्तदात्मप्रकटीकृते वा क्षेमादिसाधारणसाध्यभावात् ।
उत्पाद्यनुत्पादिपदार्थबुद्धेस्तदर्थमुद्देश्यतयेप्सितत्वात् ॥
तस्माद्विशुद्धाद्वयनिष्प्रपञ्चब्रह्मैक्यबोधादधिकारिणोऽस्य ।
ब्रह्मैकताविष्कृतिरेव सद्यो जीवस्य मुक्तिर्भवतीति सिद्धम् ॥
सर्वज्ञनारायणसूरिजेन श्रीलोकनाथेन कृते प्रबन्धे ।
अद्वैतमुक्तासरनामधेये वृत्तः परिच्छेद इतस्तृतीयः ॥

आत्मैक्यसन्नायकरत्नरम्यमुक्तं मया श्लोकगुणैर्निबद्धम् ।
अङ्गीकरोतु स्वमिवास्त्रजालमद्वैतमुक्तासरमम्बुजाक्षः ॥

(b) अद्वैतमुक्तासरव्याख्या—कान्तिः.

ADVAITAMUKTĀSARAVYĀKHYĀ: KĀNTIḤ.

Foll. 26*a*—103*b*. Fol. 104 is left blank.

A commentary on the work above-described; by the same author. Complete.

Beginning:

आविर्भवेत्तदद्वैतमाद्यन्तरहितं महः ।
जीवत्वेनेश्वरत्वेन द्विधा यद्भाति मायया ॥

* * * *

तं नृसिंहाश्रमं वन्दे पितुर्मम पितामहम् ।
यद्गर्जितानुकरणैर्जयन्त्यद्वैतिनः परान् ॥
षट्शास्त्रीपरिकर्मिणो भुजगराड्भाष्याशयावेदिनः
श्रीनारायणशास्त्रिणः प्रियसुतश्श्रीलोकनाथाध्वरी ।
क्षुद्राद्वैतिदुरूहशार्वरभिदा कान्त्याख्यया व्याख्यया
स्वीयं श्लोकगुणाश्रयं विशदयत्यद्वैतमुक्तासरम् ॥

चिकीर्षितग्रन्थकरणसाधनीभूताद्वितीयज्ञानाभिवृद्धये स्वेष्टदेवताभिमुख्यं प्रार्थयते—अस्त्विति । अभिमुखोऽस्त्वित्यर्थः । अध्ययनकालीनापाताद्वितीयज्ञानस्याङ्कुरः श्रवणमननाभ्यां निर्णयीभावः । तस्य वृद्धिरविच्छेदः सान्तत्यमिति यावत् । तदर्थमित्यर्थः ।

* * * *

ननु त्वन्मतेन प्रेक्षावताद्वयब्रह्मविचारः कार्यः । जीवे तदभेदस्य नाहमीश्वर इति प्रत्यक्षबाधितत्वेन बाधितविषयत्वादहमिति निश्चितविषयत्वात्प्रयोजनाभावाच्च सम्मतवदिति क्षुद्राद्वैती प्रत्यवतिष्ठते—नन्विति । प्रतीत्ययोग्यतानिश्चयस्य वाक्यार्थनिश्चयप्रतिबन्धकत्वादिति भावः । इदमुपलक्षणम् । जीवो न ब्रह्म तद्विरुद्धधर्मवत्त्वात्सम्मतवदित्यपि द्रष्टव्यम् ।

End:

मध्वमुक्तिमनूद्य दूषयति—यच्चेहेति । परिमाणभेदाभावमभिप्रेत्य शङ्कते—कथन्विति । प्रकाशस्वरूपतारतम्यमभिप्रेत्य परिहरति—लोक इति ।

नामरूपेति। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति नामरूपविमोचनस्य श्रुत्युक्तत्वादित्यर्थः । क्षेमेति। दुःखं मे माभूदिति कामनया सुखप्रागभावस्य क्षेमसाधारणसाध्यत्वमादाय तत्प्रागभावार्थप्रायश्चित्तप्रवृत्तिवदविद्यानिवृत्तिरूपब्रह्मभावलक्षणमोक्षार्थं तद्विचारशास्त्रे प्रवृत्तिसम्भवादित्यर्थः । परमप्रकृतमुपसंहरति—तस्मादिति ।

एकासनं विरचयन्फणिपक्षिराजावेकं वपुश्च घटयन्नरसिंहदेहौ ।
एकं विराट्पुरुषमाकलयन् त्रिलोकीमेकं हरे तव ममापि गुरुस्वरूपम्॥

फल्गुद्वैतिदुरूप(ह)दुष्प्रलपितप्रच्यावितस्याद्वय-
ब्रह्मात्मैक्यविनिर्णयस्य नितरां पूर्वस्थितिस्थापकम् ।
ग्रन्थं तत्त्वविवेकदेशिकमुनेर्युक्त्यैकदेशावृतं
सूरीन्द्रारचितं यथामति मया प्रीत्यानुगृह्णन्त्वमुम् ॥

Colophon:

इति श्रीमन्नृसिंहाश्रमयोगीन्द्रनप्त्रा पदवाक्यप्रमाणपारावारपारीणस्य नारायणशास्त्रिणः सूनुना श्रीलोकनाथाध्वरिणा विरचिते अद्वैतमुक्तासरव्याख्याने कान्त्याख्ये तृतीयः परिच्छेदः ॥

The scribe adds—

जयवर्षे पौषमासे वेङ्कटेशेन धीमता ।
श्रीरङ्गनाथशिष्येण कान्त्याख्या लिखिता कृतिः ॥

आलङ्गुडिग्रामनिवासिलोकनाथाध्वरीन्द्रेण कृतं प्रबन्धम् ।
अद्वैतमुक्तासरमेतदीयव्याख्याञ्च कान्तिं लिखति स्म रामः ॥

सुब्रह्मण्यसमानीतः चोलेभ्यः केरलानयम् ।
नेपालसंख्ये कोलम्बे लिखितः केरलाक्षरैः ॥

नृसिंहाश्रमनप्तृश्रीलोकनाथाख्ययज्वनः ।
कृतिर्विलिखिता सेयं संशोध्या सद्भिरञ्जसा ॥

लोकनाथमखिच्छात्त्रङ्गनाथाख्यशास्त्रिणः ।
शिष्यस्य वेङ्कटेशस्य ग्रन्थोऽस्य खलु मातृका ॥

R. No. **2986.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 84. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdrippāḍ, Puliyanūr-mana.

(*a*) **शाब्दनिर्णयः.**

ŚĀBDANIRṆAYAḤ.

Foll. 5*a*—35*b*. Foll. 1*a*—5*a* contain the Kārikās of this work.

A short work elucidating the nature of the valid cognition resulting from *śabda*, according to the Advaita-Vēdānta: by Prakāśātman, pupil of Ananyānubhava.

Complete.

Beginning:

यस्याः प्रसादमवलम्ब्य जगद्गुरूणामप्यस्खलद्बहुगुणाः प्रसरन्ति वाचः ।
सा वेदशास्त्रपरिनिर्मितवन्द्यदेहा भूयात्समग्रवरदैव सरस्वती वः ॥

* * * *

नत्वा ब्रह्म यथा शाब्दान्मानात्तत्त्वमीक्ष्यते ।
तथा वयं निबध्नीमः स्वबुद्धिपरिशुद्धये ॥

शब्दप्रमाणस्वरूपाधिगमादिना तस्य विषयविशेषे सामर्थ्यावधारणेति शाब्दप्रमाणस्वरूपं निरूपयितुं लोकप्रसिद्धमेव तल्लक्षणमनुवदति—

शब्दविज्ञानजा यार्थेऽसन्निकृष्टे सुनिश्चिता ।
बुद्धिस्तच्छाब्दमानं हि सङ्गिरन्ते विपश्चितः ॥

शब्दविज्ञानादसन्निकृष्टेऽर्थे बुद्धिः शाब्दं प्रमाणमिति सङ्ग्रहः । तल्लक्षणोपनिविष्टानां विशेषणानां निवर्तनीयानि मतान्तराणि दर्शयति—

वक्तुर्विवक्षा मानं वा विषयो लिङ्गतोऽपि च ।
बुद्धिर्मानान्तरेच्छा च निवार्यन्ते विशेषणैः ॥

End:

सञ्जातेऽपि शब्दात्तथाविधे विज्ञाने सम्भावनादिदोषादविद्यासंस्कारबलाद्वा परोक्षमिव विभ्रमादवभासते । तच्च मननिदिध्यासनादिभिर्विमलीकरणात्सूक्ष्मवस्त्वालोचनक्षमेन मनसा शरीरेन्द्रियव्यतिरिक्ते च त्वंपदार्थे प्रत्यक्षतोऽवभासमाने ब्रह्मात्मज्ञानाकारेण परिणममानेन मनसा स्थिरीभावात् क्षणद्वय-

वर्तिनाग्निनेव क्षणमात्रेण दाहकेनापि क्षणद्वयवर्तिना दह्यते । ततश्चैतत्सिद्धमित्याह—

ततो निश्श्रेयसप्राप्तेस्तादर्थ्याच्छाब्दनिर्णयः ।
विशिष्टफलसम्बन्धी श्रोतव्योऽयं बुभुत्सुना ॥

* * * *

वन्दे तमात्मसंबुद्धस्फुरद्ब्रह्मात्मभावतः ।
अर्थतोऽपि न नाम्नैव योऽनन्यानुभवो गुरुः ॥

प्रकाशात्मयतीन्द्रेण प्रणिपत्य जनार्दनम् ।
बालानां प्रतिबोधाय प्रणीतश्शाब्दनिर्णयः ॥

The scribe adds—

ब्रह्मदत्तकवीन्द्रेण लिखतोपनिषद्रसम् ।
ब्रह्मज्ञानाय लोकानां लिखितश्शाब्दनिर्णयः ॥

सद्यस्संपद्यतेऽक्ष्णोः क्षतजकलुषता मूर्ध्नि तोदो गरीयान्
ग्रीवायां वायुकोपोऽप्यलमनुलिपितै(र्भि)र्लेखकानां हि लोके ।
क्लेशप्रायाः प्रयासास्तदिह लिपिगणेषूपलभ्यापि दोषं
रोषं कुर्वन्तु सन्तस्सकरुणमतयो मा प्रमत्ताय मह्यम् ॥
ओङ्काराम्बुजभृङ्गीमागमसहकारशाखिपरभृतिकाम् ।
तर्कगिरिगह्वरान्तःकरेणुकां वैष्णवीं तनुं वन्दे ॥
परमेश्वरीकृतकपालमालिने पुरुषोत्तमीकृतबलिप्रमाथिने ।
सुरकारिणीकृतसरोजयोनये कमलाकटाक्षविधये नमो नमः ॥

(b) शाब्दनिर्णयव्याख्या—दीपिका.

ŚĀBDANIRṆAYAVYĀKHYĀ: DĪPIKĀ.

Foll. 36*a*—84*a*. Fol. 84*b* is left blank.

A commentary on the work described above: probably by the same author.

Incomplete.

Beginning:

यद्भासा निखिलं विभाति विषयो यो नस्स्वयं ज्योतिषां
यस्याहुर्भवनोद्भवस्थितिलयाँल्लीलामयान्सूरयः ।

यश्चागोचरमामनन्ति मनसां वाचां च विश्वात्मने
तस्मै शुद्धसुखाद्वितीयवपुषे शश्वन्नमो विष्णवे ॥
श्रोतृमोहतिमिरापहारिणी शुद्धनीतिनिकुरुम्बदीधितिः ।
शाब्दनिर्णयसदर्थभासिका दीपिकेयममला विधीयते ॥

इह हि ग्रन्थमारभमाणाश्शिष्टाः प्रारिप्सितग्रन्थस्याविघ्नेन परिसमाप्तये मङ्गलाचरणं कुर्वन्तो दृश्यन्ते । ततश्शिष्टाचारप्रामाण्यादेवाविघ्नेन ग्रन्थपरिसमाप्तये मङ्गलाचरणं करणीयमित्यवसीयते । न च कृतेऽपि मङ्गलाचरणे कादम्बर्यादावसमाप्तिदर्शनान्न मङ्गलाचरणस्याविघ्नहेतुतेति सांप्रतम् ।

* * * *

शब्दविज्ञानजा यार्थेऽसन्निकृष्टे सुनिश्चिता ।
बुद्धिस्तच्छाब्दमानं हि सङ्गिरन्ते विपश्चितः ॥

शब्दविज्ञानाज्जातेति शब्दविज्ञानजा असन्निकृष्ट इति प्रमाणान्तरागोचर इत्यर्थः । सुनिश्चिता विषयात्मनेत्यर्थः ।

End:

प्रकृतमुपसंहरति—तस्मादन्विते सामर्थ्यमिति, परः परिचोदयति । ननु यदि कार्यतादेरन्वयव्यतिरेकवतोऽपि सर्वशब्दसामर्थ्यविषयन्नियामकत्वं परित्यज्योपायतयान्यथासिद्धिरुच्यते । उच्यतान्तर्हि संसर्गप्रत्ययस्यापि शब्दसामर्थ्यविषयताभाव इति । समाधत्ते नैतत्सारं पदव्यतिरिक्तं वाक्यं पदप्रतिबुद्धान्वा संसर्गहेतूनवलम्ब्य तत्प्रत्ययस्य स . . . . . ॥

R. No. **2987.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 90. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Tippan Nambūdirippāḍ, Ponnūrkotta-mana, Travancore State.

शाकुन्तलव्याख्यानम्—गोविन्दब्रह्मानन्दीयम्.

ŚĀKUNTALAVYĀKHYĀNAM : GŌVINDABRAHMĀNANDĪYAM.

A commentary called Gōvindabrahmānandīya on the Śākuntalanāṭaka of Kālidāsa, which work has been described under Nos. 12465—12481 of the D.C.S. MSS., Vol. XXI; by Bālagōvinda, son of Śaṅkarapaṇḍita, and patronized by Vañcibhūpāla; the author refers to a prior commentary on the Śākuntala by Śrīnivāsa and says that as it is difficult, he wrote this abridged commentary at the request of some persons.

Complete.

Beginning:

गुरूणां चरणाम्भोजपरागपरमाणवः ।
मनोमुकुरमस्माकं पुनीयुरनुवासरम् ॥

* * * *

अस्ति श्रीहरिगीताख्यो देशस्सर्वत्र विश्रुतः ।
तत्रास्ते भगवान् स्कन्दो लोकसंरक्षणोत्सुकः ॥
तत्सेवापरतन्त्रश्च सद्वारिजिशिखामणिः ।
वश्चीश्वरगुरुर्धीमान् शङ्कराख्योऽभवद्बुधः ॥
तत्पुत्रो वञ्चिभूपालकृपापीयूषवर्धितः ।
बालोऽपि गुरुकारुण्यात्प्रांशुलभ्यफलं स्पृहे ॥
विख्यातश्श्रीनिवासाभिधप(बुधव)रजिह्वाग्रनृत्यत्सरस्व-
त्यर्थावाप्त्युत्सुकानामपि गहनतया यत्नमात्रं गतानाम् ।
केषाञ्चित्प्रार्थनाभिः खलु सपदि मया बालगोविन्दनाम्ना
व्याख्या संक्षिप्य शाकुन्तलमिति विदितस्योच्यते नाटकस्य ॥

इह खलु कविकुलतिलकः तत्रभवान् कालिदासनामा नाटकान्तं कवित्वमिति धिया नाटकप्रबन्धरूपं निर्मित्सुः चिकीर्षितस्य ग्रन्थस्याविघ्नपरिसमाप्तिमभिलषन् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्यालङ्कारिकमतशास्त्रमनुसरन् प्रकृतप्रबन्धप्रत्यूहपरिपन्थिनीं पूर्वरङ्गस्य प्रधानभूतां नान्दीरूपामाशिषं प्रयुङ्क्ते—या सृष्टिरिति ।

End:

तवेत्यादि । तव भवत्विति प्रजास्विति विषयसप्तमी । बिडौजाः इन्द्रः । विततयज्ञः विस्तृतयज्ञः । अलम्भावय सम्भावय । एवमनेकप्रकारेण उभयलोकानुग्रहश्लाघनीयैः उभौ लोकौ मर्त्यस्वर्गौ तयोरनुग्रहः अभ्युपपत्तिः । तेन श्लाघनीयैः स्तुत्यैः ।

* * * *

एवं सर्वनाटकेषु भरतवाक्येषु शुभशंसा योजनीया ॥

इति निष्क्रान्तास्सर्वे ॥

Colophon:

इति सङ्क्षिप्तश्रीनिवासीयव्याख्येन हरिगीतपुराधिवासलोलुपशीसुब्रह्मण्यपदपाथोजसेवापरतन्त्रेण बालगोविन्दवारिजेन लिखिते गोविन्दब्रह्मानन्दीयाभिधे शाकुन्तलव्याख्याने सप्तमोऽङ्कस्समाप्तः ॥

R. No. **2988.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 412. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from a MS. of the Sanskrit Library, Bobbili Samsthanam, Bobbili.

काशीखण्डव्याख्या—पदयोजना.

KĀŚĪKHAṆḌAVYĀKHYĀ : PADAYŌJANĀ.

Foll. 1*a*—412*a*. Fol. 412*b* is left blank.

Bound in two volumes.

A commentary called Padayōjanā on the Kāśīkhaṇḍa, which work is described under R. No. 2151 ante: by Vēṅkaṭanārāyaṇa of Kōlacala family.

Contains from 33rd Adhyāya to the end of the work.

Beginning :

ज्ञानवापीमाहात्म्यं परिपृच्छति . . . . ततः कुमारः प्रत्याह—घटोद्भवेत्यादिना । हे घटोद्भव . . . . . . अधुना इदानीं मया कथ्यमानां पापानां प्रणोदिनीं विनाशिनीं ज्ञानवाप्यास्समुत्पत्तिं शृणु आकर्णय। अनादीति। हे मुने अनादिसिद्धे संसारे वर्तमाने सति पुरा पूर्वकाले कृतयुगे ईशानश्शम्भुः, स्वैरं स्वेच्छया इतस्ततश्चरन्सन् कुतश्चित्समये प्राप्तः काशीं प्रति समागतः । कदेत्यत आह । यदा यस्मिन् काले अभ्राणि मेघाः न वर्षन्ति । निम्नगाः गङ्गादिनद्यः न प्रावर्तन्त नोत्पन्नाः ।

* * * *

Colophon :

इति श्रीमत्कोलचलान्वयसुधाम्बुधिसुधाकरेण वेङ्कटनारायणेन विरचिते पदयोजनासमाख्याने काशीखण्डव्याख्याने षट्त्रिंशोऽध्यायः ॥

* * * *

Colophon :

इति काशीखण्डव्याख्याने एकोनशततमोऽध्यायः ॥

अथ श्रीवेदव्यासं सूतः पृच्छति—इदमिति । स्कान्दं स्कन्दपुराणमहमनुत्तमं काशीखण्डं श्रुत्वा । श्रुतं सर्वं हृदि मनसि । विधारितं प्रतिष्ठापितं सत् विस्मृतम् । हे पाराशर्य अनुक्रमणिकाध्यायमाचक्ष्व कथय ॥

End :

एकोनशततमान्तेषु अध्यायेषु । काशीचरित्रं, काशीस्थितलिङ्गानि तीर्थानि तत्फलानि च सेतिहासं कथयामास । मम बालस्य शृण्वतस्सतो वाराणसीमाहात्म्यं परिपृच्छन्त्याः जगदम्बिकायाः गिरिजायाः मम मातुः पुरतः । स्वामिना देवदेवेन यथा भाषितं तथैव कथयिष्यामीति . . . . ॥

Colophon :

काशीखण्डव्याख्यानं समाप्तम् ॥

R. No. **2989.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 173. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Śrīmān Jugulakiśōra Pāṇigrāhī, B.A., Parlakimedi.

(*b*) सिद्धान्तरत्नम्.

SIDDHĀNTARATNAM.

Foll. 1*a*—78*a*. Fol. 78*b* contains the index of the subjects dealt with in the work.

Gōvindaikāntin alias Baladēva, also called Vidyābhūṣana, first wrote a commentary on the Brahmasūtras in accordance with the doctrines of the Caitanya. Then he wrote this work, Siddhāntaratna, in support of his own Sūtrabhāṣya.

This is also called Gōvindabhāṣyapīṭhikā.

Complete in eight Pādas in the following order :—

१. परमपुरुषार्थोपायनिर्णयः.
२. भगवदैश्वर्यादिनिर्णयः.
३. विष्णुपारम्यनिर्णयः.
४. सर्ववेदवेद्यत्वनिर्णयः.
५. केवलाद्वैतनिरासः.
६. विधान्तरेण केवलाद्वैतनिरासः.
७. केवलानुभूतिनिरासः.
८. पुरुषार्थनिर्णयः.

Beginning :

ओं नमः कृष्णाय ।

वेदास्तथा स्मृतिगिरो यमचिन्त्यशक्तिं सृष्टिस्थितिप्रलयकारणमामनन्ति ।
तं श्यामसुन्दरमविक्रियमात्ममूर्तिं सर्वेश्वरं प्रणतिमात्रवशं भजामः ॥

गजपतिरनुकम्पासम्पदा यस्य सद्य-
स्समजनि निरवद्यस्सान्द्रमानन्दमृच्छन् ।
निवसतु मम तस्मिन्कृष्णचैतन्यरूपे
मतिरतिमधुरिम्णा दीप्यमाने मुरारौ ॥

दैवाभ्यर्थनमन्थरेण मथिताद्भक्त्यीन्दिराभूद्यतः
श्रीमद्भागवताख्यनिर्जरतरुस्सल्लूत्ररत्नोत्करः ।
दीव्यद्रीतिसुधांशुकामृतरुचिर्ज्ञानश्च धन्वन्तरि-
स्स श्रीव्यासमहाम्बुधिर्विजयते प्रीत्यै समन्तात्सताम् ॥

गोविन्दाभिधमिन्दिराश्रितपदं हस्तस्थरत्नादिव-
त्तत्त्वं तत्त्वविदुत्तमैः क्षितितले यौ दर्शयाञ्चक्रतुः ।
मायावादमहान्धकारपटलीसत्पुष्पवन्तौ सदा
तौ श्रीरूपसनातनौ निरचिताश्चर्यौ सुचर्यौ स्तुमः ॥

इह हि सुखदुःखप्राप्तिपरिहारयोर्लोकप्रवृत्तिर्दृश्यते । तौ चोपेयभूता-वुपायमन्तरेण न सम्भवेतामतस्सारासारविचारज्ञाः महर्षयस्तत्रोपायं प्रकीर्तयन्ति । तत्र प्रकृतिपुरुषाविवेकादस्य त्रिविधदुःखोत्पादस्तद्विवेकात्पुनरनाद्यविद्यानिवृत्तौ पुरुषं प्रति निवृत्ताधिकारा प्रकृतिर्भवतीति तस्य त्रिविधस्य दुःखस्य प्रध्वंसस्स्यात् । स च कार्योऽपि नित्यः अभावरूपत्वात् । स एव चानन्दावाप्तिरिति उपचरितः भारापगमे सुखी संवृत्त इतिवत् । न तु तस्मात्सातिरिच्यत इति कपिलः ।

* * * *

Colophon :

इति सिद्धान्तरत्नाख्ये भाष्यपीठके परमपुमर्थोपायनिर्णयः प्रथमः पादः समाप्तः ॥

End :

तदेतदविचारिताभिधानम् । दुःखभोगान्यथानुपपत्तेर्बाधकत्वात् । यदि जीवो नाम ब्रह्मैव स्यात् तर्हि दुःखभाङ्न स्यात् । ननु जडप्रपञ्चस्य सत्यत्वे स्यादयं दोषः, स तु नयान्तरवदिहापि मिथ्यैवेति चेन्न । वेदाप्रामाण्यादिदोषापत्तेः । किञ्च कारुण्यादीनाञ्चात्र दत्तोत्तरत्वापत्तिर्निरुद्देश्यत्वात् । तस्माद्वाक्यार्थावगाहनाशक्तैः कैश्चिन्मन्दमतिभिः कल्पितमिदं मतद्वयम् । अतो यत्किञ्चिदेतत् ॥

विद्यारूपं भूषणं सम्प्रदायख्यातिं निन्ये तेन यो मामुदारः ।
श्रीगोविन्दः स्वप्ननिर्दिष्टभाष्यो राधाबन्धुर्बन्धुराङ्गस्स जीयात् ॥

यद्ब्रह्मसूत्रेषु विभाति भाष्यं कृष्णात्मकं व्यक्तनवप्रमेयम् ।
तस्योपवेशाय सुवर्णपीठं सिद्धान्तरत्नं न भवेत्किमेतत् ॥
सिद्धान्तरत्नकिरणात्किल भाष्यचन्द्रादद्वैतशार्वरहरादमलप्रकाशात् ।
दृष्टं न किं किमिह तत्त्वमुदग्रधीभिः श्रीमन्मुरारिचरणाम्बुजभक्तिभाग्भिः ॥
विजयन्ति(न्ते) श्रीराधादामोदरपादपङ्कजद्युतयः ।
याभिस्सकृदुदिताभिर्विनिर्मितो मे महान्मोदः ॥
वेदान्तदान्तहृदयै रचितं मयैतत् सङ्गृह्य युक्तिनिचयं मितभाषितेन ।
पीताम्बरस्य करुणावरुणालयस्य कारुण्यतः कृतमुदेतु मुदे बुधानाम् ॥
आनन्दतीर्थप्लुतमच्युतं मे चैतन्यभास्वत्प्रभयातिफुल्लम् ।
चेतोऽरविन्दं प्रियतामरन्दं पिबत्यलिस्सच्छवि तत्त्ववादः ॥

Colophon:

इति सिद्धान्तरत्नाख्ये भाष्यपीठके पुरुषार्थनिर्णयाख्यः अष्टमः पादस्समाप्तः ॥

(*b*) **सिद्धान्तरत्नटिप्पणी.**

SIDDHĀNTARATNAṬIPPAṆĪ.

Foll. 79*a*—172*b*. Foll. 90 and 173 are left blank.

This is also called Siddhāntaratnabhāṣyapīṭhakavyākhyā or Gōvindabhāṣyapīṭhakaṭippaṇī.

A commentary on the Siddāntaratna described above: by the same author.

Complete.

Beginning:

ओं नमः पूर्णप्रमितये गोविन्दाय ।
यस्म श्रीमन्नामपीयूषवर्षैरासीद्विश्वं धूततापं किलैतत् ।
स्वाविर्भावोल्लासितानन्दसिन्धुः जीयात्स श्रीकृष्णचैतन्यचन्द्रः ॥
सान्द्रानन्दस्यन्दिगोविन्दभाष्यं जीयादेतत्सिन्धुगाम्भीर्यसम्पत् ।
यस्मिन्सद्यस्संश्रुते मानवानां मोहच्छेदी जायते तत्त्वबोधः ॥
आलस्यादप्रवृत्तिस्स्यात्पुंसां यद्ग्रन्थविस्तरे ।
सिद्धान्तरत्ने संक्षिप्ता टिप्पणी क्रियतेऽत्र तत् ॥

अथ सोऽयं गोविन्दैकान्ती बलदेवापराख्यो विद्याविभूषणो ब्रह्मसूत्रेषु गोविन्दभाष्याभिधानं विवरणं निर्माय तत्परिपोषाय सिद्धान्तरत्नाख्यं तत्पीठं

निर्मातुकामस्साक्षाद्भगवतोऽर्च्यमानस्य श्यामसुन्दरस्य भक्तिं मङ्गलमाचरति— वेदास्तथेति । तं सर्वेश्वरं वयं भजामः । प्रणत्यादिकया भक्त्यानुकूलयाम इत्यर्थः । तं किंगुणकमित्याकाङ्क्षायामाह—यं वेदास्तथा स्मृतयः सृष्टया-दिकारणमामनन्ति अभ्यस्यन्ति तथा सादृश्यनिर्देश इति श्रीधरः ॥

* * * *

अथ स्वाभीष्टे महाप्रभौ रसिकानन्दे च स्वधीनिवेशं ततोऽभ्यर्थयति —गजेति । अत्र गजपतिरुत्कलाधीशः प्रतापरुद्रः गोपालदासाख्यया ख्यातः करीन्द्रश्च । निरवद्यस्त्यक्तराज्याभिमानः त्यक्तपशुभावश्च कृष्ण-चैतन्यरूपे शचीसुतात्मनि । मुरारौ कृष्णे, पक्षे परेशतया कृष्णचैतन्यं निरूपयति मुरारौ तन्नामके स्वपूर्वचतुर्थे । श्लेषोऽत्रालङ्कारः ।

End :

अत्रेदं बोध्यम् । नन्दात्मजः स्वयं भगवत्परतया ब्रह्मसूत्रार्थनिर्णयं परैः पृष्टो भाष्यकृततया तन्निर्णयस्यालब्धत्वादतिखिन्नो बभूव । तदतिखेद-मसहिष्णुः स भगवान् श्यामसुन्दरः पीताम्बरो यज्ञोपवीती धृतोर्ध्वपुण्ड्रो धम्मिल्ली स्वापे त्रिरादिदेश— प्रथमे कुर्विति, द्वितीये कुरु तव भविष्यतीति, तृतीये ब्रह्मसूत्राणि व्याचक्ष्व तद्भाष्यं ते संसेत्स्यतीति । एवं भाष्यसिद्धये यो मां त्रिरुक्तवानिति इदमप्रकाश्यमप्युक्तं स्वामिकृपाया गेयत्वात् । स्व-कर्तृताभ्रान्तेः परिहार्यत्वाच्च ।

* * * *

अथ स्वमन्त्रदेशिकोत्कर्षं मङ्गलमन्ते प्रदर्शयति—विजयन्त इति । राधादामोदरः कान्यकुब्जविप्रवंशावतंसः । स्वस्य मन्त्रोपदेष्टा महत्तमो विद्वदग्रणीः तस्य पादपङ्कजद्युतयः । महत्तमतां द्योतयितुं सकृदिति । मोदः परतत्त्वावगतिहेतुकः । सत्सभानुकम्पाभाजनताहेतुको नृपेन्द्रसभाजन-हेतुकश्च । पक्षे श्रीराधा च श्रीदामोदरश्च कृष्णस्तयोः पादपङ्कजद्युतयः । महान्मोहस्तदेकान्तिताहेतुकः ॥

* * * *

अथात्मनः श्रीमध्वान्वयदीक्षितभगवत्कृष्णचैतन्यमतस्थत्वमाह—आनन्देति । तत्त्ववादः सर्वं वस्तु सत्यं न किञ्चिदनृतमस्तीति मध्वराद्धान्तः । स एवालिर्भृङ्गः मे चेतोरविन्दं पिबति । तत्सिद्धान्ताक्रान्तमनास्तदीयोऽह-मित्यर्थः । तत्कीदृक् । आनन्दरूपे तीर्थे ऋषिजुष्टाम्भसि प्लुतमाकण्ठमग्नम् ।

पक्षे आनन्दतीर्थेन मध्वमुनिना स्तुतं व्याप्तं चैतन्यं तत्त्ववादशास्त्रोत्थं ज्ञानं सैव भास्वत्प्रभा तयातिफुल्लम् । पक्षे चैतन्यः शचीनन्दनो भगवान् स एव भास्वान् सूर्यस्तस्य प्रभया ध्यातयागकान्त्याऽतिफुल्लं विकासितं । प्रियता हरिप्रीतिः स एव मन्दरो यत्र तत् । सच्छवि कान्तिमत् । इह पाञ्चजन्य-कौमोदकीसुदर्शनतार्क्ष्यवामनत्रिविक्रमनन्दकपद्माख्याः क्रमात्पादास्तत्साद्दश्या-दवगन्तव्याः ॥

हरेः प्रापके स्वे प्रभोः पीठिकेयं प्रिये साधुना संव्यधायि प्रबन्धः ।
दयासिन्धवस्साधवः श्रद्धयैनं मुहुर्लोकयध्वं ततश्शोधयध्वम् ॥

Colophon:

इति श्रीसिद्धान्तरत्नव्याख्यायां श्रीगोविन्दभाष्यपीठकटिप्पण्याम् अष्टमः पद्मपादः व्याख्यातः ॥

R. No. **2990**.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 162. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Śrīmān Jugulakiśōra Pāṇigrāhī, B.A., Parlakimedi.

ब्रह्मसूत्राणि, गोविन्दभाष्यसहितानि.

BRAHMASŪTRĀṆI WITH GŌVINDABHĀṢYA.

Foll. 1*a*—161*a*. Foll. 161*b* and 162 are left blank.

A commentary on the Brahmasūtras written in accordance with the doctrines of Caitanya, which work is described under Nos. 4649—4657 of the D.C.S. MSS., Vol. IX: by Gōvindamuni alias Baladēva, also called Vidyābhūṣaṇa.

Complete.

Beginning:

सत्यं ज्ञानमनन्तं ब्रह्मशिवादिस्तुतं भजद्रूपम् ।
गोविन्दं तमचिन्त्यं हेतुमदोषं नमस्यामः ॥
सूत्रांशुभिस्तमांसि व्युदस्य वस्तूनि यः परीक्षयते ।
स जयति सात्यवतेयो हरिरनुवृत्तो नतप्रेष्ठः ॥

द्वापरे वेदेषु समुत्सन्नेषु सङ्कीर्णप्रज्ञैः ब्रह्मादिभिरभ्यर्थितो भगवान् पुरुषोत्तमः कृष्णद्वैपायनस्तांस्तानुद्धृत्य विबभाज । तदर्थनिर्णेत्रीं चतुर्लक्षणीं ब्रह्ममीमांसामाविश्चकारेत्यस्ति प्रथा स्कान्दी । वेदेषु खलु कर्मणो निखिल-

पुमर्थहेतुत्वं विष्णोस्तु कर्माङ्गत्वं स्वर्गादेः कर्मफलस्य नित्यत्वं जीवस्य प्रकृतेश्च स्वतः कर्तृत्वं परिच्छिन्नस्य प्रतिबिम्बितस्य भ्रान्तस्य वा ब्रह्मण एव जीवत्वं चिन्मात्रब्रह्मात्मकत्वधीमात्रादेवास्य संसृतिनिवृत्तिरित्यापाततोऽर्थाः दुर्मतिभिः प्रतीयन्ते । तानिमान्पूर्वपक्षान्विधाय परस्य विष्णोरिह स्वातन्त्र्य-सर्वकर्तृत्वसार्वज्ञ्यपुमर्थत्वादिधर्मकविज्ञानसुखस्वरूपत्वं निरूप्यते । तथाहि ।

* * * *

ब्रह्मजिज्ञासाधिकरणं तावत्प्रवर्तते । 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य' इति । 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयी'ति च श्रूयते । अत्रात्मनो दर्शनाय तस्य ध्यानं विधीयते । निदिध्यासितव्यो जिज्ञासितव्यः । इह भवति संशयः । अधीतवेदस्य पुंसो धर्मज्ञस्य ब्रह्मजिज्ञासा न युक्ता युक्ता वेति । 'अपाम सोमममृता अभूम अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवति' इत्यादिषु धर्मैः अमृतत्वाक्षयसुखत्वश्रवणान्न युक्तेति पूर्वस्मिन्पक्षे प्राप्ते भगवान् बादरायणो व्यासः प्रारिप्सितस्य शास्त्रस्यादिमं सूत्रमेवमवतारयति—

अथातो ब्रह्मजिज्ञासा ।

अथातश्शब्दावत्रानन्तर्यहेतुभावयोर्भवतः । अथानन्तरमतो हेतोः । ब्रह्मजिज्ञासा युक्तेत्यक्षरयोजना ।

End:

अथ मुक्तस्य सार्वदिकं भगवत्सान्निध्यं वक्तुमारम्भः अत्र भगवल्लोक-प्राप्तिवाक्यानि विषयः तत्रैव संशयः तत्प्राप्तिलक्षणा मुक्तिः । क्षय्या स्याद-क्षय्या वेति लोकत्वाविशेषात्स्वर्गादिवत्तस्मात्पातसम्भवात् क्षय्या स्यादिति प्राप्ते—

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।

* * * *

एतदुक्तं भवति—सत्यवाक्सत्यसङ्कल्पः स्वाश्रितवात्सल्यवारिधिः सर्वेश्वरः स्वभक्तानां स्वनिमित्तपरित्यक्तसर्वविषयाणां स्ववैमुख्यकरीमविद्यां विनिर्धूय ताननतिप्रियान्निजांशान् स्वान्तिकमुपानीय कदाचिदपि न जिहासति । जीवश्च सुखैकान्वेषी सुखाभासाय तुच्छेषु जडेषु अनुरज्यन् व्यतीतासंख्येयजनुर्भोग्यविशेषोपलब्धात्सद्गुरुप्र(सा)दाद्विदितनिजांशिस्वरूपस्तदितरनिस्स्पृह -

स्तदनुवृत्तिपरिशुद्धस्तमनन्तानन्दचित्स्वरूपं प्रसादाभिमुख सुहृत्तमं निजस्वामिनं प्राप्य कदाचिद(पि)तद्विच्युतिं नेच्छतीति शास्त्रादेवाधिगतः शास्त्रैकशरणैस्तथैव तत्तदास्थेयमिति । सूत्राभ्यासश्शास्त्रसमाप्तिद्योतनार्थः ।

समुद्धृत्य यो दुःखपङ्कात्स्वभक्तान्नयत्यच्युतश्रित्सुखे धाम्नि नित्ये ।
प्रियान् गाढरागात्तिलार्धं विमोक्तुं न त्वेच्छत्यसावेव सुज्ञैर्निषेव्यः ॥
श्रीमद्गोविन्दपदारविन्दमकरन्दलुब्धचेतोभिः ।
गोविन्दभाष्यमेतत्पाठ्यं शपथोऽर्पितोऽन्येभ्यः ॥

Colophon :

इति श्रीमद्ब्रह्मसूत्रगोविन्दभाष्ये चतुर्थस्याध्यायस्य चतुर्थः पादस्समाप्तः ॥
समाप्तश्च चतुर्थोऽध्यायः ॥

R. No. 2991.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 58. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Śrīmān Jugulakiśōra Pāṇigrāhī, B.A., Parlakimedi.

हंसदूतम्, सटीकम्.

HAMSADŪTAM WITH ṬĪKĀ.

Foll. 1*a*—57*a*. Foll. 57*b* and 58 are left blank.

A commentary on the Haṁsadūta of Rūpagōsvāmin, also called Rūpaka or Rūpasanātana, which work has been described under No. 11903 of the D.C.S. MSS., Vol. XX: by Madhumiśra alias Puruṣōttama, son of Ānanda.

Complete.

Beginning :

नाट्याटोपविधूतधूर्जटिजटाजूटालवालस्थली-
निर्गच्छत्सुरनिम्नगामलजलसं(प्र)स्पर्धिभिर्यो गुणैः ।
आनन्दाभिधतां ययौ गुणिगणानानन्दयन् तत्सुतो
मिश्रश्रीपुरुषोत्तमो वितनुते टीकां मनोहारिणीम् ॥
टीकायाः प्रथमं मयैव रचिता श्रीहंसदूताभिधे
काव्ये सा किल पावकेन नितरां नीतार्थला(लो)भादिव ।
तस्यैव प्रतिपत्तये पुनरपि प्रारभ्यते सा कृतिः
याचे तत्प्रणतोऽत्र शुद्धिविधिना सन्तोऽनुगृह्णन्तु माम् ॥

अतिसरला गुणबहुला सुललितवाक्या स्वलङ्कृतिस्सुपदा ।
ललनेव लोलनेत्रा कृतिरियमालोक्यतां रसिकैः ॥

अत्र कैशिकी वृत्तिः । तथा च रत्नाकरे—

या श्लक्ष्णनैपथ्यविशेषयुक्ता स्त्रीसङ्कुला पुष्कलनृत्यगीता ।
कामोपभोगप्रसवोपचारा सा कैशिकी चारुविलासयुक्ता ॥

इति । अत्र शिखरिणीवृत्तम् । तथाच रस(वृत्त)रत्नाकरे—रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी इति । केचिदस्य कलापकमाहुः—

समानवृत्तिनिर्व्यूढः कैशिकीवृत्तिकोमलः ।
कलापो नाम विज्ञेयः कविकर्णरसावहः ॥ इति ॥

तत्रादौ कविः प्रारिप्सितग्रन्थसमाप्तये स्वस्याद्वैतभजनद्वारा हरिहरब्रह्मणामैक्यं प्रतिपादयन्निष्टदेवतानमस्कारेणाशीर्नामकं काव्यमुखमाविष्करोति—

दुकूलं बिभ्राणो दलितहरितालद्युतिहरं
जपापुष्पश्रेणीरुचिरुचिरपादाम्बुजतलः ।
तमालश्यामाङ्गो दरहसितनीलाञ्चितमुखः
परानन्दाभोगः स्फुरतु हृदि मे कोऽपि पुरुषः ॥

दुकूलमिति । तत्र श्रीमान् परमभागवतो रूपः प्राणिनो विषयासक्तचेतसः कुकाव्यानुसन्धानपरानालोक्य तदनुजिघृक्षया कृष्णलीलासहितं हंसदूताख्यं खण्डकाव्यमारभते ।

End:

रसानामाधारैरपरिचितदोषः सहृदयैः
मुरारातिक्रीडानिबिडघटनारूपसहितः ।
प्रबन्धोऽयं बन्धोरखिलजगतां तस्य सहसा
प्रभोरन्तः सान्द्रां प्रमदलहरीं पल्लवयतु ॥

Colophon:

इति श्रीमद्रूपक(गोस्वामि)विरचितं हंसदूतकाव्यं समाप्तम् ॥

अखिलानि समस्ताश्च(नि) जगतः(न्ति) तेषां चतुर्दशभुवनानां बन्धुः स्नेहकारी एवंभूतस्य प्रभोः श्रीकृष्णस्यायं प्रबन्धः श्रीकृष्णराधाविरहनिवेदितरचनाविशेषः अन्तर्मध्ये सान्द्रां निबिडां प्रेमलहरीं श्रीकृष्णहर्षपरम्परां सहसा वेगेन पल्लवयतु पल्लवं करोतु । जनानामित्यध्याहारः । प्रबन्धः किंभूतः

रसानां शृङ्गारादिरसानामाधारैरवस्थितिभिः अपरिचितो न जातो दोषो यस्य सः । किंविशिष्टः हृदयेन सह वर्तन्त इति सहृदयास्तैः हृदयग्राह्यै-रित्यर्थः । पुनः किंभूतः । मुरस्य मुरनाम्नोऽसुरस्यारातिः शत्रुः कृष्णः तस्य क्रीडाया निबिडः निबिडश्चासौ घटनारूपश्च तेन सहितः ॥

Colophon:

इति श्रीमधुमिश्रविरचिता रूपसनातनकृतस्य हंसदूतस्य टीका समाप्ता ॥

R. No. 2992.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 212. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of Śrīmān Jugulakiśōra Pāṇigrāhī, B.A., Parlakimedi.

वैष्णवस्मृतिसारः.

VAIṢṆAVASMṚTISĀRAḤ.

Foll. 1*a*—211*a*. Foll. 211*b* and 212 are left blank.

The author, whose name is not given, says that he has laid down herein the important duties to be performed by Śrī-Vaiṣṇavas. This relates mostly to the worship of God Viṣṇu and to the observances of certain Vratas.

Complete in 17 Prakāśas dealing with the subjects given below :—

१. भगवन्माहात्म्यवर्णनम्.
२. सदाचारकथनम्.
३. भगवत्पूजाकथनम्.
४. भगवत्प्रबोधनादिकथनम्.
५. पुष्पमाहात्म्यकथनम्.
६. पूजनादिमाहात्म्यकथनम्.
७. भगवद्दर्शनादिकथनम्.
८. वैष्णवमाहात्म्यकथनम्.
९. श्रवणादिभक्तिकथनम्.
१०. एकादशीमाहात्म्यम्.
११. उपवासादिनिर्णयः.
१२. उपवासपूर्वदिनकृत्यम्.
१३. महाद्वादशीकथनम्.
१४. षाण्मासिककृत्यकथनम्.
१५. ज्येष्ठकृत्यादिकथनम्.
१६. कार्त्तिककृत्यकथनम्.
१७. भगवद्द्रव्यदानमाहात्म्यवर्णनम्.

Beginning:

ब्रह्मादिशक्तिप्रदमीश्वरन्तं दा(पा)तुं स्वभक्त(क्तान्)कृपयावतीर्णम् ।
चैतन्यदेवं शरणं प्रपद्ये यस्य प्रसादात्सकलार्थसिद्धिः ॥

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे कृष्णं चैतन्यमीश्वरम् ॥
श्रुतिस्मृतिपुराणानां सारमुद्धृत्य यत्नतः ।
नराणां विषयान्धानां सुहिताय लिखाम्यहम् ॥
वैष्णवानाञ्च कर्तव्यमत्रैव परिकीर्तितम् ।
वैष्णवस्मृतिसाराख्यं(ख्यो) ग्रन्थश्चै(श्चै)व प्रतन्यते ॥
हरेस्सेवादिमाहात्म्यं विविधञ्च प्रकीर्तितम् ।
वैष्णवानाञ्च माहात्म्यमेकादश्यादितस्तथा ॥
कृपया कृष्णदेवस्य तद्भक्तजनसङ्गतः ।
भक्तेर्माहात्म्यमाकर्ण्य तामिच्छन् सद्गुरुं भजेत् ॥

तत्रादौ श्रीभगवन्माहात्म्यं प्रथमे श्रीसूतेन—

सत्त्वं रजस्तम इति प्रकृतेर्गुणास्ते
युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादि ये हरिविरिञ्चिहरेतिसंज्ञा-
श्श्रेयांसि तत्र खलु सत्त्वमनोनृणां स्युः ॥

पाद्मे—

हरिरेव सदाराध्यः सर्वदेवेश्वरेश्वरः ।
इतरे ब्रह्मरुद्राद्याः नावज्ञेयाः कदाचन ॥

End:

यथा सिद्धरसस्पर्शात्ताम्रं भवति काञ्चनम् ।
सन्निधानाद्गुरोरेवं शिष्यो विष्णुमयो भवेत् ॥

(न)किञ्चित्संस्कारादिकं किन्तु हृन्मात्रं स्पृशतीति । तथा सन्नपि फलत्येव । तत्र दृष्टान्तत्वेनार्थान्तरमुपन्यस्यति ।

यथा कथञ्चित्स्पर्शमात्रेण दहनो दहेदेव । तच्छक्तेस्तथाभूतत्वादिति भावः । एतच्च पूर्वमाहात्म्यलि(ले)खने व्यक्ति(क्ती)भूतमेवास्ति ॥

Colophon:

इति श्रीवैष्णवस्मृतिसारे भगवद्द्रव्यदानादिमाहात्म्यकथनं नाम सप्तदशः प्रकाशः ॥

The scribe adds—

जयाभिधानवर्षे च रजनीकरवासरे ।
माघस्य शुक्लपञ्चम्यां श्यामसुन्दरमण्टपे ॥

वैष्णवस्मृतिसाराख्यं पुस्तकं ज्ञानदायकम् ।
रामचन्द्रेण लिखितं हरिदासस्य सूनुना ॥

R. No. 2993.

Paper. 10⅞ × 9⅝ inches. Foll. 180. Lines, 20 in a page. Grantha and Tamil.

Transcribed in 1919–20 from a MS. of M.R Ry. S. Gōpālācāriyar of Villiyambākkam, Chingleput district.

हरिवंशपुराणम्, द्राविडव्याख्यासहितम्.

HARIVAMŚAPURĀṆAM WITH TAMIL MEANING.

Similar to the text described under R. No. 2424 ante. It is followed by meaning in Tamil. By Brahmacārijinadāsa, pupil of Sakalakīrti.

Incomplete.

Beginning:

सिद्धं सम्पूर्णभव्यार्थं सिद्धेः कारणमुत्तमम् ।
प्रशस्तदर्शनज्ञानचारित्रप्रतिपादिनम् ॥
सुरेन्द्रमकुटाश्लिष्टपादपद्मांशुकेसरम् ।
प्रणमामि महावीरं लोकत्रितयमङ्गलम् ॥

* * * *

वन्दे नेमीश्वरं भक्त्या त्रिदशाधिपवन्दितम् ।
त्रिजगत्पूज्यपादाब्जं समस्ताघविनाशनम् ॥
सकलांस्तीर्थकर्तॄंश्च प्रणमामि स्वसिद्धये ।
मुक्तिश्रीललनासङ्गलालितान्विश्ववन्दितान् ॥

* * * *

त्रिकालयोगयुक्तानां तप्तघोरतपोभृताम् ।
मुक्तिश्रीस्नेहकर्तॄणां वन्दे पादसरोरुहम् ॥
रत्नत्रयपदप्राप्तै(प्त्यै) स्तुवे रत्नत्रयं सदा ।
यस्य प्रसादमासाद्य मल्लिस्तीर्थङ्करोऽभवत् ॥
श्रीजिनेन्द्रमुखोद्भूतां भारतीं त्रिजगन्नुताम् ।
अज्ञाननाशिनीं स्तोष्ये विश्वतत्त्वप्रदीपिकाम् ॥

वन्दे वृषभसेनादिगणाधीशान् गुणाम्बुधीन् ।
सर्वाङ्गपारगान्नित्यं शिरसा तद्गुणाप्तये ॥
कवीश्वरान्नमाम्यत्र कुन्दकुन्दा(कुण्ठनाथा)दिकान् शुभान् ॥
आचार्याननतिविख्यातान् बाह्यान्तर्ग्रन्थिवर्जितान् ॥
अथ सन्मार्गदातारं गुरुं निर्ग्रन्थनायकम् ॥
भक्त्या सकलकीर्त्याख्यं वन्दे तं गुणभूषितम् ।
पूर्वाचार्योदितान् ग्रन्थान्वीक्ष्य सम्यगिमां कथाम् ।
सुखावबोधां कुर्वेऽहं न क्वापि निजबुद्धितः ॥

* * * *

Colophon:

इति श्रीहरिवंशपुराणे सकलकीर्तिशिष्यब्रह्मचारिजिनदासविरचिते हरिवंशपीठिकावर्णनो(नं) नाम प्रथमस्सर्गः ॥

अथाऽस्ति विदितं लोके जम्बूद्वीपं मनोहरम् ।
परिष्वकूस्व(क्ता)च्छजलधेर्वलयाकृतिवेष्टितम् ॥

End:

संसारिणो द्विधा जीवाः भव्याभव्यप्रभेदतः ।
तृसस्थावरभेदेनाथवा मुक्तिभवाध्वगाः ॥
एकाक्षा विकलाक्षा च पञ्चाक्षास्त्रिविधा मताः ।
सुरनारकतिर्यङ्नृभेदाद्वा ते चतुर्विधाः ।
एकद्वित्रिचतुःपञ्चेन्द्रियभेदाच्च पञ्चधा ॥
पृथ्व्यप्तेजोमरुद्वृक्षोतृसभेदात् षडङ्गिनः(?) ।
संज्ञिनो संज्ञिनो द्व्यक्षास्त्र्यक्षा हि चतुरिन्द्रियाः(?) ॥

R. No. 2994.

Paper. $10\frac{7}{8} \times 9\frac{3}{8}$ inches. Foll. 158. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of the Raja of Chirakkal.

तन्त्रसमुच्चयविवरणम्.

TANTRASAMUCCAYAVIVARAṆAM.

Foll. 1*a*—158*a*. Fol. 158*b* is left blank.

A commentary on the Tantrasamuccaya which is an Āgama work on Śāktism.

Begins in the middle of the third Paṭala and breaks off in the ninth Paṭala.

Beginning :

(वर्णाश्र)माचारे विशेषोऽपि सूचितः । . . . .
दत्वा कूर्चान्यथैतेषामासनार्थन्तु वाग्यतः ।
सपवित्रैर्जलैः पादौ क्षालयेद्धृदयेन तु ॥

इत्य . . . . भिषेक इति । विष्णुदुर्गयोः शिवादीनामपि स्नपनप्रकरणमित्यर्थः । मूलं स्याद्गुरोरिति शिवाद्यभिप्रायमेव । तेन शिवादिषु मूलमूर्ति . . . . स्ति । न त्वङ्गपक्ष इत्यपि प्रतिपादितं भवति । स्वे स्वे मूर्तिमन्त्रा इति । अयमिह मूर्तिविभागः । विष्णौ वासुदेवादयः . . . . ष्टौ केशवादयो द्वादश । दुर्गायां पौरुष्याद्याश्चत्वारः . . याद्या अष्टौ शिवेतरपुरुषादयश्चत्वारः ।

* * * *

सर्ववर्णसामान्यतो भूलक्षणमेवमुक्तम् । अथ वर्णभेदतः भूलक्षणमाह—विप्रादिक्रमत इति ।

* * * *

अथ विस्तारबलिः ।

आज्याक्षतैर्यजेदीशमुत्पलाभिः पताकया ।
रत्नैर्वितानैः कौसुम्भैर्माषैर्मासे रुचा नवम् ॥
लाजैस्सुवर्णैर्भूयोऽपि लड्डुकैः पिशितैरपि ।
गन्धैश्च स्वगजिह्वाभिर्यवैश्च तिलवारिभिः ॥

* * * *

Colophon:

इति तन्त्रसमुच्चयविवरणे तृतीयः पटलः ॥

Colophon :

इति तन्त्रसमुच्चयविवरणे अष्टमः पटलः ॥

End :

अथेदानीं वरणक्रियतां विष्णुयागो मे शिवयागस्तीर्थस्नानावसानिकं स्कन्दयाग इति चार्थनीयतयोक्तम् ।

* * * *

यद्वा प्रायश्चित्तजीर्णोद्धारादिस्नपनानामादिशब्देन ग्रहणम् । यदुक्तम्—स्नपनश्चाथ कुर्यादुत्सवसंयुतमिति । सर्वासु पर्वस्विति । सुपर्वाणो विष्णु शिवादिदेवताः ततोऽनुसंवत्सरमिति.

R. No. **2995.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 222. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of Śrīmān Purōhita Nīlamaṇi Ṛṣi, Parlakimedi.

शुद्धिदीपिका, अर्थकौमुदीव्याख्यासहिता.

ŚUDDHIDĪPIKĀ WITH THE COMMENTARY ARTHA-KAUMUDĪ.

Foll. 1*a*—221*b*. Fol. 222 is left blank.

A commentary on the Śuddhidīpikā of Śrīnivāsācārya, a work dealing with astrology: by Gōvindānandakavikaṅkaṇācārya, son of Gaṇapatibhaṭṭa. The author of the original mentions Varāhamihira.

Complete in eight Adhyāyas dealing with the following subjects;—

१. ज्योतिश्शास्त्रप्रशंसा.
२. ग्रहनिर्णयः.
३. ताराशुद्धिनिर्णयः.
४. वारादिनिर्णयः.
५. विवाहनिर्णयः.
६. जातकनिर्णयः.
७. नामादिनिर्णयः.
८. यात्रानिर्णयः.

Beginning:

गोपीमोहनमन्दो रतिकलकण्ठीकलक्काणः ।
श्रवणकरीन्द्रालानं मुररिपुमुरलीध्वनिर्जयति ॥
जगति ख्यातगुणौघो हरिरवतीर्णो . तः पृथिव्याम् ।
श्रीमद्गणपतिभट्टो ज्योतिर्विद्यासु मार्तण्डः ॥
कवि(कङ्क)णपण्डितः श्रिया सहितस्तस्य सुतोऽर्थकौमुदीम् ।
तनुते किल शुद्धिदीपिकाखिलतत्त्वार्थविरोचनाविधिम् ॥

ग्रन्थारम्भेऽभिमतसिद्धिं वाञ्छन् स्वयं श्रीमच्छ्रीनिवासपण्डितः ज्योतिश्शास्त्राधिकारिणं ग्रन्थाधिराजं स्तुवन्नाह—

तृष्णातरङ्गदुस्तरसंसाराम्भोधिलङ्घने तरणिः ।
उदयवसुधाधरारुणमुकुटमणिः पातु वस्तरणिः ॥

तरणिः सूर्यः । वः युष्मान् । पातु ।

*　　　*　　　*　　　*

प्रयोजनमाह—

अस्तङ्गतवति मिहिरेऽतिमलिनदोषाकुले च गोविभवे ।
उद्वाहादिषु शुद्धिग्रहणार्थं दीपिका क्रियते ॥

मिहिरे मिहिराचार्ये । अस्तङ्गतवति मृते सति । तस्माद्धेतोः । गोविभवे उद्वाहादिकर्मोपदेशकस्य वाक्यस्य विभवे बाहुल्ये । अतिमलिनदोषेण उच्छिन्नशास्त्रत्वेनाकुले सति विवाहादिकर्मसु शुद्धिग्रहणार्थं दीपिकाख्यग्रन्थः क्रियते । दीपिकेव दीपिका शुद्ध्यर्थं दीपिका शुद्धिदीपिकेति ग्रन्थस्य नाम ।

*　　　*　　　*　　　*

शिष्यप्रवर्तनार्थं ज्योतिश्शास्त्रं स्तुवन्नाह—

विफलान्यन्य शास्त्राणि विवादस्तेषु केवलम् ।
सफलं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ॥

*　　　*　　　*　　　*

Colophon:

इति श्रीगोविन्दानन्दकविकङ्कणाचार्यकृतायां शुद्धिदीपिकायामर्थकौमुद्यां प्रथमोऽध्यायः ॥

End:

शवपरिणतिनिर्णयमाह—

पापद्रेक्काणे दाहो द्वाविंशे शुभद्रेक्काणके क्लेदः ।
शेषो न मिश्रद्रेक्काणे निष्क्रान्तो व्याडवर्गे च ॥

स्पष्टोऽर्थः ।

मृतस्य देवलोकादिगतिनिर्णयमाह—

विबुधपितृतिरोनरकान्गुरुभुपसितावसु वीयक्षमौ(?) ।
. . . . . रिपुचन्द्रत्र्यंशकपालयन्ति शस्तारिनिधनस्थाः ॥

स्पष्टार्थः । अत्र परिशेषं किञ्चिन्नास्ति तस्मान्न लिखितम् ।

सुविस्तरे ज्योतिषि यत्नतो हृतां समस्तकर्मव्यवहारदर्शिकाम् ।
श्रीश्रीनिवासेन विनिर्मितामिमाममत्सर[ा]ः पश्यति शुद्धिदीपिकाम् ॥

Colo hon:

इति श्रीश्रीनिवासाचार्यविरचितायां श्रीशुद्धिदीपिकायां श्रीगोविन्दानन्दकाविकङ्कणाचार्यविरचितव्याख्यायुक्तायां यात्राध्यायोऽष्टमः ॥

R. No. 2996.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 174. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyāṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala, Malabar district.

प्रायश्चित्तपटलम्.

PRĀYAŚCITTAPAṬALAM.

Foll. 1*a*—174*a*. Fol. 174*b* is left blank.

A treatise in Dharmaśāstra dealing with the following subjects. The portions found herein are taken from the various works given below :—

(३६)	नित्यनैमित्तिकप्रायश्चित्तम् ...	प्रश्नसंहिता.
(१८)	प्रायश्चित्तविधिः	पाद्मसंहिता.
(१९)	नारायणबलिविधिः (प्रायश्चित्त) ...	Do.
(१९)	प्रायश्चित्तविधिः	पारमेश्वरसंहिता.
(१८)	दिशाहोमविधिः	परमपुरुषसंहिता.
(२९)	प्रायश्चित्तविधिः	Do.
(१०)	महोत्सवप्रायश्चित्तम्	Do.
(३९)	बिम्बसङ्करादिप्रायश्चित्तम् ...	विष्वक्सेनसंहिता.
(४९)	कवाटमोचनप्रायश्चित्तम् ...	नारायणसंहिता.
....	उत्सवप्रायश्चित्तम्	Do.
(९)	पवित्रारोपणप्रायश्चित्तम् ...	अगस्त्यसंहिता.
(१०)	तन्त्रसङ्करप्रायश्चित्तम्	Do.
(११)	नित्यनैमित्तिकप्रायश्चित्तम् ...	Do.
(१३)	प्रायश्चित्तविधिः	वसिष्ठसंहिता.
(२५)	नित्यनैमित्तिकप्रायश्चित्तम् ...	नारदसंहिता.
(२६)	रथादिवाहनपतनभङ्गप्रायश्चित्तम् ...	Do.
(२७)	प्रतिनिधिविधिः	Do.
(२७)	प्रायश्चित्तविधिः	विश्वामित्रसंहिता.
(३१)	Do.	कपिञ्जलसंहिता.
(९६)	महोत्सवविघ्नप्रायश्चित्तम् ...	प्रश्नसंहिता.

(५६) नैमित्तिकप्रायश्चित्तम् ... ... विहगेन्द्रसंहिता.

(२६) उत्सवादिसंवत्सरप्रायाश्चित्तम् ... सात्वतसंहिता.

Contains 25 Adhyāyas dealing with Prāyaścitta taken from different Saṁhitās, namely the Agastya, Vāsiṣṭha, etc., of Pāñcarātrāgama.

Complete.

Beginning:

अथातस्संप्रवक्ष्यामि प्रायश्चित्तविधिं परम् ।
भूसङ्ग्रहादिकार्येषु यद्विहीनं भवेद्यदि ॥
तत्साधनं सदा कुर्यान्मुच्यते साधकोत्तमैः ।
प्रवेशे बलिकाले वा द्रव्यमात्रविहीनके ॥
बलिपात्रनिपाते च द्रव्यत्यागासनेऽपि च ।
सूत्रपातनकाले तु छेदशङ्कोर्विदारणे ॥
षडक्षरं तथाष्टार्णं जपेदष्टोत्तरं शतम् ।
भूशोधनविहीने तु प्रायश्चित्तं विधीयते ॥

* * * *

Colophon:

इति पाञ्चरात्रे शुक्रप्रश्नसंहितायां नित्यनैमित्तिकप्रायश्चित्तविधानं नाम षट्त्रिंशोऽध्यायः ॥

ब्रह्मोवाच—

नैमित्तिकानां नित्यानां कर्मणां भगवन् हरे ।
आराधनानां वैकल्यं केलाको (स लोके) प्रायसंज्ञकः ॥
तस्य चित्तं समाधानमिति निर्वचनक्रिया ।
तस्य किंवा समास्थानां कः प्रकारोऽस्य कथ्यताम् ॥

श्रीभगवानुवाच—

अस्नातोनो(ऽनु)पवीतो वा स कृत्वा किं(की)लकं तथा ।
अर्चयेद्देवदेवेशं प्रायश्चित्तीयते नरः ॥

* * * *

Colophon:

इति पाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे प्रायश्चित्तविधिर्नामाष्टादशोऽध्यायः ॥

End :

स्फोटनं भेदनश्चैव एककालं भवेद्यदि ।
तद्बिम्बन्तु परित्याज्यमन्यत्रैव तु साधयेत् ॥

* * * *

महता विभवेनैव पूजयेत्पुरुषोत्तमम् ।
ब्राह्मणान्भोजयेत्पश्चादष्टोत्तरसहस्रकम् ॥
दक्षिणां दापयेत्पूर्वं गन्धपुष्पन्तु दापयेत् ।
मुखवासश्च ताम्बूलं दापयेत्क्रमयोगतः ॥
प्रदक्षिणं प्रमाणन्तु कृत्वा तत्रैव देशिकः ।
ब्राह्मणानामनुज्ञाश्च चालयेत्क्रमयोगतः ॥

Colophon :

इति प्रायश्चित्तपटलं संपूर्णम् ॥

R. No. **2997.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 272. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of Śrīmān Purōhita Nīlamaṇi Ṛṣi, Parlakimedi.

स्मृतिसरोजकलिका.

SMṚTISARŌJAKALIKĀ.

Bound in two volumes.

A work on Dharmaśāstra: by Viṣṇuśarman. The subjects dealt with herein are apparent from the headings of Khaṇḍas given below :—

१. स्नानखण्डः.
२. पूजाखण्डः.
३. तिथिखण्डः.
४. श्राद्धखण्डः.
५. सूतकखण्डः.
६. दानखण्डः.
७. यज्ञखण्डः.
८. प्रायश्चित्तखण्डः.

Complete in eight Khaṇḍas. The arrangement is not in order.

Beginning :

नत्वा विष्णुं गणेशञ्च गोभिलादीन् ऋषींस्तथा ।
क्रियते नित्यकृत्येषु छन्दोगानाञ्च पद्धतिः ॥
भाषिता विष्णुशर्मेण ? प्रयत्नेन स्फुटीकृता ।
सरोजकलिका नाम स्मृतिः स्नानादिकर्मणाम् ॥

स्नानं पूजा तिथिः श्राद्धं सूतकं दानयज्ञयोः ।
प्रायश्चित्तं क्रमादष्ट खण्डाः स्मृतिविधानतः ॥
मनुना याज्ञवल्क्येन विश्वामित्रेण चात्रिणा ।
विष्णुना च वसिष्ठेन व्यासेनोशनसा तथा ॥
बोधायनेन दक्षेण शङ्खेनाङ्गिरसेन च ।
आपस्तम्बेनागस्त्येन हारीतगुरुनारदैः ॥
पराशरेण गार्ग्येण गौतमेन यमेन च ।
शातातपेन कश्यपेन संवर्तेन प्रचेतसा ॥
गोभिलेन सुमन्त्रेण मनुस्वायम्भुवेन च ।
अष्टाविंशतिभिर्दृष्टं शास्त्रं लोकहिते रतैः ॥
धर्मसंरक्षणार्थाय सङ्क्षेपेण महात्मभिः ।
धर्मानृतु(?)स्त्रिवेदोक्तान्स्वर्गादिफलदायकान् ॥

* * * *

अथ स्नानविधिः—

प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं नृणाम् ।
सर्वमहितपूतात्मा प्रातःस्नायी जपादिकम् ॥
याम्यं हि यातनादुःखं प्रातस्स्नानेन पश्यति ।
प्रातस्स्नानेन पूयन्ते येऽपि पातकिनो नराः ॥

* * * *

Colophon:

इति श्रीविष्णुशर्मणः कृतौ स्मृतिसरोजकालिकायां स्नानादिनिर्णयो नाम प्रथमखण्डप्रकरणम् ॥

End:

स्कन्दपुराणे ईश्वरकार्त्तिकेयसंवादे—

प्रायश्चित्तसहस्रेतु कृत्वा व्रतशतानि च ।
कलौ पापानि गच्छन्ति न विष्णोः स्मरणं विना ॥

इति तेषां प्रायश्चित्तम् ॥

कर्मनिष्ठास्तपोनिष्ठाः कदाचित्पापमागताः ।
जपहोमादिकं तेभ्यो विशेषेण प्रदीयते ॥

ये नामधारका विष्णोर्मूर्खा धनविवर्जिताः ।
कृच्छ्रचान्द्रायणादीनि तेभ्यो यज्ञविशेषतः ॥

तथा च—

प्रायश्चित्ते व्यवसिते कर्ता यदि विपद्यते ।
पुत्रस्तवहते वासादिन्द्रलोके परत्र च ॥ १

व्यासः—

धर्मार्थं यत्र(त)मानस्तु तरेच्छक्नोति मानवः ।
प्राप्नोत्यभवपुण्य(श्च) शिवलोके परत्र च ॥
सरोजकलिकाग्रन्थे कृतं खण्डाष्टकं शुभम् ।
नानास्मृतिं समालोक्य क्रियते विष्णुशर्मणा ॥ १

Colophon:

इति विष्णुशर्मणः कृतौ सरोजकलिकायां पञ्चगव्यादिहिंसाप्रायाश्चित्ताष्टमखण्डप्रकरणं सम्पूर्णम् ॥

R. No. **2998.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 62. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of Śrīmān Jugulakiśōra Pāṇigrāhī, B.A., Parlakimedi.

श्राद्धदीपः.

ŚRĀDDHADĪPAḤ.

Foll. 1*a*—61*b*. Fol. 62 is left blank.

On certain details connected with the performance of the Śrāddha ceremony: by Divyasiṁhamahāpātrō, who worships in the beginning Kṛṣṇa, Pārvatī and Śaṅkara.

Complete.

Beginning:

प्रणम्य देवं श्रीकृष्णं भवानीशङ्करावपि ।
तन्यते श्राद्धदीपोऽयं दिव्यसिंहेन धीमता ॥

श्राद्धं नाम पितृनुद्दिश्य द्रव्यत्यागः । तत्र ब्राह्मणभोजनं पिण्डदानञ्चोभयं प्रधानमिति बहवः ।

अत एव

अग्नौ हुतेन देवस्थाः पितृस्था द्विजतर्पणैः ।
नरकस्थाश्च तृप्यन्ति पिण्डैर्दत्तैस्त्रिभिर्भुवि ॥

इति पिण्डदानब्राह्मणभोजनयोस्समकक्षतया फलश्रवणम् । कवलसोमयाजिनस्सान्नाय्यविरहेऽपि ? प्रधानसिद्धिवदग्नीषोमीयपुरोडाशविरहेऽसोमयाजिनः पौर्णमासीफलसिद्धिवन्मघादौ पिण्डविरहेऽपि श्राद्धफलं भवत्येव । गयाश्राद्धे पिण्डदानमात्रं विहितमिति तत्र तावन्मात्रेण श्राद्धफलम् । वस्तुतस्तु पितनुद्दिश्य द्रव्यत्याग एव प्रधानम् । पिण्डदानब्राह्मणकर्तव्यता इति सारमित्यपरः ।

End:

मन्वादिश्राद्धम् ।

आश्वयुक्शुक्लनवमी कार्त्तिके द्वादशी सिता ।
तृतीया चैव माघस्य तथा भाद्रपदस्य च ॥
फाल्गुनस्याप्यमावास्या पुष्यस्यैकादशी सिता ।
आषाढस्यापि दशमी माघमासस्य सप्तमी ॥

* * * *

कल्पभेदेन मतान्तरमाह—

आश्वयुक् शुक्लनवमी कार्त्तिके द्वादशी सिता ।
तृतीया चैव माघस्य ज्येष्ठे पञ्चदशी सिता ॥
सप्तमी माघमासस्य पुष्यस्यामा तथा परा ।
वृश्चिके चाष्टमी कृष्णा मकरे द्वादशी सिता ॥
गोविन्दद्वादशी कुम्भे मेषे पञ्चदशी सिता ।
कार्त्तिकफाल्गुन्याषाढपूर्णिमा द्वादशी सिता ॥
मन्वन्तरादयश्चैता मुनिभिः परिकीर्तिताः ।

सिता पञ्चदशी पौर्णमासी वृश्चिक कार्त्तिके मकरे पुष्ये कुम्भे माघे मेषे चैत्रे आषाढे पूर्णिमा द्वादशी च ॥

Colophon:

इति श्रीदिव्यसिंहमहापात्रविरचितः श्राद्धदीपः समाप्तः ॥

R. No. **2999.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 55. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of Śrīmān Jugulakiśōra Pāṇigrāhī, B.A., Parlakimedi.

कालदीपः.

KĀLADĪPAḤ.

Foll. 1*a*—55*a*. Fol. 55*b* is left blank.

A treatise giving details of the importance of various Tithis, the proper Vratas to be observed, the proper time of observing them and the person or persons who are eligible to observe them; by Divyasiṁha-mahāpātrō of Vatsagōtra.

Complete.

Beginning:

प्रणम्य देवं श्रीकृष्णं भवानीशङ्करावपि ।
तन्यते कालदीपोऽयं दिव्यसिंहेन धीमता ॥

तिथिलक्षणम्—

तन्वते कलया यस्मात्तस्मात्तास्तिथयः स्मृताः । इति ॥
अमाषोडशभागेन देवि प्रोक्ता महाकला ।
संस्थिता परमा माया देहिनां देहधारिणी ॥
अमादिपौर्णमास्यन्ता या एव शशिनः कलाः ।
तिथयस्तास्समाख्याताः षोडशैव वरानने ॥

या महामाया आधारशक्तिरूपा देहिनां देहधारिणी संस्थिता सा चन्द्रमण्डलस्य षोडशभागेन परिमिता चन्द्रदेहधारिणी अमानाम्नी महाकला प्रोक्ता ।

* * * *

तिथिस्वरूपम् ।

खर्वो दर्पस्तथा हिंस्रस्त्रिविधं तिथिलक्षणम ।
खर्वो नाम तिथेस्साम्यं दर्पो वृद्धिः प्रकीर्तिता ॥
हिंस्रस्स्यात् क्षय इत्युक्तं मुनिभिस्तिथिनिर्णये ।

End:

ग्रहणम् ।

पूर्णिमाप्रतिपत्सन्धौ राहुस्संपूर्णमण्डलम् ।
ग्रसते चन्द्रमर्कश्च दर्शप्रतिपदन्तरा ॥
ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते ।
मुच्यमाने भवेत्स्नानं सू(मु)क्ते दानं विधीयते ॥
सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम् ।

चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना ॥
अपराह्णेन मध्याह्ने मध्याह्नेन तु सङ्गमे ।
भुञ्जीत सङ्गवे चेत्स्यान्न पूर्वं भुक्तिमाचरेत ॥
ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत् ।
ग्रस्तावेवास्तमयनं रवीन्दू प्राप्नुतो यदि ॥
तयोः परेद्युरुदये स्नात्वाभ्यवहरेन्नरः ।

Colophon:

इति श्रीदिव्यसिंहमहापात्रविरचितः कालदीपः समाप्तः ॥
वत्सगोत्रसमुत्पन्नो दिव्यसिंहाभिधः सुधीः ।
कालदीपाभिधं ग्रन्थं कृतवान् कृतिनां मुदे ॥

R. No. **3000.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 26. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Vēmūri Rāmagōvinda Śāstrigāru, Narsapur, Kistna district.

प्रामाण्यवादः.

PRĀMĀṆYAVĀDAḤ.

Foll. *3a—25b.* Fol. 26 is left blank.

Similar to the work described under No. 4272 of the D.U.S. MSS., Vol. VIII.

Foll. 1 and 2 contain a commentary on first two lines of Prāmāṇyavāda of Tattvacintāmaṇi, which begins as follows :—

यस्य संशयव्यतिरेकनिश्चयाविति मूलम् । अत्र व्यतिरेकपदव्यत्यासेन यद्व्यतिरेकज्ञानत्वेन प्रतिबन्धकता लभ्यत इति दीधितिकारेणोक्तम् ।

Complete.

Beginning:

प्रामाण्यं स्वत एव गृह्यत इति मीमांसकाः । तत्र गुरुमते प्रामाण्यग्रहप्रतिबन्धकाभावकालीनयावत्स्वाश्रयीभूतज्ञानग्राह्यत्वमेव स्वतोग्राह्यत्वम् । एवञ्च प्रामाण्यं स्वविषयकग्रहप्रतिबन्धकाभावकालीनस्वाश्रयज्ञानत्वव्यापकविषयताप्रतियोगि न वेति विप्रतिपत्तिः । प्रामाण्यग्रहप्रतिबन्धकीभूतबाधादिबुद्धिकालीनज्ञानस्य प्रामाण्यविषयकतया बाधवारणाय कालीनान्तं ज्ञानविशेष-

णम् । प्रामाण्याश्रयज्ञाने प्रामाण्यग्रहप्रतिबन्धकबाधादिबुद्धिश्चान्यथाख्याति-मनङ्गीकुर्वतां गुरूणां मते अगृहीतासंसर्गकज्ञानद्वयरूपैवेति ध्येयम् ।

* *

अत्र नैयायिकाः—

प्रामाण्यस्य स्वतोग्राह्यत्वे व्यवसायानन्तरमिदं ज्ञानं प्रमा नवेति तद्धर्मिकप्रामाण्यसंशयानुपपत्तिः निर्णीते संशयायोगात् । अथ तादृशव्यवसायोत्तरं प्रामाण्यसंशयोऽनुभवसिद्धः तादृशव्यवसाये प्रामाण्यविषयतैव न स्वीक्रियते फलबलात् ।

End:

वस्तुतस्तु ज्ञाततादिकमनुल्लिखतो घटादिज्ञानस्य घटमहं जानामीत्याद्याकारस्यानुभवसिद्धतया तादृशज्ञानस्य तल्लिङ्गत्वासम्भवेन प्रत्यक्षरूपता निष्प्रत्यूहैव । उपदर्शितयुक्तिभिश्च ज्ञानमतीन्द्रियमेव परन्तु शब्दगन्धादिवत्तद्वृत्तिप्रामाण्यमेव योग्यमिति प्राचीनगुरुमतमपि निरसनीयमिति सङ्क्षेपः ॥

Colophon:

इति प्रामाण्यस्य परतोग्राह्यत्वव्यवस्थापनं समाप्तम् ॥

R. No. **3001.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 80. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of Śrī Rāmatīrtham Library, Ramatirtham.

सङ्क्षेपरामायणव्याख्या.
SAṄKṢĒPARĀMĀYAṆAVYĀKHYĀ.

A commentary on the Saṅkṣēparāmāyaṇa, which work has been described under No. 1849 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

Beginning:

आञ्जनेयं गुरून्वाणीं वाल्मीकिञ्च नमन्(मं) नमन्(म्) ।
रामायणादिसर्गस्य भाष्यं कुर्मो यथामति ॥
अपिचत्वेन(चोततु)वै शब्दाः प्राणा आदिकवेः कृतौ ।
तान्पादपूरणीयार्थान्मन्यन्ते मन्दबुद्धयः ॥

विशेषणानि सर्वाणि यानि यानि (च) सर्वतः ।
साकाङ्क्षाणि च किं वोक्त्या सर्वं स्पष्टीकरिष्यति ॥

श्रीरामजपमहिमप्रकाशको भगवान् वाल्मीकिः श्रीरामायणाख्यप्रबन्धं निबन्धनेन प्रकटयन् तत्कारणभूतं तत्कथोपदेशकेन नारदेनात्मनस्संवाद-मादौ कथयति—तप इति । तपस्वी तपश्शाली । वाल्मीकिः वामलूरु-प्रभूतमुनिः । तपसि स्वाध्याये च । निरतः नितरामासक्तः । तं वाग्विदां वक्तणां वरं श्रेष्ठम् । मुनिपुङ्गवमृषिश्रेष्ठं नारदं परिपप्रच्छ पुनः पुनः प्रश्नं कृतवान् । वाल्मीकिरित्यत्र वल्मीकात्करचरणादिविशिष्टतयोत्पन्न-त्वेन वल्मीकस्यापत्यमित्यर्थविवक्षायां अत इञिति इञ्प्रत्ययः । ननु वल्मीकनामकमुनेः स्कन्नं रेतः काचित्सर्पाङ्गना पीत्वा वाल्मीकिं जनयामासेति स्कान्दे वैशाखमाहात्म्ये श्रूयते । कश्चिन्निषादः सप्त(र्ष्यु)पदेशेन रामनाम जपन् वने तस्थौ । तत्किरातशरीरे वल्मीकमभूत् । ततः कतिपयकाले गते सप्तर्षयस्तद्वनमेत्य किराततपस्स्थानमिति तत्रागत्य वल्मीकं दृष्ट्वा किराताह्वानं चक्रुः । स . . . रामनामजपमहिमप्राप्तमुनिभावो वाल्मीकि-रिति प्रथितोऽभूदिति पाद्मे पुराणे ।

* * * *

प्रश्नप्रकारं श्लोकत्रयेणाह—को न्विति । अस्मिन् लोके भूलोके । सांप्रत-मिदानीम् । गुणवान्प्रशस्तगुणयुक्तः । को नु क इत्यर्थः । वीर्यवांश्च प्रशस्तशौर्य-युक्तश्च कः ।

End:

श्लोकव्याख्यात्रा प्रतीकग्रहणमिव गायत्र्यक्षरव्याख्यात्रा वाल्मीकिना केषाञ्चिदक्षराणामेकदेशग्रहणं कृतमिति ज्ञेयम् । तदित्याद्यक्षरप्रतिपाद्यार्थः कल्याणगुणसमूहः अष्टादशभिः श्लोकैः विवृतः ततः परं तत्तदक्षरयुक्तः श्लोके तत्तदक्षरार्थः प्रकटीकृतः । रामवियोगेन दुःखितो भरतो गोमूत्रयावकाहारो जटा-चीरधरश्च स्थितस्तद्दुःखनाशाय रामेण हनुमत्प्रेरणं कृतमिति 'भरतस्यान्तिकं राम' इति श्लोकः दुःखनाशनप्रतिपादक इति ज्ञेयम् ॥

* * * *

भाष्येऽस्मिन् मद्रचिते राम गुणं त्वं गृहाण न तु दोषान् ।
शुकपद्यचये(लोके) गृह्णाति जनो गुणं न दोषगणम् ॥
महार्थगर्भा वसुधा यथैषा कृतिर्मुनेस्तत्र किलैकदेशे ।
समुद्धृतस्सर्वजनोपकृत्यै मया यथाशक्ति मितोऽयमर्थः ॥

यत्पादपङ्कजरजः किल गौतमेन त्यक्तं चिराय महिताध्ययनं मनोज्ञम् ।
भूयो व्यचीकरदयं पुरुषोत्तमो मे भूयात्पुरा रवितनूजपुरप्रयाणे ॥
चामीकरक्षितिभृतस्त्वसमानधर्मे भङ्गे समुद्भवति यद्भुजशौर्यलेशात् ।
जङ्घेतरां प्रतिरवच्छलसिंहनादस्सोऽयं नरः स्फुरतु मे चरमप्रयाणे ॥
रामायणे चतुश्लोकीं तीर्णः पर्वतवर्धनः ।
अतारीदञ्जनासूनुः समुद्रे शतयोजनम् ॥

Colophon:

इति सङ्क्षेपरामायणव्याख्या समाप्ता ॥

R. No. 3002.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 94. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Agadācārya of Mandasa.

भारतामृतम्.

BHĀRATĀMṚTAM.

Foll. 1*a*—93*a*. Foll. 93*b* and 94 are left blank.

A poem narrating the story of the Mahābhārata. The name of the author is not given. But it is stated that he was the son of Muktāmbā and Vaidyēśvara. It is also stated that Gōvinda, son of the paternal uncle, helped the author in the revision of the work. The author's other works are Pārijātaharaṇanāṭaka, Rasamañjarī, etc. It is stated that he got the title of "Kavicandrarāya" from the king Rudra.

Contains Sargas 21 to 39 complete, 40th incomplete.

Dealt with the following subjects :—

२१ पार्थधनुर्विद्या.
२२. धनञ्जयप्रत्यागमनम्.
२३. काम्यकागमनम्.
२४. अरणीहरणम्.
२५. कीचकवधः.
२६. अज्ञातवनवासनिस्तारः.
२७. द्यूताङ्गीकारः.
२८. भीमप्रतिज्ञा.
२९. विदुरगृहनिवासः.
३०. दुर्योधनानुशासनम्.
३१. सन्धिनिषेधः.
३२. युधिष्ठिरचमूनिवेशः.
३३. समरसमुद्यमः.
३४. भीष्मयुद्धे दिनपञ्चकयुद्धम्.
३५ शरतल्पनिपातः.
३६. जयद्रथवधप्रतिज्ञा.
३७. जयद्रथवधः.
३८. वञ्चितगुरुगौरवम्.
३९. कर्णवधः.

Beginning :

भारती भारतीभूय यस्य निर्व्याजनिर्मला ।
जगत्पुनीते गङ्गेव तस्मै व्यासाय मे (ते) नमः ॥
ततः प्रतस्थे प्रियया सहायो निजया तया ।
सहजानुगतः पार्थः काकुत्स्थ इव काननम् ॥
अहो सत्त्वमहो धैर्यमहो सत्यमहो यशः ।
यद्धे पार्थिवः पापैश्चलितोऽपि न विक्रियाम् ॥

* * * *

स विलङ्घ्य कुरुक्षेत्रमक्षेत्रमघसम्पदाम् ।
गत्वा प्रयागसान्निध्यमवगाह्य सरस्वतीम् ॥
काम्यकं वनमासाद्य काम्यकन्दलितद्रुमम् ।
उवास वासवप्रख्यः प्रख्यातमृषिसत्तमैः ॥

Colophon :

भारतामृते महाकाव्ये पार्थधनुर्विद्या नाम०

* * * *

यं प्रासूत पतिव्रता गुणवती मुक्ता विमुक्तात्मनः
श्रीवैद्येश्वरतो विभूषितभरद्वाजान्वयादात्मजम् ।
यश्चक्रे रसमञ्जरीति रसिकाह्लादाय पद्यावलिं
सर्गस्तत्कृतकाव्य एष गुणवानत्रैकविंशो गतः ॥

* * * *

यं प्रासूत . . . . दात्मजम् ।
गोविन्दः कविशेखरः कविपथे हस्तावलम्बः पितुः
भ्रात्रीयोऽजनि यस्य तस्य सुकृतौ द्वाविंशसर्गो गतः ॥

* * * *

यं प्रासूत . . . . दात्मजम् ।
यश्चापत् कविचन्द्ररायपदवीं श्रीरुद्रभूमीभुजः
सर्गस्तद्विनिबद्धकाव्यनिलकेऽसौ पञ्चविंशो गतः ॥

* * * *

यं प्रासूत . . . . दात्मजम् ।
रम्यश्चाकृत पारिजातहरणं सन्नाटकं यस्त्रय-
स्त्रिंशस्तत्कृतकाव्य एव विरतिं सर्गोऽनवद्यो गत. ॥

* * * *

यं प्रासूत . . . . दात्मजम् ।
यश्चम्पूमकरोदरोचकितयाचारौ चरित्रे हरेः ?
पञ्चत्रिंशतया श्रुतश्रुतिसुखः काव्येऽस्य सर्गो गतः ॥

* * * *

यं . . . . दात्मजम् ।
यत्पित्रा कविडिण्डिमोऽपि कवितावादे जितस्तत्कृता-
षष्टत्रिंशमितो विशिष्टवचनस्सर्गस्समग्रो गतः ॥

* * * *

Colophon:

भारतामृते महाकाव्ये कीर्तिशेषिताङ्गनायको नाम एकोनचत्वारिंशस्सर्गः ॥

End:

किं पौरुषमस्य पञ्चतां यत्पाञ्चालीसुतपञ्चकं निनाय ।
आश्चर्यमिदं यदस्य प्रारम्भे तदसंख्यमेव शीर्णम् ॥
अन्येऽपि रणक्षतावशिष्टास्संविष्टा अपि निन्दि(न्यि)रे विराजः ।
द्रोणप्रभवेन कालधर्मं संरम्भान्निजधर्ममुज्झतैव ॥
चक्रे च तथा पृथासुतानां स द्रौणिः शिबिरं शवैकशेषम् ।
पारावतपञ्जरान्तराले संविष्टो मथितं यथा बिडालः ॥

R. No. 3003.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 32. Lines, 20 in page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Sabhāmaṭham, Kunnankulam post.

नटाङ्कुशम्.

NAṬĀṄKUŚAM.

A criticism on a particular phase of gesticulation in histrionics as practised by the Śākyars in Malabar: The author, whose name is not given, salutes Bharata, the author of Nāṭyaśāstra.

Illustrations are quoted from—

(1) Nāgānanda of Śrīharṣa.
(2) Tapatīsaṁvaraṇa } of Kulaśēkhara.
(3) Subhadrādhanañjaya } of Kulaśēkhara.
(4) Āścaryacūḍāmaṇi of Śaktibhadra.

Complete.

Beginning:

महिमा स जयत्येको यत्प्रभावस्य गायिका ।
सततागमकोदारा तारस्वरवती त्रयी ॥
दम्पती प्रक्रियां काञ्चित् जगत्रय . . . . ।
. . वसम्भेदप्रयोगाश्चर्यभूमिकाम् ।
भारती चारुवक्त्रेन्दुलीलाभसितचन्द्रिका ।
सूते सुधीचकोराणां नाट्यविद्याभृशं मुदम् ॥
यस्य विज्ञान . . . . रमयते दिवि ।
तस्मै नमो मुनीन्द्राय भरताय ससूनवे ॥
अहो दुर्ज्ञानमप्यन्यैः प्रयोगेन महानटाः ।
आदाय दर्शयन्त्येव वस्तु नेत्राश्रयं रसम् ॥
तत्रामीभिस्तु शैलूषैर्नाट्यं यत्प्रवितन्यते ।
लोकोत्तरत्वान्नूनं तदवगन्तुं न गच्छति ॥
गर्वयन्ते च तेनामी वयमेवात्र पण्डिताः ।
नास्मत्प्रयोगं जानन्ति मुग्धा एते जना इति ॥
तद्युक्तं यत एतेषां गृहगानतया स्थिते ।
अङ्गुलीयाङ्क एवादौ संशयास्सन्ति मादृशाम ॥

तथाहि—

का तावदियं क्रिया किं कथाशरीरैकदेशः उत देवताप्रीति-साधनमाहोस्विदनुकार्यस्वभावचेष्टा । अथवा कथाभिनय . . . त्याङ्गं किञ्चिन्नृत्तमिति । किमपि न निर्धार्यते । प्रकारान्तरन्तु न सम्भवति ! ननु माभूदसम्भाव्यम् । एष्वेव पक्षेषु केनचिद्भूयताम् । अस्तु । कस्तर्हि पक्षीभवतु । न तावदाद्यः ।

* * * *

यथा वात्रैव नान्दी सा खलु देवतैकतानतया प्रत्यूहविहतिहेतुरादा-वादीयते । यथोक्तम्—

देवतादिनमस्कारमङ्गलारम्भपाठनम् ।
नाट्यादौ शस्यते यत्तु सा नान्दी कथिता बुधैः ॥ इति ।

तथा च नान्द्यन्ते प्रविशति सूत्रधार इति नाटकोपक्रमो भवति ।

क्रियेयं देवताप्रीतिविधये जायते यदि ।
नाट्यात्प्रागेव नान्दीव प्रयोक्तव्या भवेद्ध्रुवम् ॥

तथा सति तु किमनया, नान्द्येवालमिति स्यात् । नान्द्येव क्रियेति व्यपदिश्यते इति चेत् । कामं नान्द्यि क्रियमाणे न विवदामहे । सर्वथेयं क्रियानाट्याद्यन्तरेणावस्थानमर्हति । ततः प्रविशति हनूमानङ्गुलीयकहस्त इति प्रावेशिकेन किञ्चित्कथां समारभ्य पुनस्तां विसृज्य मध्ये देवतार्थां क्रिया क्रियत इति कोऽयं नयः ।

* * * *

आचार्यकृतिविच्छिन्नकविकृत्युपादानं हि तत् महिमशालित्वादाचार्यस्यैव कृतावेवमिति चेत्, अस्माकं प्रबन्धकृदपि महानेव ।

यत्कृतं नाटकं चूडामणिश्चूडामणिस्सताम् ।
स कस्येव न मान्योऽयं शक्तिभद्रो महाकविः ॥

* * * *

न किञ्चिदप्रयोगाय नाटके कथितं भवेत् ।
यतो गत्वेति वक्तव्ये परिक्रम्येति कथ्यते ॥
न केवलं कवेश्चित्रप्रबन्धस्थितिवेदिनः ।
द्रौपद्या अप्रवेशेऽस्मिन्नाज्ञा राज्ञोऽपि लङ्घ्यते ॥
कुलशेखरभूपालकुलशेखरनिर्मिते ।
धनञ्जये याज्ञसेन्याः प्रवेशः कथितोऽस्ति यत् ॥
नाट्ये प्रविशतीत्यादि पदं विधिपरं ध्रुवम्
स्थापकः प्रविशेत्तत्रेत्यादेरध्वानमास्थितम् ॥

End :

ततः प्रविशति हनूमानङ्गुलीयकहस्त इत्येतद्ग्रन्थानुसारेण समुचितवेषाभि . . . . लोकनरभसादिनिरूपणानन्तरं प्रसङ्गात्संप्रति हीत्युक्त्वा मैनाकं नागकन्यादि . . . . र्वी न कथा । एवमुपरिष्टादपि । तत्र यथेच्छं श्लोकार्थविस्तारोऽङ्गीकरणीयः । किन्तु क्वचित् . . . . . . स्थितिस्सर्वत्र समालोचनीया ।

वितत्य नाट्यतां कामं ग्रन्थस्यार्थो यथारुचि ।
मा विमोचि स्वभावे . . . . ॥

नाट्यन्यायमनुसरति ।

Colophon :

इति नटाङ्कुशं समाप्तम् ॥

R. No. 3004.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 56. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Sabhāmaṭham, Kunnankulam post.

अलङ्कारसर्वस्वव्याख्या.

ALAṄKĀRASARVASVAVYĀKHYĀ.

Foll. 1*a*—55*b*. Fol. 56 is left blank.

A commentary on the Alaṅkārasarvasva of Maṅkhuka, which work has been described under No. 12796 of the D.C.S. MSS., Vol. XXII. The commentary is printed in the Trivandrum Sanskrit Series, Vol. No. XI, and is attributed to Samudrabandha; but no such name is found in the MS. under notice, which however gives good readings in many places.

Wants the beginning and the end.

Beginning:

पर्यायपरिवृत्त्यक्षमत्वादौ यथा . . . . . . ।

कविमदविहितहेवाकं लब्ध्वा नायकमनघं . . . . ॥

अत्र रणसमयेत्यरिचक्रेति च पदद्वयपरिवृत्त्यक्षमत्वमाद्ये द्वयोरपि नैरर्थ्यम् । द्वितीये सार्थकत्वं व्यञ्जनमात्रमिति मात्रशब्देन स्वरसाम्यनियमो व्यावर्त्यते न तु तदभावः प्रतिपाद्यते । अतस्सायं सायमित्यादौ स्वरसाम्यं न दोषाय । स्वरसाम्यपौनरुक्त्या वचनेनासम्भवो हेतुः किन्त्वनलङ्कारत्वमेवेत्याह—अलङ्कारप्रस्ताव इति । व्यञ्जनमात्राश्रितमित्यनेन सूत्रस्थस्य पूर्वशब्दस्यार्थमाह—किन्नामेत्यादि । मधुरवचसां मध्ये कटुभाषिणः कश्चिदप्रस्तुतसरूपस्तुत्या प्रतिक्षिपति । अत्र दुरदुरेति द्वौ व्यञ्जनसमुदायौ मिथस्सदृशौ । एवं सायसाय, रुषेरुषे, सितसित, कर्ण्यकर्ण्येत्यत्रेत्यनेकधात्वम् । वृत्त्यनुप्रासेनेत्यादि। केवलव्यञ्जनसादृश्यलक्षणप्रकारविशिष्टेन । एकाभिधानेति ।

End:

रसावदादिभ्य इति । भिन्नत्वेनेति । यद्यपि भावोदयादिनिष्ठतत्तद्भावानां स्वानुभावविभावव्यञ्जितत्वात्प्रेयसः तत्तद्भावाद्यभिव्यञ्जितस्य रसवशेन रसवतो . . कारत्वं सुवचनम् । तथापि कविसंरम्भगोचरानुदयादीन्विशेषानाश्रित्यालङ्कारान्तरत्वेन निर्दिश्यन्त इत्यर्थः । भावोदयभावसन्धिभावशबलताश्चेत्येतावत्येव निर्दिष्टव्ये एते पृथगित्यादिवचनस्य प्रयोजनमाह—एत-

त्प्रतिपादनञ्चेत्यादि । एते पृथगित्यादियोगविभागेनार्थान्तरप्रतिपादनलक्षणं प्रयोजनान्तरमप्यस्तीत्याह—अथ चेत्यादिना । एते सर्वे इति । उक्तलक्षणाः पुनरुक्तवदाभासादयः एतत्पर्यन्ताः केवलत्वेनालङ्का . . ।

R. No. 3005.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 38. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Śrī Rāmatīrtham Library, Sri Ramatirtham.

यदुगिरिभूषणचम्पूः.

YADUGIRIBHŪṢAṆACAMPŪḤ.

Foll. 1—37*a*. Foll. 37*b* and 38 are left blank.

A work in verse and prose describing the sanctity and the greatness of Yādavagiri, now called Mēlukōṭē, in the Mysore territories: by Appalācārya of Śrīśaila family, son of Lakṣmī and Rāghavācārya and pupil of Vīrarāghava.

For similar works see under Nos. 2506—2510 of the D.C.S. MSS., Vol. IV, Part II.

Complete in nine Ratnas.

Beginning:

श्रीमानब्जभवादिमस्तकतटन्यस्तप्रशस्तप्रभा-
वास्तुस्निग्धचिरत्नरत्नमकुटासङ्गोल्लसत्पन्नगः ।
गाम्भीर्यादिगुणौघरत्नगणवाराशिः परः पूरुषः
श्रेयो मे विदधातु भक्तफलदः श्रीवेङ्कटेशो हरिः ॥

* * * *

श्रीभाष्यामृतपूरितं गुरुतरं श्रीवैष्णवैश्चातकैः
नित्यं सेवितमात्मसस्यनिकरानत्यन्ततापोद्गतान् ।
धिन्वन्तं रसवत्तया हृदि भजे दुर्लक्ष . . . .
. . . क्षरगर्जितं जलधरं श्रीराघवस्वामिनम् ॥

* * * *

समञ्चितविप . . . . . सारसारस्वत-
प्रसारसरसोदयाः सकलसम्मतास्सज्जनाः ।

धरन्तु हृदि मत्कृतिं घनघृणारसासारकृत्
घना गुणगणोन्नताः परहितानुरागोज्ज्वलाः ॥

*   *   *   *

यादवाचलमाहात्म्यममृत : . . . . . . ।
चकोरचन्द्रिकान्यायात्क्रियते चम्पुबन्धनम् ॥
धर्मान्वेदविबोधितान् कबलयन्नन्यायमुद्वेलयन्
वाक्सत्यञ्च निमीलयन् रसवरं शान्तं समुन्मूलयन् ।
पृथ्वीं मन्दफलप्रदाञ्च कलयन् दुः . . . . यन्
यत्यग्रेसरसञ्चयं चपलयन्कालः कलेः प्राप्तवान् ॥

अथैकदा मुनयः कपिलकश्यपव्यासवसिष्ठवाल्मीकिवासुदेववैशम्पायन-भार्गवभरद्वाजदक्षविश्वामित्रात्रिगौतमकुम्भसम्भवपुलस्त्य . . . . शौनक-प्रमुखाः सर्ववेदान्तान्तरनिरन्तरदुरन्तसिद्धान्तान्तकस्वसिद्धान्तनितान्तश्रान्त-स्वान्तानिश्चिन्तकृतपरतत्त्वकृतान्ताः सकलजनबहुलजननकृतसुकृतफलमहिम-रचितविहितविविधवेदो . . . . श्रुतय इव ।

End:

इत्युक्त्वा मुनिभिस्साकं देवदेवो जगत्पतिः ।
बभौ यादवशैलाग्रे श्रीमान्नारायणः स्वयम् ॥
ततस्तु नारदः प्राह वेदवेदान्तपारगः ।
यादवाचलमाहात्म्यं श्रुतं दृष्टञ्च खल्विति ॥

*   *   *   *

प्राप्तरूपमधुरं ददात्विदं गद्यपद्यनवरत्नमण्डितम् ।
अप्पलार्यकविनिर्मितं हरिभूषणं यदुगिरीशभूषणम् ।
इति श्रीमद्यदुगिरिभूषणाख्ये चम्पूकाव्ये नवमं रत्नम् ॥
साधुरत्नहृदयङ्गमोज्ज्वलं भानुकूटनिभनायकोज्ज्वलम् ।
माननीयगुणबन्धपोषणं राजते यदुगिरीशभूषणम् ॥

Colophon:

इति श्रीमत्सैन्धवकन्धरदेवलब्धसंस्कृतान्ध्रभाषाचतुर्विधकविताधुरन्धरस्य श्रीवेङ्कटाद्रिनिवासचरणकमलकिङ्करस्य श्रीमद्वीरराघवगुरुचरणनीरजभृङ्गस्य श्रीशैलान्वयदुग्धसिन्धुसिन्धुजस्य श्रीराघवार्यतनूजस्य श्रीलक्ष्मीगर्भशुक्तिका-मणेरप्पलाचार्यस्य कृतिषु यदुगिरिभूषणाख्यं चम्पूकाव्य समाप्तम् ॥

R. No. **3006.**

Paper. $10\frac{7}{8} \times 9\frac{4}{8}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Khaṇḍavilli Narasiṁhācārlugāru, Vizagapatam.

वैखानससकलागमसारसङ्ग्रहः.

VAIKHĀNASASAKALĀGAMASĀRASAṄGRAHAḤ.

Foll. 1*a*—21*b*. Fol. 22 is left blank.

A treatise purporting to contain the essence of all the Vaikhānasāgamas: by a pupil of Śrīkṛṣṇadēśika.

Complete in three Śatakas.

Beginning:

शुकं भागवते व्यासं वेदे तत्त्वे च तद्गुरुम् ।
तत्पितामहमाचारे वन्दे श्रीकृष्णदेशिकम् ॥

यन्माययासीत् जगतः प्रतिष्ठा सत्त्वात्मनित्यात्मनि यो न कल्पा ।
यस्य प्रतिष्ठा ध्रुवकौतुकाद्या तस्मै नमः श्रीरघुनायकाय ॥

कुर्यादङ्कुरपालिकाघटशरावानत्र मात्राङ्गुलो-
द्भूतानि षोडशभानुदिक्श्रुतिमु(यु)तान् प्रत्येकवर्णक्रमात् ।
प्रादेशद्वयपालिकाश्रयविधिस्सायं षडंशः पर
स्त्वेकांशं ज्वलनांशनालमपरं द्व्यंशास्तथा पालिकाः ॥

पादान्तर्विपुलं दशाङ्गुलयुतं सार्धाङ्गुलं भक्तिकं
नालान्तश्चतुरङ्गुलं नलिनवद्भित्तिस्तथैवाङ्गुलम् ।
वक्त्रान्तर्विपुलं च षोडशमितं नालं कृशं तत्क्रमा-
त्कुर्याद्व्यङ्गुलमोष्ठतारमखिलश्चैवंविधाः पालिकाः ॥

* * * *

Colophon:

इति श्रीवैखानसे सकलागमसारसङ्ग्रहे प्रथमशतकं साष्टादशं सम्पूर्णम् ॥

End :

अनयोरपि सङ्करं भवेत् क्षितिभिद्राष्ट्रविनाशकारणम् ।
इह दोषनिवारणाय तां महतीं चा(शा)न्तिमधा(था)भिषिच्यताम् ॥

* * * *

विधिमङ्कुरकर्मपूर्वकं स पुनस्ता(स्था)पनकर्मवद्भवेत् ।
अवलम्ब्य तथैव कौतुकं सकलं कर्म पुनर्विधाय वै ॥

हविरन्तमिदं समापयेदनघं कर्तुमिदं हि शक्यते ।
विधिनापि मरीचिरप्यतो यदुवाचैव तमुच्चरन्मनुः ॥

Colophon :

इति श्रीवैखानसे श्रीत्रिशतकाख्यग्रन्थे तृतीयशतकं सविंशतिकं सम्पूर्णम् ॥

R. No. **3007.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 167. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala post, Malabar district.

युधिष्ठिरविजयव्याख्या—विजयदर्शिका.

YUDHIṢṬHIRAVIJAYAVYĀKHYĀ : VIJAYADARŚIKĀ.

Foll. 1*a*—166*a*. Foll. 166*b* and 167 are left blank.

A commentary on the Yudhiṣṭhiravijaya of Vāsudēva, which work has been described under No. 11634 of the D.C.S. MSS., Vol. XX : by Acyuta. Similar to the work described under R. No. 2761 ante.

Complete in eight Āśvāsas, but wants the beginning.

Beginning :

. . . . . . इत्यर्थः । कर्मणा यमभिप्रैतीत्यादिना सम्प्रदानसंज्ञा । . . . . भयाभिमुख्येन सम्बध्नीयादित्यर्थः । प्रतिभानुरूपां गिरमपि अनुगृह्णीयादित्याह—श्रियमित्यादिना । श्रीयते सेव्यत इति श्रीः सम्पत् ततः वचिप्रच्छि . . . . शोभायां स्यात् ।

सम्पत्तिलं पङ्कयोरिति केशवः । चशब्दः क्रियापदं समुच्चिनोतीति समुच्चयार्थः ।

* * * *

अथ राजवर्णनं प्रकृत उपयोजयन् काव्यनिर्माणस्य . . . . . . काव्यज्ञशिक्षादय इति अभिसन्धाय कविरात्मगुरोः लोकोत्तरतोक्तिमाह— तस्येत्यादि । चस्समुच्चये । तस्य वसुधावनकाल इत्यनेन विदुषां बाहुल्यसत्ता प्रतीयते । वसुधां न केरलविषयमात्रमस्य चक्रवर्तित्वात्, अवत इति शत्रन्तः । अव रक्षण इति धातुः अव प्रीणन इति वा । प्रीणनस्यापि पालनसमीचीनत्वहेतुः । कुलशेखर इति अभिषेककृतं नाम । पित्रादिकृतन्तु रामवर्मेति वसूनि धनानि धाम महोदयाख्यं पुरं चेति द्वन्द्वः पश्चान्मतुप् । भूमातिशयनप्रशंसा मतुपा व्यज्यन्ते ।

* * * *

Colophon:

अच्युतविरचितायां विजयदर्शिकायां प्रथम आश्वासः समाप्तः ॥

End:

सुखेनेत्यादि । सुखेनेति प्रकृत्या तृतीया । नागसाह्वये पुरे हस्तिनपुर इत्यर्थः । भारतो युधिष्ठिरः । पुरा इवेत्युत्तरत्र छेदः । सत्सभारतः सज्जनसभायां रतः । सर्वैरपि रसैरेषास्वादनीया कृतिः कवेः प्रपञ्चयन्ती . . . . सा विरिञ्चस्य विराजत इति शिवम् ॥

Colophon:

इति विजयदर्शिकायामष्टम आश्वासः ॥

The scribe adds.—

ईश्वरेण लिखितमिदं पुस्तकम् ॥

R. No. 3008.

Paper. $10\frac{7}{8} \times 9\frac{1}{8}$ inches. Foll. 102. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Tekkemaṭham, Trichur.

आरण्यवृत्तिसम्बन्धोक्तिः.

ĀRAṆYAVṚTTISAMBANDHŌKTIḤ.

Foll. 1*a*—101*b*. Fol. 102 is left blank.

This is also called Surēśvaravārtikasambandhōkti. This is the further portion of the work described under R. No. 2755 ante.

Begins from the 1091st Vārtika in the 4th Brāhmaṇa of the 3rd Adhyāya and breaks off in the 1364th Vārtika of the same, and begins from 45th Vārtika in the 5th Brāhmaṇa of the 4th Adhyāya and breaks off in the 37th Vārtika of the 7th Brāhmaṇa of the 5th Adhyāya. These Adhyāyas are mentioned according to the Bṛhadāraṇyakōpaniṣad.

Beginning :

. . . . कमित्यत्र तदेव दूषणमत्रापि स्यादित्यर्थः । किञ्चापरिच्छिन्ने ब्रह्मणि संभवति परिच्छिन्नग्रहणमयुक्तमित्याह—कल्पना नापि गौण्यत्र मुख्येऽर्थे सति युज्यते । इति । अत्र दृष्टान्तमाह

न ह्यालभन्ते वाहीकं मुख्ये सति गवि क्वचित् । इति । ननु मुख्यं ब्रह्मापरिच्छिन्नं नास्त्येवेति चेत्तत्राह—

मुख्यं ब्रह्म न चेदस्ति गौणं स्यात्तद्विना कुतः ।
मुख्यमग्निं विना गौणं न लोकोऽप्यवगच्छति ॥ इति ॥

किञ्चाकृत्स्नत्वे ब्रह्मणस्तज्ज्ञानात्पुरुषार्थो न सिध्यतीत्याह—

अकृत्स्नज्ञानतो नापि पुरुषार्थोऽवगम्यते ।
ब्रह्मज्ञानसमुत्थत्वान्मिथ्याज्ञानत्वकारणात् ॥ इति ॥

* * * *

सर्वमज्ञातमेव स्याद्यस्मिन्नज्ञात आत्मनि ।
ज्ञाते ज्ञातञ्च तत्कात्स्न्र्यात्तावत्त्वात्सर्ववस्तुनः ॥ इति ॥

सदा अद्वयं ब्रह्म ब्रह्ममात्रत्वात्सर्वस्येत्यर्थः । तावत्त्वं साधयति—

युक्त्या निरूप्यमाणस्य ह्यात्मा तत्त्वमनात्मनः ।
प्रत्याख्यातः स चेत्तेन कानात्मा सिध्यतां ततः ॥ इति ॥

नन्वात्मानात्मस्वरूपत्वेनाद्वैतं चेदसङ्गश्रुतिकोपस्तत्राह—

अनात्मतत्त्वमन्वेति ह्यात्माऽसङ्गो गुणोऽद्वयः । इति ॥

नन्वसङ्गश्चेदात्मा कथं तद्बलादनात्मसिद्धिरिति तत्राह—

असिध्यतस्स स्वतः सिद्धोऽसिद्धि . . . ।

* * * *

Colophon :

इति श्रीमत्प्रत्यग्बोधपूज्यपादशिष्येण भगवताख्येन! विरचितायां सुरेश्वरवार्तिकसम्बन्धोक्तौ चतुर्थोऽध्यायः समाप्तः ॥

वृत्तमनूद्य सम्बन्धं कथयति—

समाप्तो मधुकाण्डार्थो याज्ञवल्कीयकाण्डगः ।
अतः परं प्रयत्नेन श्रुत्या व्याख्यायते स्फुटः ॥ इति ॥

मुनिकाण्डार्थः क इति विचार इत्यभिप्रेत्याह—

याज्ञवल्कीयमेतस्मान्मधुकाण्डादनन्तरम् ।
काण्डं विचारभूयिष्ठमधुनारभ्यते परम् ॥ इति ॥

End :

न कार्यं कारणं वास्य किञ्चिदात्मीयमिष्यते ।
अन्तर्यामी परः साक्षादशरीरो निर्गुणोऽद्वयः ।
विलक्षणोऽतो विज्ञेयः पृथिवीदेवतात्मनः ।
स्वकार्यभूतान्तामेव पृथिवीं मोहवर्त्मना ।
तत्र लब्धविशेषस्सन् तामेवायं नियच्छति ॥
अदाहकोऽपि वह्निः सन्दाह्यद्रव्यसमाश्रयात् ।
तत्र लब्धात्मकस्तस्य दग्ध्वा दाह्य न . स्वतः ।
यथा ज्ञातैवमेवात्मा देवताद्यात्मकार्यगः ।
देवतादिशरीराद्यैर्देवतादीन्नियच्छति ।
स्वतः स्वकरणो देहो निर्गुणोऽभेद एव च ।
चिदाभासः स्वमोहोत्थकार्यैस्तद्वानिवेक्ष्यते । इति ॥

R. No. **3009.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 48. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Rādhākānta Maṭhamu, Parlakimedi.

मुक्ताचरितम्.

MUKTĀCARITAM.

A tale of Śrī-Kṛṣṇa and Gōpīs regarding the pearl plant: by Raghunāthadāsa who refers to Rūpagōsvāmin, son of Śacī, as a Guru.

The story in the work as follows :—

One day, in the course of conversation, Śrī-Kṛṣṇa told Satyabhāmā that pearls could be grown as a crop. But this information only

excited the laughter of the Gōpīs. Śrī-Kṛṣṇa demonstrated His statement by sowing a pearl and watering it with milk and curds. When, by the power of Śrī-Kṛṣṇa, a plant began to grow, the Gōpīs naturally thought it could not be the pearl plant. In due course it bore clusters of pearls to the dismay of the avaricious Gōpīs. They then sowed all the pearls in their possession, but no plant sprang up. In disappointment they went to Śrī-Kṛṣṇa to demand their pearls from Him. Having tested the affection of the Gōpīs towards Him in different ways, Śrī-Kṛṣṇa gave new pearls to them in lieu of the pearls lost by them.

Complete.

Beginning:

कन्दर्पकोटिरम्याय स्फुरदिन्दीवरत्विषे ।
जगन्मोहनलीलाय नमो गोपेन्द्रसूनवे ॥

क्रयविक्रयखेलाब्धौ मुक्तानां मज्जितात्मनः(नोः) ।
मिथो जयार्थिनोर्वन्दे राधामाधवयोर्युगम् ॥
निजामुज्ज्वलितां भक्तिसुधामर्पयितुं क्षितौ ॥
उदितं तं शचीगर्भव्योम्नि पूर्णं विधुं भजे ॥
नामश्रेष्ठं मनुमपि शचीपुत्रमत्रस्वरूपं
रूपं तस्याग्रजमुरुपुरीं माधुरीं गोष्ठवाटीम् ।
राधाकुण्डं गिरिद(व)रमहं राधिकामाधवाशां
प्राप्तो यस्य प्रथितकृपया श्रीगुरुं तन्नतोऽस्मि ॥
हरिचरितामृतलहरीं बृन्दाविपिनाम्बुराशिसम्भूताम् ।
रसवद्वृन्दारकगणपरमानन्दाय सन्तनुमः ॥

एकदा किञ्चिन्मात्रश्रुतपूर्ववृत्तान्तया सत्यभामया कृष्णः साकूतं पृष्टः।

लतास्ता मधुराः कस्मिन् जायन्ते धन्वनीवृति ।
नाथ मत्कङ्कणन्यस्तं यासां मुक्ताफलं फलम् ॥

ततस्तद्वृत्तान्तस्मरणात्कृष्णः स्वा(सा)न्तर्ग्लानिर्बहिर्विहस्याह—

गतस्स कालो यत्रासीन्मुक्तानां जन्मवल्लिषु ।
वर्तन्ते साम्प्रतं तासां हेतवः शुक्तिसम्पुटाः ॥

एतदपूर्वं श्रुत्वा सविशेषश्रवणोत्कण्ठितया बाढमाम्रेडितः कृष्णः पुनराह । एकदा कार्त्तिके मासि गोकुले गोवर्धनगिरौ दीपमालिकामहोत्सव आसीत् । ततः सर्वो जनः विचित्रनैपथ्यसामग्रीणां संस्काराय साधनाय च परमासक्तो बभूव ।

* * * *

अधुना तद्विचारे को लाभः । साम्प्रतमन्यद्दुःखं न गण्यते । गुर्वादितो भयमेव नः खेदयति तद्भयन्तु तेभ्यो मौक्तिकेषु दर्शितेष्वेव शिथिलीभवेत् । तादृशानि सर्वथैव दुर्लभानि किन्तु कृष्णादेव मूल्येन यथा गृहीतानि स्युः तथोपायश्चिन्त्यताम् । तत्र सर्वाभिर्विभाव्योक्तम् । चन्द्रमुखी चतुरा भवति । सुवर्णानि गृहीत्वा मूल्येन मौक्तिकान्यानयतु ततस्तयोक्तम्—सम्प्रत्यस्माभिरुपालब्धस्य तस्य समीपमेकाकिनी गन्तुमशक्तास्मि । काञ्चनलता मम सङ्गे गच्छतु । इति सर्वासामनुमत्या बहुसुवर्णानि गृहीत्वा मौक्तिकवाटीसमीपं ते आजग्मतुः । तत्र तद्वाटिकाधिकारिणं सुबलं मया सह निविष्टमब्रूताम् । हे सुबल श्रुतमस्माभिः भवद्भिर्नव्यमौक्तिकानि विक्रीयन्ते । तदिमानि शुद्धसुवर्णानि गृहीत्वा समुचितमूल्येन प्रवीणप्रवीणमुक्ताफलानि दीयन्ताम् ।

End :

समञ्जसा—

सखि तथैव सर्वथा भवतु भवत्याः । इति ।

आददानस्तृणं दन्तैरिदं याचे पुनः पुनः ।
श्रीमद्रूपपदाम्भोजधूलिः स्यां जन्मजन्मनि ॥

यस्याज्ञासुधया प्रबोधितधिया मुक्ताचरित्रैर्मया
गुच्छं पुष्पभरैर्व्यधायि य इह श्रीरूपसंशिक्षया ।
जीवाख्यस्य मदेकजीविततनोस्तस्यैकदृक्षट्पदी-
घ्राणैस्तं परिभूषितं वितनुतां तत्केलिसाधूत्करी ॥

मुक्ताचरितपुष्पौघैः गुच्छं गुम्फितमद्भुतम् ।
वतसयतु सस्नेहं श्रीमद्रूपगणो रहः ॥

यस्य सङ्गबलतोऽद्भुता मया मौक्तिकोत्तमकथा प्रचारिता ।
तस्य कृष्णकविभूपतेर्व्रजे सङ्गतिर्भवतु मे भवे भवे ॥

Colophon :

इति श्रीरघुनाथदासगोस्वामिना विरचितं मुक्ताचरितं सम्पूर्णम् ॥

R. No. **3010**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 40. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Malabar district.

मुकुन्दमालाव्याख्या—तात्पर्यदीपिका.

MUKUNDAMĀLĀVYĀKHYĀ: TĀTPARYADĪPIKĀ.

Foll. 1a—40a. Fol. 40b is left blank.

A commentary on the Mukundamālā of Kulaśēkhara, which work has been described under No. 10201 of the D.C.S. MSS., Vol. XVIII: by Ānandarāghava, pupil of Kṛṣṇānanda.

Complete.

Beginning:

इह खल्वखिललोकवारस्य कमलावल्लभस्येव भूमण्डलसंरक्षणसमग्रशक्तिमत्तयाम्भोरुहसम्भवस्येव भारतीविलासविभवभूमितया कात्यायनीकान्तस्येव कंसमथनचरणकमलपाथोधरमूर्धतया कश्चनावतारः केरलचक्रवालचक्रवर्ती ।

* * * *

भक्तिरेव मुक्तिसाधिकेति सैवाभ्यर्थनीया मुमुक्षुभिरित्यतस्तदुपायत्वेन श्रीनारदानुगृहीतमौकुन्दाष्टादशाक्षरं मन्त्रं मुकुन्दचरणशब्दात्प्रत्यभिज्ञानमत्र प्रमाणयन् मुकुन्दमालाख्यं स्तोत्ररत्नमकरोत् ॥

तस्यास्य स्तोत्ररत्नस्य व्याख्यां शक्त्यनुरोधतः ।
करिष्याम्यात्मशुद्ध्यर्थं नाम्ना तात्पर्यदीपिकाम् ॥

* * * *

हे मुकुन्दाहं भवन्तं मुमुक्षुजनेप्सिततमं सर्वभूतात्मानं सर्वेश्वरञ्च मूर्ध्ना साष्टाङ्गपातं प्रणिपत्य श्रद्धाभक्तिपुरस्सरं नत्वा एकान्तनियतं प्रयोजनानन्तरनिमित्तं न भवति । इयन्तमेतावन्मात्रन्न पुनः स्वर्गापवर्गादि । यद्वा इयन्तं परिमितन्नापरिमितरूपन्निर्वाणमुदकबिन्दुमात्रमिवाम्भोधिं मीनपोतकः । अर्थं प्रयोजनं पुरुषार्थं वा धर्मादीनां बहुदुःखसाध्यसाधनायत(च)त्वादनित्यत्वादनात्मत्वाच्च सुखात्मकानां न पुरुषार्थत्वम् ।

End:

अम्बुजाक्षचरणाम्बुजषट्पदेनेति—अम्बुजाक्षस्य चरणावेवाम्बुजे तयोः षट्पदवन्नित्याभिनिविष्टेन सानन्दं क्रीडतेति वार्थः ॥

यस्य प्रियौ श्रुतिपरौ रविलोकवीरौ
मित्रे द्विजन्मप(व)रपारशवावभूताम् ।
तेनाम्बुजाक्षचरणाम्बुजषट्पदेन
राज्ञा कृता कृतिरियं कुलशेखरेण ॥

सच्चित्सुखैकरसमन्वहमात्मतत्त्वं
साक्षात्समुन्मिषति यस्य हृदीह दैवात् ।
आनन्दशेखरितला(रा)घवनामधेयः
सोऽयं मुनिर्विमृशति स्म मुकुन्दमालाम् ॥
कृष्णानन्दगुरोरेषा पूर्णा कारुण्यसर्पिषा ।
रचिता हरितोषाय जीयात्तात्पर्यदीपिका ॥
कलायकुसुमच्छविः कलितकेकिपिञ्छः कचे
करे मुरलिकां वहन्पदसरोजयोर्नूपुरम् ।
नितम्बभुवि चाम्बरं कनकक्रान्तिकान्तोप(ऽव)ता-
न्नितान्तमुदधीशितुस्तनुभुवो भव(।)न्नोऽनिशम् ॥

The scribe adds—

श्रीकृष्णपुरि श्रीचरणानां प्रीतये लिखितमिदं श्रीकण्ठेन मुकुन्दमालाव्याख्यानम् ॥

R. No. **3011.**

Paper. $10\frac{7}{8} \times 9\frac{4}{8}$ inches. **Foll.** 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala, Malabar district.

रामकथा.

RĀMAKATHĀ.

Foll. 1*a*—21*b*. Fol. 22 is left blank.

A narration of the story of the Rāmāyaṇa in prose: by Vāsudēva, son of Umā and Nārāyaṇa. It is stated that the author composed the work under the orders of the King Ādityavarman.

Complete.

Beginning:

गजवदनमस्तु महते विधिवदनविहारि दैवतश्च परम् ।
श्वश्रेयसाय भवतां गुरवः प्राचेतसादयश्च सदा ॥
सतां परित्राणपरस्सुमेधा जितारिषड्वर्गतया महीयान् ।
विभ्राजते विश्रुतविक्रमश्रीरादित्यवर्मा नरलोकवीरः ॥

चिराय रक्षोपचयेन कुर्वन् गुर्वीं मुदं यस्सुमनोजनानाम् ।
महीजयोदञ्चितपुण्यकीर्तिरामोदते राम इव प्रकामम् ॥
तस्याज्ञया सर्वजनीनवृत्तेरविस्तरा रामकथा पवित्रा ।
निगद्यते गद्यमयी मयेयं सन्तोऽनुगृह्णन्तु नितान्तमस्याम् ॥

अस्ति किल जगत्त्रयपरित्राणलीलाविचक्षणानामक्षतभुजद्रविणभूषणानामुज्ज्वलयशःप्रवरचन्द्रिकानिष्यन्दनित्यविकस्वरसुजनमनःकैरवाकराणाममेयमहिमाद्भुतानामहिमांशुवंशोद्भवानामवनीश्वराणां शाश्वतं निवासस्थानम् ॥

* * * *

अवनिवनितातिलकायमानं पुरोत्तरमयोध्या नाम ॥

End :

इति विहितविबुधकार्यो विश्वास(नु)जिघृक्षया गृहीतमानुषवेषो भगवानरविन्दनाभस्सदारावरजस्सकलमित्रपरिवृतो निसर्गनिस्तुषनिजचरितवितीर्णनिखिलभुवनानन्दश्चिराय परमेण सुखेन सुतरां विरराज ॥

Colophon :

यं वासुदेवमनुरूपमवाप पुत्रं
नारायणो विमलबुद्धिरुमा तथाम्बा ।
प्राणायितेन मनुवंशपतेः कथेय-
मादित्यवर्मनृपतेः कृतिनो निदेशात् ॥

निशाचरतमोलीनजगदुन्मेषहेतवे ।

R. No. **3012.**

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 28. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala, Malabar district.

भगवदज्जुकाव्याख्या.

BHAGAVADAJJUKĀVYĀKHYĀ.

A commentary on the Bhagavadajjukā of Bōdhāyana, which work has been described under Nos. 12571—12573 of the D.C.S. MSS., Vol. XXI.

Complete.

Beginning :

बौधायनकविरचिते विख्याते भगवदज्जुकाभिहिते ।
अभिनेयेऽतिगभीरे विशदानधुना करोमि ग्रन्था(गूढा)र्थान् ॥

तत्र तावदष्टपदीरूपां सुरवरमकुटशब्दाभिव्यञ्जितचन्द्राभिधयामाशीर्वचनात्मिकां नान्दीं करोति—स्वामित्यादिना । रुद्रस्य पादः त्वां पातु इति सम्बन्धः । रुद्रस्य परमेश्वरस्य पादः अभिमतफलसम्पादनप्रवीणोपपन्नः त्वामर्थात्सभापतिं जातावेकवचनं वा सामाजिकानित्यर्थः ।

* * * *

रावयति दुःखयति जन्तूनिति रावणः संसारः तस्मिन् विषयेऽङ्गुष्ठनमनं नाम तन्निरसनं संसरणदुःखेन । रोदनाद्रुद्रः शाण्डिल्यः वर्तमानक्ष-(क्त)प्रत्ययेन योगात् कर्तरि षष्ठी । अर्चितः पूजितः ।

* * * *

अथेति । नाटकप्रकरणोद्भवासु नाटकानां प्रकरणाल्लक्षणग्रहाद्भरतशास्त्रादुद्भवो यासान्तासु । दशजातिषु दशसु जातिषु विषये सप्तमी । नाट्यरसेष्विति निर्धारणे । अनेन वैशेषिकादिभिश्शास्त्रकारैर्दृष्टेषु मोक्षोपायेषु मायावादिदृष्टस्य प्राधान्यात्तत्स्वीकरणं सूच्यते । अहं हास्यो विप्रहसनं न जाने । अनेन मायावादिमतस्वीकरणेऽपि ब्रह्मस्वरूपपरिज्ञानाभावेन तद्ग्रहणाभिलाषस्सूच्यते ।

End :

यस्येति—अस्तङ्गतस्येत्यर्थः । प्रभाभिः पातालतलादुद्गच्छद्भिः । अनुरञ्जितेति । क्रमेण रज्यमानं मेघबृन्दं यस्मिन् तत् । आलक्ष्यते दृश्यते । मेघबृन्दस्यैवं रक्तत्वं दीनकमण्डलस्याधस्ताद्गमनमन्तरेण नोपपद्यते । अतः शीघ्रमेवेतो गत्वाऽस्माभिरिदानीं सन्ध्यावन्दनादिकं कर्तव्यमिति भावः ।

इति प्रहसनाभिख्ये पूर्वनाट्यनिबन्धने ।
हास्यगृहीततत्त्वार्थे टीकादि . त्रदर्शिनी ॥
बुधजनमानसेन कियतीमपि मे विवृति-
र्मुदमतिरिक्तमोहरभसोपचिता कुरुते ।
तदपि कुशाशयावशकुशीलवमात्रहिता
यदि तु भविष्यतीयमियता सफलैव कृतिः ॥
यश्चासौ भवभूतिसूक्तिजलधेरर्थौघयादोगणः
प्रक्षोभोत्थितभीतिभञ्जनकरीं व्याख्यातरीं निर्ममे ।

तेनेयं विषमेति वृत्तगहने बौधायनीये पुनः
नाख्ये गर्भितशास्त्रजृम्भितवचोगम्भीरगुम्भे कृता ॥

R. No. 3013.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 174. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Śrīmān Bṛndāvanacandra Pāṇigrābī, Parlakimedi.

Bound in two volumes.

चैतन्यचरितामृतम्, सटीकम्.

CAITANYACARITĀMṚTAM WITH COMMENTARY.

Fol. 53*b* gives the contents of this work. Foll. 54, 173 and 174 are left blank. Fol. 174*b* gives the colophon in the text.

A treatise explaining the doctrines of the followers of the Caitanya school incidentally describing some of the leading incidents in the life of Lord Kṛṣṇa : by Nityānandādhikārin who commented upon the above work under the orders of Rājagurupuruṣōttamadēva. In the beginning the commentator salutes Ārya, one of the foremost preceptors of the Caitanya school. Illustrations are quoted from various Purāṇas and other works.

Deals with the following subjects :—

1—17 Paricchēdas in the Ādyakhaṇḍa.

१. मङ्गलाचरणम्.
२. चैतन्यतत्त्वनिरूपणम्.
३. कृष्णचैतन्यनिर्णयः.
४. चैतन्यतत्त्वकथनम्.
५. नित्यानन्दविनिर्णयः.
६. अद्वैततत्त्वनिर्णयः.
७. प्रेमदातृतावर्णनम्.
८. भक्तमहिमवर्णनम्.
९. भक्तकारुण्यकथनम्.
१०. भक्तशाखानिरूपणम्.
११. अवधूतगणनिर्णयः.
१२. अद्वैतगणनिर्णयः.
१३. गौराब्धिभावनिर्णयः.
१४. बाल्यलीलावर्णनम्.
१५. पौगण्डवर्णनम्.
१६. कैशोरवर्णनम्.
१७. यौवनवर्णनम्.

1—26 Paricchēdas in the Madhyakhaṇḍa.

१. राधाकृष्णमीलनम्.
२. लीलासूत्रानुवर्णनम्.
३. सन्न्यासकरणम्.
४. माधवेन्द्रचरितम्.

५. साक्षिगोपालचरितम्.
६. सार्वभौमानुग्रहणम्.
७. वासुदेवसमुद्धारः.
८. रामानन्दसङ्गमः.
९. दक्षिणदेशभ्रमणम्.
१०. वैष्णवसङ्गमः.
११. नामकीर्तनम्.
१२. गुण्डिचागेहमार्जनम्.
१३. रथाग्रनर्तनम्.
१४. लक्ष्मीविजयोत्सवः.
१५. सार्वभौमग्रहभोजनम्.
१६. गौडगमनागमनम्.
१७. बृन्दावनगमनम्
१८. बृन्दावनदर्शनम्.
१९. श्रीरूपशिक्षणम्.
२०. भगवत्स्वरूपभेदविचारः.
२१. माधुर्यैश्वर्यवर्णनम्.
२२. अभिधेयभक्तितत्त्वविचारः.
२३. प्रयोजनप्रेमविचारः.
२४. सनातनानुग्रहः.
२५. मध्यलीलानुवादकरणम्.
२६. शिक्षाश्लोकार्थास्वादनम्.

1—20 Paricchēdas in the Antyakhaṇḍa.

१. श्रीरूपसङ्गमः.
२. हरिदासदण्डशिक्षा.
३. हरिदासमाहिमवर्णनम्.
४. सनातनमिलनम्.
५. प्रद्युम्नविजयः.
६. रघुनाथदासमिलनम्.
७. वल्लवभट्टमिलनम्.
८. भिक्षासङ्कोचनम्.
९. गोपीनाथभट्टनायकोद्धरणम्.
१०. भक्तदत्तास्वादनम्.
११. हरिदासनिर्याणम्.
१२. जगदानन्दतैलभञ्जनम्.
१३. जगदानन्दबृन्दावनगमनम्.
१४. उन्मादवर्णनम्.
१५. उद्यानविहारः.
१६. विरहोन्मादप्रलापः.
१७. उन्मादप्रलापः.
१८. समुद्रपतनम्.
१९. विरहप्रलापमुखसंहर्षणादिवर्णनम्.
२०. शिक्षाश्लोकार्थास्वादनम्.

Complete.

Beginning :

मन्दारमात्माङ्घ्रिसरोजभाजां मन्दारसौन्दर्यविनिन्दकोष्ठम् ।
बृन्दारकैर्वन्द्यपदारविन्दं बृन्दावनेशं सततं प्रपद्ये ॥
निजप्रभानिर्जितपुष्पकेतुं पाषण्डविध्वंसनधूमकेतुम् ।
वन्दे स्वभक्तप्रपदाम्बुसेतुं चैतन्यचन्द्रं भवमोक्षहेतुम् ।
* * * *
अद्वैताचार्यमाचार्यचर्यमार्यं महाद्युतिम् ।
गौराङ्गप्रणयोन्मत्तमाश्रये भुवनाश्रयम् ॥

पुरुषोत्तमदेवाख्यवसुधाधिपतेर्गुरोः ।
आज्ञया संमता नाम्ना गौरभक्तविनोदिनी ॥
सेयं चैतन्यचरितामृतटीका मया मुदा ।
विचार्य क्रियते नित्यं नित्यानन्दाधिकारिणा ॥
वन्दे गुरूनीशभक्तानीशमीशावतारकान् ।
तत्प्रकाशांश्च तच्छक्तीः कृष्णचैतन्यसंज्ञकम् ॥

ग्रन्थारम्भे स्वाभीष्टनामगुणलीलात्मकमङ्गलमङ्गीकुर्वन् तस्य चाशीर्वादनमस्कारवस्तुनिर्देशात्मकत्वेऽपि प्रथमतः सामान्येनैवेष्टदेवं ग्रन्थकारो नमस्करोति—वन्द इति । वन्द इत्याद्ये क्रियापदं परमादरत्वसूचनार्थम् । अत एव महाभाष्ये प्रोक्तं क्रियाद्यक्रियामध्यक्रियान्तेषु परमादरादि सूचितम् । गुरूनिति शिष्यदीक्षाभेदेन बहुवचनं न तु मान्यार्थम् । ईशस्य श्रीकृष्णचैतन्यस्य भक्तान् श्रीवासादीन् । ईशं स्वाभीष्टश्रीकृष्णचैतन्यम् । ईशस्य श्रीकृष्णचैतन्यस्य । अवतारकान् श्री-अद्वैतान इति मान्यार्थे बहुवचनम् । तस्य श्रीचैतन्यस्य प्रकाशान् श्रीनित्यानन्दादीनिति पूर्ववत् । तस्य शक्तीः श्रीगदाधरपण्डितादीनिति भक्तत्वे सिद्धेऽपि अन्तरङ्गशक्तित्वनिरूपणार्थं पृथङ्निर्देशः कृतः ।

*　　　*　　　*　　　*

प्रियः सोऽयं कृष्णस्सहचरि कुरुक्षेत्रमिलितः
तथाहं सा राधा तदिदमुभयोः सङ्गमसुखम् ।
तथाप्यन्तः खेलन्मधुरमुरलीपञ्चमजुषे
मनो मे कालिन्दीपुलिनविपिनाय स्पृहयति ॥

श्रीमच्चैतन्यदेवस्यान्तःकरणं तद्भावाविष्टं दृष्ट्वा तदन्तःकरणवेत्ता श्रीरूपगोस्वामी कुरुक्षेत्रमिलभाववत्तद्भावं वितर्क्य तज्जातीयतया नवमेकं पद्यमाह—प्रिय इति । हे सहचरि ललिते सोऽयं प्रियः श्रीकृष्णः कुरुक्षेत्रे मिलितः सङ्गत इत्यर्थः ।

End :

तथाहि—

नयनं गलदश्रुधारया वदनं गद्गदधारया गिरा ।
पुलकैर्निचितं वपुः कदा तव नामग्रहणे भविष्यति ॥

तथाहि—

युगायितं निमेषेण चक्षुषा प्रावृषायितम् ।
शून्यायितं जगत्सर्वं गोविन्दविरहेण मे ॥

तथाहि—

आश्लिष्य वा पादरतां पिनष्टु मामदर्शयन्नर्महतां करोतु वा ।
यथा तथा वा विदधातु लम्पटो मत्प्राणनाथस्तु सएव नापरः ॥

Colophon:

इति श्रीचैतन्यचरितामृते अन्त्यखण्डे शिक्षाश्लोकार्थास्वादनो(नं) नाम विंशति(:)परिच्छेदः ॥

समाप्तोऽयमन्त्यखण्डः ॥

रचि(चरि)तममृतमेतच्छ्रीलचैतन्यविष्णोः
शुभदमशुभबृन्दस्यातनोच्छान्तयेद्यः(यः) ।
तदमलपदपद्मे भृङ्गतामेत्य सोऽयं
रसयति रसमुच्चैः प्रेममाध्वीरसज्ञः ॥
श्रीमन्मदनगोपालगोविन्ददेवतुष्टये ।
चैतन्यार्पितमस्त्वेतच्चैतन्यचरितामृतम् ॥
मत्प्राणसर्वस्वपदाब्जरेणोर्मदीश्वरश्रीयुतराधिकायाः ।
प्राणोरुसर्वस्वपदाब्जरेणुं तच्छ्रीलगोविन्दमहं प्रपद्ये ॥

R. No. **3014.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 106. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Śrī Mahant Bharatadās, Sadārāma Mutt, Parlakimedi.

हस्तामलकपञ्चाध्यायी, भक्तिदीपिकाव्याख्यासहिता.

HASTĀMALAKAPAÑCĀDHYĀYĪ WITH THE COMMENTARY BHAKTIDĪPIKĀ.

The text is a eulogy in five Adhyāyas addressed to God Viṣṇu by Prahlāda and is taken from the Prahlādasaṁhitā. The commentary is by Bhaṭṭakṛṣṇadāsa.

Complete in five Adhyāyas. The names of these Adhyāyas are given below :—

१. स्मरणभक्तिनिर्णयः.
२. भगवत्प्राप्त्युपायः.
३. भक्तिरहस्यप्रदर्शनम्.
४. भक्तिसापेक्षकर्मज्ञानवैराग्ययोगः.
५. भगवत्प्रार्थनाध्यायः.

Beginning:

युधिष्ठिर उवाच—

मुने येन प्रकारेण हरिणा रूपमद्भुतम् ।
धृतं नृमृगेन्द्राकारं तत्समाख्यातुमर्हसि ॥
श्रीप्रह्लादसंहितायां श्रीप्रह्लादस्तोत्ररूपा पञ्चाध्यायी ।

तस्या विवरणार्थं भट्टकृष्णदासो मङ्गलाचरणं करोति—

ध्रुवस्यापि मनो जातं स्तवनार्थं हरिं यदा ।
तदैव हरिणा स्पृष्टः कपोले ब्रह्मकम्बुना ॥
तस्मै कृष्णाय गुरवे नत्वा तु प्रारभे ह्यहम् ।
स्तोत्रं विवरणं कर्तुं वैष्णवानाञ्च प्रीतये ॥
प्रह्लादस्तोत्ररूपा या पञ्चाध्यायी निरूपिता ।
तस्यां दृष्टान्तदार्ष्टान्तैर्भगवद्भक्तिनिर्णयम ॥
तत्र तु प्रथमेऽध्याये स्मृतिभक्तेस्तु वर्णनम् ।
प्रह्लादेनापि क्रियते दृष्टान्तादिप्रभेदतः ॥

इदानीं ग्रन्थप्रारम्भे प्रह्लादसंहितास्थप्रकरणे पूर्वानुसारेण युधिष्ठिरः पृच्छति—मुने इति । हे मुने श्रीनारद हरिणा भक्तानां सन्तापहरिणा श्रीकृष्णेन येन प्रकारेण अद्भुतं रूपं धृतमाविष्कृतं तत्त्वमेव सम्यक्प्रकारेण वक्तुं योग्योऽसि । अयं भावः—भागवता एव हरेश्चरित्रं प्रेमपूर्वकमभिप्रायतो वक्तुं योग्या नान्ये । अतस्तेषु श्रेष्ठत्वात् त्वमेव वक्तुमर्हसीति । अद्भुतत्वे हेतुमाह—नृमृगेन्द्रेति । कीदृशं रूपं नृमृगेन्द्राकारं नरसिंहाकारं नरस्तु दृश्यते सिंहस्तु श्रूयते तयोर्मिश्रीभावस्तु (न) श्रुतो नापि दृष्टश्च । अत एवाद्भुतत्वमित्यर्थः । नृमृगेन्द्राकारम् । अस्मिन् पादे छन्दोभङ्गः आर्षत्वान्न दोषः पाठान्तरन्तु सुगमम ।

साधु पृष्टं त्वया राजन् हरेरद्भुतविक्रमम् ।
शृणु येन यथा भक्तः प्रह्लादो ह्यवितोऽसुरात् ॥
*　　*　　*　　*

प्रह्लादसंहितायां या प्रह्लादेन कृता स्तुतिः ।
हस्तामलकमाख्यातं कथयिष्ये विशांपते ॥

शृण्विति यदुक्तं तन्नामनिर्वचनेनाह—प्रह्लादसंहितायामिति ।

* * * *

Colophon:

इति श्रीप्रह्लादसंहितायां प्रह्लादकृतहस्तामलकपञ्चाध्यायीस्तोत्रे श्रीनारद युधिष्ठिरसंवादे स्मरणभक्तिनिर्णयो नाम प्रथमोऽध्यायः ॥

* * * *

इति श्रीहस्तामलकपञ्चाध्याय्यां कृष्णदासभट्टकृतटीकायां भक्तिदीपिकायां प्रथमोऽध्यायः ॥

End:

अन्ते च याति कृष्णो हि हृदि वाग्दृष्टिगोचरे ।
गरुडारूढभक्तो हि वैकुण्ठं प्रति गच्छति ॥

* * * *

पश्चाच्च भगवतैव सह गरुडारूढभक्तो भूत्वा हीति निश्चयेन संशयाद्यभावेन वैकुण्ठं विकुण्ठस्य हरेर्लोकं प्रति गच्छत्येव । हरिदासानामेव इह लोके परलोके च परमसुखं नान्येषामभक्तानामिति भावः ।

Colophon:

इति श्रीप्रह्लादसंहितायां प्रह्लादकृतब्रह्मविद्यातत्त्वे अध्यात्मस्वरूपे सकलशास्त्रसारे हस्तामलकपञ्चाध्यायीमन्त्रे पञ्चमोऽध्यायः ॥

The scribe adds—

बहुना किञ्च वक्तव्यमेतावान्सारसङ्ग्रहः ।
सन्ततं हरिभक्तिश्च कर्तव्या सर्वप्राणिभिः ॥
नमो नलिननेत्राय वेणुनादविनोदिने ।
राधाधरसुधापानशालिने वनमालिने ॥
काश्यां वै कृष्णभट्टेन विवृतं स्तोत्रमद्भुतम् ।
बिन्दुमाधवसान्निध्ये राघवेण प्रकाशितम् ॥
श्रीभागवतसद्भक्ता श्रीधरस्वामिसद्गुरुः ।
तत्प्रसादान्मयालेखि नात्र कार्या विचारणा ॥

* * * *

Colophon :

इति श्रीभक्तिहस्तामलके श्रीभक्तिदीपिकायां टीकायां पञ्चाध्यायी समाप्ता ॥

* * *

The scribe adds—

नन्दपुत्रस्य कारुण्याल्लिखितं ग्रन्थमुत्तमम् ।
हस्तामलकमाख्यानं व्रजदासेन चाधुना ॥

R. No. 3015.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 234. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Gaṅgādhara Khadaṅgagāru, Parlakimedi.

Bound in two volumes.

आगमसङ्क्षिप्तसारः.

ĀGAMASAṄKṢIPTASĀRAḤ.

A work purporting to contain briefly the essence of the Āgamas relating to Śāktism and to the worship of the goddess Śakti : by Dvijānanda, who states in the beginning that he has consulted all the Tantric works before writing this treatise.

Contains the following 22 Paṭalas :—

१. विद्यामाहात्म्यकथनम्.
२. दीक्षाक्रमप्रातःकृत्यादिकम्.
३. स्नानादिविधिः.
४. पूजाविधिः.
५. अन्तर्यजनम्.
६. द्रव्यशोधनम्.
७. मांसादिशोधनम्.
८. आवरणपूजादिकथनम्.
९. उपचारदानादिकथनम्.
१०. होमविधिः.
११. बलिदानकथनम्.
१२. शक्तिपूजादिकथनम्.
१३. द्रव्यस्वीकारविधिः.
१४. कालिकास्तोत्रादिकथनम्.
१५. पुरश्चरणकथनम्.
१६. महाशक्तिपूजाकथनम्.
१७. साधनादिकथनम्.
१८. कुलाचारनिर्णयादि.
१९. सामान्यसाधनप्रकारः.
२०. साधनप्रकारः.
२१. फलपाकप्रकारादिकथनम्
२२. प्रतिष्ठाविधानम्.

Beginning :

नमामि कालीं कलिकल्मषापहां प्रेतासनीं चण्डनृमुण्डमालिनीम् ।
विशालदंष्ट्रानिवहैर्भयानका सदा मुदा नोऽवतु दक्षिणा परा ॥

नत्वा विश्वेश्वरीं देवीं कृत्वा च गुरुवन्दनम् ।
साधकानां सुबोधाय कृतं संक्षिप्तसङ्ग्रहम् ॥
तन्त्राणां सारमालोच्य संक्षिप्तसारसङ्ग्रहम् ।
कृतं तत्सर्वबोधाय न कृतं मम प्रौढये ॥
द्विजानन्दकृतं ग्रन्थं गृह्यतां भो जनास्सदा ।
ममापराधः क्षन्तव्यः क्रियते सर्वसम्मतम् ॥
अथ वक्ष्याम्यहं या या महाविद्या महीतले ।
दोषजालैर्न संस्पृष्टास्तास्सर्वा हि फलैस्सह ॥
अस्ति गुह्यतमं ह्येतज्ज्ञानमेकं सनातनम् ।
अतीव तत्सुगोप्यत्वाद्वर्णितुं नैव शक्यते ॥

* * * *

नास्ति किञ्चिन्महादेवि दुःखसाध्यं कदाचन ।
एषा हि परमा विद्या त्रिषु लोकेषु दुर्लभा ।
सुखदा मोक्षदा चाद्या क्लेशसाध्या न तादृशी ।
न वा प्रयासबाहुल्यं न कायक्लेशसम्भवः ।
अस्याः स्मरणमात्रेण सिद्धयोऽष्टौ भवन्ति हि ॥

* * * *

Colophon:

इति श्रीआगमसंक्षिप्तसारे विद्यामाहात्म्यकथनं नाम प्रथमः पटलः ॥

End:

अथ यन्त्रप्रायश्चित्तं स्वच्छन्दभैरवे—

दग्धं वा स्फुटितं यन्त्रं हृतं चोरेण वा प्रिये ।
उपवासं प्रकुर्वीत दिनमेकमतन्द्रितः ॥
लक्षमेकं जपेद्विद्यां होमतर्पणमार्जनम् ।
शक्त्या गुरुञ्च सन्तोष्य ब्राह्मणानपि भोजयेत् ॥
कदाचिल्लुप्तचिह्नं वा स्फुटितार्धविदूषणम् ।
भग्नं करोति यो मर्त्यो मृत्युस्तस्य [1]द्रुतं भवेत् ॥
तस्माच्च तीर्थराजे वा गङ्गादिसरितां वरे ।
समुद्रे वा क्षिपेद्देवि त्वन्यथा दुःखमाप्नुयात् ॥

इति मन्त्रप्रायश्चित्तम् ॥

Colophon:

इति श्रीआगमसंक्षिप्तसारे प्रतिष्ठाविधानं नाम द्वाविंशः पटलः ॥

[1] दृढम्—इति पाठान्तरम् ।

R. No. **3016.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Charlayam Rāja Kunnamkulam, Cochin State.

ऋजुलघ्वी (मालतीमाधवकथा).

ṚJULAGHVĪ (MĀLATĪMĀDHAVAKATHĀ).

Foll. 1*a*—24*a*. Fol. 24*b* is left blank.

A poem narrating the story of the Mālatīmādhava, the well-known drama of Bhavabhūti whom the author Pūrṇasarasvatī salutes in the beginning.

Complete.

Beginning:

जग(मह)त्प्रकरणं येन सो(स्वो)त्पाद्यचरितं कृतम् ।
चिरन्तनाय कवये नमोऽस्मै भवभूतये ॥

प्रकरणतिलकं यन्मालतीमाधवाख्यं सुकुटिलमितिवृत्तं तस्य बालैर्दुरापम् ।
सरसविविधवृत्तैः पद्यबन्धैस्ततोऽहं प्रगुणविरचितं तद्दर्शयिष्ये समासात् ॥

अस्ति श्रियोऽन्तःपुरमग्रहारः पृथ्व्यङ्गनायाः प्रथितोऽग्रहारः ।
पदं महत्पद्मपुरीति नाम्ना धर्मस्थिराणां धरणीसुराणाम् ॥
तत्रान्ववायश्रुतवृत्तवित्तौ मान्यौ द्विजौ माधवकेशवाख्यौ ।
बभूवतुर्बद्धजगत्प्रमोदौ भुवि स्फुरन्ताविव पुष्पदन्तौ ॥
पितॄनमात्याननतिथीन्महर्षीन् भूतानि च प्रत्यहमेधयन्तौ ।
स्तम्भाविवोच्चैर्दधति(तुः) स्थिरौ तौ गृहश्चतुर्णां गतिमाश्रमाणाम् ॥

पूर्वस्तयोरजनयत्किल देवरातं पुण्यैः प्रसाद्य नियमैः पुरुषं पुराणम् ।
अन्यस्तु भूरिवसुमन्वितनामधेयं तेजोह(म)रैर्व(र्ध)नचयैश्च समग्रभावात् ॥

End:

वधूसहायस्य वरस्य मङ्गले पुरः प्रवेशे पुरुहूततेजसः ।
प्रसन्नतां मन्त्रिवरे प्रकाशयन् विदर्भराजो विदधे महोत्सवम् ॥

अभिमतधनराशिप्राप्तिसञ्जाततोषै-
रवनिसुरसमूहैराशिषाबध्यमानः ।
अविरलमनुतिष्ठन् पञ्च यज्ञान् स्वगेहे
सममरमत दारैः प्रीणयन् बन्धुवर्गम् ॥

पद्मावतीं कुण्डिनतः कदाचित्परापतन्पद्मपुरीं कदाचित् ।
पद्मयः(?) सुखानां सह धर्मपत्न्या कोटिं परामन्वभवत्कुमारः ॥
प्रकटितमिति पद्यैरञ्जसा बालिशानां
सुकुटिलमितिवृत्तं मालतीमाधवाख्यम् ।
दिशतु सहृदयेभ्यो दीर्घमानन्दमुद्रां
कृतिरियमृजुलघ्वी पूर्णसारस्वतस्य ॥

Colophon:

इति ऋजुलघ्वी समाप्ता ॥

R. No. **3017.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Śrī Jugulakiśōra Pāṇigrāhī, B.A., Parlakimedi.

सङ्क्षेपभागवतामृतम्.

SAṄKṢĒPABHĀGAVATĀMṚTAM.

A treatise purporting to give briefly the essence of the Śrī Bhāgavata. Herein the author says that Lord Kṛṣṇa is the incarnation of the Supreme Brahman and quotes authorities from various works, such as the Skānda, Viṣṇupurāṇa, Mahābhārata, Harivaṁśa, Brahmasaṁhitā, etc., in support of his statement.

Contains the Pūrvakhaṇḍa only.

Beginning:

नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे ।
यो धत्ते सर्वभूतानामभावायोशतीः कलाः ॥

* * * *

श्रीचैतन्यमुखोद्गीर्णा हरे कृष्णेति वर्णकाः ।
मज्जयन्तो जगत्प्रेम्णि विजयन्तां तदाह्वयाः ॥
श्रीमत्प्रभुपदाम्भोजैः श्रीमद्भागवतामृतम् ।
यद्यतानि तदेवैवं सङ्क्षेपेण निषेव्यते ॥
इदं श्रीकृष्णतद्भक्तसम्बन्धादमृतं द्विधा ।
आदौ कृष्णामृतं तत्र सुहृद्भ्यः परिवेष्यते ॥
निर्बन्धं युक्तिविस्तारे मयात्र परिमुञ्चता ।
प्रधानत्वात्प्रमाणेषु शुद्ध एव प्रमाण्यते ॥

* * * *

अथोपास्येषु मुख्यत्वं वक्तुमुत्कर्षभूमतः ।
कृष्णस्य तत्स्वरूपाणि निरूप्यन्ते क्रमादिह ।

तदेवाह—

स्वयंरूपस्तदेकात्मरूप आवेशनात्मकः ।
इत्यसौ त्रिविधं भाति प्रपञ्चातीतधामसु ॥

End:

यथा तन्त्रे—

कन्दर्पकोट्यर्बुदरूपशोभानीराज्यपादाब्जनखाञ्चलस्य ।
कुत्राप्यदृष्टश्रुतमेव कान्तेः ध्यानं परं नन्दसुतस्य वक्ष्ये ॥

श्रीदशमे च—

त्रैलोक्यसौभगमिदञ्च निरीक्ष्य रूपं
यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रत्(न्) ॥ इति

Colophon:

इति श्रीसङ्क्षेपभागवतामृते श्रीकृष्णामृतं नाम पूर्वखण्डं समाप्तम् ॥

R. No. 3018.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Narāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala, Malabar district.

हनूमदपदानम्.

HANŪMADAPADĀNAM.

Fol. 20*b* is left blank.

A work narrating some of the leading incidents in the life of Hanūmat.

Breaks off in the third Vilasita.

Contains the following Vilasitas :—

१. कौमारविलसितम्.
२. नयविलसितम्.
३. सीतान्वेषणविलसितम्.

Beginning:

प्रणम्य गुरुमीश्वरं कविवृषञ्च वल्मीकजं
सहैव रघुनायकं सहचरीसहायादिभिः ।

परामपि गिरं लसत्रिविधशक्तिविश्वोन्मुखीं
हनूमदपदानदिङ्नुतिमधीरपि प्रारभे ॥

क्षमन्त एव सन्तोऽत्र सर्वविद्याब्धिपारगाः ।
अन्ये हसन्तु किं छिन्नं भक्तास्सम्भावका मम ॥

अथ रविसुतभाग्याभोगसर्वस्वमुद्यन्मुनिवरवरहृष्यत्केसरिप्राणसारम् ।
अलभत पवमानादञ्जना सज्जनान्तःकरणकमलभानुं सूनुमीशानभानम् ॥

प्रादुर्भूत एव तस्मिन् जगदवितरि सवितरीवापरे प्रतिहतिरहितप्रतापप्रसरणसरणिनिरस्तनिखिलभुवनविमतसन्तमसे विंशद्भु(तिभु)जबलावलेपदलितेन कुलिशेन तद्भुजसमसमाघातसमुचिताभङ्गुरस्थानसंस्थापितानामिव निजांशानां रुचिरतरकरचरणान्तखर्वेतराणां खराणां नखराणां मयूखजालेन अदरिद्रविद्रुमछेदसच्छायललितलवनविलसति रुचिरमरीचिमालया क्षेमङ्करवीरप्ररोहपरितुष्टसुरनरवर्गवितीर्णयोर्निजकबलांशयोर्जैवातृकशकलयोरिव उपरि द्विविधसाचिव्यसंवर्धनीययोर्द्विशाखयोरिव यशोऽङ्कुरयोर्दंष्ट्रयोः ।

* * * *

वीरश्रियस्सरसचङ्क्रमणोचितेन सुस्निग्धरोमचयचर्मसमावृतेन ।
औज्वल्यजं हरिगिरेर्हरताभिमानं लोकत्रयं स्वपुषा वपुषा रराज ॥

* * * *

Colophon:

इति हनूमदपदाने कौमारविलसितं नाम प्रथमं विलसितम् ॥

End:

साध्ये द्वे अपि लोकयोः कृतपदे श्रीरामपादाब्जयोः
सेवासाधनसम्भवे इति दृढं निश्चित्य ते संश्रितः ।
पूर्वं स्वामिनि सङ्क्रमय्य चरमं स्वस्यापवर्गात्मकं
स्वीकृत्यायमवञ्चितस्तु विषयैरास्ते सुधीमानिह ॥

Colophon:

इति हनूमदपदाने नयविलसितं नाम द्वितीयं विलसितम् ॥

अहरदिह हरीशस्याज्ञयासौ हनूमान् गिरिजलनिधिवेलारण्यवासानसंख्यान् ।
सह हरिगणगोलाङ्गूलभल्लूकमुख्यान् दिशि दिशि गुरुभेरीताडनेनानिनाय ॥

* * * *

प्रथमप्रवृद्धोत्साहस्पर्धयेव द्विगुणं वेगमङ्गीकुर्वन्समीहितसाधनं रघुवरानुसन्धानं धनमाददानं प्रलयार्णव इव विनद्य वर्धमानशरीरः ततोऽपि शतगुणं वर्धमानतेजस्सश्चयः अमृताहरणोद्यत इवाण्डजेश्वरः महेन्द्रा(न्द्रात्) खमुत्प्लुत्य चण्डवेगवायुसमाकृष्टमूर्ध्वं नयन्निव समुद्रं पार्श्वयोरुपरि च वेगशकलितजलदान्तरनिस्सृतजलसिक्तमूर्तिर्गगनश्रममपनयन्निव ।

जनपदनगरादि प्रेक्षमाणो विमानैः प्रलयनलदबुद्ध्या दूरनिर्मुक्तमार्गः ।

R. No. 3019.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 68. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Mānavikrama Anujan Kuññuṇṇi Rāja of Padiññāre Kōvilagam (third Raja).

तर्कप्रकाशटिप्पणी.

TARKAPRAKĀŚAṬIPPAṆĪ.

Foll. 1*a*—53*a*. Foll. 53*a*—66*b* are duplicate (incomplete) of foll. 38*a*—53*a*. Foll. 67*a*—68*b* are left blank.

A brief commentary on the Tarkaprakāśa of Śrīkaṇṭha or Śitikaṇṭha, which work is itself a commentary on Jānakīnātha's Nyāyasiddhāntamañjarī which has been described under No. 4215 of the D.C.S. MSS., Vol. VIII.

Contains a small portion of the Śabdakhaṇḍa and the Anumānakhaṇḍa.

Beginning:

अनुपेक्षणीयत्वरूपशिष्यावधानायाथशब्दसूचितां सङ्गतिं प्रदर्शयन् प्रतिज्ञाफलमाह—उपजीव्येति । प्राचीनमते उपमानशब्दस्वरूपयोरुक्तसङ्गत्यभावमाशङ्क्य परिहरति—अत्रेति । फलयोस्सङ्गत्याभिधाने उभयत्र परम्परया सङ्गतेः करणनिष्ठत्वेन स्वरूपफलयोस्तदभिधाने च एकत्रैव परम्परया कारणनिष्ठत्वेन लाघवमभिसन्धायाह—स्वरूपफलयोर्वेति ।

* * * *

साध्यवाचकपदसमभिव्याहृतसिद्धपदबोध्यत्वं यत्र तत्र साध्योपयोगित्वमिति नियमः । सविशेषणे हीति । सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्यबाधे इति नियमे विशेष्यबाधसहितविशिष्टनिष्ठविधिनिषेधत्वं यत्र तत्र विशेषणोपसङ्क्रामकत्वमिति व्याप्यव्यापकभावः ।

End:

तथाच संयोगाभावाभावप्रतियोगितावच्छेदकदैशिकविशेषणतासम्बन्धे-

सामान्यान्तर्गते निरवच्छिन्नसंयोगात्मकाभावाधिकरणाप्रसिद्ध्या तदनुयोगिकत्वाभावनिबन्धनोभयाभावासम्भवेन संयोगाभावाभावस्य प्रतियोगिन्यधिकरणत्वाभावादभावान्तराप्रतियोगित्वेन केवलान्वयित्वसम्भवान्न केवलान्वयित्वानुपपत्तिः।

R.No. 3020.

Paper. $10\frac{1}{8} \times 9\frac{5}{8}$ inches. Foll. 267. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Tekkēmaṭham, Trichur. Bound in two volumes.

ब्रह्मसूत्रभाष्यभावप्रकाशिका.

BRAHMASŪTRABHĀṢYABHĀVAPRAKĀŚIKĀ.

Foll. 263*b* and 267 are left blank. Foll. 264*a*--266*b* give the contents of this work.

A commentary on the Brahmasūtrabhāṣya of Śaṅkarācārya: by Citsukhamuni, disciple of Jñānōttamapūjyapāda.

Wants the beginning; otherwise complete.

Beginning:

आत्मधर्मत्वाभिमतानामनुभवादीनाश्चिद्रूपात्ततो भेदाभावान्न जडे बुद्ध्याभावाध्यासोऽतुल्यत्वादित्यर्थः। अध्यासो नामान्यस्मिन्नन्यरूपता धीस्सा मिथ्येत्यविद्यमानतोच्यतेऽर्थाध्यासो ज्ञानाध्यासन्ये(सान्न)त्यध्यासयोर्नास्तित्वं वक्तुं धीर्द्विरध्यासवचनमाक्षेपमुपसंहरति—इति भवितुमिति । युक्तमिति वक्तव्ये भवितुमित्याक्षेपस्य सम्भावनैव मूलं नामानामि(भानादि)ति दर्शयितुमुक्तः। तदेवं मातृत्वादिबन्धस्य वस्तुतया विषयाद्यभावादनारभ्यमिदं शास्त्रमित्याक्षेपुर्विवक्षितमध्यासस्य नास्तित्वमयुक्तत्वादभानाद्वेति विकल्प्याद्यमङ्गीकरोति—तथापीति ।

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यश्रीचित्सुखमुनिविरचितायां भाष्यभावप्रकाशिकायां प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः ॥

End:

ननु निर्गुणब्रह्मविदामनावृत्तिः किमिति नोक्तेति तत्राह—सम्यग्दर्शनेति। तेषामावृत्तिशङ्काया अप्यभावादित्यर्थः। सगुणब्रह्मविदामपि ब्रह्मलोकगतानां

तत्रोत्पन्नसम्यग्दर्शनप्रसादादेव मुक्ति(क्ते)रभ्युपगमात्सम्यग्दर्शिनामा(मना)वृत्तिस्सुतरां सिध्यतीत्याह—तदाश्रयणेनैव हीति । सूत्राभ्यासस्य प्रयोजनमाह—अनावृत्तिश्शब्दादिति । सूत्राभ्यासश्शास्त्रपरिसमाप्तिं द्योतयति ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यश्रीचित्सुख-मुनिविरचितायां भाष्यभावप्रकाशिकायां चतुर्थाध्यायस्समाप्तः ॥

R. No. 3021.

Paper. 10⅜ × 9⅝ inches. Foll. 12. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Komāṇḍūr Appalācāriyar of Simhachalam.

वैखानसविषयश्लोकाः.

VAIKHĀNASAVIṢAYAŚLŌKĀḤ.

Foll. 1*a*—9*b*.

A collection of stanzas on the origin and the purity of the Vaikhānasa Brāhmans. The stanzas herein are taken from various sources, such as the Brahmāṇḍapurāṇa, the Mahābhārata, etc.

Beginning:

ब्रह्माण्डपुराणे अर्थपञ्चकविवरणे—

सृजस्व मम पूजार्थं युष्मदंशसमुद्भवम् ।
त्वत्समानं मुनिवरं सूत्रकर्तारमब्जज ॥
इत्युक्ते देवदेवेशे ब्रह्मा लोकपितामहः ।
ध्यानयोगपरो भूत्वा तस्थौ योगसमाधिना ॥
तेनैव ध्यानयोगेन परिशुद्धोन्तरात्मनि ।
विशेषखननं तत्र कृतवान् पद्मसम्भवः ॥
विशेषखननात्तस्मात्तत्त्वार्थपरिचिन्तनात् ।
प्रादुरासीन्मुनिश्रेष्ठः वेदवेदाङ्गपारगः ॥

* * * *

श्रीभगवानुवाच—

मया नियुक्तो विखनो मदाराधनकृद्भव ।
मामाराध्य मुनिश्रेष्ठ मल्लोके निवसिष्यति(सि) ॥

सूत्रं कुरु महाभाग त्वन्नाम्ना यजुषीकृतौ ।
वैखानसमिति प्रोक्तं लोके ख्यातिर्भविष्यति ॥
* * * *

इति श्रीमहाभारते शान्तिपर्वणि.

End:

वैखानसाः देवस्थानादन्यत्रापि पावना एव । कथमिति चेदुच्यते । ब्रह्माण्डपुराणे अर्थपञ्चकविवरणे दृढव्रतोपाख्याने पञ्चमाध्याये श्रीभगवान्—

तथा रङ्गेश्वरो देवः कृपयार्चनमब्रवीत् ।
मद्भक्तो मम सेवार्थमिदानीं समुपोषितः ॥
व्रजस्व मम देहं त्वं त्वमेवाहं न संशयः ।
चलाचलन्तु द्विविधं रूपं मम महात्मनः ॥
* * * *
मया नियुक्तो विखनो मदाराधनकृद्भव ।
मामाराध्य मुनिश्रेष्ठ मल्लोके निवसिष्यसि ॥ इति ॥

Foll. 9*b*—11*b* contain a few stanzas from Dharmaśāstras and Purāṇas.

R. No. 3022.

Paper. 10⅞ × 9⅝ inches. Foll. 58. Lines, 20 in a page. Telugu Good

Transcribed in 1919-20 from a MS. of the Library of Maharaja's Sanskrit College, Vizianagram.

(*a*) शीतलास्तोत्रम्.

ŚĪTALĀSTŌTRAM.

Foll. 1*a*—2*b*.

Complete.

Slightly different from the work described under R. No. 1448 ante.

Beginning:

स्कन्द उवाच—

भगवन् देवदेवेश शीतलायास्तवं शृणु(?) ।
वक्तुमर्हस्यशेषेण विस्फोटकभयापहम् ॥

ईश्वर उवाच—

वक्ष्यामि शीतलास्तोत्रं तन्मूर्तिध्यानपूर्वकम् ।
नृणां स्फोटकनाशाय तदिहैकमनाश्शृणु ॥

End:

नमो दाहज्वरहरे सन्निपातातिसारहृत् ।
त्वामहं शरणं यामि शीघ्रमारोग्यदा भव ॥
प्रसीद शीतले देवि प्रसन्ना स्फोटकान् हन ।
प्रसन्नायां त्वयि सदा न बाधा स्फोटकादिजा ॥

Colophon:

इति श्रीशीतलास्तोत्रं संपूर्णम् ॥

(*b*) नवग्रहमन्त्रः.

NAVAGRAHAMANTRAḤ.

Foll. 2*b*—5*b*.

Complete.

Similar to the work described under No. 6456 of the D.C.S. MSS., Vol. XIII.

Beginning:

श्रीरुद्रयामले सूर्यग्रहमन्त्रः—

अस्य श्रीसूर्यग्रहमहामन्त्रस्य हिरण्यस्तूप ऋषिः, त्रिष्टुप् छन्दः, श्रीसूर्यनारायणो देवता, ह्सौं बीजं, श्रीं शक्तिः, अं कीलकम्, मम श्रीसूर्यनारायणप्रसादसिद्ध्यर्थे जपे विनियोगः ।

*   *   *   *

मनुः—ओं ह्सौं श्रीं आं ग्रहाधिराजाय ह्रीं ठः आदित्याय मां पालय स्वाहा । इति लक्षपुरश्चरणम् ॥

End:

मनुः—ओं ह्रीं क्रूं क्रूररूपिणे केतवे ऐं सौः मां पालय पालय स्वाहा ॥ इति लक्षपुरश्चरणम् ॥ एतेषां ग्रहाणामुक्तद्रव्यैस्तर्पणहोमादिकं तत्तद्दशांशेन कुर्यात् । इष्टदा भवन्ति ॥

(*c*) हरिद्रागणपतिकल्पः.

HARIDRĀGAṆAPATIKALPAḤ.

Foll. 6*a*—9*b*.

Same work as that described under No. 8164 of the D.C.S. MSS., Vol. XV. This forms a portion of the Gaṇēśasaṁhitā.

Contains the Paṭalas one to three complete; and the fourth incomplete.

Colophon:

इति श्रीगणेशसंहितायां हरिद्रागणपतिकल्पे तृतीयः पटलः ॥

(*d*) गणपतिपञ्चावरणस्तोत्रम्.

GAṆAPATIPAÑCĀVARAṆASTŌTRAM.

Foll. 9*b*—24*a*.

Complete.

This portion is taken from Rudrayāmala.

A eulogy on Gaṇapati surrounded by five sets of minor deities.

Beginning:

सर्गस्थित्यादिहरणं विश्वस्याप्येककारणम् ।
महागणपतिं वन्दे पञ्चावरणसंयुतम् ॥
क्रीडासक्तगणाधीशं करशीकरपूजितम् ।
अमृताम्भोनिधिं वन्दे तरङ्गकुलसङ्कुलम् ॥

End:

चतुश्चत्वारिंशत्परिगणितपद्यैर्विरचितं
गणेशस्तोत्रं यः पठति नियतात्मा स लभते ।
धनं धान्यं पुत्रान् जननृपवशित्वं पशुचयं
चिरायुस्तद्विद्यां विपुलतरकीर्तिं शिवपदम् ॥

Colophon:

इति श्रीरुद्रयामले शिवप्रणीते श्रीमहागणपतिपञ्चावरणस्तोत्रं संपूर्णम् ॥

Fol. 12 contains the Gaṇapatimantra, foll. 12*b*—15*b* contain Bindunādakalāsvarūpanirūpaṇa and 15*b* and 16*a* Kumbhakanirūpaṇa.

(*e*) मयूरचित्रकम्.

MAYŪRACITRAKAM.

Foll. 16*a*—53*b*.

On the performance of the pacificatory ceremony to be performed by one, on various occasions, such as when lightning falls in a palace, town or village, when a pillar of the house is broken all in a sudden, the front portion of a temple or the temple itself falls down, when a pounding stone in the house is broken, etc: by Bhaṭṭaguru.

Complete in seven Kāṇḍas, the names of which are given below; in the first Kāṇḍa there are 18 Śāntis dealing with various subjects:—

१. दिव्यकाण्डः.
२. अन्तरिक्षकाण्डः.
३. भौमकाण्डः.
४. वर्षकाण्डः.
५. फलविपाककाण्डः.
६. शुभकाण्डः.
७. ग्रहोत्पातशान्तिकाण्डः.

Beginning:

दुर्निमित्तप्रथमशान्तिविधानम्—

उक्तश्च गुरुणा पूर्वं विस्तीर्णं बहुभिर्मुखैः ।
लेखकानाश्च दोषेण मूर्खाणां वापि सङ्गमात् ॥
सौ . बाला च वक्षायां पादमभ्रंशमागतम्(?) ।
मयूरचित्रमाख्यातमिदं कृत्स्नश्च लिख्यते ॥
आलोक्य निखिलं तस्य समुत्कीर्णश्च यत्नतः ।
संस्कृतश्च सुबोधश्च लोकार्थमनुलिख्यते ॥

इन्द्र उवाच—

योक्षा गर्ग इति प्रोक्तः कथं जानाति वाकूपते(?) ।
मयूरचित्रकं ब्रूहि सर्वशास्त्रविशारद ॥

गुरुरुवाच—

गर्गो नाम महानासीदृषिरुग्रस्तपोधनः ।
दुर्निमित्तान्यसौ दृष्ट्वा तत्कृतानि फलानि च ॥

*   *   *   *

प्रासादे राजगेहे च पुरे ग्रामे विशेषतः ।
अग्न्यगारे च गोष्ठे च वज्रपातो भवेद्यदि ॥
राजामात्यविनाशस्स्यात् षड्भिर्मासैर्न संशयः ।
वासुदेवालये शान्तिर्वक्ष्यमाणात्र साधनी ॥

Colophon:

इति श्रीभट्टगुरुविरचितायां धर्मावतारसंहितायां वीरपर्वणि मयूरचित्रके दिव्यकाण्डः ॥

End:

आत्मच्छायां शिरोहीनां सूर्याचन्द्रमसोर्द्वयम् ।
एतयोरिव छिद्रं हि पश्यन्ति मृत्युचोदिताः ॥
व्रजेयुस्ते हि शीघ्रन्तु गङ्गां नरकतारिणीम् ।
दशाहे कस्यचिन्मृत्युः कस्यचित्सप्तरात्रके ॥
उद्वेस्या मशकादंशात्यनः मक्षिका यदि(?) ।
भूयो रोगकरा प्राहुः द्रव्यनाशं विभोर्भयम् ॥
पक्षाहे कस्यचिन्मृत्युः कस्यचित्पक्षगोचरः ।
मयूरेण कृतं चित्रं नष्टं कालान्तरेण यत् ॥
दुष्टग्रहगृहीतानां नराणां हितहेतवे ।

Colophon :

इति मयूरचित्रिकायां ग्रहोत्पातशान्तिकं नाम सप्तमकाण्डः ॥
इति मयूरचित्रं समाप्तम् ॥

(*f*) दुर्गास्तवः.
DURGĀSTAVAḤ.

Foll. 54*a*—57*b*. Fol. 58 is left blank.

This work is a eulogy on Goddess Durgā and is taken from the 6th Adhyāya of the Virāṭaparvan and from the 22nd Adhyāya of the Bhīṣmaparvan of the Mahābhārata.

Complete.

Beginning :

वैशंपायन उवाच—

विराटनगरं रम्यं गच्छमानो युधिष्ठिरः ।
अस्तुवन्मनसा देवीं दुर्गां त्रिभुवनेश्वरीम् ॥
यशोदागर्भसम्भूतां नारायणवरप्रिययाम् ।
नन्दगोपकुले जातां मङ्गल्यां कुलवर्धिनीम् ।

* * * *

इत्युक्त्वा वरदा देवी युधिष्ठिरमरिन्दमम् ।
रक्षां कृत्वा च पाण्डूनां तत्रैवान्तरधीयत ॥

Colophon :

इति श्रीमहाभारते शतसहस्रसंहितायां विराटपर्वणि दुर्गास्तवोना नाम षष्ठ(ष्ठो)ऽध्यायः ॥

End :

देव्युवाच—

स्वल्पेनैव तु कालेन शत्रून् जेष्यसि पाण्डव ।
सर्वस्त्वमसि दुर्धर्ष नारायणसहायवान् ॥

* * * *

यत्र धर्मो द्युतिः कान्तिः यत्र ह्रीश्रीस्तथा मतिः ।
यतो धर्मः ततः कृष्णः यतः कृष्णस्ततो जयः ॥

Colophon:

इति श्रीमहाभारते शतसहस्रसंहितायां भीष्मपर्वणि दुर्गास्तवो नाम द्वा(त्रयो)विंशोऽध्यायः ॥

R. No. **3023.**

Paper. 10⅞ × 9⅝ inches. Foll. 460. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala, Malabar district.

Bound in three volumes.

भागवतव्याख्या—कृष्णपदी.

BHĀGAVATAVYĀKHYĀ: KṚṢṆAPADĪ.

Foll. 1*a*—459*a*. Foll. 459*b* and 460 are left blank.

Same work as that described under R. No. 2769 ante.

Contains the Skandhas one and two complete and Adhyāyas 1 to 15 in the third Skandha.

Beginning:

प्रत्यक्परं प्रकृतिपूरुषयोः प्रपञ्चप्रोद्भावनावननिरोधननित्यलीलम् ।
निर्व्याजसौभगममङ्गलमस्मदीयं निर्माष्टु नैगमशिरोपदमैशमोजः ॥

अष्टप्रकृत्यष्टवधूविकारद्व्यष्टसाहस्रवधूगणेष्टम्(?) ।
अखण्डचैतन्यसुखात्ममूर्तिं नमामि कृष्णं पुरुषं पुराणम् ॥

*　　*　　*　　*

यैराप्ता परंहसराजपदवी विष्णोः पदासेवना-
द्यत्पक्षाश्रयणेन लब्धगतयो याता द्विजेन्द्रा दिवम् ।
ब्रह्मानन्दसुधाब्धिकेलिरसिकाश्रीशङ्कराख्यामृताः
शम्भोर्नः करुणाविलासविभवाः कुर्वन्तु ते मङ्गलम्
यत्पादाब्जरजोऽभिषेकसुकृतप्रक्षीणदुष्कर्मणा-
मस्माकं हृदयारविन्दकुहरोर्न(रे न)र्नर्ति लक्ष्मीपतिः ।
तेभ्यो ब्रह्मणि नित्यनिर्वृत्तिरसो लीलाशयेभ्यस्सदा
कृष्णानन्दगुरुभ्य एभ्य उदियाद्भूयान् प्रसादो मयि ॥

श्रीभागवततात्पर्यसुधाविष्कृतिकारिणीम् ।
कीतं कृष्णपदीं नाम करिष्याम्यात्मशुद्धये ॥

केदं व्यासविचित्रमानससरस्सद्राजहंसास्पदं
केमे तत्प्रतिबोधनाय मनसस्स्वल्पाः प्रचारा मम ।
उद्योगोऽयमथापि हन्त विदुषां हासाय न स्यात्परं
सद्धासास्पदता हि दुर्लभतरेत्येता विदोषा कृतिः ॥

तत्र तावत्—

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥

इति यदिदं शास्त्रलक्षणं तदस्मिन् प्रबन्धेऽस्ति वा नास्ति वेति विमृशामः । सिद्धे हि शास्त्रत्वे प्रमाणत्वेन व्याख्येयत्वमिति ।

* * * *

तदेवमखिललोकहितावतारो भगवान् बादरायणः स्वावतारकार्यपरिपूरणाय श्रीभागवतं नाम पुराणरत्नं चिकीर्षुस्तत्प्रत्यूहविच्छित्तिप्रचयगमनाभ्यां मङ्गलाचारयुक्तानां विनिपातो न विद्यत इति शिष्टाचारसहकृतस्मृत्यनुमितश्रुतिप्रमाणकमिष्टदेवतानुस्मरणलक्षणं मङ्गलम्मुखतस्सम्पादयन्नर्थाद्विषयप्रयोजनसम्बन्धाधिकारिलक्षणमारम्भापेक्षितमनुबन्धिचतुष्टयञ्चाचक्षाणश्चिकीर्षितं प्रतिजानीति—जन्माद्यस्येति ।

R. No. 3024.

Paper. $10\frac{3}{8} \times 9\frac{4}{8}$ inches. Foll. 137. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Ampalakaṭ Karuṇākara Menon Avl., B.A., B.L., Chalapram, Calicut.

प्रक्रियासर्वस्वम्.

PRAKRIYĀSARVASVAM.

Fol 137 contains the contents of this work.

A grammatical treatise written by Nārāyaṇabhaṭṭa who was patronized by Dēvanārāyaṇa, king of Kērala country. A commentary on this work is described under R. No. 2710 ante, wherein see for details about this work and author.

Contains Tiṅanta, Samāsa and Taddhitakhaṇḍas.

Beginning:

परस्परां समीयुस्ता अन्योन्यामितरेतराम् ।
तदपत्यानि चान्योन्यां मिलन्ति स्म महोत्सवे ॥

विकल्पादन्योन्यमित्याद्यपि । स्त्रीत्वे टाप्प्राप्तावपि समासवच्चबहुलमि-
त्युक्तेः ह्रस्वः ।

* * * *

Colophon:

इति श्रीमत्केरलभूवलयभूषणदेवनारायणधरण्यधिपतिकरुणाशरणेन नारा-
यणकविना विरचिते प्रक्रियासर्वस्वे सुबन्तखण्डः ॥

* * * *

अथ तिङन्तान्वक्तुं प्रथममात्मनेपदपरस्मैपदविभाग उच्यते । अनुदा-
त्तङित आत्मनेपदम् । अनुदात्तेद्भ्यो ङिद्भ्यश्चात्मनेपदं स्यात् । अनुदा-
त्तेत्त्वस्वरितेत्त्वादि धातुपाठे बोध्यम् ॥

End:

तसिलाद्याः पाशपः प्राग्डाप्पर्यन्ताः शसादयः ।
वतिर्नानाञथामुश्च कृत्वोऽर्थः तद्धितेऽव्ययम् ॥

कृतः ।

इतः परं समासान्तास्सन्ति केचन तद्धिताः ।
तेषां तत्तत्समासेषु वर्णनैव लघीयसी ॥

Colophon:

इति प्रक्रियासर्वस्वे तद्धितखण्डः ।

R. No. 3025.

Paper. $10\frac{1}{8} \times 9\frac{5}{8}$ inches. Foll. 30. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Tiruvāymoḻipiḻḻai, Tirumala Āḻvār of Āḻvārtirunagarī, Tinnevelli district.

शठकोपसहस्रम्.

ŚAṬHAKŌPASAHASRAM.

Fol. 30*b* is left blank.

A eulogy by Vēṅkaṭarāya in ten Daśakas of 100 stanzas each, on Śaṭhakōpa or Nammāḻvār, the author of the well-known Tamil Prabandham called Tiruvāymoḻi.

Complete.

Beginning:

रमासहचरः प्रभू रचितमत्स्यरूपोऽम्बुधौ
प्रमाणवरमुद्धरन् प्रहृतवान्मधुं कैटभम् ।
त्वमार्य शठजित्तथा द्वयमपि प्रमाणं ततः
प्रमेयमसि वर्धयन्प्रबलकाममन्यू हरन् ॥

* * * *

भवन् बहुविधोऽवनौ परमपूरुषस्सोऽपि नो
भवव्ययकरोऽभवद्भवसि देशिकस्त्वन्त्विति ।
स्तवं सुदशपद्यकं शठजिदार्यदासोदितं
ब्रुवन् जनिमिहावनौ पुनरुपैति नापन्मयीम् ॥

* * * *

अस्त्वार्य श्रीरन्वहं जृम्भितेति स्वस्त्यास्तिक्यात्सज्ज(ज्ञ)गौ वेङ्कटार्यः ।
यस्त्वाहैतच्छ्लोकपश्चद्विकं स स्वस्तोमैर्युक् सर्वदेशेषु सुख्येत् ॥

End:

नयनाश्चलतश्श्रीमन् दयमानो मां निषिच्य शठकोप ।
स्वयमतनो(ः)पदसाते(त्ते)स्मयमानमुरवस्समीक्ष्य भट्टेशम् ॥
भट्टेशवेङ्कटार्यः शिष्टमुदे शठजितस्सहस्रमिदम ।
हृष्टमनाः प्राहास्मिन्निष्टं दशकं पठत्(न्) सुभद्राणि ॥

R. No. 3026.

Paper. $10\frac{1}{8} \times 9\frac{5}{8}$ inches. Foll. 52. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Kṛṣṇacakravartyācār of Kōtaṇḍapaṭṭi, North Arcot district.

श्रृङ्गारकन्दुकम्, सुमचापविहारव्याख्यासहितम्.

ŚṚṄGĀRAKANDUKAM WITH THE COMMENTARY SUMACĀPAVIHĀRA.

The text is an erotic work describing the love between the Gōpīs and Śrī-Kṛṣṇa and their amorous sports. It is also called Jārapañcāśat. The commentary is called Sumacāpavihāra and is by Vēṅkaṭarāghavasūri of Śrīśaila family.

Contains the Pūrvapañcāśat complete, and the Uttarapañcāśat incomplete.

Beginning:

श्वेताद्रिनाथं द्विरदाद्रिनाथं शेषाद्रिनाथं घटिकाद्रिनाथम् ।
तोताद्रिनाथं गरुडाद्रिनाथं सिंहाद्रिनाथं प्रणतोऽस्मि नित्यम् ॥

* * * *

श्रीशाङ्घ्रियुग्मं प्रणिपत्य नित्यं स्मृत्वा . . . नखिलार्थदातन् ।
शृङ्गारपूर्वोत्तरकन्दुकस्य व्याख्याभवद्राघवसूरिवर्यात् ॥

शृङ्गारकन्दुकाख्यस्य काव्यस्यामृतशालिनः ।
सुमचापविहाराख्या व्याख्या सा क्रियतेऽधुना ॥

शृङ्गारकन्दुकेनास्य विहर्तुर्मन्मथस्य यत् ।
शोधा(भा)यै बुद्धिरुत्पन्ना सारतोऽन्तः प्रकाश्यते ॥

श्रीमान् श्रीकृष्णाद्भुतचरितवर्णनकुतूहली

* * * *

षोडशसहस्रगोपस्त्रीनायकत्वेन प्रसिद्धस्य नायकस्य क्रीडावर्णनरूपकाव्यं व्यातनोति—प्रणम्येति ।

प्रणम्य बालगोपालमस्मदीयांश्च देशिकान् ।
क्रीडानां गोपजारस्य चरितं क्रियतेऽद्भुतम् ॥

* * * *

गोपश्चासौ जार इति कर्मधारयः । तस्य क्रीडानां रासक्रीडानां चरितं क्रियते श्लोकरूपेण क्रियत इत्यर्थः ।

पूर्वोत्तराभ्यां चरितं पञ्चाशद्भ्यां करोम्यहम् ।
शृङ्गारकन्दुकाख्येन गोपजारस्य चित्रितम् ॥

End:

नायिका कलहान्तरिता ।

कोपात्कान्तं पराणुद्य पश्चात्तापसमन्विता । इति लक्षणात् । विरहस्याग्नित्वारोपाद्रूपकालङ्कारः स्वभावोक्तिश्च ॥

Colophon:

इति श्रीशैल(कुल)कलशाम्बुधिपूर्णचन्द्रस्य क(वे)ङ्कटोपपदगोत्रप्रत्ययान्तरघुपदार्थस्य कृतौ शृङ्गारकन्दुकापरनामजारपञ्चाशद्व्याख्यायां सुमचापविहाराख्यायां प्रथमपञ्चाशत् कृतः ॥

जारेणाहृतदारकाः पुरजनास्सेवारता येऽभवन्
त्यक्तागारसुतादिसम्पदधिकाः प्राणान्वरं दुस्त्यजान् ।

कामं त्यक्तुमुपाश्रिताश्रुनयनाः कण्ठस्खलद्राविण-
स्सर्वं राजसदस्सु नम्रवदनास्त्वावेदयाञ्चक्रिरे ॥
ये पुरजनाः सेवारताः उत्सवसेवासक्ताः । अभवन् आगताः ।

* * * *

मुग्धे मुग्धदृगुत्पलं हि सततं चन्द्राननाभ्याशतः
(सम्यक् हा) समुपैति चोत्पलमरं पश्यन्नतेहे किमु ।
वातेनाहतवारिवीचिततिभिर्नद्धं शिरश्लाघना-
न्मौनेनैव निरस्तहानविरतिप्रायेण तौल्यन्त्वगात् ॥
हे मुग्धे हे सुन्दरि ॥

R. No. 3027.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 88. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Patayan Nambūdiri, Karakanūr, Payani post, Malabar district.

तन्त्रशेषसमुच्चयः.

TANTRAŚEṢASAMUCCAYAḤ.

Foll. 87*b* and 88 are left blank.

On the details of procedure for the performance of festivals in temples. The procedure herein laid down is generally followed by the Nambudiri people of Malabar. The author says that he has given the essence of Tantrasamuccaya.

Contains the following subjects in ten Paṭalas :—

१. देवताप्रतिष्ठाविधिः.
२. मण्टपसंस्कारादि.
३. प्रतिष्ठितदेवतासपर्यादि.
४. कलशपूजादि.
५. ध्वजपूजादि.
६. प्रायश्चित्तम्.
७. वास्तुदेवतादिपूजा.
८. आवरणशक्तिमन्त्रन्यासादि.
९. देवोत्सवादि.
१०. बेरजीर्णोद्धारणोद्वासनादि.

Beginning :

ब्रह्मार्कवैश्रवणकृष्णसरस्वतीश्रीगौर्यग्रजा ददतु काश्यपि मातरो मे ।
क्षेत्राधिपोऽथ रुरुजिद्गिरिशादिरूपाणीन्द्रादयो विनमतेऽभिमतं प्रसन्नाः ॥
गुरून्प्रणम्याथ गुरोर्निदेशादेषां प्रतिष्ठाप्यभिधीयतेऽद्य ।
स्वतन्त्रके साङ्गनिरङ्गभिन्ने बह्वेकबेरेऽपि विशेषयुक्तम् ॥

योऽयं तन्त्रसमुच्चयो गुरुकृतो यत्तत्र सारग्रहान्
तच्छिष्टागमसारसङ्ग्रहतयेहारभ्यमाणे ततः ।
ग्राह्यं शेषसमुच्चये सुकुशलैस्सामान्यकर्माखिलं
योऽजाद्येषु विशेष एष निखिलस्सुव्यक्तमत्रोच्यते ॥
स्नातः स्वे सदने विशोधितकले स्नातान् गुरून्मूर्तिमां-
श्चास्य प्राग्वदनान्पुरो गणपतिं सम्पूज्य संवन्द्य तान् ।
पाद्यादीन्यथ मूलमूर्तिमनुभिस्संसाध्य कर्तेशादि-
श्येतैस्तानभिपूज्य भुक्तवत आचान्तान्प्रणीतानतः ॥
मया सम्पूजितैरत्र दक्षिणाभिश्च तोषिते ।
क्रियतां ब्रह्मयागो मे प्रार्थयामि प्रसीदत ॥

* * * *

Colophon :

इति शेषसमुच्चये प्रथमः पटलः ॥

End :

पूजार्च्यायामष्टबन्धस्य जीर्णे तस्यामावाह्य स्वसम्पातसिक्तम् ।
जीर्णे प्रोद्वास्यादिबिम्बे विभुं तं नीत्वेज्यार्चां क्षालयित्वा विधिज्ञः ॥
पीठं प्राच्यीवाह्य तन्मूलबिम्बात् क्षिप्त्वा प्रागुद्दिष्टरीत्याष्टबन्धम् ।
सर्वं कृत्वा पायसं सन्निवेद्य पूजां कुर्यान्मूलबिम्बे नयस्व ॥

Colophon :

इति शेषसमुच्चये दशमः पटलः ॥

R.No. **3028.**

Paper. $10\frac{3}{8} \times 9\frac{5}{8}$ inches. Foll. 8. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. D. China Buchi Veṅkaṭa Rao gāru, Pāltēru, Vizagapatam district.

भावमञ्जरी.

BHĀVAMAÑJARĪ.

Fol. 8*b* is left blank.

Same work as that described under R. No. 2975(*b*) ante.

Complete in three Adhyāyas.

R. No. 3029.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 50. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of the Raja of Chirakkal, Malabar district.

प्रयोगमञ्जरी.

PRAYÓGAMAÑJARĪ.

Foll. 49*b* and 50 are left blank.

A treatise in Śilpaśāstra laying down rules for the foundation of capital towns, for the construction of dwelling houses and temples and for consecrating the Liṅga image of God Śiva. The work is attributed to Viśvakarman.

Wants the beginning and the end.

Contains the following subjects :—

१. प्रासादलक्षणम्.
२. देवमन्दिरनिर्माणम्.
३. शिलालक्षणम्.
४. लिङ्गलक्षणम्.
५. तत्त्वप्रतिष्ठादीक्षादि.
६. गोपुरविशालालङ्कारः.
७. विशालनामभेदः.
८. सभालक्षणम्.
९. राजधानीविधानम्.
१०. मनुष्यालयविधानम्.
११. पञ्जरालङ्कारादिः.
१२. लिङ्गद्वारविभागः.
१३. प्रतिद्वारविभागः.
१४. द्वारविस्तारादि

Beginning:

विस्तारत्रिगुणेन मध्यनिहितं सङ्कल्प्य चाष्टाश्रकं
हीनो मूर्ध्नि लवोतिकाविनिहितं कुम्भेन तन्मण्डनैः ।
संयत्तस्त(स्त्व)थ वीरकाण्डविहितस्स्यात् षोडशा स्थिकृतं
तुर्यश्रं विनिधाय मूलनिहितं कर्णस्थमानात्मतः(?) ॥

* * * *

गर्भाका(गा)रस्य वक्ष्यामि विभागश्च पुनः पुनः ।
उत्तमाधममध्यानां त्रित्रिभेदैर्यथाक्रमम् ॥

* * * *

आरूढभित्तिर्विहिताष्टमांशे येषां बहिश्शिष्टमन्द्र(लिन्द)मस्यात् ।
अष्टांशमानादथ बाह्यभित्तिर्घनस्याथवाल्पगेहे(?) ॥
भागाय चन्द्रिभजिते ह्यथ गर्भगेहे(?) ।

* * * *

Colophon:

इति प्रयोगमञ्जर्यां प्रासादलक्षणे षष्ठः पटलः ॥

End:

पञ्चविधन्तु विस्तारं विशालं विप्रतिकीर्तिताः(?) ।
वैपुल्यं सुमानञ्चैव पञ्चैते परिकीर्तिताः(?) ।
एकैकं नवभेदं स्याच्चत्वारिंशत्स्वपञ्चप(?) ॥
इत्येतद्द्वारविस्तारं कारयेन्मतिमान्नरः ।

Colophon:

इति विश्वकर्मकृतौ प्रतिद्वारप्रकरणम् ॥

* * * *

अपद्वारगेहानि दक्षिणे गमनं तथा ।
निष्कले भवेत्सूत्रं द्वारं दक्षिणमाचरेत(?) ॥

* * * *

त्र्यंशं पादुकं विद्यात्सप्तांशं कोष्ठिमोच्छ्रयम्(?) ।
उत्सेधं पञ्चभागं स्यादेकजन्मादिकोष्टिमम् ।
गलमेव प्रति तत्र प्रतिमञ्च नामतः ।
जन्मभूभागं रसकोष्टिमोच्चम् ।

R. No. **3030.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 128. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Gōvindakavirāja, Pudamari, Ganjam district.

गङ्गवंशानुचरितम्.

GAṄGAVAMŚĀNUCARITAM.

Foll. 1*a*—125*b*. Foll. 126*a*—127*b* give the contents of this work. Fol. 128 is left blank.

A historical work in prose and verse dealing with the genealogy of the kings of the Gaṅga dynasty which reigned in the Oriya country, now called Cuttack, between the 10th and 14th century: by Vāsudēvaratha-sōmayājin, also called Rājaguru of Ātrēyagōtra, whose genealogy is thus given:—

Viṣṇu
|
Śrīnivāsa
|
Gōvinda
|
Vāsudēva
(author).

Contains one to ten Paricchēdas complete.

Beginning :

श्रीनीलाचलतुङ्गशृङ्गविहरन्मातङ्गभङ्गीभृतो
दुर्दैवातपतापतप्तमनसां कादम्बिनीकन्दलः ।
पादाम्भोरुहरक्तभक्तजनताकारुण्यपाथोनिधिः
यस्सोऽयं जगदीश्वरो वितनुतां श्रेयांसि भूयांसि वः ॥

* * * *

अथ वर्णनीयं वस्तु प्रस्तौति—

गङ्गवंशावतंसानां राज्ञामाज्ञानपेक्षया ।
जातोऽस्मि गुणलोभेन कीर्तिकीर्तनकौतुकी ॥

तत्रापि वैतालिकयोर्द्वयोरपि परस्परम् ।
प्रश्नोत्तरापदेशेन मयाभिमतमुच्यते ॥

तद्यथा—

यो लेभे मगधेन्द्ररायपदवीं कर्णाटभूमीश्वरा-
ज्जित्वा संसदि वन्दिबृन्दमखिलं वादेषु वाग्डम्बरैः ।
अध्येता बिरुदावलीषु समये भोगावलीपाठकः
सञ्जातो जगदीशवीक्षणरसे विद्यार्णवः कौतुकी ॥

* * * *

विद्यार्णवः प्रियां प्रति—

आन्ध्राणामेष देशः परिचिनु सुभगे लालनापालनाभिः
येषामेषां विशेषाज्जनयति परमानन्दमानन्दराजः ।
ते चामी मीननेत्रे विपुलधनमदोन्मादमत्तैकचिन्ता
वित्ताधीशादितत्तत्सुरगणगणनां गर्वतः कुर्वते किम् ॥

इदानीमपि—

दोर्भ्यां श्रीरामराजस्य पूर्ववत्परिपालिताः ।
सानन्दा निष्प्रतिद्वन्द्वाः कालिङ्गाः सुखमासते ॥

लीलावती—

सर्वतः प्रजानां समृद्धिशीलतां निभाल्य बहुधा रामराजप्रशंसापरा भर्तारं प्रति । नाथ, एते हि ।

* * * *

Colophon :

इति श्रीराजगुरुपदवीप्रतिष्ठितवासुदेवरथसोमयाजिकृतौ गङ्गवंशानुचरिते चम्पूकाव्ये प्रथमः परिच्छेदः समाप्तः ॥

End :

महाराजः, श्रुत्वा ससन्तोषम् । विद्यार्णव के ते सोमयाजिनो यैरस्मन्म-ङ्गलादिकं सन्ततमाशास्यते ।

विद्यार्णवः, सचकितम् । महाराज गङ्गवंशनरेन्द्रकुलवर्णनपरो मादृशवन्दिजनजीवातुभूतवाग्विलासामृतस्य ग्रन्थविशेषो यैरेव प्रणीतस्तत्र च देवस्य विशेषतः कीर्तिप्रतापादयो यथामति यैरेव निर्दिष्टास्ते सोमयाजिनः किमिति महाराजस्य न लोचनगोचरीभवन्तीति विसिष्मिये ।

महाराजः, सविज्ञासम् । विद्यार्णव अपि स च ग्रन्थविशेषो भवता कर्णविषयीकृतोऽस्ति ।

*   *   *   *

अत्रेर्गोत्रे पवित्रेऽजनि जनितमखाद्विणुतः श्रीनिवासो
दीक्षावान् तत्सुतोऽभूद्रसमयकविताधामा गोविन्दनामा ।
तत्पुत्रस्सोमयाजी कविपथपथिको वासुदेवाभिधानः
काव्यं सद्गद्यपद्यं व्यधित तव मुदे गङ्गवंशानुशंसी ॥

*   *   *   *

यावज्जागर्ति शम्भोः शिरसि शशिकला चारुचूडामणित्वे
लक्ष्मीवक्षोजकुम्भे रचयति मकरीं यादवेन्द्रोऽपि यावत् ।
यावत्कैङ्कर्यकार्ये घटयति तरुणान् कामिनीनामनङ्गः
तावद्वाग्वल्लरी मे प्रसरतु परितो गङ्गवंशावलम्बा ॥

Colophon:

इति श्रीराजगुरुपदवीप्रतिष्ठितवासुदेवरथसोमयाजिकृतौ गङ्गवंशानुचरिते चम्पूकाव्ये दशमः परिच्छेदः ॥

R. No. 3031.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 164. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Tekkēmaṭham, Trichur.

न्यायचन्द्रिकाव्याख्या—न्यायप्रकाशिका.

NYĀYACANDRIKĀVYĀKHYĀ: NYĀYAPRAKĀŚIKĀ.

Fol. 164 is left blank.

A commentary on the Nyāyacandrikā which is a treatise on Advaita-Vēdānta dealing with the subjects given below: by Svarūpānanda, disciple of Gōvindānanda:—

१. ब्रह्मणि वेदान्तसमन्वयः.
२. उक्तसमन्वयविरोधपरिहारः.
३. प्रमाणप्रमेयदूषणपरिच्छेदः.

Beginning:

गणेशं लोकेशं परमपरमं पालनपरं
समस्तव्यस्तानां सुखनिलयतत्त्वैकवचसाम् ।
हरिब्रह्मेशानाः सफलकृतयो यत्करुणया
नमस्यामो देवं गिरिशगिरिजानन्दनकरम् ॥

सरोजजन्माननपद्महंसीं गिरीशकल्पद्रुमकल्पवल्लीम् ।
हरेरुरस्सागरलग्नगङ्गामुपास्महे कामपि देवतां ताम् ॥

ग्रन्थारम्भे शिष्टाचारपरम्परापरिप्रापितकर्तव्यभावं परदेवतास्तुतिनमस्काररूपं मङ्गलमनुविदधानोऽभिमतकार्यस्याप्रत्यूहपरिपूरणं करिवदनप्रसादाधीनमिति तमेव तावदाशास्ते—आविरिति । तन्महो ज्योतिः चैतन्यरूपं नोऽस्माकमाविरस्तु चित्तरङ्गे स्फुरतु ।

आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ।

इत्यलङ्कारकारैराशिषः शास्त्रमुखत्वेन प्रथममुदितत्वादाशीरेव क्रिया । त्रिविधा(न्य)न्ताभावोपलक्षितचैतन्यस्य प्रत्यग्रूपतया चित्ते स्फुरणं सदास्तीति न तत्प्रार्थयामहे . . . दत्राह—गौरीति ।

* * * *

ईश्वर एव नास्ति प्रमाणाभावादत्राह—श्रुतीति । सैव न प्रमाणं कुतस्तयेश्वरसिद्धिरित्यत्राह—स्वप्रामाण्येति ।

अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयैः ॥

तत्र न तावदन्त्यं वैदिकवेदने चाकारार्था(न्तरा)नुल्लेखनात् । नापि मध्यमम्, विदितपदपदार्थसङ्गतेर्वाक्यार्थवेदनोत्पादनात् । नाप्यादिमम्, बाधात् । वेदवाक्यमप्रमाणमनाप्तप्रणीतवाक्यत्वादुन्मत्तवाक्यवदिति चेन्न ।

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दानन्दपूज्यपादशिष्येण स्वरूपानन्दमुनीन्द्रेण विरचितायां न्यायप्रकाशिकायां समन्वयाख्यः प्रथमः परिच्छेदः ॥

End:

इदानीं प्रकरणार्थमुपसंहरति—सकलमिति । शास्त्रान्ते मङ्गलस्यावश्यकरणीयत्वात् परदेवतास्तुतिनमस्कारस्वरूपमङ्गलं कुर्वन् स्वकीयदेशप्रशस्तिं करोति परापरेति । गोकर्णमण्डनं गोकर्णक्षेत्रस्य भूषणं मणिं, गोकर्णाः सर्पाः मण्डनं यस्येति वा गोकर्णमण्डनम् । सम्प्रति स्वकृतियुवत्या पण्डितो-

दारभट्टकण्ठलग्नतया निखिलकालगोचरास्खलित . लतव्यादिमाशास्ते—विद्यासागरेति । अत्र ग्रन्थकर्ता सागरते . न ग्रन्थप्रतिपाद्यो न्यायश्चन्द्रत्वन रूपित इति रूपकालङ्कारो द्रष्टव्यः । आचन्द्रभास्कर इति वैधर्म्यालङ्कारः ॥

* * * *

येनाखण्डि सुखण्डनस्य बहुशष्टीकाच्छलेनान्यहक्
श्रीमद्भारतसागरप्रमथनेनाहारि वार्थामृतम् ।
येन व्याकरणाटवी स्फुटतरं सम्प्रापिता लीलया
विद्याब्धिं प्रणतोऽस्मि पण्डितसभाचूडामणिं श्रेयसे ॥

यद्वक्त्रचन्द्रसम्भूतवाक्पीयूषविशुद्धधीः ।
ब्रह्मा सम्प्रतिपद्ये तं विमलारण्यभास्करम् ॥

आशान्तादुदयाचलात्सुमुदिता(तां) न्यायेन्दुसच्चन्द्रिका(कां)
लोकालोककुमुद्वती(तीं) बुधजनश्रीकैरवप्रेयसी(सीम्) ।
प्रस्तौमि प्रसभं मुनीश्वरकृत(तां) श्रीशङ्कराद्याश्रिता(तां) .
तत्त्वार्थप्रतिपादने पटुतरा(रां) बुद्धेर्विशुद्ध्यै मयः(मम) ॥

R. No. 3032.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Malabar district.

पदार्थरत्नमञ्जूषा.

PADĀRTHARATNAMAÑJŪṢĀ.

Foll. 1*a*—17*b*. Foll. 17*b* and 18*a* contain two stanzas in praise of God Kṛṣṇa. Fol. 18*b* is left blank.

This is a metrical treatise dealing with the following subjects in Nyāya philosophy. By Kṛṣṇa who wrote this work at the time of king Arjuna, son of Sāraṅgadhara. The author salutes his Guru Rāma.

१. द्रव्यपदार्थनिरूपणम्.
२. गुणपदार्थनिरूपणम्.
३. कर्मपदार्थनिरूपणम्.
४. सामान्यपदार्थनिरूपणम्.
५. विशेषपदार्थनिरूपणम्.
६. समवायपदार्थनिरूपणम्.
७. अभावपदार्थनिरूपणम्.
८. मोक्षवादनिरूपणम्.

B ginning :

नमामस्संसारोरुहमिहरदुरन्तातपहरं(?)
मुहुर्ब्रह्माद्युद्यद्वदनकुमुदाह्लादचतुरम् ।

घनस्वान्तध्वान्तक्षपणनिपुणं चारुकिरणं
नृपश्चास्यं श्रीमच्चरणनखराकेशमरुणम् ॥

* * * *

भरतहृदयविज्ञं नीलसुग्रीवभृत्यं
हरिबलकृतदुःखाम्भोधिसत्सेतुबन्धम् ।
हतखररिपुवर्गं सीतयाऽलङ्कृताङ्गं
गुरुवरमहमीशं नौमि रामाभिधानम् ॥

* * * *

अवाप्तविस्तरां बालबोधवृद्धिप्रसादिनीम् ।
पदार्थरत्नमञ्जूषां कुर्वे सर्वेष्टदायिनीम् ॥
तत्र वाच्यः पदार्थः स्याद्द्विधासौ सम्प्रकीर्तितः ।
भावोऽभावश्च षोढोक्तो भावो भावविशारदैः ॥
अस्तीति विधिधीवेद्यो भावः प्रोक्तो मनीषिभिः ।
द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ॥
समवाय इति प्राहुर्भेदान् भावस्य सूरयः ॥
कारणं समवायि स्याद्द्रव्यं तन्नवधा स्मृतम् ।
क्ष्माम्बुतेजोऽनिलाकाशकालकार्या(ष्टा)त्महृद्भिदा ॥

* * * *

Colophon:

पदार्थरत्नमञ्जूषाग्रन्थे कृष्णविनिर्मिते ।
पदार्थो द्रव्यसंज्ञोऽयं समाप्तोऽतिप्रियस्सताम् ॥

End:

आकाङ्क्षादित्रयोपेताः पदार्थाः प्रतिपादिताः ।
वाक्यार्थस्मृतिसिद्धेयं मोक्षशब्दस्य मानता ॥
तस्मादकस्मान्नरपश्चवक्त्रपादाम्बुजद्वन्द्वसमाधिभाजाम् ।
वैराग्यविज्ञानसमुत्थधर्मजुषां भवेद्दुःखनिवृत्तिरन्त्या ॥
विद्यागर्वाधिरूढातिचपलरसनाग्रोग्रचित्तान्तराल-
प्रोद्यत्पाषण्डदण्डच्चादिकविविजयदुर्वादिपञ्चाननेन ।
मञ्जूषा सत्पदार्थामलमणिगणसंराजिता निर्मितेयं
कृष्णेनागर्वविद्वज्जनचरणयुगाम्भोजसेवारतेन ॥

Colophon :

पदार्थरत्नमञ्जूषाग्रन्थे कृष्णविनिर्मिते ।
निर्दिष्टो मोक्षवादोऽयं समाप्तोऽतिप्रियस्सताम् ॥
निश्शेषक्षितिपालमौलिविलसद्भास्वन्मणिश्रेणिस-
द्दीपोद्दीपितपादपद्मयुगलश्रीरेणुकासेविनि ।
पृथ्वीं शासति शार्ङ्गधारितनुसम्भूतेऽर्जुने राजनि
ग्रन्थोऽयं समकारि कृष्णकृतिना श्रीरेणुकाप्रीतये ॥

The scribe adds—

पदार्थरत्नमञ्जूषाभिधं कृष्णविनिर्मितम् ।
तर्कं रुद्राभिधः कश्चिल्लेखकापशदोऽलिखत् ॥

R. No. 3033.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 174. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. A. V. Jagga Rao Bahadūrgāru, Zamindar, Shērumahammadupuram, Chicacole.

सदाचारसङ्ग्रहः.

SADĀCĀRASAṄGRAHAḤ.

Fol. 174*b* is left blank.

The subjects dealt with in this work are apparent from the headings given below.

Contains one to eight Prakaraṇas complete and a few stanzas in the ninth Prakaraṇa :

१. दीक्षाविधानम्.
२. प्रातस्स्नानगङ्गादिमहिमवर्णनम्.
३. प्रतिमासालग्रामलक्षणम्.
४. पूजाविधानम्.
५. भगवद्भागवतधर्ममहिमवर्णनम्.
६. भक्तिविभागनाममहिमकीर्तनम्.
७. एकादशीव्रतनिर्णयः.
८. दिव्याविर्भावव्रतवर्णनम्.
९. द्वादशमासमहिमवर्णनम्.

Beginning :

श्रीमत्स्यकच्छपवराहनृसिंहकुब्ज-
. . . . . . हलधृद्बुधकल्किरूपान् ।
धृत्वा हिताय जगतः स्थितिभङ्गसर्गान्
धत्ते स मामवतु वाचमलङ्करोतु ॥

* * * *

नमामि परमात्मानं जगन्मोहनविग्रहम् ।
यस्य प्रसादलेशेन कीर्त्यते सारसङ्ग्रहः ॥
दुर्ज्ञेयत्वादनन्तत्वाद्दुष्प्रापत्वाद्विचक्षणाः ।
सर्वतस्सारमादद्युः पुष्पेभ्य इव षट्पदाः ॥

* * * *

श्रीशुकः—

कर्मणा कर्मनिर्हारो न ह्यात्यन्तिक इष्यते ।
अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनम् ॥
तपसा ब्रह्मचर्येण शमेन च दमेन च ।
त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥
देहवाग्बुद्धिजं धीराः धर्मज्ञास्सुश्रियान्विताः ।
क्षयन्त्येनो महदपि वेणुगुल्ममिवानलः ॥

* * * *

तस्माद्बाह्यप्रयत्नेन दीक्षा भागवती जनैः ।
गुरोर्भागवतात्पुण्या सर्वाभीष्टप्रदायिनी ॥
दीयते चैश्वरं ज्ञानं क्षिप्यते पापपञ्जरम् ।
प्राप्यते वैष्णवं धाम तस्माद्दीक्षोच्यते बुधैः ॥

* * * *

Colophon:

इति सदाचारसङ्ग्रहे दीक्षाविधानप्रकरणम् ॥

End:

दुष्प्रापं वैष्णवस्थानमश्वमेधशतैश्शतैः ।
हेलया प्राप्यते नूनं द्वादश्यां जागरे कृते ॥
यतः(शः) क्षरत्यसत्येन तपः क्षरति विस्मयात् ।
आयुर्विषयवादेन दानञ्च परिकीर्तनात् ॥
न्यूनाधिकं न कर्तव्यं कर्मसिद्धिमभीप्सता ।

Colophon:

इति श्रीसदाचारसङ्ग्रहे वार्षिकमहोत्सवपर्वाणि दिव्याविर्भावव्रतवर्णनं नामाष्टमं प्रकरणम् ॥

* * * *

युधिष्ठिर उवाच—

फाल्गुने मासि शुक्ले च दशम्याश्च नरेश्वर ।
आरम्भ(भ्य)स्सर्वसम्पत्स विष्णोर्यात्रामहोत्सवः ॥
कार्याः पताका विविधाः सुवस्त्रकुसुमामलाः ।
पुरशोभा च कर्तव्या मार्गशुद्धिस्तथैव च ॥

* * * *

डोलारूढं प्रपश्यन्ति कृष्णं कलिमलापहम् ।
अपराधसहस्रैस्तु मुक्तो भवति दर्शनात् ॥

R. No. 3034.

Paper. $10\frac{7}{8} \times 9\frac{3}{8}$ inches. Foll. 41. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of the Raja of Chirȧkkal, Malabar district.

महाभास्करीयव्याख्या—प्रयोगरचना.

MAHĀBHĀSKARĪYAVYĀKHYĀ : PRAYŌGARACANĀ.

Fol. 41*a* gives the contents of this work. Fol. 41*b* is left blank.

A commentary on the Mahābhāskarīya of Bhāskara, which work is described under No. 13467 of the D.C.S. MSS., Vol. XXIV.

Complete in eight Adhyāyas.

Beginning:

प्रणमत(पर)शिवमनिश तं यं(सद्) ब्रह्मवादिनः प्राहुः ।
यस्य च विभूतिरेषा क्षित्यादीनां प्रकाशाख्या ॥
क्रियते प्रयोगरचना गुरुप्रसादेन भास्करीयस्य ।
यैषा प्रदीपिकेव प्रकाशयित्री च सूक्ष्मवस्तूनि ॥
अक्षरसंज्ञा ज्ञेया क्वचित् क्वचिद्भूतसंज्ञिका ज्ञेया ।
सङ्ख्यावस्तूनि यथा सुकराण्युपपादयितुं तथा वक्ष्ये ॥

कलां बिभर्तीति देवतानमस्कारः क्रियते विघ्नोपशमनाय । जयन्ति भानोरिति ग्रहान् स्तौति तद्विषयं शास्त्रमिति प्रतिपादयितुम् । तपोभिराप्तं स्फुटतन्त्रमिति शास्त्रस्य प्रयोक्तृणाश्चाशीः स्वशास्त्रस्य तन्मूलख्यापनार्थश्च ।

नवाद्री(म्री)ति अहर्गणानयनम् । द्विषट्कं द्वादश । गतमासं चैत्रादिमासम् । द्विराशितं द्विधाकृतम् । युगाधिमासादयः सर्वे साधनविशेषाः सप्तमेऽध्याये कथ्यन्ते ते ग्राह्याः ॥

* * * *

Colophon:

इति महाभास्करीयव्याख्यायां प्रयोगरचनायां प्रथमोऽध्यायः ॥

End:

एतदुक्तं भवति—एवमक्षकथनमक्षकृतिं व्यासार्धकृतेः शोधयित्वा मूललम्बकं भवति । एवमक्षकथनम् । भास्करेणेति आचार्यपरम्परां दर्शयति । स्पष्टार्थेति ग्रन्थं स्तौति ॥

कृतामाकलितप्रायः प्रक्रियाभेदविस्तरः ।
अनुक्तं यदि वक्तव्य . . . . . तत्तदूह्यताम् ॥

Colophon:

इति महाभास्करीयव्याख्यायां प्रयोगरचनायामष्टमोऽध्यायः ॥

R. No. **3035.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 84. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. V. N. Nārāyaṇa Nambūdiri, Vaidyamaṭham, Trittala, Malabar district.

प्रक्रियामृतम्.

PRAKRIYĀMṚTAM.

Foll. 82*b* and 83*a* give the contents of this work. Foll. 83*b* and 84 are left blank.

Similar to the work described under R. No. 2541 ante. By Prasannasarasvatī.

Beginning:

अशेषजगदाधारमनाधारमुपास्महे ।
अनित्थंकारनिर्धारमैश्वरं शाश्वतं महः ॥
पाणिनीयमहाम्भोधिं मथित्वा मेधयोद्धृतम् ।
मुग्धाः पिबन्तो मोदन्तां मधुरं प्रक्रियामृतम् ॥
सञ्चूषितेऽपि चुलके विद्यासारस्वतं रसम् ।
कृत्स्नं पातुं सरस्वन्तमगस्त्यो नैव मादृशः ॥

कवीनां क्षमतां क्षोदं कोमला नः सरस्वती ।
कान्तोपभोगचिह्नानि कामिनीनां हि भूषणम् ॥
आदेशादिप्रयोगाणामनुकूलोऽक्षरक्रमः ।
पाठात्प्रत्याहृतसूत्रैश्चतुर्दशभिरुच्यते ॥

अइउण् । ऋलृक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् । इति ॥

* * * *

आधिकारिकसूत्राणि ग्रन्थगौरवभीरुणा ।
न लिख्यन्ते प्रकीर्त्यन्ते तेषामर्थास्तु वृत्तिषु ॥
. . . . हल् तदिहत्सञ्ज्ञकं भवेत् ।
संज्ञा च परिभाषा च विधिर्नियम एव च ॥
प्रतिषेधो निषेधश्च षड्विधं सूत्रलक्षणम् ।

आदिरन्त्येन सहेता ।

आदिर्वर्णस्सहान्त्येन वर्णेनेता जिघृक्षितम(:) ।
मध्यस्थानाञ्च वर्णानां स्वस्य च ग्राहको भवेत् ॥

अदर्शनं लोपः ।

अदर्शनं यद्वर्णानां तद्भवेल्लोपसंज्ञकम् ।
अदर्शनञ्चाश्रवणमनुच्चारणमित्यपि ॥
वर्णाभावस्य पर्याया नाशश्चानुपलम्भनम् ।

* * * *

Colophon:

इति तद्धितावतारः समाप्तः ॥

* * * *

इति सार्वधातुकपरिच्छेदः समाप्तः ॥

End:

चङिणौ सन्यपि परे गाङादेशो भवेदिणः ।
इङश्चेति गमिः प्रोक्तो दीर्घोऽज्झनगमां सनि ॥
. . . . . व्याकरणं वेत्ति भूयोऽप्यधिजिगांसते ।
शल इगुपधादनिटः क्सः ।

* * * *

सुललितपदन्यासा सुव्यक्तभास्व . . . .
नवरसवती नानाभावप्रदर्शनपेशला ।
विलसति सभामध्ये लास्योद्रिक्ते(व) वारविलासिनी
वशितरसिकास्थाना वाणी प्रसन्नसरस्वतेः ॥

Colophon:

इति प्रक्रियामृतं सम्पूर्णम् ॥

R. No. **3036.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 79. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Paravastu Vēṅkaṭaraṅganāthācāriyar of Vizagapatam.

हरिभक्तिकल्पलतिका, सव्याख्या.

HARIBHAKTIKALPALATIKĀ WITH COMMENTARY.

Fol. 79*b* is left blank.

A commentary on Viṣṇupuri's Haribhaktikalpalatikā, which is a treatise on Bhakti or devotion to God Viṣṇu. The author explains the importance of Bhakti and its various stages. The commentator Kṛṣṇa, son of Lōkanātha, wrote the commentary under the orders of Gōpīnātha, a descendant of Jīvadāsa family.

Complete in 14 Stábakas.

Beginning:

सर्वात्मानमशेषलोकपितरं सर्वेश्वरं शाश्वतं
यं नो वेत्ति जगन्निवासममृतं यन्माययान्धं जगत् ।
यं ज्ञात्वा कृतिनो विशन्ति परमानन्दावबोधं च यं
तं भक्तप्रियबान्धवं शरणदं वन्दे मुरद्वेषिणम् ॥

टीका ॥

प्रणम्य श्रीजगन्नाथं गोपीनाथानुशासनात् ।
लोकनाथसुतः कृष्णः लतामेनां व्यकाशयत् ॥

तत्रादौ लौकिकाविगीतशिष्टाचारानुमितकर्तव्यताकस्य परिशेषावगतसमाप्तिफलकस्य शिष्यशिक्षामात्रप्रयोजकस्य स्वयंकृतस्य मङ्गलस्य निबन्धं कुर्वन्नाह—सर्वेति । जगत् कर्तृ यं नो वेत्ति (न) जानाति । नन्वसत्त्वेनाकाशकुसुमवदज्ञानं सम्भवतीत्याशङ्क्याह—सर्वेति ।

* * * *

Colophon :

इति श्री हरिभक्तिकल्पलतिकायां सटीकायां प्रथमस्स्तबकः ॥

अथ भक्तजनप्रसादैकसाध्य(ध्या)[त्वात्]भगवद्भक्तिरिति तानुपश्लोकयति—

अशेषब्रह्माण्डप्रभुरपि विहायात्मनिलयं
सदा येषां पार्श्वे वसति वशगः कैटभरिपुः ।
विमुक्तौ मुक्ताशान्मुरहरपदाम्भोजरसिकान्
भजेऽहं भक्तांस्तान् भगवदवतारान् भवहितान् ॥

End :

श्रीमद्भागवते महामुनिकृते सत्यप्यनन्तात्मिके
सन्तो मत्कृतिमल्पिकामपि वरिष्यन्ते गुणग्राहिणः ।
अम्भोधौ परिलब्धरत्ननिवहप्राप्त्यै क एवं विधौ
यः कूपेऽपि तदेव रत्नममलं लब्ध्वाप्युपक्षिप्यते ॥

* * * *

सान्द्रानन्दमनावृतं प्रकाशममृतं तद्विष्णोः पदं विन्दन्ति । यद्वा राहोश्शिर इतिवदभेदे षष्ठी तथा च विष्णुरूपं पदमित्यर्थः ।

Colophon :

इति श्रीहरिभक्तिकल्पलतिकायां चतुर्दशस्तबकव्याख्या ॥

यो जीवदासहरिचन्दनवंशजातः पद्मालयाधवपदाम्बुजनित्यसेवी ।
अर्थव्रजाटनसमुद्यतरोमराजिः वा . . . तज्जीवसद्द . . जाति ॥

गोपीनाथस्य तस्य प्रणतिपरवशः कृष्णनामाग्निचिच्छ्री-
धीरो(याँ)ल्लोकनाथात्मज इह विवृतिं भक्तिवल्ल्या व्यतानीत् ।
भक्ताः कारुण्यतस्तां निखिलगुणसमारोपणे . . . .
निर्धूयान्तर्निधाय प्रतिसभमुररीकृत्य . . . . न्तु ॥

यावच्चन्द्रकला चकास्ति मकुटे देवस्य गौरीपतेः
यावत्खेलति कृष्णचन्द्रहृदये पद्मालया कामदा ।
. . . . यावदेष कुरुते . . . स्वयंभूविभुः
गोपीनाथ तवानुशासनमिदं तावत्क्षितौ दीव्यताम् ॥

Colophon :

समाप्तमिदं विष्णुपुरीनिर्मितश्रीहरिभक्तिकल्पलतिकाविवरणम् ॥

R. No. **3037.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Mānavikrama Anujan Kuññuṇṇi Raja of Paḍiñārekōvilagam, third Raja of Calicut.

लघुमानसम्, व्याख्यासहितम्.

LAGHUMĀNASAM WITH COMMENTARY.

Fol. 20 is left blank.

Same work as that described under R. No. 2741, wherein see for the beginning.

Wants the beginning in the Grahōdayāstamayādhyāya.

End:

विश्वेशशातकुम्भा(र्क)हस्तज्ञर्क्षाप्तजन्मना ।
कथिता सूर्यदेवेन ग्रहास्तोदयवासना ॥

इति पूर्वं मया कृता ग्रन्था अनुक्रम्यन्ते भास्कराचार्यमहा[न्तः]तन्त्र(न्त्र)विवरणं गोविन्दस्वामीयं प्रथमं व्याख्यातम्। अत्र आर्यभटीयस्य शास्त्रस्य भटप्रकाशाख्यं सङ्क्षिप्तं भाष्यं कृतम् । ततो वराहमिहिरकृता महायात्रा सङ्क्षेपतो व्याख्याता । इदं मानसाख्यं करणं मूलवासनासंहितसङ्क्षेपवासनाप्रदर्शनार्थं विस्तरेण विवृतम्। इदानीं श्रीपतिकृता जातकपद्धतिः व्याख्याता। तावद्देवी सरस्वती सू(पू)रयिष्यतीति सिद्धम् ।

इत्थं मानसकरणं व्याख्यातं सूर्यदेवसोमसुता ।
श्रीसूर्यदेवनाम्ना मातृभ्रातृप्रसादेन ॥

Colophon:

इति सूर्यदेवसोमसुद्विरचिते मानसव्याख्याने ग्रहोदयास्तमयाधिकारश्चतुर्थः ॥

॥ सम्पूर्णमिदं मानसव्याख्यानम् ॥

दशलोचनभूमयश्शराः विषया व्योमभुवः पिनाकिना ।
षडथाम्बरमद्रयोऽम्बरं मुनयो रामभुवो गजा यमौ ॥

नगाग्नयोऽर्धेन विवर्जितश्च यं त्रयोऽब्धयोऽर्धेन युता भुजङ्गमाः ।
त्रिभागयुक्ता विषयाश्शिलीमुखाः खवह्नयः षट्कगुणालवस्स्मृत ॥

त . . . स्त्रिभागोऽथ जिनाः षड्श्विनो
नभश्च विक्षेपलवास्तु दस्रभाक् ।

R. No. 3038.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 253. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Valliyat-mana, Oorakam post, Malabar district.

Bound in two volumes.

अध्वरमीमांसासूत्रार्थदीपिका—केरलीया.
ADHVARAMĪMĀṀSĀSŪTRĀRTHADĪPIKĀ : KĒRALĪYĀ.

Foll. 250 and 251 give the contents of this work. Foll. 170*b*, 252 and 253 are left blank.

A lucid commentary on the Pūrvamīmāṁsāsūtras of Jaimini. The author belongs to Malabar, but his name is not given.

Contains the first two Adhyāyas complete and 1 to 11 Adhikaraṇas in the first Pāda of the third Adhyāya.

Beginning :

चिकीर्षितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्याद्यर्थं कृतमाचार्यनत्यात्मकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निवध्नाति—जैमिनीति । व्याख्येयं सूत्रमुपन्यस्यति—अथातो धर्मजिज्ञासेति । इदं सूत्रं त्रिपदम् । अनेन सूत्रेण प्रमाणस्वरूपसाधन फलैः (साभासैः) धर्मो जिास्यत्वेन प्रतिज्ञायते । को धर्मः कथंलक्षणः । कान्यस्य साधनानि कानि साधनाभासानि किंपरश्चेति । तत्र सर्वत्र सिद्धान्तसूत्रैः प्रमाणादयः पूर्वपक्षसूत्रैश्चाभासाः कथ्यन्त इति । अत्राथशब्दः आनन्तर्यार्थकः । तथैव लोके प्रसिद्धत्वात् । ततश्च कस्मादानन्तर्यमिति विवक्षायां धर्मस्य वेदार्थत्वेन वेदाध्ययनं विना धर्मविचारस्याशक्यत्वात् अर्थाद्वेदाध्ययनादिति लभ्यत इत्याशयेनाह—अध्ययनानन्तरमिति । साङ्गवेदाध्ययनानन्तरमित्यर्थः ।

* * * *

एवं विध्यर्थवादमन्त्रनामधेयानां श्रुत्यविरुद्धस्मृतीनां निरस्तदोषाणां सदाचाराणाञ्च धर्मं प्रति प्रामाण्यमिति सिद्धम् ।

॥ अस्मिन्नधिकरण एकसूत्रम् ॥

इति विंशमर्थाधिकरणम् ।

अस्मिन्पादेऽधिकरणानि विंशतिरेकोनविंशतिर्वा सूत्राणि त्रिंशदेकोनत्रिंशद्वा पञ्चविंशतिर्वा चतुर्विंशतिर्वा ।

इति चतुर्थो नामधेयपादः ॥

अस्मिन्नध्याये एकोनपञ्चाशच्छतं वा पञ्चचत्वारिंशच्छतं वा ।

Colophon :

इति केरलीयायां सूत्रार्थदीपिकायामध्वरमीमांसायाः प्रमाणलक्षणं नाम प्रथमोऽध्यायः ॥

End :

सोऽयं प्रयोगविधिश्चतुर्थपञ्चमयोश्चिन्त्यते । तत्र चतुर्थे श्रुतिलिङ्गादिभिरेव प्रयोजकत्वांशश्चिन्त्यते । अतः पञ्चमे च श्रुत्यर्थादिभिः क्रम इति । फलस्वाम्यबोधको विधिरधिकारविधिः । यथा—यजेत स्वर्गकाम इति । फलस्वाम्यञ्च फलभोक्तृत्वम् । सोऽयमधिकारविधिश्चिन्त्यते । अतः परमुत्तरषट्केऽतिदेशचिन्तेति ।

अस्मिन्नधिकरणे षड्विंशतिसूत्राणि ।

इति केरलीयायां शाखान्तराधिकरणं समाप्तम् । अस्मिन्पादे [क]द्व्यधिकरणे त्रयस्त्रिंशत्सूत्राणि ।

इति चतुर्थो यावज्जीवपादस्समाप्तः ।

अस्मिन्नध्यायेऽष्टाचत्वारिंशदधिकरणानि । चत्वारिंशच्छतं सूत्राणि ।

Colophon :

इति केरलीयायां सूत्रार्थदीपिकायामध्वरमीमांसायां भेदलक्षणं नाम द्वितीयोऽध्यायस्समाप्तः ॥

अथ—त्रिपदम् । अनेन सूत्रेण वृत्तवर्तिष्यमाणसम्बन्धकथनपूर्वकं वक्ष्यमाणेऽर्थे श्रोतणामादरार्थं प्रतिज्ञायते । तत्राथशब्दस्य चत्वारोऽर्थाः ।

* * * *

काम्यानां प्रकरणाभावात्पाठसन्निधेश्च प्रकरणाद्दुर्बलत्वादित्याशयेनाह—सन्निधेरिति । सन्निधिलक्षणप्रकरणादाकाङ्क्षालक्षणप्रकरणं बलीय इत्यर्थः । न ह्यनाकाङ्क्षितं सन्निधिमात्रेण सम्बध्यत इति । तस्मादत्रापि संयोगतो विशे-

षात्प्रकरणं नाविशेषाच्चेति योजयितुं शक्यमिति भावः । अत्रेदमवधेयम्—देवा वै नर्चीत्यनुवाकद्वयं सामिधेनीप्रकरणं नत्वानु(नि)वीतानुवाकपर्यन्तमिति ।

इत्येकादशमि(मु)[त्यु]पवीताधिकरणं समाप्तम् ।

गुणा . . . . षट्पदम् ॥

R. No. 3039.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 152. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Śivānandayōgīśvarasvāmin of Chicacole, Vizagapatam district.

पातञ्जलयोगसूत्रम्, गूढार्थद्योतिकासहितम्.

PĀTAÑJALAYŌGASŪTRAM WITH THE COMMENTARY GŪḌHĀRTHADYŌTIKĀ.

Similar to the commentary described under No. 4351 of the D.C.S. MSS., Vol. IX: by Nārāyaṇatīrthasvāmin, disciple of Rāmagōvindatīrtha. The commentary is also called Yōgasiddhāntacandrikā.

Complete.

Beginning:

सत्यं ज्ञानमनन्तमद्वयसुखं ब्रह्मेति वेदेषु य-
श्प्रोक्तं विष्णुशिवादिभिश्च बहुभिरुपायैः(?) मतङ्गादिभिः ।
यन्मानं त्वृषिभिस्सदा गुरुकृपायोगेन यल्लभ्यते
सल्लभ्यं तमुपास्महे हृदि सदा कृष्णं जगद्धेतुकम् ॥
यं सम्प्राह पितामहोऽथ भगवांच्छेषस्स्वयं सत्तमैः
सूत्रैर्भाष्यमिषेण सर्वविदितो व्यासस्समस्तं परम् ।
यद्भाष्यं विशदीचकार भगवान् दुर्बोधभिक्षुस्तदा
दुर्बोधं हि तथा विमूढमतिभिर्गूढं रहस्यं यतः ॥
अथ सूत्रेषु गूढार्थद्योतिकां तनुते पराम् ।
वृत्तिं नारायणो भिक्षुस्सुगमं हरितुष्टये ॥
स्वातन्त्र्यसत्सत्यसुखं प्रधाने सत्त्वञ्च चिद्भेदमभेदवाक्यैः ।
व्यासो निराचष्ट स भावनाख्यं योगं स्वयं निर्मितवान् स्वसूत्रैः ॥
अपि चात्मप्रदं योगं व्याकरोन्मतिमान्मुनिः ।
भाष्यादिषु ततस्तत्राप्याचार्यप्रमुखैर्यतः ॥

अतो योगो भगवता गीतायामधिकोऽन्यतः ।
कृतश्शुकादिभिस्तस्मादत्र सन्तोऽतिसादराः ॥

* * * *

प्रेक्षावत्प्रवृत्तये विषयप्रयोजनाधिकारिसम्बन्धान् दर्शयन् प्रथमं शास्त्रस्यारम्भं प्रतिजानीते भगवान् पतञ्जलिः—अथ योगानुशासनमिति । अथशब्द आरम्भार्थः श्रुतिमात्रेण मङ्गलार्थश्च । शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यत इति न्यायेन शब्दानुपस्थितानन्तर्यार्थे कालानौचित्यात् शिष्यप्रश्नगुर्वाज्ञाश्रद्धादीनामविशेषसविचारप्रयोजकतया कस्यानन्तर्यं(र्ये) तात्पर्यमित्यवधारयितुमशक्यत्वाच्च । योगस्समाधिः । अनुशासनं हिरण्यगर्भोक्तेः अनु पश्चाच्छास्यते व्युत्पाद्यते लक्षणभेदोपायफलशासनैरनेनेति अनुशासनम् । योगस्यानुशासनं योगानुशासनम् । योगप्रतिपादकं शास्त्रमारभ्यत इत्यर्थः ।

* * * *

Colophon:

इति श्रीनारायणतीर्थकृतायां श्रीमत्पातञ्जलसाङ्ख्यप्रवचनयोगसूत्रवृत्तौ गूढार्थद्योतिकायां योगसिद्धान्तचन्द्रिकायां साधननिर्देशो नाम द्वितीयः पादस्समाप्तः ॥

* * * *

Colophon:

इति श्रीनारायणतीर्थस्वामिविरचितायां योगपातञ्जलसूत्रवृत्तौ योगचन्द्रिकाख्यायां विभूतिपादस्तृतीयः ॥

End:

यद्यपि स्वमते सुखरूपता नास्ति तथापि दुःखभोगात्यन्ताभावरूपतया पुमर्थत्वे न कोपि विवादः । तैरपि दुःखनिदानवृत्तिरूपतयाऽविद्यानाशस्यैव वस्तुतः आत्मस्वरूपस्य शास्त्रफलत्वप्रतिपादनादिति सङ्क्षेपः ॥

इतिशब्दस्सूत्रे शास्त्रसमाप्तिद्योतकः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामगोविन्दतीर्थभगवत्पूज्यपादशिष्यनारायणतीर्थस्वामिविरचितायां पातञ्जलसूत्रवृत्तौ कैवल्यपादस्समाप्तः ॥

R. No. 3040.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 56. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919-20 from a MS. of the Raja's Library, Bobbili.

कृष्णकर्णामृतम्, भगवद्भक्तिरसायनव्याख्यासहितम्.

KRṢṆAKARṆĀMṚTAM WITH THE COMMENTARY BHAGAVATBHAKTIRASĀYANA.

Fol. 56 is left blank.

Same commentary as that described under R. No. 2183 ante.

Contains the first Adhyāya only

Beginning:

वक्षोजरतबकाञ्चितावनिसुतावल्लीमतल्लीदृढा-
श्लिष्टं स्कन्दमहोन्न(तं) निजभुजाशाखाग्रहस्ताङ्कुरम् ।
सत्त्वामोदरसप्रसादसुमनोनित्याश्रयं सर्वदा
भक्तारामसुरद्रुमं रघुपतिं श्रीकृष्णरूपं भजे ॥

* * * *

श्रीमांस्त्रैलिङ्गदेशे विलसति विबुधश्रेणिकोटीरकोटी-
कोटीमाणिक्यभूतागणितगुणगणाखण्डपाण्डित्यशौण्डः ।
धीरश्शाण्डिल्यगोत्रस्सकलकविकुलाह्लादिसूक्तिप्रवीणो
वीणोदाहार्यविद्याविवरणनिपुणो रामचन्द्रो बुधेन्द्रः ॥
वेदान्तोदन्तचिन्तामतनुत चतुरेणान्तरेण कुतर्कं
तर्कश्चातर्कयद्यः फणिपतिवचसां सारमाधत्त योगे ।
योगे यस्साङ्ख्यसङ्ख्यासमग्रविवरणे तत्त्वतस्तन्त्रविद्या
विद्यामन्याश्च धीशो जयति सुरुचिराद(व)श्चवंशाम्बुराशेः ॥
सोऽहं मोहनबिल्वमङ्गलकविर्वेश्यानुरक्तस्तया-
वज्ञातोऽननुरूपकार्यवशतो निर्विद्य वैराग्यभाक् ।
चक्रे सोमगिरिश्शुकाह्वयमुनिश्श्रीकृष्णकर्णामृत-
स्तोत्रं भक्तिरसायनाख्यमिह तद्व्याख्यानमाख्यापये ॥
व्याख्यातमप्यधः पूर्वैर्व्याकरोमि मुदे सताम् ।
नूत्नैरस्तोकलीलानामनुरागो हि जायते ॥
व्याकुर्वन्ति निबन्धगौरवभयान्नैव स्फुटं युक्तिभिः
ये ते दैत्यजनप्रतारणपरा का नैपुणी वा ततः ।

वैखर्या वचसां कवीशहृदयं प्रख्यापयन्नन्वय-
द्वारैवाहमिहाखिलं प्रविवृणोम्युक्तिव्रजोज्जृम्भितम् ॥

अथ खल्वत्रभवान् सकलकलाकलापवाग्विलासवाचस्पतिः भगवद्भक्ताग्रगण्यः कृष्णलीलाशुकमुनिर्नाम महाकविः

* * * *

विशिष्टेष्टदेवतागुरुजनानुस्मरणानुरूपं मङ्गलमादौ निबध्नाति—चिन्तामणिरिति ।

चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे .... लीलास्वयंवररसं लभते जयश्रीः ॥

मे मम गुरु हितोपदेशिता चिन्तामणिर्नाम । पूर्वं स्वेनैवोपभो(भु)क्ता काचिद्वाराङ्गना जयति सर्वोत्कृष्टेन वर्तते । अथवा चिन्तामणिरिति सोमगिरेर्विशेषणम् । चिन्तामणिवदभीष्टप्रदातृत्वात् । चिन्तामणिर्मे गुरुः महावाक्योपदेष्टा । गृणात्युपदिशति गुरुरिति विग्रहः । गुरुसंप्रदायप्रवर्तकः परमहंसपरिव्राजकाचार्यः सोऽपि जयति ॥

* * * *

Colophon:

इति श्रीमद्रघुनन्दनचरणारविन्दमकरन्दास्वादनकन्दलितसारस्वतेन नित्यनिर्मलाचार्यपरिपूतेनाखण्डतपःप्रचण्डमुनिप्रकाण्डमण्डलेश्वरशाण्डिल्यमुनिगोत्रावतंस .. भगवद्भक्तिरसायनसमाख्यायां प्रथमोऽध्यायः ॥

R. No. **3041.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 169. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of Śrīmān Nīlamaṇi Parīkṣa, Parlakimedi.

भक्तिरसामृतसिन्धुः.

BHAKTIRASĀMṚTASINDHUḤ.

Fol. 169 contains the contents of this work.

A work describing the four varieties of Bhakti or devotion to Lord Kṛṣṇa in accordance with the doctrines of the Caitanya school: by Rūpagōsvāmin.

Contains one to four Vibhāgas complete.

Beginning:

अखिलरसामृतमूर्तिः प्रसृमररुचिरुद्धतारकापालिः ।
कलितश्यामाललितो राधाप्रेयान्विधुर्जयति ॥

हृदि यस्य प्रेरणया प्रवर्तितोऽहं वराहरूपोऽपि ।
तस्य हरेः पदकमलं वन्दे चैतन्यदेवस्य ॥
विश्राममन्दिरतया तस्य सनातनतनोर्मदीयस्य ।
भक्तिरसामृतसिन्धुर्भवतु सदायं प्रमोदाय ॥
भक्तिरसामृतसिन्धौ चरतः परिभूतकालजालभयान् ।
भक्तमकरानुशीलितमुक्तिनदीकान्नमस्यामि ॥

* * * *

भक्तिरसस्य प्रस्तुतिरखिलजगन्मङ्गलप्रसङ्गस्य ।
अज्ञेनापि मयास्य क्रियते सुहृदां प्रमोदाय ॥
एतस्य भगवद्भक्तिरसामृतपयोनिधेः ।
चत्वारः खलु वक्ष्यन्ते भागाः पूर्वादयः क्रमात् ॥
ततः पूर्वविभागेऽस्मिन् भक्तिभेदनिरूपके ।
अनुक्रमेण वक्तव्यं लहरीणां चतुष्टयम् ॥
आद्या सामान्यभक्त्याढ्या द्वितीया साधनाञ्चिता ।
भावाश्रिता तृतीयात्र तुर्या प्रेमनिरूपिका ॥
तत्रादौ सुष्ठु वैशिष्ट्यमस्याः कथयितुं स्फुटम् ।
लक्षणं क्रियते भक्तेरुत्तमायास्सतां मतम् ॥

* * * *

Colophon :

इति श्रीहरिभक्तिरसामृतसिन्धौ रसोपयोगिस्थायिभावोपादानं नाम पूर्वभागः प्रथमः ॥

End :

ग्रन्थस्य गौरवभयादस्या भक्तिरसश्रियः ।
समाहतिस्समासेन मया सेयं विनिर्मिता ॥
गोपालरूपशोभां दधदपि रघुनाथभावविस्तारी ।
तुष्यतु सनातनोऽस्मिन्नुत्तर[वि]भागे रसामृताम्भोधेः ॥

Colophon :

इति श्रीहरिभक्तिरसामृतसिन्धौ गौणभक्तिरसनिरूपणं नाम चतुर्थो विभागः ॥

रामाङ्गशक्रगणिते शाके गोकुलमधिष्ठितेनायम् ।
भक्तिरसामृतसिन्धुर्विटङ्कितः क्षुद्ररूपेण ॥

* * * *

शाके रामशराङ्गभूपरिमिते मासीषसंज्ञे भृगो-
र्वारे पञ्चजभे विरोधिकृति सत्षष्ठ्यां तिथौ वत्सरे ।
श्रीरूपेण विनिर्मितं समलिखद्विज्ञानहीनो . हंसा ?
शत्रोर्भक्तिरसामृतामृतनिधिं सध्यानदासाभिधः ॥

R. No. 3042.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 9. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Trittala, Malabar district.

मत्स्यप्रबन्धः.

MATSYAPRABHANDHAḤ.

A work in verse and prose describing the vanquishment of the demon Hayagrīva by God Viṣṇu in His incarnation as Matsya.

Complete.

Beginning:

किं मत्स्याकृतिमाश्रितोऽसि दयिते त्वन्नेत्रमैत्रीरसात्
किन्ते तोयरतिस्सुखाय भवती तत्सम्भवेत्यादरः ।
शोच्या नन्वनिमेषता तव कथं त्वां पश्यतो नो भवे-
दित्थं सल्लपितं मुकुन्दरमयोर्मुग्धं शिवायास्तु वः ॥

निगमहरणगर्वाध्मातदुर्वारदैत्यक्षपणनिपुणघोरप्रक्रमं त्वत्क्रु(चक्र)पाणेः ।
वपुरधिकविशालव्यायनन्त्रायतां तत्प्रलयजलधिलीलाशीकरं शाफरं वः ॥

पुरा विश्वप्लाविन्युपनमति कल्पान्तसमये
पुरस्तादुत्तिष्ठन्नपर इव संवर्तसमयः ।
घनध्वानोदग्रस्त्रिभुवनविनाशं प्रकटयन्
हयग्रीवो नाम त्रिदशकुलवैरी समुदभूत् ॥

स खलु समरधरणीषु परिमथितसकलसुरकुलमहिमा निजतेजसा दहनस्यापि दाहदायी तपनस्यापि तापहेतुः शतमन्युमपि गतमन्युमादधानो दण्डधरेऽपि दण्डमर्पयन्

* * * *

त्रयीमयीं सरस्वतीं बलादपजहार ।

End:

उद्बुद्धेऽपि च सुतवत्किल जगन्निर्माणकर्माण्यपि
प्रारब्धुं विगतोद्यमे कमलजे वेदव्यपायाकुले ।
तूष्णीके सति वैष्णवं खलु महस्तन्मत्स्यरूपं तदा
गत्वा तन्मुखपङ्कजभ्रमरितां वेदत्रयीमातनोत् ॥

इत्थं बुधाशयशयोऽपि जलाशयान्तः स्वैरं विहृत्य स विहाय विसाररूपम् ।
अम्भोधिचङ्क्रमणवासनयेव भूयोऽप्यम्भोधिमेव स पयोमयमाजगाहे ॥

R. No. 3043.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 31. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ Kūḍalūr-mana, Nareri, Tritala, Malabar district.

कोकसन्देशः.

KŌKASANDĒŚAḤ.

A love-message written after the manner of Mēghasandēśa of Kālidāsa: by Viṣṇutrāta of Rambhāvihārakṣētra, now called Vāḻappaḻḻimana in the Cochin State.

Complete.

Beginning:

श्रीमान् कोऽपि क्षितिपतिसुतो यौवराज्याभिषिक्तः
शश्वद्रम्ये निजपुरवरे सर्वसंपत्समृद्धे ।
सौधोत्सङ्गे प्रणयविवशस्वान्तया कान्तयामा
रेमे स्वैरं स्मरपरवशोऽक्षीणलावण्यवेण्या ॥

काले तस्मिन्निजकुशलतां सर्वतो दर्शयिष्णु-
र्दूरे त्वो(त्व)स्मै समुपहृतवान्मान्त्रिकः कोऽपि यन्त्रम् ।
यस्मिन् भक्त्या शिरसि निहिते स्वादधिष्ठीयमाना-
द्देशाद्दूरे वयमिति नृणां चित्तदेशेऽवभाति ॥

* * * *

मन्दीभूतैर्झटिति करणै(रक्षमस्तत्र [1] गन्तुं)
सोऽयं तत्र क्षणमिव वसन् कृत्यमूढान्तरात्मा ।

---

[1] स्पन्दितुं चाप्यशक्तः—इति पाठान्तरम्.

सीताजानिः स्वयमिव हनूमन्तमत्यन्तमार्यं
कोकं दृष्ट्वा कमपि ललितं सन्दिदेशैनमेवम् ॥

* * * *

पुञ्जीभूतैः कनकवरणोद्दामकान्तिप्ररोहै-
रालिप्तत्वाद् द्विगुणिततरस्वीयरूपप्रभेण ।
एषा तावद्विहग भवता विश्यतां राजधानी
स्वान्तर्धाम स्फुरति दनुजारातिधामोज्ज्वलश्रीः ।
आसीद्विप्रो हरिनतिरतः कोऽपि रम्भाविहारे
विष्णुत्रातो द्विजपरिवृढः ब्रह्मदत्तैकमित्रः ।
तेनैतस्मिन् सपदि रचिते कोकसन्देशकाव्ये
पूर्णस्तावत्समजनि रसैश्चाप्यसौ पूर्वभागः ॥

End:

इत्थं प्रोक्तं सकलमपि मे वाक्यमुक्त्वा प्रियां तां
लब्ध्वा तस्याः पुनरनुमतिं सप्रियस्त्वं यथेष्टम् ।
इष्टान् देशान् भुवनमहितान् प्राप्य तत्रेक्षकाणां
मोदं तन्वन् विचर विहगश्रेष्ठ विश्वाधिकश्रीः ॥

Colophon:

इति कोकसन्देशे उत्तरभागः ॥

The scribe adds—

रम्भाविहारभूदेवरचितं रुचिरं क्षणात् ।
अलिखत्कोकसन्देशं विप्रो नारायणाभिधः ॥

R. No. **3044.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 38. Lines, 20 in a page. **Dēvanāgarī.** Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Gōpīnāthānanda Śarma, Parlakimedi.

(*a*) **पथ्यापथ्यविवेकः.**

PATHYĀPATHYAVIVĒKAḤ.

Foll. 1*a*—31*b*.

Similar to the work described under No. 13169 of the **D.C.S. MSS.,** Vol. XXIII.

Beginning:

दृष्ट्वा रजस्सत्त्वतमांसि विश्वं निर्माति पाति क्षयति स्वयं यः ।
इन्द्रादिबृन्दारकबृन्दवन्द्यः पायादपायाम्बनया स ईशः(?) ॥
आलोक्य वैद्यतन्त्राणि यत्नादेष निबध्यते ।
व्याधितानां चिकित्सासु पथ्यापथ्यविनिश्चयः ॥
भिषक् सर्वेषु रोगेषु निर्दिष्टानि यथायथम् ।
निदानापथ्यपथ्यानि त्रीणि यत्नाद्विचिन्तयेत् ॥

End:

हेमचूर्णश्च वर्गोऽयं यथावस्थं यथाविषम् ।
विषरोगेषु सर्वेषु प्रयोक्तव्यो विजानता ॥
क्रोधं विरुद्धाद्यशनं व्यवायताम्बूलमायासमपि प्रवाताः(तम्) ।
अम्लश्च सर्वं लवणं प(क)टूनि स्वेदश्च नानाविधमासुता च(?) ।
निद्रां भयं धूमविधिं क्षुधाश्च विषातुरो नैव भवे(जे)त्कदाचित् ॥

Colophon:

इति विषरोगपथ्यापथ्याधिकारः ॥

(*b*) **नाडीपरीक्षालक्षणम्.**

NĀḌĪPARĪKṢĀLAKṢAṆAM.

Foll. 32*a*—37*a*. Foll. 37*b* and 38 are left blank.

Similar to the text described under No. 13152 of the D.C.S. MSS., Vol. XXIII.

Beginning:

प्रणम्य जगदुत्पत्तिस्थितिसंहारकारणम् ।
स्वर्गापवर्गयोर्द्वारं त्रैलोक्यशरणं शिवम् ॥
आदौ सर्वेषु रोगेषु नाडीजिह्वाथमूत्रयोः ।
परीक्षां कारयेद्वैद्यः पश्चाद्रोगं चिकित्सकः ॥
नाडीजिह्वाथमूत्राणां लवणं यो न विद्यते ।
मारयित्वाशु जन्तूनां सो वै धनयशो लभेत् ॥

* * * *

पुंसां दक्षिणपाणिश्च स्त्रियो वामाङ्ग उच्यते ।
कराङ्गुष्ठस्य मूले तु त्रिरङ्गुलि प्रशस्यते ॥

End:

यदि मूत्रगते तैलं त्रिशूलछत्रयोर्यदि ।
कार्मुकं कमठं भेकं हंससाध्ये गतिर्भवेत् ॥
प्रवेशमपि दिग्भागे पश्चिमे वा यथोत्तरे ।
रोगी रोगविनिर्मुक्तः कालज्ञानेन कथ्यते ॥

Colophon:

इति परीक्षालक्षणं समाप्तम् ॥

R. No. 3045.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḷalūr-mana, Nareri, Trittala, Malabar district.

भीमपराक्रमम्.

BHĪMAPARĀKRAMAM.

A drama having for its plot the vanquishment and death of Jarāsandha by Bhīma in a wrestling match during the Rājasūya sacrifice performed by Yudhiṣṭhira.

Beginning:

गौरीबाहुलताशङ्खवलयांशुभिरञ्जसा ।
कृष्णोऽप्यर्जुनतां नीतः कण्ठो भीमस्य पातु वः ॥
(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

सूत्र—(सहर्षम्) अयमभ्यु(प्य)पूर्वाभ्युदयवृत्तान्तः प्राणसमायै समुपहर्तव्यः । यतः—

उत्तमस्य परा काष्ठा सूक्तिलाभो हि तद्विदाम् ।
सुहृद्भ्यस्संविभागेन स सहस्रगुणायते ॥

(परिक्रम्य । नेपथ्यं प्रति ।) आर्ये यदि कल्याणाकर्णनकुतूहलि ते श्रवणयुगलं तदितस्तावदागम्यताम् ।

(प्रविश्य)

नटी—एतह्मि अवहिदा । अय्यो कहेहिदु ।

सूत्र—आर्ये ननु स्मरसि सिद्धार्थकनाम्ना त्रैकाल्य(ल्य)विदुषा कार्तान्तिकेन मां प्रत्यादिष्टम् ।

करिष्यते भीमपराक्रमाख्यं काव्यं शतानन्दकवीन्द्रसूनुः ।
मनीषिणां संसदि तत्प्रयोगात्त्वं सम्पदां धाम करिष्यसीति ॥

* * * *

सूत्र—(विलोक्य) आर्ये एष खलु भरतकुलधुरन्धरस्य धर्मराजस्य पुरोहितो धौम्यो मद्वचनं श्लाघयन्नित एव अभिवर्तते । तदावामनन्तरकरणीयेषु भरतान्नियोक्तुमितो गच्छावः ।

(इति निष्क्रान्तौ)

स्थापना ।

End:

तथापीदमस्तु भरतवाक्यम्—

वंशोदग्रे गुणिनि रमतां रत्नगर्भा नरेन्द्रे
शश्वच्छम्भोश्चरणकमले भक्तिमानस्तु लोकः ।
सार्धं मित्रैरविरतरसास्वादय(व)न्तः कवीनां
वाणीगुम्भात्सततसुखिनस्सज्जनास्सन्तु कामम् ॥
(इति निष्क्रान्तास्सर्वे) ॥

Colophon:

इति भीमपराक्रमं नाम नाटकं समाप्तम् ॥

R. No. 3046.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdiri of Kūḍalūr-mana, Nareri, Trittala, Malabar district.

तत्त्वोपदेशः.

TATTVŌPADĒŚAḤ.

Fol. 16*b* is left blank.

The subjects dealt with herein are apparent from the headings of the Adhyāyas given below :—

१. समष्टितत्त्वनिरूपणम्.
२. व्यष्टितत्त्वनिरूपणम्.
३. योगलक्षणम्.
४. अद्वैतमतनिरूपणम्.
५. कणादादिमतनिरूपणम्.
६. शैवमतनिरूपणम्.

Complete in six Adhyāyas.

Beginning:

वेदान्तैरसच्चिदानन्दस्वरूपमिति कीर्तितम् ।
व्याप्तमाकाशवत्सूक्ष्मं प्रत्यग्ज्योतिः प्रकाशताम् ॥
मायाशबलितं ब्रह्म परमात्मेति कीर्त्यते ।
गुणत्रयात्मिका माया गुणास्सत्त्वं रजस्तमः ॥
* * * *
इति पौराणिकाः प्राहुस्त्रिंशत्तत्त्वान्यनुक्रमात् ।
बिन्दुनादौ शक्तिशिवौ शान्तातीतौ ततः परम् ॥
षट्त्रिंशत्तत्त्वमावृत्य पूर्वं पूर्वमवस्थितम् ।
इत्थं शिवागमार्थज्ञैराचार्यैरुपदिश्यते ॥

Colophon:

इति तत्त्वोपदेशे प्रथमोऽध्यायः समाप्तः ॥
समष्टिरूपं निर्दिष्टं व्यष्टिरूपं निरूप्यते ।
भूम्यां वर्षनिमित्तायां भवन्त्योषधयः कलाः ॥

End:

विश्वाधिको रुद्र इति व्याचष्टे स्पष्टमाप्तवत् ॥
प्रत्यभिज्ञामहाम्बोधेर्ज्ञानामृतमुपाहृतम् ।
पिबन्तं(तां) परमां सिद्धिं लभते शिवयोगिनाम् ॥
तत्त्वोपदेशान् शुकवज्जडचित्तोऽपि यः पठत् ।
सतां सभां प्रविष्टोऽसौ सर्वज्ञ इति भाष्यते ॥

Colophon:

तत्त्वोपशे षष्ठोऽध्यायस्समाप्तः ॥

R. No. **3047.**

Paper. $10\frac{7}{8} \times 8\frac{5}{8}$ inches. Foll. 100. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Trittala, Malabar district.

आश्वलायनगृह्यसूत्रम्, व्याख्यासहितम्.

ĀŚVALĀYANAGṚHYASŪTRAM WITH COMMENTARY.

Fol. 100 is left blank.

Similar to the commentary described under R. No. 1088 ante. Breaks off in the fourth Adhyāya.

Beginning:

नमस्कृत्य सरस्वत्यै गुरुभ्यश्चैव सर्वशः ।
शौनकन्तु विशेषेण प्रणम्य प्रयतश्शुचिः ॥
अर्थविस्मरणार्थस्तु . . . . . यत्नतः ।
अर्थप्रयत्नमालम्ब्य प्रयतिष्ये यथार्थतः ॥
गृह्याणां यानि सूत्राणि तेषामादौ यथार्थतः ।
ग्रहणं वक्ष्यते यत्त् तदन्तं सूत्रमुच्यते ॥

उक्तानि वैतानिकानि गृह्याणि वक्ष्यामः ॥

तत्रेदं प्रतिज्ञासूत्रम् । उत्तरस्य सूत्रस्य विधिर्विस्तरेण वक्ष्यते—गृह्याणीति । गृहे भवानि यानि कर्माणि तानि गृह्याणि । तत्रायं गृहशब्दः त्रिष्वर्थेषु वर्तते । यथा तावत् भार्यायां शालायामाश्रम इति ।

* * * *

Colophon:

इत्याश्वलायनगृह्यव्याख्यायां प्रथमोऽध्यायः ॥

End:

यत्र बाणाः जपेत् ॥ (१९)

यत्र बाणाः इत्येतामृचमभियुध्यमानेषु जपति पुरोहितात् शिष्याद्वा अथवा न स्वयं जपेत् । तमेव क्षत्रियं शिष्यात् सन्दिशेदित्यर्थः ।

* * * *

Colophon:

इत्याश्वलायनगृह्यव्याख्यायां तृतीयोऽध्यायः समाप्तः ॥

आहिताग्निश्चेदुपतपेत् ॥

इति । व्याधिनोपपीडित उपतप्त इत्युच्यते । प्राच्यां वस्येत् गच्छेदित्यर्थः । कस्मात्

ग्रामकामा—दाहरन्ति ॥

केचित् ब्रह्मवादिनः यस्मात् ग्रामकामाः अग्नयः तस्मादसावुद्वस्येदिति । तस्मादाशंसन्ते ब्रह्मवादिनः । किमिति ।

* * * *

इष्टान्यमुत्सृजेत् ॥ (३७)

यदिह चेदनेककर्मणः पुनरर्थस्स्यात् । अथ चेन्नार्थी नोत्सृजेत् ।

नानुत्सृष्टस्स्यात् ॥ (३८)

न खल्वनुत्सृष्टस्स्यात् । सकृदुत्सर्गोऽवश्यकर्तव्यः । सकृदुत्सर्गम् ॥

R. No. **3048.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 76. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Tippan Nambūdirippāḍ of Ponnūrkoṭṭa-mana, Perumbāvūr post, Travancore State.

तपतीसंवरणव्याख्या.

TAPATĪSAṀVARAṆAVYĀKHYĀ.

A commentary on the Tapatīsaṁvaraṇa of Kulaśēkharavarman, which work is described under No. 12520 of the D.C.S. MSS., Vol. XXI.

Contains one to three Acts only; but wants the beginning in the first Act.

Beginning:

अथाहं केरलभूभृत्कृतेऽपि नाटके स्वाविर्भावं प्रयो . . . . मि · कथमिति चेत्—

भूभृत्स्वयं भूमिकया निरेत्य निजामलङ्कृत्य तनुं मनस्वी ।

यद्दर्शयित्वेति विनिश्चितात्मा प्रयोगमार्गं रहसि श्रुमीमा(तीना)म्(?) ॥

तेन मया महीसुरेण तत्सहृदयेन पिष्टपेषणं क्रियते । तथापि—

म(हा)कवेरभिप्रायं ज्ञातुमेतत्कृतं मया ।

तत्प्रदर्शितमार्गेण विच्छिन्नेऽस्योपदेष्टरि ॥

नाटक . . . नायकलक्षणं सर्वं दशरूपके द्रष्टव्यम् । अत्र तन्मात्रमेव दर्शयामि । अत्रादौ संवरणनाम्नि नाटके विदूषकस्थायीभावप्रयोगमार्गौ दृश्येते ।

* * * *

Colophon:

एवं प्रथमाङ्कस्थायीभावः । समाप्तः प्रथमाङ्कः । प्रयोगमार्गश्च दर्शितः ॥

End:

अथ नायिका सखीभिस्सार्धं तदलङ्करणाय निष्क्रान्ता भवेत् । एवं तृतीयाङ्कस्थायीभावः प्रयोगमार्गश्च दर्शितः । अतः परं ध्वनिर्न स्यात् षष्ठे

नायकस्य मेनकारूपधारिण्या नायिकायाः दर्शने किमपि ध्वनिः दृश्यते ।
इति निष्क्रान्ताः सर्वे ॥
॥ तृतीयोऽङ्कः ॥

R. No. 3049.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 219. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Agadācārya of Mandasa, Ganjam district.

कालसारः.

KĀLASĀRAḤ.

Fol. 219*b* is left blank.

Deals with the determination of certain ritualistic important days for the observence of several kinds of Vratas, Śrāddha ceremonies, fire-worship, etc. This forms part of the Gadādharapaddhati which work was edited by Sadāśivamiśra in the Bibliotheca Indica. By Gadādhara-sudhī, son of Jānakī and Nīlāmbara who was the elder brother of Yameśvara Yajvan and younger brother of Haladhara, sons of Bṛhat-paṇḍita Kṛṣṇa.

Beginning:

अशेषवर्णाश्रमधर्मवृद्धये शरीरमात्रस्य च शीघ्रमुक्तये ।
निजालये श्रीपुरुषोत्तमाह्वये (दधद्वपुर्दारुमयं) मद(ह:)श्रये ॥
रचितजननिकायाभीष्टदानैकदक्षः क्षपयतु विमलाया दीनद(प)क्षः कटाक्षः ।
स्मृतिनिकरगभीराम्भोधिम(ध्यार्थ)रत्नानयनकृतविधाने नु ने(नूत्नयत्ने)ऽन्तरायम् ॥

कृष्णा(त्)कौशिकवाजपेय(यि)तुलसीवंश्याद्बृहत्पण्डितान्(त्)
नीतिग्रन्थकृतिः (तस्स)रायगुरुरित्यासीद्वदान्याग्रणीः ।
पुत्रः श्री(शा)रदवाजपेयमखकृद्विद्वान् हरे[:] कृष्णभू-
नाथश्रीमहिषीगुरुर्हलधराभिख्योऽग्रजो (ग्रामकृत्) ॥

वेदान्तादिसमस्तशास्त्रनिलयो नीलाम्बराख्योऽनुज-
स्तस्य स्मार्तवरोऽतिदे(दै)वविदभूत्साहित्यविद्यार्णवः ।
सद्वैयाकरणश्च नीतिनिपुणः श्रीनीलशैलेशितुः
मञ्चस्नानमुखोत्सवानवयवस्तोत्रश्च यो वर्णये(य)त् ॥

* * *

यो नीलाम्बरराज(गुर्वभिध)या ख्यातिः(तः) क्षितौ श्रीहरे-
कृष्णाख्यः क्षितिपेश्वरेभपतिना शिष्येण सम्मानितः ।

सौवर्णेतु(डु)चतुष्टयाच्युतपदाम्भोजाङ्कक्रूष्णातप-
प्रा(त्रा)णेन द्विपचामरप्रभृतिभिश्चार्मि(र्मि) यचिह्नैः परैः ॥
यज्वा यश्वरमो यमी(मे)श्वर इति भ्राता बृहत्पण्डितः
तं नीलाम्बरनामकञ्च पितरं श्रीजानकीं मातरम् ।
नत्वा राजगुरुर्गदाधरसुधीस्तं कालसाराभिधं
ग्रन्थं प्रारभते विलोक्य यमिमं निस्संशयाः स्युर्जनाः ॥

कालो द्विविधः नित्यो जन्यश्चेति । तत्र काल्यकालापरनामा ईश्वर एव नित्यकालः । स विश्वकृद्विश्ववेदात्मा योऽभिज्ञः कालकालो गुणी सर्वविद्यः प्रधानक्षेत्रमिति । निर्गुणः संसारमोहस्थितिबन्धहेतुरिति श्रुतेः ॥

कौर्मेऽपि—

अनादिरेष भगवान् कालोऽनन्तोऽक्षरः परः ।
सर्वगत्वात्स्वतन्त्रत्वात्सर्वात्मत्वान्महेश्वरः ॥

End:

कुतपलक्षणं वायवीये—

दिवसस्याष्टमे भागे मन्दीभवति भास्करः ।
स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम् ॥ इति ।
तथाच तन्मुहूर्तद्वयव्यापिनी तिथि रेकोद्दिष्टे ग्राह्यैव ॥

R. No. 3050.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 100. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of Śrīmān Jugulakiśōra Pāṇigrāhī, B.A., Parlakimedi.

(*a*) प्रणामस्मरणपद्धतिः.

PRAṆĀMASMARAṆAPADDHATIḤ.

Foll. 1*a*—62*a*. Fol. 62*b* is left blank.

On the manner of meditating and saluting Lord Kṛṣṇa preliminary to His ceremonial worship in accordance with the views of the Caitanya school; by Gōpālaguru.

Contains Praṇāma-and Smaraṇa-paddhatis.

Complete.

Beginning :

वन्देऽहं श्रीगुरुश्रीयुतपदकमलं श्रीगुरून्वैष्णवांश्च
श्रीरूपं साग्रजातं सहगणरघुनाथान्वितं तं सजीवम् ।
साद्वैतं सावधूतं परिजनसहितं कृष्णचैतन्यचन्द्रं
श्रीराधाकृष्णपादान् सहगणललितान् श्रीविशाखान्वितांश्च ॥

* * * *

अथ प्रणमेत् ।

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

* * * *

अथ परमगुर्वादीन्प्रणमेत् ।

योऽस्मत्प्रभुः करुणया प्रकटीचकार राधाव्रजेन्द्रसुतयो रसतत्त्ववार्ताम् ।
लोकेशशेषशितिकण्ठमुखैरगम्यां तं श्रद्धया परमपूर्वगुरुं नतोऽस्मि ॥

* * * *

अथ प्रणालीक्रमेण प्रणमेत् ।

अथ ध्यानम् ।

* * * *

वन्दे भक्त्या तटविलसदमरसरिच्छ्रीलवद्वीपनाम
क्रीडत्सर्वस्वगोष्ठी प्रभुयुगसहिता श्रीलचैतन्यचन्द्रम् ।
श्रीमद्वृन्दावनगिरिवरे शेषकुण्डादियुक्तं
श्रीमद्धाम व्रजाख्यं सहगणविहरच्छ्रीलराधाच्युतञ्च ॥

Colophon :

इति प्रणामपद्धतिः ॥

अथ स्मरणपद्धतिः ।

आसनोपरि उपविश्य । सिद्धदेहं भावयित्वा । श्रीगुरुभ्यो नमः । श्रीपरमगुरुभ्यो नमः। श्रीपरापरगुरुभ्यो नमः । ततः शङ्खप्रक्षालनम्। शङ्खे जलं पूरयित्वा शङ्खे तीर्थावगाहनम् ।

End :

एतेषु समयेष्वेव या या लीला पुरोहिताः ।
तान्तामेव यथाकालं संस्मरेत्साधकाङ्कः ॥

इति स्मरणपद्धतिस्समाप्ता ॥

Colophon :

इति श्रीगोपालगुरुणा विरचिता स्मरणपद्धतिस्समाप्ता॥

(*b*) चैतन्यचन्द्रामृतम्.

CAITANYACANDRĀMṚTAM.

Foll. 63*a*—75*b*. Fol. 76 is left blank.

A hymn to Caitanya describing his attributes: by Prabōdhānanda-sarasvatī. Same work as that described under No. 3167 of the R. L. Mitra's Catalogue, Vol. IX, Part I.

Complete.

Beginning:

स्तुमस्तं चैतन्याकृतिमतिविपर्याद(स)परमा-
द्भुतौदार्यं वर्यं व्रजपतिकुमारं रसयितुम् ।
विशुद्धस्वप्रेमोन्मदमधुरपीयूषलहरीं
प्रदातुश्चान्येभ्यः परपदनवद्वीपप्रकटम् ॥

सर्वैराम्नायचूडामणिभिरपि न संलक्ष्यते यस्य रूपं
श्रीशब्रह्माद्यगम्या सुमधुरपदवी कापि यस्यास्ति रस्या ।
येनाकस्माज्जगच्छ्रीहरिरसमदिरामत्तमेतद्व्यधायि
श्रीमच्चैतन्यचन्द्रः स किमु मम गिरां गोचरश्चेति सो वा ॥

धर्मे निष्ठां दधदनुपमां विष्णुभक्तिं गरिष्ठां
संबिभ्राणो दधदहह हृत्तिष्ठतीवाश्मसारम् ।
नीचो गोष्ठादपि जगदहो प्लावयत्यश्रुपूरैः
को वा जानात्यहह गहनं हेमगौराङ्गरङ्गम् ॥

End:

सर्वसाधनहीनोऽपि परमाश्चर्यवैभवे ।
गौराङ्गे न्यस्तभावो यः सर्वदा पूर्ण एव सः ॥

ब्रह्मेशादिमहाश्चर्यमहिमापि महाप्रभुः ।
मुग्धो बालोदितं श्रुत्वा स्निग्धोऽवश्यं भविष्यति ॥

दृष्टं न शास्त्रं गुरवो न पृष्टाः विवेचितं नापि बुधैः सुबुद्ध्या ।
यथा तथा जल्पतु बालभावात्तथैव मे गौरहरिः प्रसीदतु ॥

Colophon:

इति श्रीप्रबोधानन्दसरस्वतीविरचितं श्रीचैतन्यचान्द्रामृतं समाप्तम् ॥

(*c*) ब्रह्मसंहिता.

BRAHMASMHITĀ.

Foll. 77*a*—83*a*. Foll. 83*b* and 84 are left blank.

This is a Saṁhitā of the Pāñcarātrāgama.

Incomplete.

Beginning:

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।
अनादिरादिर्गोविन्दस्सर्वकारणकारणः ॥
सहस्रपत्रं कमलं गोकुलाख्यं महत्फलम् ।
तत्कर्णिकारं तद्वा(द्धा)मतदनन्तांशसम्भवम् ॥
* * * *
सहस्रशीर्षा पुरुषस्सहस्राक्षः सहस्रपात् ।
सहस्रबाहुर्विश्वात्मा सहस्रांशः सहस्रसूः ॥

End:

तत्त्वसागरे—
यथा काञ्चनतां याभि(ति)[ः] कांस्यं रसविधानतः ।
यथा दीक्षाविधानेन द्विजत्वं जायते नृणाम् ॥

अगस्त्यसंहितायाम्—
सर्वेषु मन्त्रवर्गेषु श्रेष्ठो वैष्णव उच्यते ।
नानोपदेशे दैवेषु शाक्तसौरेषु भिषितम्(?) ॥

आगमे—

(*d*) चैतन्यचन्द्राष्टकम्.

CAITANYACANDRĀṢṬAKAM.

Foll. 85 and 86*a*.

Eight stanzas in praise of Caitanya: by Rūpagōsvāmin, also called Rūpaka or Rūpasanatana.

Complete.

Beginning:

सदोपास्यः श्रीमान् धृतमनुजकायैः प्रणयितां
वहद्भिर्गीर्वाणैर्गिरिशपरमेष्ठिप्रभृतिभिः ।
स्वभक्तेभ्यः शुद्धां निजभजनमुद्रामुपदिशन्
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम् ॥

End :

भुवं सिञ्चन्नश्रुश्रुतिभिरभितः सान्द्रपुलकैः
परीताङ्गो नीपस्तबकनवकिञ्जल्कजयिभिः ।
घनस्वेदस्तोमस्तिमिततनुरङ्की(सङ्की)र्तनसुखी
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम् ॥
अधीते गौराङ्गस्मरणपदवीमङ्गलतरं(तिं)
कृती यो विस्रम्भस्फुरदमलधीरष्टकमिदम् ।
परानन्दे संद्यस्तदमलपदाम्भोजयुगले
परिस्फारा तस्य स्फुरस्तु नितरां प्रेमलहरीं ॥

Colophon :

इति श्रीरूपगोस्वामिना विरचितं चैतन्यचन्द्राष्टकं सम्पूर्णम् ॥

(*e*) पञ्चरत्नम्.

PAÑCARATNAM.

Fol. 86.

Similar to the work described under R. No. 366(*e*) ante.

Complete.

Beginning :

नभोभूषा पूषा नलिनवनभूषा मधुकराः
वचोभूषा सत्यं वरयुवतिभूषा सुगुणता ।
मनोभूषा हर्षो मधुसमयभूषा पिककुलं
सभाभूषा विद्या सकलगुणभूषा वितरणम् ॥

End :

अर्थः पादरजोपमा गिरिनदीवेगोपमं यौवनं
मानुष्यं जलपूर्णबिन्दुसदृशी फेनोपमं जीवनम् ।
धर्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनं
पश्चात्तापहरा परं परिणतिः शोकाग्निना दह्यते ॥

Colophon :

इति पञ्चरत्नं सम्पूर्णम् ॥

(*f*) गङ्गाष्टकम्.

GAṄGĀṢṬAKAM.

Fol. 87.

Eight stanzas in praise of the presiding goddess of the river Gaṅgā : by Śaṅkarācārya.

Complete.

Beginning :

गङ्गा गङ्गेति यो ब्रूयात् योजनानां शतैरपि ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥
देवि सुरेश्वरि भगवति गङ्गे त्रिभुवनभरिणि तरलतरङ्गे ।
शङ्करमौलिविहारिणि विमले मम मतिरास्तां तव पदकमले ॥

End :

गङ्गाष्टकमिदमतुलं पठति नरो यः स जयति सत्यम् ।
येषां हृदये गङ्गाभक्तिः तेषां सुलभा भवति च मुक्तिः ॥

Colophon :

इति श्रीशङ्कराचार्यविरचितं गङ्गाष्टकं सम्पूर्णम् ॥

(*g*) **यमुनाष्टकम्.**

YAMUNĀṢṬAKAM.

Fol. 88.

Eight stanzas in praise of the river Yamunā or Jamna : by Rupagōsvāmin.

Beginning :

मुदा राधाकृष्णप्रचुरजलकेलीरसभर-
स्वलत्कस्तूरी तद्घुसृणघनचर्चार्चितजला ।
प्रमोदान्तौ फेनस्मितमुदितमूर्मिस्फुटकर-
श्रिया सिञ्चन्तीव प्रथयतु सुखं नस्तरणिजा ॥
चिदानन्दभानोस्सदानन्दसूनोः परं प्रेमपात्री द्रवद्ब्रह्मपात्री
अघानां लवित्री जगत्क्षेमधारी(त्री) पवित्रीक्रियान्नो वपुर्मित्रपुत्री ॥

End :

तुष्टबुद्धिरष्टकेन निर्मलोर्मिचेष्टितां
त्वामनेन भानुपुत्रि सर्वदेववेष्टिताम् ।
यः स्तुवीत वर्धयस्व (सर्व)पापमोचने
भक्तिपूरमस्य देवि पुण्डरीकलोचने ॥

Colophon:

इति श्रीरूपगोस्वामिना विरचितं श्रीयमुनाष्टकं सम्पूर्णम् ॥

(*h*) रत्नमाला.

RATNAMĀLĀ.

Foll. 89 and 90*a*. Fol. 90*b* is left blank.

A composition of witty stanzas containing ingenious questions with suitable answers on various topics: by Paśupati.

Beginning:

का भूषा योषाणां किञ्च शिशोः कण्ठमण्डनं भवति ।
निर्मलमुक्तामाला पशुपतिरचिता(सु)चातुरी वाचाम् ॥
कः कुलकमलदिनेशः सति गुणविभवेऽपि यो नम्रः ।
कस्य वशं जगदेतत्प्रियहितवचनस्य धर्मशीलस्य ॥
परधनहृदयहरा का सत्कविता वेशवनिता च ।
कं न स्पृशति विपत्तिर्वृद्धवचोवि(ऽनु)वर्तनश्च दातारम् ॥

End:

को नृपतिः सुखसेव्यो निर्लोभो वृद्धसचिवी च ।
संसारे किं सारं गङ्गानङ्गारिसेवा च ॥
द्रव्यं किं करणीयं देयं विप्राय साधवे सततम् ।
सद्गुणमुक्ताकलिता विमलसुवक्त्रे वन . ङ्गी ॥

Colophon:

इति श्रीमत्पशुपतिरचिता रत्नमाला सम्पूर्णा ॥

(*i*) राधाकुण्डाष्टकम्.

RĀDHĀKUṆḌĀṢṬAKAM.

Foll. 91 and 92*a*.

Eight stanzas in praise of the pond called Rādhākuṇḍa, which is said to be a holy one as Rādhā, a consort of Śrī-Kṛṣṇa, used to bathe in it: by Śrīdāsagōsvāmin.

Beginning:

वृषभदनुजनासानर्मधर्मोत्तरङ्गैः निखिलनिजसखीभिर्यस्य हस्तेन पूर्णम् ।
प्रकटितमपि बृन्दारण्यराज्याः प्रमोदैः तदतिसुरभिराधाकुण्डमेवाश्रयो मे ॥
व्रजभुवि मुरशत्रोः प्रेयसीनां निकायैः असुलभमपि पूर्णं प्रेमकल्पद्रुमं तम् ।
जनयति हृदि भूमौ स्नातुरुच्चैः प्रियं यत् तदतिसुरभिराधाकुण्डमेवाश्रयो मे ॥

End :

अविकलमतिदेव्याश्चारुकुण्डाष्टकं यः
परिपठति तदीयोल्लासिदास्यार्पितात्मा ।
अचिरमिह शरीरे दर्शयत्येव तस्मै
मधुरिपुरतिमोदैः श्लिष्यमाणं(णां) प्रियां ताम् ॥

Colophon :

इति श्रीदासगोस्वामिना विरचितं राधाकुण्डाष्टकं सम्पूर्णम् ॥

(*j*) **गुरुदेवाष्टकम्.**

GURUDĒVĀṢṬAKAM.

Foll. 92 and 93*a*.

Eight stanzas in praise of Gurudēva, one of the esteemed leaders of the Caitany sect : by Viśvanāthacakravartigōsvāmin.

Beginning :

ससान्द्रदावानललीढलोके त्राणाय दा(का)रुण्यधनाघनत्वम् ।
प्राप्तस्य कल्याणगुणार्णवस्य वन्दे गुरोः श्रीचरणारविन्दम् ॥
महाप्रभोः कीर्तननृत्यगीतवादित्रमाद्यन्मनसा रसेन ।
रोमाञ्चकम्पाश्रुतरङ्गभाजो वन्दे गुरोः श्रीचरणारविन्दम् ॥

End :

श्रीमद्गुरोरष्टकमेतदुच्चैः ब्राह्मे मुहूर्ते पठति प्रयत्नात् ।
यस्तेन बृन्दावननाथसाक्षात्सेवैव लभ्या जनस(ना)न्त एवम् ॥

Colophon :

इति श्रीविश्वनाथचक्रवर्तिगोस्वामिना विरचितं श्रीगुरुदेवाष्टकं सम्पूर्णम् ॥

(*k*) **वक्रेश्वरपण्डिताष्टकम्.**

VAKRĒŚVARAPAṆḌITĀṢṬAKAM.

Fol. 93.

Eight stanzas in praise of Vakrēśvarapaṇḍita who is probably a great leader of the Caitanya sect.

Beginning :

यं प्राहुः कवयस्सर्वे परमानन्दकन्दलम् ।
तमहं सन्ततं वन्दे श्रीवक्रेश्वरपण्डितम् ॥
यश्चैतन्यपदाम्भोजमरन्दरसलम्पटः ।
तमहं सन्ततं वन्दे श्रीवक्रेश्वरपण्डितम् ॥

End :

श्रीवक्रेश्वरपण्डितस्य विमलां(लं) नित्यं पठन्ति ध्रुवं
श्रीचैतन्यपदानुरक्तमनसो ये स्रष्टृपद्याष्टकम् ।
ते वै गोकुलनारा(यका)ङ्घ्रिकमलद्वन्द्वेऽचलां निर्मलां
भक्तिं तां तरसाप्नुवन्ति मनुजो(जा) योगेश्वरे दुर्लभाम् ॥

Colophon :

इति श्रीवक्रेश्वरपण्डिताष्टकं सम्पूर्णम् ॥

(*l*) चैतन्यचन्द्राष्टकम्.

CAITANYACANDRĀṢṬAKAM.

Foll. 94 and 95*a*.

Similar to the work described under sub division (*d*) of the same number.

Beginning :

अखिलभुवनभर्ता दुर्गति[ः]त्राणकर्ता
कलिकलुषनिहन्ता दीनदुःखैकहन्ता ।
निरवधिगुणगाथाकीर्तनानन्ददाता
स्फुरतु हृदि न चन्द्रः श्रीनवद्वीपचन्द्रः ॥
कनककमलगौरः प्राणिनां चित्तचौरः
प्रणतभजनसिन्धुः सर्वलोकैकबन्धुः ।
अतुलहसविनोदी कीर्तनानन्दवादी
स्फुरतु हृदि न(स) चन्द्रः श्रीनवद्वीपचन्द्रः ॥

End :

संसारसारवननागरजीवबन्धुः चैतन्यचन्द्रपदपद्ममहं नतोऽस्मि ॥
महाप्रभोरिदं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
भावभक्तिसमं युक्तं भवेत्तस्य न संशयः ॥

Colophon :

इति श्रीरूपगोस्वामिना विरचितं चैतन्यचन्द्राष्टकं सम्पूर्णम् ॥

(*m*) चैतन्यचन्द्रामृतम्.

CAITANYACANDRĀMṚTAM.

Foll. 95*a*—97*a*.

Similar to the work described under subdivision (*b*) of this number. By Sārvabhumabhaṭṭācārya.

Complete.

Beginning:

सत्ये दैत्यकुलाधिनाथमथने सूर्येन्दुभिः केसरी
त्रेतायां दशकण्ठकन्धरहरो रामाभिरामाकृतिः ।
गोपालान्परिपालयन् व्रजकुले भारा(रं)हरन् द्वापरे
गौराङ्गप्रियकीर्तने कलियुगे कृष्णश्शचीनन्दनः ॥
ब्रह्माण्डे परमेश्वरोऽवतरति प्रीत्या जगत्पालको
वारं वारमखण्डपुण्यनिचयैः सर्वप्रजानां कलौ ।
गौडे मूढजनान्निरीक्ष्य भगवान् बृन्दावनानन्दनो
गङ्गातीरमुपेत्य नन्दतनयो जातः शचीमन्दिरे ॥

End:

आसीत्पुरा मधुरिपुर्वसुदेवसूनुः सङ्ग्रामनिर्जितमुरो धृतमल्लदेशः ।
गोपालिकावदनपङ्कजकृष्णभृङ्गः सोऽयं यदि प्रभवति प्रभुगौरचन्द्रः ॥

Colophon:

श्रीसार्वभौमभट्टाचार्यविरचितं श्रीचैतन्यचन्द्रामृतं सम्पूर्णम् ॥

(*n*) गान्धर्वप्रार्थनाष्टकम्.

GĀNDHARVAPRĀRTHANĀṢṬAKAM.

Foll. 97*b*—98*b*.

Eight stanzas of prayer and praise addressed to Rādhā and Kṛṣṇa: by Rūpagōsvāmin.

Complete.

Beginning:

बृन्दावने विहरतो हरिकेलिकुञ्जो(ञ्जे) मत्तद्विपप्रवरकौतुकविभ्रमेण ।
सन्दर्शयस्व युवयोर्वदनारविन्दद्वन्दं विधेहि मयि देवि कृपां प्रसीद ॥
हा देवि काकुभरगद्गदयाच्यवाचा याचे निपत्य भुवि दण्डवदुद्भटार्तिः ।
अस्य प्रसादमबुधस्य जनस्य कृत्वा गान्धर्वके निजगणे गणनां विधेहि ॥

End:

यः कोऽपि सुष्ठु वृषभानुकुमारिकायाः संप्रार्थिताष्टकमिदं पठते प्रयत्नात् ।
सा प्रेयसा सह समेत्य धृतप्रमोदा तस्य प्रसादलहरीमुररीकरोतु ॥

Colophon:

इति श्रीरूपगोस्वामिना विरचितं गान्धर्वप्रार्थनाष्टकं समाप्तम् ॥

(o) राधाष्टकम्.

RĀDHĀṢṬAKAM.

Foll. 98b—99b. Fol. 100 is left blank.

Eight stanzas in praise of Rādhā, a consort of Śrī-Kṛṣṇa: by Kṛṣṇa-kavirājagōsvāmin.

Complete.

Beginning:

कुङ्कुमाक्तकानना गर्वहारिसौरभा पीतनाञ्चिताब्जगन्धकीर्तिनिन्दिसौरभा ।
वल्लवेशसूनुसर्ववाञ्छितार्थसाधिका मह्यमात्मपादपद्मदास्यदास्तु राधिका ॥
कौरुविन्दका(की)र्तिनिन्दिचित्र(वर्ण)शाटिका कृष्णमत्तभृङ्गकेलिफुल्लपुष्पवाटिका ।
कृष्णनित्यसङ्गमाधिपद्मबन्धुराधिका मह्यमात्मपादपद्मदास्यदास्तु राधिका ॥

End:

अष्टकेन यत्स(स्त्व)नेन नौति कृष्णवल्लभां
दर्शनेऽपि शैलजादियोषिदालिदुर्लभाम् ।
कृष्णसङ्गनिन्दितात्मदास्यसीधुभाजनं
तं करोति निन्दितालिसञ्चयाश्च भाजनम् ॥

Colophon:

इति श्रीकृष्णकविराजगोस्वामिना विरचितं श्रीराधाष्टकं सम्पूर्णम् ॥

R. No. 3051.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 90. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of the Raja of Chirakkal.

उपदेशसारसमुच्चयः.

UPADEŚASĀRASAMUCCAYAḤ.

Foll. 1a—89. Fol. 90a contains the table of contents of this work. Fol. 90b is left blank.

Deals with the Mantras and the procedure for bringing persons under one's control and for causing harm to them in various ways, etc. The subjects dealt with herein are apparent from the headings of the Paṭalas given below.

Contains the following Paṭalas:—

१. स्तम्भनप्रयोगः.
२. उच्चाटनप्रयोगः.
३. मारणप्रयोगः.
४. मोहनप्रयोगः.
५. विद्वेषणप्रयोगः.
६. वश्यविशेषप्रयोगः.
७. अपमृत्युविषोन्मादादिशान्तिप्रयोगः.
८. अर्चाभेदमहामन्त्रप्रयोगः.
९, १०. अर्चाभेदनिरूपणम्.

Complete.

Beginning:

अस्तु नश्श्रेयसे वस्तु सच्चिदानन्दलक्षणम् ।
अनन्यगतमद्वैतमखिलार्थप्रकाशकम् ॥

यतो भूतानि जायन्ते जीवन्ति यदनुग्रहात् ।
यस्मिन्निमानि लीयन्ते तस्मै सर्वात्मने नमः ॥

* * * *

गुरूपदेशादुचितं वेदितुं मन्त्रवादिनाम् ।
निगूढमुपदेशानां सारमुच्चिनवामहै ॥

गुरून्विशिष्टानभिगम्य साधूनवाप्य दीक्षामथ तत्सकाशात् ।
स्वनामवर्णोचितमन्त्रक्लृप्त जपादिकं कर्म करोतु शिष्यः ॥

विन्यस्य मातृकावर्णान् भूतसंहृतिपूर्वकम् ।
सकलस्यापि मन्त्रस्य जपः कार्यो मनीषिणा ॥

* * * *

मनोरमे शुचौ क्वापि प्रदेशे वीतदुर्जने ।
मृद्वासन(ने) सुविशदे पटाजिनकुशोत्तरे ॥

उपविश्याभिवाद्य स्वानासनश्चाभिमृश्य च ।
ब्रह्मादिमन्त्रतो मूर्ध्नि गुरून्वन्देत संयतः ॥

अथानुष्ठानं लिख्यते—

ब्रह्माद्यशेषगुरुपारंपर्यक्रमेण स्वगुरुपादाम्बुजं यावत् तावत् प्रणमामि । शिवादिश्रीगुरुभ्यो नमः । श्रीमदस्मद्गुरुभ्यो नमः । इति च शिरस्यञ्जलिमुद्रया संवन्द्य गुं गुरुभ्यो नमः । गं गणपतये नमः । दुं दुर्गायै नमः । क्षं क्षेत्रपालाय नमः । सं सरस्वत्यै नमः । पं परमात्मने नमः ।

प्राधान्यात्प्रथमं वन्द्या गुरवो मूर्ध्नि सुव्रतैः ।
वामांसे च विशेषेण दक्षांसे गणनायकः ॥
विघ्नानां शान्तये दुर्गा रक्षार्थै वामसक्थनि ।
अन्यत्र क्षेत्रपालोऽयं क्षेत्रस्यास्वै(स्यै)व पालनात् ॥
सरस्वती सर्ववर्णसुखोच्चारणसिद्धये ।
हृद्यधस्तादूर्ध्वतस्तु परमात्माखिलाप्तये ॥

वन्दनीया इत्यनुषज्यते ।

* * * *

येन केनापि मन्त्रेण स्तम्भनं कर्म साध्यते ।
पार्थिवादिगणस्तत्राप्ययं संयोज्यतां बुधैः ॥

Colophon:

इति उपदेशसारसमुच्चये स्तम्भनप्रयोगसन्दर्शनं नाम प्रथमः पटलः ॥

End:

अर्चासु विष्णोः प्रवरैरमीभिः मन्त्रैश्च पुष्पाञ्जलिमातनोतु ।
दीपप्रदानोत्तरकालमिष्टैरन्यैश्च देवस्य महाविभूतेः ॥
यतो वाचः प्रवर्तन्ते यतश्च मनसा सह ।
अप्राप्याथो निवर्तन्ते तस्मै सर्वात्मने नमः ॥

Colophon:

इत्युपदेशसारसमुच्चये दशमः पटलः ॥

R. No. 3052.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 189. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Tippan Nambūdirippāḍ, Ponnūr-koṭṭamana, Perambāvūr post, Travancore State.

वचनमाला.

VACANAMĀLĀ.

Foll. 1*a*—189*a*. Fol. 189*b* is left blank.

On the duties and religious observances to be performed in relation to a twice-born from conception to marriage: by Rāmāśārya. His other works are Gaurīpādādikēśāntastava, Sētu and Samasyākṛṣṇalīlā.

Complete.

Beginning:

यन्मायाविवशा विदुर्भुवनमात्माभिन्नमप्यन्यथा
यद्विद्याकुशला विदन्ति तदिदञ्चाभिन्नमेवात्मना ।

कर्तुं यत्किमपीश्वरोऽपि परमश्शक्नोति नो यामृते
तां संविन्मयविग्रहामविरतं वन्दे मुकुन्दानुजाम् ॥
अवनम्य मनुसुरेश्वरयोगीश्वरगीप्रकरणगुरुचरणान् ।
शास्त्राणां व्याकर्तॄन् कर्तॄनपि देवतां निखिलाम् ॥
परमेश्वरस्य परमां परहितनिरतस्य विश्वरूपस्य ।
रचयामि वचनमालां विदधतु मदनुग्रहं सन्तः ॥
गौरीकेशादिपाद(पादादिकेश)स्तवमपि(रवि)शतकश्लोकपूर्वार्धपादान्
वृत्तं श्रीरामशार्यस्स च (वि)रचितवान्पूरयन्यस्समस्याः ।
सेतुं चैवातिमात्रं रुचिरमभिनवं मेघपद्यान्त्यपादान्
व्याख्यालङ्कारहेतोस्सुरवन(वचन)कुसुमैस्साधु बध्नाति मालाम् ॥

अस्यायमर्थः—यः स्वतन्त्रमेव गौरीपादादिकेशस्तवमभिनवं सेतुनामधेयञ्च प्रबन्धं (वि)रचितवान् । यश्च सूर्यशतकश्लोकपूर्वार्धपादान्मेघपद्यान्त्यपादांश्च समस्याः पूरयन् श्रीरामशार्यः वृत्तं रचितवान् । स विश्वरूपशास्त्रव्याख्याःलङ्कारार्थं वचनकुसुमैर्मालां साधु बध्नातीति योजना । तत्र च मेघश्लोकान्त्यपादै भाव(बाल)काण्डविषयं (सूर्य)शतकश्लोकपूर्वार्धपूर्वपादैरयोध्याकाण्डमारभ्य युद्धकाण्डपर्यन्तविषयञ्च समस्यारामवृत्तनामधेयं तदुत्तरपादैः समस्याकृष्णलीलानामधेयञ्च प्रबन्धं रचितवानिति भेदः । अतिमात्रं रुचिरमित्येतत्सर्वविशेषणमिति ।

* * * *

तन्त्रं त्वत्र हि मानवार्थकथनं प्राधान्यतः स्थापितं
तत्प्राधान्यवशेन चायमपरः स्मृत्यन्तरार्थान्वयः ।
तत्त्वाद्यैर्मनुनिर्मितैः कृतमतिर्योगीन्द्रपद्यान्वयं
पद्यं पद्यमहं विधातुमपि (च) प्रासङ्गिकोऽन्यान्वयः ॥

* * * *

बालक्रीडेति नाम्ना जगति निगदिता विश्रुता विश्वरूपाचार्याज्जाता महत्या विहितबहुमतिर्याज्ञवल्क्यस्य कृत्या ।
या रेजे वैदिकोत्था विमलतरलसत्की(र्ति)वासोवृतास्या
बालक्रीडा ममेयं परमतमसही सन्ततं बोभवीतु ॥
एषा हि वचनमाला निरन्तरं वचनकुसुमनिवहेन ।
यदि सान्तरा सुमतिभिस्साधु निरूप्यैव परिपूर्या ॥

मयैषा रचना कार्या गृह्येत यदियं बुधैः ।
स्तोतुं वानन्दितुं वास्माद्याख्येयार्थः प्रकाश्यते ॥
भवभूतिनिबन्धनोदधौ तिमिभीमप्रतिवादिके गुरोः ।
सकटाक्षनिरीक्षणप्लवं(वः) पतितं माभयमुद्धरिष्यति ॥
*   *   *   *

अथ शास्त्रार्थं यथावत्प्रकाशयितुमधिष्ठातृदेवतामभ्युपगम्य स्तुतिपूर्वं नमस्करोति—सुश्लिष्टेति ॥

End:

सव्याहृतिकास्सप्रणवाः प्राणायामास्तु षोडश ।
अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः ।
एतदाद्यं तपः श्रेष्ठमेतद्धर्मस्य लक्षणम् ।
सर्वदोषोपघातार्थमेतदेव विशिष्यते ॥ इति ॥

. उदाहरणार्थश्चैतत्, स्मृत्यन्तरेभ्यश्चान्विष्योदाहर्तव्यम् । ग्रन्थगौरवभयान्न प्रपंचितम् । प्राणायामेत्यादि ॥

R. No. **3053.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 206. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1919-20 from a MS. of Śrīmān Bṛndāvanacandra Pāṇigrāhi, Parlakimedi, Ganjam district.

(*a*) गुरुदेवाष्टकम्.

GURUDĒVĀṢṬAKAM.

Foll. 1*a* and 1*b*.

Same work as that described under R. No. 3050 (*j*) ante.

(*b*) नित्यानन्दाष्टकम्.

NITYĀNANDĀṢṬAKAM.

Foll. 1*b*—2*b*.

Eight stanzas in praise of Nityānanda, a devotee of Śrī-Kṛṣṇa.

Complete.

Beginning:

शरच्चन्द्रभ्रान्तिस्फुरदमलकान्तिं गजगतिं
हरिप्रेमोन्मत्तं धृतपरमसत्त्वं स्मितमुखम् ।
समाघूर्णन्नेत्रं करकलितवेत्रं कलिभिदं
भजे नित्यानन्दं भजनतरुकन्दं निरवधि ॥

End:

सुखानामाधानं रसिकवरसद्वैष्णवधनं
रसागारं सारं पतिततरतारं स्वरसतः ।
परं नित्यानन्दाष्टकमिदमपूर्वं पठति य-
स्तदङ्घ्रिद्वन्द्वाब्जं स्फुरति नितरां तस्य हृदये ॥

Colophon:

इति श्रीनित्यानन्दाष्टकं सम्पूर्णम् ॥

(*c*) चैतन्यचन्द्राष्टकम्.

CAITANYACANDRĀṢṬAKAM.

Foll. 2*b* – 3*b*.

Same work as that described under R. No. 3050 (*d*) ante.

Complete.

(*d*) गौराङ्गाष्टकम्.

GAURĀṄGĀṢṬAKAM.

Foll. 3*b* and 4*a*.

Eight stanzas in praise of Gaurāṅga alias Caitanya: by Sārvabhaumabhaṭṭācārya.

Complete.

Beginning:

मलयजवासितशोभितगात्र मूर्तिमनोहरविश्वपवित्र ।
पदनखराजिविनिन्दितचन्द्र शुद्धकनकमय गौर नमस्ते ॥

End:

भक्तपराजित सात्त्विकवेष गमनसुनर्तनभावविशेष ।
मालाराजितदेहसमस्त शुद्धकनकमय गौर नमस्ते ॥

Colophon:

इति श्रीसार्वभौमभट्टाचार्यविरचितं गौराङ्गाष्टकं सम्पूर्णम् ॥

(*e*) **चैतन्याष्टकम्.**

CAITANYĀṢṬAKAM.

Foll. 4*a*—5*a*.

Similar to the work described under R. No. 3050(*d*) ante.

Complete.

Beginning:

कलौ यं विद्वांसः स्फुटमभियजन्ते द्युतिभरा-
दकृष्णाङ्गं कृष्णं मखविधिभिरुत्कीर्तनमयैः ।
उपास्यं च प्राहुर्यमखिलचतुर्थाश्रमजुषां
स देवश्चैतन्यः कृतिरतितरां नः कृपयतु ॥

End:

शचीसूनोः कीर्तिस्तबकनवसौरभ्यनिबिडं
पुमान्यः प्रीतात्मा पठति किल पद्याष्टकमिदम् ।
स लक्ष्मी . नेत्रं निजपदसरोजे प्रणयतां
ददानः कल्याणीमनुपदमबाधं सुखयति॥

Colophon:

इति श्रीचैतन्याष्टकं सम्पूर्णम् ॥

(*f*) **चैतन्याष्टकम्.**

CAITANYĀṢṬAKAM.

Foll. 5*a*—6*a*.

Similar to the above. Same work as that described under No. 2224 of R. L. Mitra's Catalogue, Vol. VI.

Complete.

Beginning:

हरिर्दृष्ट्वा गोष्ठे मुकुरगतमा(त्मा)नममलं
स्वमाधुर्यं राधा प्रियतरसखीवा(प्तु)मचिरात् ।

अहो गौडे जातः प्रभुपरमगौरैव(क)तनुभाक्
शचीसूनुः किं मे नयनसरणिं यास्यति पुनः ॥

End:

शचीसूनोरस्याष्टकमिदमभीष्टं विरचयन्
सदा दैन्योद्रेकादतिविशदबुद्धिः पठति यः ।
प्रकाशं(मं) चैतन्यः प्रभुरतिकृपावेशविवशः
पृथुप्रेमाम्भोधौ प्रथितरसदे मज्जयति तम् ॥

Colophon:

इति श्रीचैतन्याष्टकं सम्पूर्णम् ॥

(*g*) गौराङ्गस्तवकल्पतरुः.

GAURĀṄGASTAVAKALPATARUḤ.

Foll. 6*a*—7*b*.

A eulogy on the personal characteristics of Gaurāṅga *alias* Caitanya by Rūpagōsvāmin. Same work as that described under No. 2226 of the R. L. Mitra's Catalogue, Vol. VI.

Complete.

Beginning:

गतं दृष्ट्वा यस्य प्रमदगजवर्येऽखिलजना
मुखश्च श्रीचन्द्रोपभि(रि) दधति(थु)त्कारनिवहम् ।
स्वकान्त्या यः स्वर्णाचलमधरयच्छीधु च वच-
स्तरङ्गैर्गौराङ्गो हृदय उदयन्मां मदयति ॥

अलङ्कृत्यात्मानं नवविविधवर्णैरिव बल-
द्विवर्णत्वस्तम्भास्फुटवचनकम्पाश्रुपुलकैः ।
हसन् खिद्यन्नृत्यन् शितिगिरिपतेर्निर्भरमुदे
पुरः श्रीगौराङ्गो हृदय उदयन्मां मदयति ॥

End:

इति श्रीगौराङ्गोङ्गदविगलित(द्रुतविविधस)द्भावकुसुम
प्रभाभ्राजत्पद्यावलिललितशाखं सुरतरुम् ।

मुहुर्योऽतिश्रद्धौषधिवर(रिव) वलत्पाठल(स)लिलै-
रलं सिञ्चेद्विन्देत्सरसगुरु(त)ल्लोकनफलम् ॥

Colophon:

इति श्रीगौराङ्गस्तवकल्पतरुः सम्पूर्णः ॥

(*h*) गौराङ्गाष्टकम्.

GAURĀṄGĀṢṬAKAM.

Foll. 7*b*—8*a*.

By Sārvabhaumabhaṭṭācārya. Similar to the work described under subdivision (*d*) of this number.

Complete.

Beginning:

उज्वलवरगौरवरदेहं विलसति निरवधिभावविदेहम् ।
त्रिभुवनपावन कृपया लेश तं प्रणमामि श्रीशचीतनयम् ॥

End:

चञ्चलचरन् चारुगतिरुचिरं रञ्जितमञ्जुलमुखध्वानमधुरम् ।
चन्द्रविनिन्दितसुन्दरवदनं तं प्रणमामि श्रीशचीतनयम ॥

Colophon:

इति श्रीसार्वभौमभट्टाचार्यविरचितं गौराङ्गाष्टकं सम्पूर्णम् ॥

(*i*) चैतन्यचन्द्रामृतम्.

CAITANYACANDRĀMṚTAM.

Foll. 8*a*—9*b*.

Complete.

Same work as that described under R. No. 3050 (*m*) ante.

(*j*) कुञ्जविहार्यष्टकम्.

KUÑJAVIHĀRYAṢṬAKAM.

Foll. 10*a* and 10*b*.

Eight stanzas in praise of Lord Kṛṣṇa, conceived as playing on the flute amidst shady bowers.

Complete.

Beginning:

इन्द्रनीलमणिमञ्जुलवर्णः फुल्लनीलकुसुमाञ्चितकर्णः ।
कृष्णनाभरकृशोरसिहारी सुन्दरो जयति कुञ्जविहारी ॥

End:

अष्टकं मधुरकुञ्जविहारि क्रीडया पठति यः किल हारी ।
स प्रयाति विकसत्परभागं तस्य पादकमलार्चनरागम् ॥

Colophon:

इति श्रीकुञ्जविहार्यष्टकं सम्पूर्णम् ॥

(*k*) कुसुमस्तबकम्.

KUSUMASTABAKAM.

Foll. 10*b* and 11*a*.
A eulogy addressed to God Kṛṣṇa: by Rūpagōsvāmin.
Complete.

Beginning:

परितोषितगोपवधूपटलं पटलङ्घितकाञ्चनसारचयम् ।
रचयन्तमुदारकलां शकलाञ्चितपादमगाधबलम् ॥
धवलं नवकीर्तिकुलैरगतिं गतिभञ्जितमत्ततरद्विरदम् ।
रदनिन्दितसुन्दरकुन्दमदं मदनार्बुदरूपमदघ्नरुचि ॥

End:

विधुरीकृतदानवराजकुलं कुलनन्दनमत्र नमामि हरिम् ।
हरिणाङ्कमुखीगणजीवगतिमुरसिपरिस्फुरदिन्दिरयोल्लसितम् ॥
हरिमङ्गलाद्युतिमङ्गलमङ्गोल्लसच्चन्दनं वन्दे ।

Colophon:

इति श्रीरूपगोस्वामिविरचितं कुसुमस्तबकं सम्पूर्णम् ॥

(*l*) मुकुन्दमुक्तावली.

MUKUNDAMUKTĀVALĪ.

Foll. 11*a*—13*b*.
Similar to the above. By the same author.
Complete.

Beginning:

नवजलधरवर्णं चम्पकोद्भासिकर्णं विकसितनलिनास्यं विस्फुरन्मन्दहास्यम् ।
कनकरुचिदुकूलं चारुबर्हावचूडं कमपि निखिलसारं नौमि गोपीकुमारम ॥
मुखजितशरदिन्दुः केलिलावण्यसिन्धुः करविनिहितकन्दुर्वल्लवीप्राणबन्धुः ।
वपुरुपगतरेणुः कक्षनिक्षिप्तवेणुः वचनवशगधेनुः पातु मां नन्दसूनुः ॥
मालिनी ॥

End:

पशुपयुवतिगोष्ठीचुम्बितश्रीमदोष्ठी सुरतचलितदृष्टिर्न(र्निर्वृ)तानन्दवृष्टिः ।
नवजलधरधामा पातु वः कृष्णनामा भुवनमधुरवेषा मालिनीमूर्तिरेषा ॥

Colophon:

इति श्रीरूपगोस्वामिविरचिता श्रीमुकुन्दमुक्तावली समाप्ता ॥

(*m*) विलापकुसुमाञ्जलिस्तवः.

VILĀPAKUSUMĀÑJALISTAVAḤ.

Foll. 14*a*—20*b*.

Similar to the above. By Raghunāthagōsvāmin.

Complete.

Beginning:

त्वं रूपमञ्जरि सखि प्रथिता पुरेऽस्मिन्
पुंसः परस्य वदनं न हि पश्यसीति ।
बिम्बाधरे क्षतमनागतभर्तृकाया
यत्ते व्यधायि किमु तच्छुकपुङ्गवेन ॥
स्थलकमलिनि युक्तं गर्विता काननेऽस्मिन्
प्रणयसि वरहासं पुष्पगुच्छच्छलेन ।
अपि निखिललतास्तास्सौरभाक्तास्स मुञ्च-
न्मृगयति तव मार्गं कृष्णभृङ्गो यदद्य ॥

* * *

Colophon:

इत्येकादशभिर्दैन्यबोधिकप्रार्थना समाप्ता ॥

प्रणालीं कीलालैर्बहुभिरतिसंक्षाल्य मधुरैः
मुदा सम्मार्ज्य स्वैर्विवृतकचबृन्दैः प्रियतया ।
कदा बाह्यागारं वरपालि(रि)मलैर्धूपनिवहैः
विधास्ये ते देवि प्रतिदिनमहो वासितमहम् ॥

* * * *

Colophon :

इति सप्तविंशतिभिर्ललिसामयी प्रार्थना ॥

End :

अयि प्रणयशालिनि प्रणयपुष्टदास्याप्तये
प्रकाममतिरोदनैः प्रचुरदुःखदग्धा जनाः ।
विलास(प)कुसुमाञ्जलिं हृदि निधाय पादाम्बुजे
मया बत समर्पितस्तव तनोतु तुष्टिं मनाक् ॥

Colophon :

इति श्रीरघुनाथगोस्वामिविरचितो विलापकुसुमाञ्जलिस्तवः समाप्तः ॥

(*n*) यमुनाष्टकम्.

YAMUNĀṢṬAKAM.

Foll. 20*b* and 21*a*.

Same work as that described under R. No. 3050 (*g*) ante.

Wants two stanzas in the beginning.

(*o*) राधाकुण्डाष्टकम्.

RĀDHĀKUṆḌĀṢṬAKAM.

Foll. 21*a* and 21*b*.

Same work as that described under R. No. 3050(*i*) ante.

(*p*) नित्यानन्दनामाष्टोत्तरशतस्तोत्रम्.

NITYĀNANDANĀMĀṢṬŌTTARAŚATASTŌTRAM.

Foll. 21*b*—23*a*.

Gives one hundred and eight names in praise of Nityānanda : by Sārvabhaumabhaṭṭācārya.

Complete.

Beginning :

प्रणम्यास्य जगद्बीजनित्यानन्दमहाप्रभुम् ।
नाम्नामष्टोत्तरशतं प्रवक्ष्यामि महाप्रभोः ॥

नीलाम्बरः पट्टवासा लाङ्गली मुसलप्रियः ।
सङ्कर्षणश्चन्द्रवर्णो यमुनाकूलमण्डनः ॥
गोपिकारमणो रामो बृन्दावनकलानिधिः ।
कादम्बरीसुधामत्तो गोपगोपीगणावृतः ॥

End:

श्रीनित्यानन्दचन्द्रस्य नाम्नामष्टोत्तरं शतम् ।
यः पठेत्प्रातरुत्थाय स प्रेम्णि प्रमिलेद्ध्रुवम् ॥

Colophon:

इति श्रीसार्वभौमभट्टाचार्यविरचितं श्रीनित्यानन्दनामाष्टोत्तरशतकं सम्पूर्णम् ॥

(g) चैतन्यनामाष्टोत्तरशतस्तोत्रम्.
CAITANYANĀMAṢṬŌTTARAŚATASTŌTRAM.

Foll. 23a—24b.

A eulogy by the repetition of one hundred and eight significant names of Caitanya: by the same author.

Complete.

Beginning:

नमस्कृत्य प्रवक्ष्यामि देवदेवं जगद्गुरुम् ।
श्रीमच्चैतन्यचन्द्रस्य श्रीकृष्णस्य जगत्पतेः ॥
नाम्नामष्टोत्तरशतं महापातकनाशनम् ।
महारोगप्रशमनमन्ते बृन्दावनप्रदम् ॥

श्रीमच्चैतन्यचन्द्रस्याष्टोत्तरशतनाम्नां श्रीनिवास ऋषिः गायत्री छन्दः, श्रीकृष्णचैतन्यो देवता, श्रीचैतन्यस्य चरणारविन्दभक्त्यर्थे विनियोगः, ध्यानम्—

End:

अपुत्रो वैष्णवः पुत्रं लभते नात्र संशयः ।
अन्ते चैतन्यदेवस्य स्मृतिर्भवति शाश्वती ॥
विश्वम्भराय गौराय चैतन्याय महात्मने ।
शचीपुत्राय मित्राय लक्ष्मीशाय नमो नमः ॥

Colophon:

इति श्रीसार्वभौमभट्टाचार्यविरचितं श्रीचैतन्यशतकं सम्पूर्णम् ॥

(*r*) चैतन्यनामाष्टकम्.

CAITANYANĀMĀṢṬAKAM.

Fol. 25*a*.

Gives the eight names of Caitanya and the efficacy of repeating them.

Beginning and the **End :**

जगद्गुरुं शचीसूनुं चैतन्यं करुणानिधिम् ।
भूभारहारिणं गौरं प्रेमदं प्रेमविह्वलम् ॥
यः पठेत्प्रातरुत्थाय एतन्नामाष्टकं शुभम् ।
त्रिसन्ध्यं पठते यस्तु सर्वसिद्धिमवाप्नुयात् ॥

Colophon :

इति श्रीचैतन्यनामाष्टकं सम्पूर्णम् ॥

(*s*) कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 25*a*—26*b*.

Same work as that described under No. 8890 of the D.C.S. MSS., Vol. XVII.

(*t*) गोपालस्तवराजः.

GŌPĀLASTAVARĀJAḤ.

Foll. 26*b*—27*b*.

Similar to the work described under No. 673(*f*) ante. This eulogy is taken from the Gautamītantra.

Complete.

Beginning :

श्रीनारद उवाच—

नवीननीरदश्यामं नीलेन्दीवरलोचनम् ।
वल्लवीनन्दनं वन्दे कृष्णं गोपालरूपिणम् ॥
स्फुरद्बर्हदलोद्बद्धनीलकुञ्चितमूर्धजम् ।
कदम्बकुसुमोद्भासिवनमालाविभूषितम् ॥

End :

य एवं चिन्तयेद्देवं भक्त्या संस्तौति मानवः ।
त्रिसन्ध्यं तस्य तुष्टोऽसौ ददाति वरमीप्सितम् ॥
राजवल्लभतामेति भवेत्सर्वजनप्रियः ।
अचलां श्रियमाप्नोति स वाग्मी जायते ध्रुवम् ॥

Colophon:

इति श्रीगौतमीतन्त्रे गोपालस्तवराजस्तोत्रं सम्पूर्णम् ॥

(u) प्रेमान्धस्तवः.

PRĒMĀNDHASTAVAḤ.

Foll. 27b—28b.

Eulogistic stanzas expressing overflowing devotion to Lord Kṛṣṇa: by Rūpagōsvāmin.

Complete.

Beginning:

कन्दर्पकोटिरम्याय स्फुरदिन्दीवरत्विषे ।
जगन्मोहनलीलाय नमो गोपेन्द्रसूनवे ॥

End:

आधारोऽप्यपराधानामविवेकहतोऽप्यहम् ।
त्वत्कारुण्यप्रतीक्षोऽस्मिन् प्रसीद मयि माधव ॥

Colophon:

इति श्रीरूपगोस्वामिविरचितः प्रेमान्धस्तवः सम्पूर्णः ॥

(v) आनन्दाख्यस्तोत्रम्.

ĀNANDĀKHYASTŌTRAM.

Foll. 28b and 29a.

A eulogy on Rādhākṛṣṇa by the repetition of 10 and 20 significant names relating to Him.

Beginning:

राधिकाहृदयोन्मादिवंशीवटमधुच्छटः ।
राधापरिमलोद्गारगरिमाक्षिप्तमानसः ॥

* * * *

Colophon:

इति श्रीकृष्णनामदशकं सम्पूर्णम् ॥

End:

इति श्रीकृष्णचन्द्रस्य नामविंशतिसङ्गतम् ॥
आनन्दाख्यं महास्तोत्रं यः पठेच्छृणुयाच्च यः ।
स परं सौख्यमासाद्य कृष्णप्रेमसमन्वितम् ॥

सर्वलोकप्रियो भूत्वा सद्गुणावलिभूषितः ।
व्रजराजकुमारस्य सन्निकर्षमवाप्नुयात् ॥

Colophon:

इति श्रीमदानन्दाख्यस्तोत्रं सम्पूर्णम् ॥

(*w*) आनन्दचन्द्रिकास्तोत्रम्.

ĀNANDACANRIKĀSTŌTRAM.

Foll. 29*b*—30*b*.

A eulogy in 16 stanzas on Lord Kṛṣṇa and attributed to Nārada. The ten names of Rādhā are given in a stanza separately at the end.

Complete.

Beginning:

भजे व्रजैकमण्डनं समस्तपापखण्डनम ।
स्वभक्तचित्तरञ्जनं सदैव नन्दनन्दनम् ॥
सुपिञ्छगुच्छमस्तकं सुनादवेणुहस्तकम् ।
अनङ्गरङ्गसागरं नमामि कृष्णनागरम् ॥

* * * *

इति श्रीनारदप्रोक्तं श्रीकृष्णस्तोत्रं सम्पूर्णम् ॥

End:

इमां बृन्दावनेश्वर्या दशनाममनोरमाम् ।
आनन्दचन्द्रिकां नाम यो रहस्यां स्तुतिं पठेत् ॥
स क्लेशरहितो भूत्वा भूरिसौभाग्यभूषितः ।
त्वरितं करुणापात्रं राधामाधवयोर्भवेत् ॥

Colophon:

इति श्रीमदानन्दचन्द्रिकाख्यस्तोत्रं सम्पूर्णम ॥

(*x*) जाह्नव्यष्टकम्.

JĀHNAVYAṢṬAKAM.

Foll. 30*b* and 31*a*.

Eight stanzas in praise of Jāhnavī, daughter of Sūryadāsa and cousin-sister of Rādhā and one of the beloved devotees of Lord Kṛṣṇa: by Jīvagōsvāmin.

Complete.

Beginning:

अनङ्गमञ्जरीख्याते व्रजे श्रीराधिकानुजे ।
सूर्यदाससुते देवि जाह्नवि त्वं प्रसीद मे ॥

End:

पठेच्छ्रीजाह्नवीदेव्या अष्टकं यो जनः सदा ।
श्रीचैतन्यपदाम्भोजमधुपः स्यात्स वै कृती ॥

Colophon:

इति श्रीजीवगोस्वामिविरचितं जाह्नव्यष्टकं सम्पूर्णम् ॥

(y) राधिकास्तोत्रम्.

RĀDHIKĀSTŌTRAM.

Foll. 31*a* and 31*b*.

Same work as that described under No. 10582 of the D.C.S. MSS., Vol. XIX, but with a different beginning as given below :—

अस्य श्रीराधास्तोत्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीराधिकादेवी देवता, विशुद्धप्रेमभक्त्यर्थे जपे विनियोगः, ध्यानं हि पूर्ववत् ।

(z) प्रेमामृतरसायनस्तोत्रम्.

PRĒMĀMṚTARASĀYANASTŌTRAM.

Foll. 32*a*—33*b*.

Songs of praise uttered by a Gōpī separated from Lord Kṛṣṇa.

Complete.

Beginning:

एकदा कृष्णविरहाद्ध्यायन्ती प्रियसङ्गमम् ।
मनो बाष्पनिरासार्थं जल्पतीदं मुहुर्मुहुः ॥
कृष्णः कृष्णेन्दुरानन्दो गोविन्दो गोकुलोत्सवः ।
गोपालो गोपगोपीशो वल्लवेन्द्रो व्रजेश्वरः ॥

End:

इत्येवं प्राणनाथस्य प्रेमामृतरसायनम् ।
यः पठेच्छृणुयाद्वापि स प्रेम लभते ध्रुवम् ॥

Colophon:

इति श्रीकृष्णचैतन्यचन्द्रमुखपद्मविगलितं प्रेमामृतरसायनस्तोत्रं समाप्तम् ॥

(*a*-1) चाटुपुष्पाञ्जलिस्तवः.

CĀṬŪPUṢPĀÑJALISTAVAḤ.

Foll. 33*b*—35*a*.

Eulogistic stanzas on Rādhā: by Rūpagōsvāmin.

Complete.

Beginning:

नवगोरोचनागौरीं प्रवरेन्दीवरां वराम् ।
मणिस्तबकविद्योतिवेणीव्यालाङ्गनाफणाम् ॥
उपमानघटीमानप्रहारिमुखमण्डलाम् ।
नवेन्दुनिन्दिफालोद्यत्कस्तूरीतिलकोज्वलाम् ॥

End:

इति बृन्दावनेश्वर्या जनो यः पठति स्तवम् ।
चाटुपुष्पाञ्जलिं नाम स स्यादस्याः कृपास्पदम् ॥

Colophon:

इति श्रीरूपगोस्वामिविरचितः चाटुपुष्पाञ्जलिस्तवः समाप्तः ॥

(*a*-2) राधाष्टकम्.

RĀDHĀṢṬAKAM.

Foll. 35*a* and 35*b*.

Eight stanzas in praise of Rādhā: by the same author.

Complete.

Beginning:

नन्दनन्दनमनोविहारिणी पञ्चसायककलाशरीरिणी ।
सर्वगोपरमणीशिरोमणिः शं तनोतु वृषभानुनन्दिनी ॥

End:

राधाष्टकं यः पठति त्रिसन्ध्यं श्रद्धया राधारमणैकचित्तः ।
लब्ध्वा हरौ प्रेम सुरैर्दुरापमन्ते स गोलोकमनुप्रयाति ॥

Colophon:

इति श्रीरूपगोस्वामिविरचितं श्रीराधाष्टकं सम्पूर्णम् ॥

(*a*-3) प्रार्थनाष्टकम्.

PRĀRTHANĀSTAKAM.

Foll. 35*b* and 36*a*.

Same work as that described under R. No. 3050(*n*) ante, but with a different colophon as given below :—

इति श्रीराधासंप्रार्थनाष्टकं सम्पूर्णम् ॥

(*a*-4) गोपीजनवल्लभाष्टकम्.

GŌPĪJANAVALLABHĀṢṬAKAM.

Foll. 36*a* and 36*b*.

Eight stanzas in praise of Lord Kṛṣṇa.

Complete.

Beginning :

प्रफुल्लराजीवविलोचनाय नवाम्बुदानीकमनोहराय ।
वेणुस्वनामोहितगोकुलाय नमोऽस्तु गोपीजनवल्लभाय ॥

End :

गोपालाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
विमुक्तः सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

Colophon :

इति श्रीगोपीजनवल्लभाष्टकं सम्पूर्णम् ॥

(*a*-5) जगन्नाथाष्टकम्.

JAGANNĀTHĀṢṬAKAM.

Fol. 37*a*.

Similar to the above.

Complete.

Beginning :

यो राधावल्लभः कृष्णो नित्यस्थलपतिप्रभुः ।
स एवायं जगन्नाथश्शरणं मम दुःखिनः ॥

End :

व्रजबृन्दावनस्थो यः क्षीराब्धितनयापतिः ।
स एवायं जगन्नाथश्शरणं मम दुःखिनः ॥

Colophon :

इति श्रीजगन्नाथाष्टकं सम्पूर्णम् ।

(*a*-6) **जगन्नाथाष्टकम्.**

JAGANNĀTHĀṢṬAKAM.

Foll. 37*b* and 38*a*.
Similar to the above. By Kṛṣṇacaitanya.
Complete.

Beginning :

कदाचित्कालिन्दीतटविपिनसङ्गीतकवरो
मुदाभीरीनारीवदनकमलास्वाद्यदमधुपः ।
रमाशम्भुब्रह्मामरपतिगणेशार्चितपदो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥

End :

सदा राधाश्लेषः सुरुचिरघनश्यामलतनुः
शरण्यः साधूनां श्रुतिशिखसदावन्द्यचरणः ।
सदा श्रीनीलाद्रौ नियतरमणीकेलिमधुरो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥

जगन्नाथाष्टकं नित्यं चैतन्योक्तं तु यः पठेत् ।
चैतन्यकृपया तस्य प्रेमभक्तिर्भविष्यति ॥

Colophon :

इति श्रीकृष्णचैतन्यचन्द्रमुखपद्मविगलितं श्रीजगन्नाथाष्टकं सम्पूर्णम् ॥

(*a*-7) **चरणारविन्दाष्टकम्.**

CARAṆĀRAVINDĀṢṬAKAM.

Foll. 38*b* and 39*a*.
Eight stanzas in praise of the lotus-like feet of Lord Kṛṣṇa.
Complete.

Beginning :

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चनुतं शरण्यम् ।
भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम् ॥

End :

ये शृण्वन्ति पठन्ति नित्यममलं कृष्णाङ्घ्रिपद्माष्टकं
संसारार्णवतारणं त्रिजगतां भोगात्परं वाञ्छितम् ।

पापौघं परिहृत्य चान्तसमये ह्यादाय वंशोद्भवा
मर्त्या वै नृहरेः पतन्ति निलये ब्रह्मादिभिर्वाञ्छिते ॥

Colophon:

इति श्रीकृष्णचरणारविन्दाष्टकं सम्पूर्णम् ॥

(*a*-8) यमुनास्तोत्रम्.

YAMUNĀSTŌTRAM.

Foll. 39*a* and 39*b*.

Same work as that described under No. 8865 of the D.C.S. MSS., Vol. XVII, but with additional stanzas in the beginning and in the end.

Colophon:

इति श्रीपद्मपुराणे मरीचिवसिष्ठसंवादे यमुनामाहात्म्ये यमुनास्तोत्रं सम्पूर्णम् ॥

(*a*-9). कृष्णलीलाक्रमः.

KṚṢṆALĪLĀKRAMAḤ

Foll. 39*b*—41*b*.

Stanzas of praise on Rādhā and Kṛṣṇa and their amarous sports: by Kṛṣṇadāsagōsvāmin.

Complete.

Beginning:

श्रीकृष्णः कृष्णचैतन्यः स सनातनरूपकः ।
गोपालरघुनाथाप्तव्रजे श्रीजीव पाहि माम् ॥
कामाकर्षिपरानन्दं गवेन्द्रं नन्दनन्दनम् ।
आनन्दिनीमहाशक्तिगोपीजनपतिं भजे ॥
* * * *
तत्र रागानुगामार्गपथिकैरनिशं हृदि ।
भावनीयः कृष्णलीलाक्रमोऽयं परिलिख्यते ॥

End:

रासादिरसमास्वाद्य प्राप्य मोहनमन्दिरम् ।
शयानौ पुष्पशय्यायां राधाकृष्णौ स्मराम्यहम् ॥

Colophon:

इति श्रीकृष्णदासगोस्वामिविरचिता अष्टकालीनश्रीराधाकृष्णलीला समाप्ता ॥

(*a*-10) स्मरणमङ्गलम्.

SMARAṆAMAṄGALAM.

Foll. 41*b*—43*a*.

Eulogistic stanzas on Rādhā and Kṛṣṇa by describing their daily sports.

Complete.

Beginning:

श्रीराधाप्राणबन्धोश्चरणकमलयोः केशशेषाद्यगम्या
या साध्या प्रेमसेवा व्रजचरितपरैर्गाढलौल्यैकलभ्या ।
सा स्यात्प्राप्ता यया तां प्रथयितुमधुना मानसीमस्य सेवां
भाव्यां रागाध्वपान्थैर्व्रजमनुचरितं नैत्यकं तस्य नौमि ॥

End:

ताम्बूलैर्गन्धमाल्यैर्व्यजनहिमपयःपादसंवाहनाद्यैः
प्रेम्णा संसेव्यमानौ प्रणयसहचरीसञ्चयेनातिशान्तौ ।
वाचा कान्तेरणाभिर्निभृतरतिरसौ कुञ्जसुप्तालिशय्यौ
राधाकृष्णौ निशायां सुकुसुमशयने प्राप्तनिद्रौ स्मरामि ॥

Colophon:

इति श्रीगोविन्दलीलामृतसूत्रं स्मरणमङ्गलं सम्पूर्णम् ॥

(*a*-11) मनश्शिक्षाद्येकादशकम्.

MANAŚŚIKṢĀDYĒKĀDAŚAKAM.

Foll. 43*a*—44*a*.

Eleven stanzas inculcating the mind to contemplate upon Rādhākṛṣṇa: by Śrīdāsagōsvāmin.

Complete.

Beginning:

गुरौ गोष्ठे गोष्ठालयिषु सुजने भूसुरगणे
स्वमन्त्रे श्रीनाम्नि व्रजनवयुवद्वन्द्वचरणे ।
सदा दम्भं हित्वा कुरु रतिमपूर्वामतितरा-
मये स्वान्त भ्रातश्चटुभिरभियाचे धृतपदः ॥

End:

मनश्शिक्षाद्येकादशकवरमेतन्मधुरया
गिरा गायत्युच्चैः समधिगतसर्वार्थयति यः ।

सयूथं श्रीरूपानुग इह भवन् गोकुलवने
जनो राधाकृष्णातुलभजनरत्नं स लभते ॥

Colophon :

इति श्रीदासगोस्वामिना विरचितं मनश्शिक्षाद्यैकादशकं सम्पूर्णम् ॥

(*a*-12) स्वनियमदशकम्.

SVANIYAMADAŚAKAM.

Foll. 44*b*—45*b*.

Ten stanzas expressing a devotee's loving attachment and course of action towards Lord Kṛṣṇa : by Śrīdāsagōsvāmin.

Complete.

Beginning :

गुरौ मन्त्रे नाम्नि प्रभुवरशचीगर्भजपदे
स्वरूपे श्रीरूपे गणयुजि तदीयप्रथमजे ।
गिरीन्द्रे गान्धर्वा(र्वे) सरसि मधुपुर्यां व्रजवने
व्रजे भक्ते गोष्ठालयिषु परमास्तां मम रतिः ॥

End :

कृतं केनाप्येतन्निजनियमशास्तिस्तवमिमं
पठेद्यो विस्रब्धः प्रियुगलरूपेऽर्पितमनाः ।
द्रुतं गोष्ठे हृष्टो वसति वसतिं प्राप्य समये
मुदा राधाकृष्णौ भजति सहितेनैव सहितः ॥

Colophon :

इति श्रीदासगोस्वामिना विरचितः स्वनियमस्तवः समाप्तः ॥

(*a*-13) पञ्चश्लोकी.

PAÑCAŚLŌKĪ

Foll. 45*b* and 46*a*.

Five stanzas in which the supplicant expresses his desire to serve Lord Kṛṣṇa in various ways: by Rūpagōsvāmin.

Complete.

Beginning :

कृष्णेति यस्य चरितं मनसाद्रियेत
दीक्षास्ति चेत्प्रणतिभिश्च भजन्तमीशम् ।
शुश्रूषया भजनविज्ञमनन्यमन्य-
लीलादिशून्यहृदमीप्सितसङ्गलब्धौ ॥

End :

हा कृष्ण नीरदरुचे तटिदारकान्तापाङ्गप्रसादपरिफुल्लमुखारविन्द ।
रागे लसन्तममुयाश्रकबिन्दुजालं त्वां वीजयामि ललिताद्यनुकम्पयैव ॥

Colophon :

इति श्रीरूपगोस्वामिना विरचिता पञ्चश्लोकी समाप्ता ॥

(*a*-14) चैतन्यपञ्चश्लोकी.

CAITANYAPAÑCAŚLŌKĪ.

Foll. 46*a* and 46*b*.

Five stanzas in praise of Caitanya and his followers.

Complete.

Beginning :

अनर्पिततरीं चिरात्करुणयावतीर्णः कलौ
समर्पयितुमुन्नतोज्ज्वलरसं स्वभक्तिश्रियम् ।
हरिः पुरटसुन्दरः द्युतिकदम्बसन्दीपितः
सदा हृदयकन्दरे स्फुरतु वः शचीनन्दनः ॥

End :

अकिञ्चनजनो दासः कृताशस्त्यपदद्वयः ।
मदीशश्रीपुरो देव याचे प्रेमधनं वरम् ॥

Colophon :

इति श्रीचैतन्यदेवस्य पञ्चश्लोकी समाप्ता ॥

(*a*-15) गोपीचन्दनमाहात्म्यम्.

GŌPĪCANDANAMĀHĀTMYAM.

Foll. 46*b* and 47*a*.

On the importance and religious efficacy of having, using and presenting Gōpīcandana.

Complete.

Beginning :

यस्मिन् गृहे तिष्ठति गोपिचन्दनं भक्त्या ललाटे मनुजो बिभर्ति चेत् ।
तस्मिन् गृहेऽहं निवसामि सर्वदा श्रियान्वितः कंसनिहा चतुर्मुख ॥

End :

गोपीचन्दनखण्डन्तु या ददाति च वैष्णवे ।
कुलमष्टोत्तरशतं तेनवै तारितं ध्रुवम् ॥

Colophon :

इति श्रीगोपीचन्दनमाहात्म्यं समाप्तम् ॥

(*a*-16) तुलसीमालाधारणनिर्णयः.

TULASĪMĀLĀDHĀRAṆANIRṆAYAḤ.

Foll. 47*a*—51*a*.

On the importance and religious efficacy of wearing a necklace of beads made from Tulasi plant. Quotations are cited herein from various Purāṇas.

Complete.

Beginning :

तथाहि स्कन्दपुराणे—

हरिनामाक्षरयुतं फाले गोपीमृदाङ्कितम् ।
तुलसीमालिकोरस्यां न स्पृशेयुर्यमोद्भटाः ॥

तथाहि पद्मपुराणस्वर्गखण्डे मार्गशीर्षमाहात्म्ये भगवान् ब्रह्माणं प्रति—

तुलसीकाष्ठजां मालां कण्ठस्थां वहते तु यः ।
अप्यशौचोऽप्यनाचारो मामुपैति न संशयः ॥

End :

ब्राह्मणस्य यथा सन्ध्या गृहिणां तर्पणं यथा ।
अदक्षिणा यथा यज्ञा मालाहीना न वैष्णवाः ॥
ततः सर्वेषु कालेषु तुलसीमालिकां दधौ ।
क्षणार्धं तद्विहीनोऽपि विष्णुत्यागी भवेन्नरः ॥

Colophon :

इति श्रीकण्ठलग्नधारणनिर्णयः समाप्तः ॥

(*a*-17) सङ्कीर्तनमाहात्म्यम्.

SAṄKĪRTANAMĀHĀTMYAM.

Foll. 51*a*—52*b*.

On the sacredness and religious efficacy of uttering the names of Lord Kṛṣṇa.

Complete.

Beginning :

कैलासशिखरारूढं भगवन्तं सदाशिवम् ।
वैष्णवाग्र्यं शिवाधारं गौरी पप्रच्छ सादरात् ॥

श्रीगौर्युवाच—

प्राणनाथ कृपासिन्धो सर्वाराध्य सुरेश्वर ।
सङ्कीर्तनस्य माहात्म्यं विस्तरात्कथय प्रभो ॥

श्रीसदाशिव उवाच —

श्रृणु देवि प्रवक्ष्यामि सङ्क्षेपेण वरानने ।
सङ्कीर्तनस्य माहात्म्यं हरेरद्भुतकर्मणः ॥

End:

ये श्रृण्वन्ति पठन्ति शैलतनये माहात्म्यमेतच्छिवं
श्रीलक्ष्मीपतिभावभावितहृदा सङ्कीर्तनस्याद्भुतम् ।
भित्वा मग्नविशेषमश्रुपुलकैर्युक्ता विमुक्ताशया
गच्छन्ते हरिमन्दिरं निजनिजप्रेमैकभावा ध्रुवम् ॥

Colophon:

इति श्रीगौरीतन्त्रे सदाशिवगौरीसंवादे श्रीकृष्णसङ्कीर्तनकथने अष्टमः पटलः ॥

(*a*-18) अधरामृतमाहात्म्यम्.
ADHARĀMṚTAMĀHĀTMYAM.

Foll. 53*a* and 53*b*.

On the importance and religious efficacy of partaking of the leavings of the devotees of God.

Complete.

Beginning:

उच्छिष्टमवशिष्टं च भक्तानां भोजनद्वयम् ।
उच्छिष्टं हरिणा दत्तमवशिष्टं सतां मुखात् ॥

पुराणान्तरे च—

गुरोरुच्छिष्टमन्नं च वैष्णवानां तथैव च ।
अश्नन्ति ये मुदा युक्तास्ते नरा भक्तिशालिनः ॥

End:

ब्रह्महत्यासहस्राणि भ्रूणहत्याशतानि च ।
तानि सर्वाणि नश्यन्ति वैष्णवोच्छिष्टभोजने ॥

Colophon:

इति श्रीअधरामृतमाहात्म्यं सम्पूर्णम् ॥

(*a*-19) बृन्दावनरजोमाहात्म्यम्.
BṚNDĀVANARAJŌMĀHĀTMYAM.

Foll. 53*b*—55*a*.
On the sacredness of the particles of earth in Bṛandāvana.
Complete.

Beginning :

ब्रह्मोवाच—

षष्टिसहस्रवर्षाणि मया तप्तं तपः पुरा ।
नन्दगोपव्रजस्त्रीणां पादरेणूपलब्धये ॥
तथापि न मया प्राप्तास्तासां वै पादरेणवः ।
श्रुत्वा तु ब्रह्मणो वाक्यं भृगुः प्राहाथ सादरम् ॥

End :

नन्दगोपव्रजस्त्रीणामन्तः पादरजो मया ।
काङ्क्षितः पुत्रतास्सम्यक् यतस्ताः श्रुतयो मताः ॥
श्रुत्वैतद्दषयो वाक्यं ब्रह्मणः परमेष्ठिनः ।
सर्वात्मना प्रपन्नास्ते श्रीगोपीजनवल्लभम् ॥

Colophon:

इति श्रीबृन्दावनरजोमाहात्म्यानिर्णयः सम्पूर्णः ॥

(*a*-20) हरिनाममाहात्म्यम्.
HARINĀMAMĀHĀTMYAM.

Foll. 55*b*—56*b*.
Similar to the work described in subdivision (*a*-17) above.
Complete.

Beginning :

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।
अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः ॥
न गङ्गा न गया सिन्धुर्न काशी न च पुष्करः ।
जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयम् ॥

End :

हरे हरे हरे नित्यं यज्जिह्वायां प्रवर्तते ।
ते सर्वे पापनिर्मुक्ता बालिशा अपि पण्डिताः ॥

Colophon:

इति श्रीस्कन्दपुराणे हरिनाममाहात्म्यं समाप्तम् ॥

(*a*-21) हरिनाममाहात्म्यम्.

HARINĀMAMĀHĀTMYAM.

Foll. 56*b*—58*a*

Similar to the above.

Complete.

Beginning:

नाम्नां मुख्यतरं नाम कृष्णाख्यं मे परं तपः ।
प्रायश्चित्तमशेषाणां पापानां मोचकं परम् ॥

End:

हरेर्नामैव नामैव नामैव शरणं परम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥

Colophon:

इति श्रीसारसङ्ग्रहे हरिनाममाहात्म्यं समाप्तम् ॥

(*a*-22) गोविन्दस्तवराजः.

GÔVINDASTAVARĀJAḤ.

Foll. 58*b*—61*b*.

A eulogy on God Kṛṣṇa.

Complete.

Beginning:

स्थिते मनसि गोविन्दे दूरतो याति पातकम् ।
उदयाचलमारूढे दिननाथे तमो यथा ॥
गोविन्देति तथा प्रोक्तं भक्त्या वा भक्तिवर्जितैः ।
दहते सर्वपापानि कल्पान्ताग्निर्गिरीन्यथा ॥

End:

क्षिप्त्वा कलिमुखे पांसुं दोर्भ्यान्तु मनुजेश्वर ।
गतोऽसौ परमं लोकं कृत्वा गोविन्दकीर्तनम् ॥

Colophon:

इति श्रीपद्मपुराणे गोविन्दस्तवराजः समाप्तः ॥

(*a*-23) भगवच्छास्त्रसेवा.

BHAGAVACCHĀSTRASEVĀ.

Foll. 61*b*—62*b*.

On the importance of keeping and reading works, which relate to God, such as the Bhāgavata, Bhagavadgītā, etc.

Complete.

Beginning:

यथा स्कन्दपुराणे—

सर्वस्वेनापि विप्रेन्द्र कर्तव्यः शास्त्रसङ्ग्रहः ।
वैष्णवस्तु महाभक्त्या तुष्ट्यर्थं चक्रपाणिनः ॥
शास्त्रमतिप्रतिख्यातं यद्भक्तिप्रतिपादकम् ।
सर्ववेदान्तसारं हि श्रीभागवतमिष्यते ॥

End:

द्वादशे यथा—

श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं
यस्मिन्पारमहंस्यमेकमतुलं ज्ञानं परं गीयते ।
यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं
तच्छृण्वन्विपठन्विचारणपरो भक्त्या विमुच्येन्नरः ॥

Colophon:

इति श्रीभगवच्छास्त्रसेवा समाप्ता ॥

(a-24) तुलसीभक्तिः.

TULASĪBHAKTIḤ.

Foll. 62*b*—64*a*.

On the nine ways of showing one's devotion to the Tulasī plant.

Complete.

Beginning:

रोपणं सेवनञ्चैव दर्शनं स्पर्शनं तथा ।
वन्दनं पूजनञ्चैव श्रवणं कीर्तनं तथा ॥
स्मरणञ्चेति नवधा तुलसीभक्तिरुच्यते ।

End:

या दृष्टा निखिलाघसङ्घशमनी स्पृष्टा वपुःपावनी
रोगाणामभिवन्दिता निरसनी सिक्तान्तकत्रासिनी ।
प्रत्यासत्तिविधायिनी भगवतः कृष्णस्य संरोपिता
न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः ॥

Colophon:

इति श्रीतुलसीनवधाभक्तिलक्षणं समाप्तम् ॥

(a-25) तुलसीस्तवः.

TULASĪSTAVAḤ.

Foll. 64*a*—66*b*.

A eulogy on the Tulasī plant.

Complete; as found in the Skāndapurāṇa.

Beginning:

शतानन्द उवाच—

नामोच्चारे कृते यस्याः प्रीणात्यसुरदर्पहा ।
पापानि यान्ति विलयं पुण्यं भवति चाक्षयम् ॥
सा कथं तुलसी लोके पूज्यते वर्ण्यते न हि ।
दर्शनेनापि यस्यास्तु फलकोटिमदाशतम्(?) ॥

End:

तीर्थकोटिसहस्रैस्तु यत्फलं मखकोटिभिः ।
तत्फलं समवाप्नोति पठित्वा तुलसीस्तवम् ॥

* * * *

यस्तु श्रवणयेन्नित्यं तुलसीगहनं वनम् ।
गीताशास्त्रं हरेः पूजां स धीमान्पुरुषोत्तम ॥

Colophon:

इति स्कान्दपुराणे तुलसीस्तवः सम्पूर्णः ॥

(a-26) गुरुभक्तिमाहात्म्यम्.

GURUBHAKTIMĀHĀTMYAM.

Foll. 67*a*—68*a*.

On the importance of devotion and attachment to one's spiritual preceptor.

Complete.

Beginning:

अथाधिवक्ष्ये सङ्क्षेपाच्छिष्यस्याचारपद्धतिम् ।
साधु विज्ञाय यां देवि साधकः सिद्धिमाप्नुयात् ॥
न लङ्घयेद्गुरोराज्ञामुत्तरं न वदेत्तथा ।
दिवा रात्रौ तथाज्ञाश्च दासवत्परिपालयेत् ॥

End:

गुरुस्त्रीपुत्रबन्धूनां दोषं नैव प्रकाशयेत् ।
भक्षयेन्नैव तद्द्रव्यं न हरेन्नैव हारयेत् ॥
इति ते कथितं सर्वं सुव्रते साम्प्रतं मया ।
एवं यः कुरुते शिष्यः स याति परमां गतिम् ॥

Colophon:

इति श्रीशिष्याचारनिर्णये महारहस्ये ईश्वरपार्वतीसंवादे गुरुभक्तिवर्णनं नाम प्रथमः पटलः ॥

(*a*-27) गुरुगीताविधानम्.
GURUGĪTĀVIDHĀNAM.

Foll. 68*a*—74*b*.
On the greatness of the Guru or spiritual preceptor.
Complete.

Beginning:

श्रीसूत उवाच—
कैलासशिखरे रम्ये भक्तिसाधनहेतवे ।
प्रणम्य पार्वती भक्त्या शङ्करं परिपृच्छति ॥
पार्वत्युवाच—
नमस्ते देवदेवेश परात्पर जगद्गुरो ।
सदाशिव महादेव गुरुदीक्षां वदस्व मे ॥
* * * *
गुकारस्त्वन्धकारः स्याद्रुकारस्तु विनाशकृत् ।
अन्धकारविनाशित्वाद्गुरुरित्यभिधीयते ॥

End:

अभक्ते वञ्चके धूर्ते पाषण्डे नास्तिके नरे ।
मनसापि न वक्तव्यं गुरुगीताभिधं प्रिये ॥
संसारसागरसमुद्धरणैकमन्त्रं ब्रह्मादिदेवमुनिपूजितसिद्धमन्त्रम् ।
दारिद्र्यदुःखभवशोकविनाशमन्त्रं लोके महाभयहरं गुरुराजमन्त्रम् ॥

Colophon:

इति श्रीस्कान्दपुराणे उत्तरखण्डे हरपार्वतीसंवादे गुरुगीताभिधं नामस्तोत्रं समाप्तम् ॥

(*a*-28) गुरुलक्षणम्.

GURULAKṢAṆAM.

Foll. 74*b* and 75*a*.

On the requisite characteristics and equipments of a proper Guru.

Beginning:

तथा श्रीनारदीये मन्त्ररहस्ये चतुर्थपटले भगवान्नारदं प्रत्याह—

जितेन्द्रियः सदाचाररतश्शान्तः प्रियंवदः ।
मनसा कर्मणा वाचा परपीडापराङ्मुखः ॥
नपुंसकः परस्त्रीषु स्वदारानिरतः सदा ।
मान्त्रिकः सर्वशास्त्रज्ञः परमात्मविचक्षणः ॥

End:

तथाहि श्रीनारदीये ब्रह्मा नारदं प्रति—

वाञ्छाकल्पतरुः साक्षादिष्टदेवो गुरुर्द्विजः ।
सेवयाराधकस्तस्य सत्वरं सिद्धिमाप्नुयात् ।

(*a*-29) शिष्यलक्षणम्.

ŚIṢYALAKṢAṆAM.

Foll. 75*a*—77*a*.

On the requisite characteristics to be found in a proper disciple.

Beginning:

यथा नारदीये चतुर्थाध्याये भगवान्नारदं प्रति—

गुरुसेवापरश्चैव गुरुभक्तिसमन्वितः ।
गुरुपादार्चनरतः सदा गुरुसमागतः ॥
यथा राज्ञः किङ्कराश्च कुर्वन्त्याज्ञां समाहिताः ।
गुरोराज्ञां तथा शिष्यः सर्वदा परिपालयेत् ॥

End:

हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
तस्मात्सर्वप्रयत्नेन गुरुदेवं प्रसादयेत ॥

तथाहि ब्रह्मवैवर्ते—

नश्यन्ति देवास्सिद्धाश्च विश्वानि चाखिलानि च ।
कृष्णभक्ता न नश्यन्ति जन्ममृत्युजरापहाः ॥

(*a*-30) गुरुसमीपे शिष्यप्रार्थनाक्रमः.

GURUSAMĪPE ŚIṢYAPRĀRTHANĀKRAMAḤ.

Foll. 77*a*—78*a*.

On the proper method for a disciple to approach the Guru for receiving spiritual instructions and initiation.

Beginning:

तथाहि श्रीनारदीये—

त्रायस्व भो जगन्नाथ गुरो संसारवह्निना ।
दग्धं मां कालदष्टश्च त्वामहं शरणं गतः ॥
इति संप्रार्थ्य गृह्णीयाद्दीक्षां भागवतीं गुरोः ।
विनयातिशयैर्युक्तः शिष्यस्तत्परमानसः ॥

End:

आदौ गुरोः प्रणामश्च पश्चात्कृष्णं नमेद्बुधः ।
लोकापवादभरतः कुरुते हेलया हरेः ॥

* * * *

तथा पाद्मे—

तावद्भ्रमन्ति संसारे पितरः पिण्डतत्पराः ।
यावद्वंशे सुतः कृष्णप्रेमभक्तिर्न जायते ॥

(*a*-31) अवैष्णवगुरुमन्त्रत्यागविचारः.
AVAIṢṆAVAGURUMANTRATYĀGAVICĀRAḤ.

Foll. 78*a*—79*a*.

An investigation as to the undesirability of choosing any person other than a Vaiṣṇava spiritual preceptor for learning the Mantras.

Beginning:

तथाहि पाद्मे शिवः पार्वतीं प्रति—

सहस्रशाखाध्यायी च सर्वयज्ञेषु दीक्षितः ।
कुले महति जातोऽपि न गुरुः स्यादवैष्णवः ॥
आचार्यः सोऽपि विज्ञेयो भवबन्धविदारकः ।

तथाहि गौतमतन्त्रे—

अवैष्णवोपदिष्टेन मन्त्रेण निरयं व्रजेत् ।
पुनश्च विधिना सम्यग्ग्राहयेद्वैष्णवाद्गुरोः ॥

End;

तथाहि नारदपञ्चरात्रे—

संप्रदायक्रमेणैव ये कृष्णचरणाम्बुजम् ।
भजन्ति वैष्णवाश्श्रेष्ठा भक्तास्ते नात्र संशयः ॥

(a-32) संप्रदायविचारः.
SAMPRADĀYAVICĀRAḤ.

Foll. 79a—87b.

Contains the following subjects :—

१. सनकसम्प्रदायविचारः.
२. तिलकधारणसम्प्रदायः.
३. तिलकस्य फलम्.
४. ऊर्ध्वपुण्ड्रविचारः.
५. तुलस्यादिपद्ममालाधारण-विचारः.
६. गुरुक्रमः.
७. रामानन्दसम्प्रदायलक्षणम्.
८. वैष्णवानामादरविचारः.
९. वैष्णवसेवाविचारः.

Beginning :

तथाहि श्रीपाद्मोत्तरे—

सनकश्रीब्रह्मरुद्रसम्प्रदायचतुष्टयम् ।
अतो विना शतं मन्त्रान् गृह्णतोऽप्यशुचीन्विदुः ॥

* * * *

पाद्मे शिवः पार्वतीं प्रति—

अतः कलौ भविष्यन्ति चत्वारः सम्प्रदायिनः ।
श्रीब्रह्मरुद्रसनका वैष्णवाः क्षितिपावनाः ॥

तथाहि श्रीनारायणः सनत्कुमारं प्रति—

उच्यते क्रमतः सिद्धिस्तत्राचार्यचतुष्टयम् ।
सम्प्रदाये तु सनके त्वाचार्यस्तु निमानुजः ॥
तत्र श्रीसम्प्रदायेऽस्मिन् नाम्ना रामानुजो मतः ।
सम्प्रदाये ब्रह्मनाम्नि मध्वाचार्यः प्रतिष्ठितः ॥
रुद्राख्ये सम्प्रदायेऽस्मिन्विष्णुः श्यामः सुनिश्चितः ।

End :

एकादशस्कन्धे नारदं प्रति वसुदेववाक्यम्—

ब्रह्मंस्तथापि पृच्छामो धर्मान् भागवतांस्तव ।
यान् श्रुत्वा श्रद्धया मर्त्यः मुच्यते सर्वतो भयात् ॥ इति ॥

Colophon :

इति श्रीवैष्णवसेवा समाप्ता ॥

(*a*-33) अवैष्णवमन्त्रदोषविचारः.

AVAIṢṆAVAMANTRADŌṢAVICĀRAḤ.

Foll. 88*a*—89*a*.

Similar to the work described under subdivision (*a*-31) above.

Beginning:

आदिपुराणे यथा—

अवैष्णवमुखोद्गीर्णं पावनं भगवद्यशः ।
शुद्ध(द्धि)कामो न गृह्णीयात्सर्वोच्छिष्टं यथा पयः ॥

तथाहि ब्रह्मवैवर्ते नन्दं प्रति श्रीकृष्णः—

सर्वेषामेव संकल्पाद्वैष्णवानां विपर्ययः ।
शैवाच्छाक्ताद्गृहीत्वा तु हरौ भक्तिर्न विद्यते ॥
मन्त्रं क्षिप्यात्तथा मन्त्रं गृह्णीयान्न कदापि च ।

End:

नारदपञ्चरात्रे भगवान्नारदं प्रति—

मद्गुणश्रवणाद्ये च पुलकाङ्कितविग्रहाः ।
सगद्गदाः साश्रुनेत्रास्ते नरा वैष्णवोत्तमाः ॥

* * * *

करोति सफलं जन्म श्रुत्वा कृष्णकथामृतम् ।
न याति तत्पुरं कालो वैनतेयमिवोरगः ॥
न जहाति क्षणं तस्य समीपं भगवान् हरिः ।

(*a*-34) ऊर्ध्वाम्नायसंहिता.

ŪRDHVĀMNĀYASAṀHITĀ.

Foll. 89*a*—90*b*.

The portion contained herein is a eulogy on the 12 incarnations of God Viṣṇu.

Beginning:

श्रीनारद उवाच—

ऊर्ध्वेनैव मुखेनैव कथितो ग्रन्थ उत्तमः ।
देवदेवेन रुद्रेण ऊर्ध्वाम्नाय इति स्मृतः ॥

श्रीव्यास उवाच—

प्रकाशान्देवदेवस्यावतारान्वदस्व मे ।
अप्रकाशांश्च देवर्षेऽवतारान् भुवि पुण्यदान ॥

End:

ततो विष्णुयशो(शा) नाम शम्बलग्राममास्थितः ।
कल्किरूपेण तत्राहं जनिष्ये दस्युनाशकृत् ॥
इति प्रतिज्ञां विज्ञाय शार्ङ्गिणो वनमालिनः ।
ब्रह्मा सृष्टिं तदा चक्रे सुरासुरमनुष्यकान् ॥

Colophon:

इत्यूर्ध्वाम्नायसंहितायामवतारद्वादशकीर्तनं नाम द्वितीयोऽध्यायः ॥

(*a*-35) यन्त्रपद्धतिः.

YANTRAPADDHATIḤ.

Foll. 90*b*—93*b*.

On the drawing of a mystic diagram to represent Lord Kṛṣṇa.

Complete.

Beginning:

एकदा नारदं वीक्ष्य रम्ये बदरिकाश्रमे ।
व्यासस्तं वै नमस्कृत्य चाब्रवीद्बहुसादरः ॥

श्रीवेदव्यास उवाच—

ब्रह्मपुत्र महाभाग कृष्णतत्त्वविशारद ।
येन वेद्मि हरेः स्थानं तदेव कथय प्रभो ॥

* * * *

तत्र श्रीगोपिकाः सर्वाः श्रीकृष्णपदसेविताः ।
अष्टषट्कोणयन्त्रे च विभाति त्रिपुरा सुरा? ॥
नित्यस्थलाधिकाराढ्या हरिभक्तिसमाश्रिता ।

End:

केवलं गोपिकाभावं ध्यात्वा येऽपि भजन्ति हि ।
ते यान्ति तत्पदं नित्यं मन्त्रयन्त्रविभाविताः ॥

* * * *

श्रुत्वा तयोश्च संवादं व्यासशिष्यः सुपण्डितः ।
लिखित्वा कृष्णचन्द्रस्य चरितं तत्प्रकाशितम् ॥

Colophon:

इति श्रीतत्त्वसारावल्यां व्यासनारदसंवादे यन्त्रपद्धतिः समाप्ता ॥

(*a*-36) कृष्णनामत्रयमाहात्म्यम्.

KṚṢṆANĀMATRAYAMĀHĀTMYAM.

Foll. 93*b*—96*a*.

On the importance of the Mantra-formula relating to Lord Kṛṣṇa and consisting of three names containing 32 syllables.

Complete.

Beginning:

अनाख्येयमिदं प्रश्नसारं गोप्यं सदैव हि ।
तथापि त्वां प्रवक्ष्यामि दृढभक्तं जितेन्द्रियम् ॥
द्वात्रिंशदक्षरं मन्त्रं मम नामत्रयान्वितम् ।
प्रणवाद्यन्तसंरुद्धं यो जपेत्सुसमाहितः ॥

* * * * *

अष्टाक्षरादयो मन्त्रा न सर्वजनतारकाः ।
नाधिकारस्तु शूद्राणां तस्मिन्नेव मनौ मुने ॥
वर्णानामाश्रमाणाश्च स्त्रीणां सङ्करजन्मनाम् ।
सर्वेषामधिकारोऽस्ति मन्त्रे नामत्रयात्मके ।

End:

एवं यस्तु विजानाति मन्त्रार्थं गुह्यमुत्तमम् ।
गुरोर्वक्त्रात्स्वतो वापि याति नित्यपदं मम ॥

Colophon:

इति श्रीनारदपञ्चरात्रे परमार्थनिर्णये श्रीकृष्णनारदसंवादे कृष्णनामत्रयमाहात्म्ये मन्त्रविधानं नाम अष्टमोऽध्यायः ॥

(*a*-37) ब्रह्मसंप्रदायपद्धतिः.

BRAHMASAṀPRADĀYAPADDHATIḤ.

Foll. 96*b*—100*b*.

Herein Kṛṣṇa is described as the Supreme Brahman and as the final goal of salvation.

Complete.

Beginning:

श्रीमद्गोपालदेवस्य मन्त्रोऽन्तर्दशवर्णकः ।
अष्टादशाक्षरो ब्रह्मसम्प्रदायमयो मतः ॥

* * * *

तत्र प्रमाणं यथा श्रीभागवते द्वितीयस्कन्धे—

स आदिदेवो भजतां परो गुरुस्सुधिष्ण्यमास्थाय सिसृक्षयैक्षत ।
तां नाध्यगच्छद्दृशमत्र सम्मतां प्रपञ्चनिर्माणविधिर्यथा भवेत् ॥

भजतां नारदादीनां परो गुरुः भक्तिरहस्योपदेष्टा । एतेन ब्रह्मणः सम्प्रदायप्रवर्तकत्वमुक्तम् ।

End:

अत एवेतिहाससंहितायां श्रीमदष्टादशाक्षरान्तर्वर्तिकृष्णाय नम इति पञ्चाक्षरो मन्त्रो ब्रह्मसम्प्रदायमयत्वेनोक्तः ।

तद्यथा इतिहाससंहितायाम्—

कृष्णाय नम इत्येष मन्त्रस्सर्वार्थसाधकः ।
प्रेमभक्तिप्रदो ब्रह्मसम्प्रदायमयो मतः ॥ इति ॥

* * * *

यतः श्रीकृष्णचैतन्यो निम्बानन्दतया स्फुटः ।
तदुक्तधर्मसंपन्ना निम्बानन्दितया मताः ॥

Colophon:

इति श्रीब्रह्मसम्प्रदायनिर्णयः समाप्तः ॥

(*a*-38) **गौरमन्त्रोद्धारः.**

GAURAMANTRODDHĀRAḤ.

Foll. 100*b*—102*a*

On details connected with the repitition of the Mantra-formula relating to Gaurāṅga, who is one of the chief leaders of the Caitanya sect.

Beginning:

श्रीनारद उवाच—

चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगम् ।
तस्या तावच्छती सन्ध्या सन्ध्यांशश्च ततः परम् ॥

* * * *

श्रीव्यास उवाच—

केन रूपेण भगवान्पूजितः स्यात्सुखावहः ।
घोरे कलियुगे प्राप्ते तन्मे वद दयानिधे ॥

श्रीनारद उवाच—

कृष्णरूपेण भगवान् कलौ पापप्रणाशकृत् ।
गौररूपेण भगवाम् भावितः पूजितस्तथा ॥

* * * *

मन्त्रं वक्ष्यामि ते ब्रह्मन्महापुण्यप्रदं शुभम् ।
ओं गौराङ्गाय नम इति मन्त्रो लोकेषु पूजितः ॥

End:

गङ्गातीरे कुरुक्षेत्रे वाराणस्यां विशेषतः ।
बृन्दावने च मन्त्रोऽयं साधितः सिद्धिमाप्नुयात् ।
पुरुषोत्तमे च मन्त्रोऽयं शीघ्रं सिध्यति साधितः ॥

Colophon:

इत्यूरुदा(र्ध्वा)म्नायसंहितायां गौरमन्त्रोद्धारो नाम तृतीयोऽध्यायः ॥

(*a*-39) **चैतन्यप्रादुर्भावः.**

CAITANYAPRĀDURBHĀVAḤ.

Foll. 102*a*—104*b*.

On the origin of the incarnation of Caitanya; as laid down in the eighth Adhyāya of the Vāyupurāṇa.

Complete.

Beginning:

शतानन्द उवाच—

ब्रूहि तात कृपालोऽसि भक्तानुग्रहकारकः ।
परित्राणाय लोकानां हेतुः कल्मषचेतसाम् ॥

* * * *

श्रीकृष्ण उवाच—

दिविजा भुविजामध्यमहं वै भक्तिरूपकः ।
कलौ सङ्कीर्तनारम्भे भविष्यामि शचीसुतः ॥
स्वर्णदीतीरमासाद्य नवद्वीपजनाश्रयः ।
तत्र द्विजकुलप्राप्तो जनिष्यामि द्विजालये ॥
भक्तियोगप्रदानाय लोकस्यानुग्रहाय च ।
सन्न्यासरूपमाश्रित्य कृष्णचैतन्यनामधृक्(त) ॥

End :

शतानन्द उवाच—

इति निगदितमेतद्वेदगुह्यातिशुद्धं सकलनिगमवल्लीकेवलैरप्रकाशम् ।
निखिलभुवनसारं प्रेमपीयूषधारं तरलिततनुजीवं कृष्णकेलिप्रकाशम् ॥

Colophon :

इति श्रीमद्वायुपुराणे गौतमशतानन्दसंवादे चैतन्यभविष्यप्रादुर्भावो नामाष्टमोऽध्यायः ॥

(*a*-40) नित्यानन्दप्रादुर्भावः.

NITYĀNANDAPRĀDURBHĀVAḤ.

Foll. 104*b*—106*a*.

The story relating to the origin and birth of Nityānanda; as laid down in the 20th Adhyāya of the Skāndapurāṇa.

Complete.

Beginning :

नित्यानन्दः पुरा कश्चिद्ब्रूहि मे मुनिपुङ्गव ।
का निष्ठा परधर्मः को ज्ञानध्यानपरायणम् ॥

* * * *

श्रीगौतम उवाच—

शृणु भक्तिः परा निष्ठा देवानां च हितैषिणाम् ।
यान्ति सत्त्वं शृणु वचो मर्त्यो धर्मपरायणः ॥
श्यामा नाम सम्यग्भू(मुद्भूता) कृष्णसख्यानुभावजा ।
सा तु नित्यस्थले ख्याता नारायणमनामयम् ॥
स पुनर्बलभद्राङ्गं विधृतो व्रजमण्डले ।
कलौ भूयो नवद्वीपे स नित्यानन्दनामधृक्(त्) ॥

End :

लोकाह्लादि प्रमादिपापविषये संसारसेवीपरं
माहान्तेन प्रमोदहान्तकवरः कार्तान्तसीमापथम्(?) ।
कान्तस्सज्जनसश्चये . . . . श्रेयः सदा दातृषु
भक्तरसान्नित्ये संश्रयतनाः कीर्तन्यवाञ्छावटम्(?) ॥

Colophon :

इति श्रीस्कान्दपुराणे गौतमशतानन्दसंवादे श्रीनित्यानन्दभविष्यप्रादुर्भावो नाम विंशतितमोऽध्यायः ॥

(*a*-41) बलराममाहात्म्यम्.

BALARĀMAMĀHĀTMYAM.

Foll. 106*a*—108*b*.

On the greatness of Balarāma, the elder brother of Lord Kṛṣṇa; as laid down in the Brahmāṇḍapurāṇa.

Complete.

Beginning:

धरण्युवाच—

कथ्यतां मे महाभाग बलदेवस्य लक्षणम् ।
स्वरूपं च तथैव त्वं भावं लीलां वदस्व मे ॥

* * *

बलेति सर्वकार्येषु बलवान् हृद्यनिर्मलः ।
बलभद्र इति प्रोक्तः प्रसङ्गान्मे समासतः ॥

End:

भूत्वानन्तस्तथैवांशे शेषाहित्वं धृतस्तथा ।
एवं नानाप्रकारेण नानारूपं प्रकाशयेत् ॥

* * * *

दिने रासस्वरूपेण कृष्णसङ्गे वसत्यसौ ।
मामकं गुह्यमेतद्धि कथितं मे समासतः ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे शेषधरणीसंवादे श्रीबलराममाहात्म्यं समाप्तम् ॥

(*a*-42) अपराधनिरसनस्तोत्रम्.

APARĀDHANIRASANASTŌTRAM.

Foll. 108*b*—110*a*.

A eulogy addressed to God to pardon the supplicant for his faults and sins.

Complete.

Beginning:

श्रीनारद उवाच—

योऽसौ भगवता प्रोक्तो धर्मवृत्तिकरो नृणाम् ।
कथं तस्य विनाशः स्यादुच्यतां भगवत्प्रिय ॥

* * * *

एवं नारद शङ्करेण कृपया मह्यं मुनीनां पुरः
प्रोक्तं नामसुखावहं भगवतो वर्ज्यं सदा यत्नतः ।
ये ज्ञात्वा न हि वर्जयन्ति सहसा नाम्नोऽपराधान्दश
क्रुद्धा मातरमप्यभोजनपराः खिद्यन्ति ते बालवत् ॥
अपराधविनिर्मुक्तो नाम्नि यत्नं समाचरन् ।
नाम्नैव तव देवर्षे सर्वं सेत्स्यति नान्यतः ॥

End:

इमं रहस्यं परमं पुरा नारद शङ्करात् ।
श्रुतं सर्वाशुभहरमपराधनिराकरम् ॥
वेदविष्णवभिधानां ये ह्यपराधपरा नराः ।
तेषामपि भवेन्मुक्तिः पठनादेव नारद ॥

Colophon:

इति श्रीपद्मपुराणे स्वर्गखण्डे कलिधर्मनिर्णयो नाम अपराधनिरसनस्तोत्रं सम्पूर्णम् ॥

(*a*-43) राधाविरूपाक्षस्तुतिः.
RĀDHĀVIRŪPĀKṢASTUTIḤ.

Foll. 110*a*—112*a*.
A eulogy on Rādhā.
Complete.

Beginning:

विरूपाक्ष उवाच—
ब्रह्मादयस्तुतिशतैर्भुवि तामवेद्यां जानन्ति नो ललितकाञ्चनसौम्यरूपाम् ।
स्तौमीति किं जडमतिः सकलैककर्त्रीं राधे प्रसीद परमेश्वरि तन्नमस्ते ॥

* * * *

महाविष्णुस्साक्षान्न तव चरणौ द्रष्टुममितः
क्षमोऽभूदद्यापि स्वयमपि महाशम्भुरचलः ।
न जानीते नूनं सुमुखि भवतीं स्तौमि किमिति
प्रसन्ने दासीत्वं मयि वितर कृष्णप्रियतमे ॥

End:

सर्वक्षणं त्वयि नतिं प्रकरोतु मूर्द्धा कर्णः शृणोतु चरितं वदनं शृणोतु ।
चित्तं विभावयतु रूपमनन्तलीलं सर्वेश्वरि प्रतिजनौ मयि देहि दास्यम् ॥

Colophon :

इति श्रीब्रह्मयामले श्रीराधाविरूपाक्षस्तुतिस्समाप्ता ॥

Foll. 112b—114a contain a description of the eight companions of Rādha.

(a-44) सख्यष्टकम्.

SAKHYAṢṬAKAM.

Foll. 114a—115a.

Eight stanzas in praise of the eight companions of Rādhā.

Complete.

Beginning :

गोरोचनारुचिमनोहरकान्तिदेहां मायूरपुच्छतुलितच्छविचारुचेलाम् ।
राधे तव प्रियसखीं च गुरुं सखीनां ताम्बूलभक्तिललितां ललितां नमामि ॥

End :

नानाविचित्रमणिकाञ्चनकान्तिभूषां गन्धोल्लसत्कुसुमचन्दनचारुवेषाम् ।
श्रीराधिकां परतनूसुषमां किशोरीं वन्दे सदा व्रजनृपात्मजचित्तगौ(चौ)रीम्॥

Colophon :

इति श्रीराधाकृष्णपरमप्रेष्ठसख्यष्टकं सम्पूर्णम् ॥

(a-45) लवङ्गमञ्जरीप्रार्थनाष्टकम्.

LAVAṄGAMAÑJARĪPRĀRTHANĀṢṬAKAM.

Fol. 115.

A eulogy in eight stanzas addressed to Lavaṅgamañjarī, a consort of Complete.

Beginning :

क्षणप्रभाकान्तिविनिन्दिदेहा तारावलीकान्तिसमानवस्त्रा ।
भूयाल्लवङ्गोत्तरमञ्जरीयं कृपाकरी मे पदकिङ्करस्य ॥

End :

नवजाम्बूनदचारुकेतकीद्युतितुल्याङ्गविराजिता हि या ।
भ्रमशालिदुकूलधारिणी मुदिता मेऽस्तु विलासमञ्जरी ॥

Colophon :

इति श्रीमञ्जरीप्रार्थनाष्टकं समाप्तम् ॥

(a-46) त्रैलोक्यमोहनस्तोत्रम्.

TRAILŌKYAMŌHANASTŌTRAM

Foll. 115b—122a.

A eulogy on Rādhā, who is said to captivate the three worlds.
Complete.

Beginning :

श्रीनारद उवाच—

भगवन्देवदेवेश युगलब्रह्मतत्त्ववित् ।
बृन्दावनरहःक्रीडां नूनं जानासि तत्त्वतः ॥
राधायाः कृष्णदेवस्तु कथं वश्यत्वमाप्नुयात् ।
त्रैलोक्यमोहनं चैतत्कृपया कथय प्रभो ॥

श्रीमहादेव उवाच—

सम्यक् पृष्टं महाभाग राधाकृष्णकुतूहलम् ।
गुह्याद्गुह्यतमं हृद्यं सर्वतन्त्रेषु गोपितम् ॥

End :

इति ते कथितं तत्त्वं गुह्याद्गुह्यतरं मुने ।
त्रैलोक्यमोहनं स्तोत्रं परं ब्रह्मस्वरूपिणी ॥

* * * *

ब्रह्मानन्दरसादनन्तगणितो रम्यो रसो वैष्णव-
स्तस्मात्कोटिगुणोज्ज्वलश्च मधुरः श्रीगोकुलेन्दो रसः ।
तस्यानन्तचमत्कृतेः प्रतिमुहुर्वीक्षानतानां परं
श्रीराधापदपद्ममेव परमं सर्वस्वभूतं महः ॥

Colophon :

इति श्रीस्वायम्भुवागमे श्रीरुद्रनारदसंवादे श्रीमद्राधारहस्यत्रैलोक्यसम्मोहनस्तोत्रं सम्पूर्णम् ॥

(*a*-47) गोपालपूजा.

GŌPĀLAPŪJĀ.

Foll. 122*a*—124*b*.

On the conduct of worship of Gōpāla, i.e., God Kṛṣṇa, in accordance with the Caitanya school : by Sanātanagōsvāmin.

Complete.

Beginning :

अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया ॥

अथ तालत्रयं दिग्बन्धनं ओं इन्द्राय नमः, ओं अग्नये नमः, ओं यमाय नमः, ओं नैरृताय नमः, ओं वरुणाय नमः, ओं वायवे नमः, ओं कुबेराय नमः,

* * * *

श्रीकूर्मो देवता, अनन्तबीजम्, पृथिवी शक्तिः, आसने विनियोगः ।

End:

अथ नैवेद्यम्—विकचोत्पलसन्निभां ग्रासमुद्रां प्रदर्श्य मूलमन्त्रमुच्चार्य श्रीकृष्णाय नैवेद्यं स्वाहा, श्रीकृष्णाय आचमनम्, मूलमन्त्रमष्टोत्तरं शतं जपेत्, पुष्पाञ्जलित्रयं दद्यात्, प्रदक्षिणम् ॥

Colophon:

इति श्रीसनातनगोस्वामिविरचिता गोपालपूजा समाप्ता ॥

(*a*-48) **वैष्णवपूजाविधानम्.**

VAIṢṆAVAPŪJĀVIDHĀNAM.

Foll. 124*b*—127*a*.

On the conduct of the worship of Kṛṣṇa, Rādhā and other devotees of Viṣṇu: by Rūpagōsvāmin.

Complete.

Beginning:

प्रथमतः श्रीराधाकृष्णस्मरणम्, आसनोपरि उपविश्य सिद्धदेहं भावयित्वा श्रीगुरुभ्यो नमः श्रीपरमगुरुभ्यो नमः श्रीपरापरगुरुभ्यो नमः, शङ्खप्रक्षालनम्, शङ्खे जलं पूरयित्वा शङ्खे तीर्थावाहनम् ।

* * * *

अनेन मन्त्रेण गन्धपुष्पाभ्यां संपूज्य अनेन मन्त्रेण वामहस्तेन घण्टावादनं मूलमन्त्रेण श्रीकृष्णाय पुष्पाञ्जलित्रयं दद्यात् ।

End:

ब्रह्माण्डपुराणे—

आदौ चतुःपादतलैकदेशे दुना(द्विर्ना)भिदेशे मुखमण्डलैकम् ।
सर्वाङ्गदेशे शुचिसप्तवारमारात्रिकं कृष्णमिमं प्रकुर्यात् ॥
कोटयो ब्रह्महत्यानामगम्यागमकोटयः ।
दहत्यालोकमात्रेण विष्णोरारात्रिकं मुखम् ॥

* * * *

तदनन्तरं श्रीराधाकृष्णोपरि शङ्खमारात्रिकं कुर्यात् । शङ्खस्थतोयं स्वशिरसि प्रक्षिप्य बाह्यं किञ्चित्प्रक्षेपयेत् ॥

Colophon:

इति श्रीरूपगोस्वामिविरचितं वैष्णवपूजाविधानं समाप्तम् ॥

(*a*-49) जन्माष्टमीव्रतकल्पः.

JANMĀṢṬAMĪVRATAKALPAḤ.

Foll. 127*b*—134*b*.

Similar to the work described under No. 8266 of the D.C.S. MSS., Vol. XVI.

Complete.

Beginning:

आदौ सङ्कल्पः श्रीविष्णुर्विष्णुर्विष्णुः ।

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

* * * *

मम श्रीकृष्णचरणारविन्दसुप्रीतिपूर्वकप्रेमभक्तिप्राप्तये श्रीकृष्णजन्मजयन्त्यष्टमीव्रतमहं कुर्वीय । अस्मिन् सङ्कल्पिते कर्मणि सिद्धिरस्तु शुभं भवतु ।

वासुदेवं समुद्दिश्य सर्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अद्य कृष्णाष्टमी देव नभश्चन्द्रां सरोहिणीम् ।
अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥

* * * *

Colophon:

इति श्रीजन्माष्टमीजयन्तीविधिः समाप्तः ॥

भविष्योत्तरपुराणोक्तजन्माष्टमीव्रतं लिख्यते—नित्यकर्मानन्तरं जन्माष्टमेः पूर्वदिने निरामिषमेकवारं भुक्त्वा सायंकाले दन्तधावनं कुर्यात् ।

End:

आचार्याय यानवाहनादि यथाशक्ति सन्तुष्टं कृत्वा, आचार्यमनुज्ञाप्य पारणां कुर्यात् । पारणामन्त्रः—सर्वाय सर्वेश्वराय सर्वसम्भवाय सर्वपतये गोविन्दाय नमो नमः, इष्टैस्सह भोज्यताम् ॥

Colophon:

इति श्रीजन्माष्टमीविधिः समाप्तः ॥

(*a*-50) राधाजन्माष्टमीपूजाविधिः.

RĀDHĀJANMĀṢṬAMĪPŪJĀVIDHIḤ.

Foll. 135*a*—138*b*.

On the Vrata which consists of the worship of Rādhā on the 8th day in the bright fortnight of the month Bhādrapada.

Complete.

Beginning:

आदावर्घ्यसंस्कारः, ततः पञ्चदेवतापूजा, आम्रादिपल्लवोपेतं घटं जलेन पूरयित्वा तदुपरि नारिकेलफलं संस्थाप्य घटं स्पृष्ट्वा आवाहयेत् ।

*   *   *   *

मम श्रीराधिकायाश्चरणारविन्दप्रेमभक्तिप्राप्तये श्रीराधाजन्माष्टमीव्रत-कर्मारम्भः क्रियते—यदेत्यादि ।

End:

सप्तारात्रिकवन्दापनामङ्गलारोपणादिकं कुर्यात्, प्रसादग्रहणं प्रदक्षिणम्, महामहोत्सवकरणम्, अपराह्णे वैष्णवप्रियभोजनं पारणं कथाश्रवणम् ॥

Colophon:

इति श्रीभविष्योत्तरे श्रीराधाजन्माष्टमीव्रतपूजा समाप्ता ॥

(*a*-51) चैतन्यजन्मोत्सवविधिः.

CAITANYAJANMŌTSAVAVIDHIḤ.

Foll. 138*b*—141*a*.

On the procedure to be adopted in celebrating the birthday festival of Caitanya, in each year. The procedure is taken from the Vāyu-purāṇa.

Complete.

Beginning:

शतानन्द उवाच—

हे देव हे महाप्राज्ञ सर्वज्ञ सर्वभावन ।
जन्मोत्सवस्य चैतन्यविधिं कथय मां प्रभो ॥

*   *   *   *

फाल्गुन्यां पौर्णमास्यां च चैतन्यस्य जन्मवासरे ।
तस्मिन्दिने द्विजश्रेष्ठ ये कुर्वन्ति महोत्सवम् ॥
ते भक्तिं प्राप्नुयुर्नित्यं चैतन्येन सदा भवेत् ।

End of the first portion :

य एवं कुरुते विप्रश्चैतन्यजन्मउ(नुरु)त्सवम् ॥
अपुत्रो वैष्णवं पुत्रं लभते नात्र संशयः ।
जन्मजन्मान्तरेणापि प्रेमभक्तिश्च जायते ॥

Colophon :

इति श्रीवायुपुराणे गौतमशतानन्दसंवादे श्रीचैतन्यजन्मोत्सवविधिः.
आदौ सर्वतोभद्रमण्डलं चित्रविचित्रेण भूमौ लिखेत्.

End of the second portion :

महामहोत्सवेन रात्रिन्दिवं नीत्वा अपरेऽह्नि पूजानन्तरं वैष्णवैस्सह पारणं कुर्यात् ॥

Colophon :

इति श्रीचैतन्यजन्मोत्सवविधिः समाप्तः ॥

(*a*-52) गोवर्धनपूजाविधिः.
GŌVARDHANAPŪJĀVIDHIḤ.

Foll. 141*b* and 142*a*.

On the conduct of worshipping the Gōvardhana mountain. Cooked rice is shaped in the form of a miniature mountain and Pūjā is performed and then the food is distributed to Brahmins.

Complete.

Beginning :

अथान्नकूटपूजाविधिर्लिख्यते—प्रथमत अष्टादशाक्षरगोपालमन्त्रेण श्रीकृष्णं षोडशोपचारेण पूजयेत् । देवागारे श्रीकृष्णस्याग्रे भूमौ संस्कृत्य पत्रं प्रसार्य शाल्यन्नं तदुपरि दद्यात् ।

End :

नीलस्तम्भज्वलरुचिभरैर्मण्डितैर्बाहुदण्डैः
छत्रच्छायां द(ध)दघरिपोर्लब्धसप्ताहवासः ।
धारापातग्लपितमनसा रक्षिता गोकुलानां
कृष्णः प्रेयान्प्रथयतु सदा शर्म गोवर्धनो नः ॥

इति स्तुतिः । ततः अन्नकूटप्रसादं वैष्णवैस्सह भोजनात्(येत्) ।

अन्नकूटं वैष्णवेन कुर्यादिष्टं च सर्वदा ।
तेषां कृष्णः प्रसन्नात्मा लभते नात्र संशयः ॥

Colophon:

इति श्रीकृष्णाश्रयान्नकूटगोवर्धनपूजाविधिः समाप्तः ॥

(*a*-53) **जन्माष्टमीव्रतकथाश्रवणम्.**

JANMĀṢṬAMĪVRATAKATHĀŚRAVAṆAM.

Foll. 142*a*—146*b*.

On the importance of listening to the story relating to the birth of Lord Kṛṣṇa and the importance of the day of His birth.

Complete.

Beginning:

श्रीनारद उवाच—
जयन्त्याश्चैव माहात्म्यं कथयस्व पितामह ।
यत्कृत्वाहं गमिष्यामि तद्विष्णोः परमं पदम् ॥
पितामह उवाच—
शृणु वत्स प्रवक्ष्यामि जयन्त्याश्च प्रभावकम् ।
जयं पुण्यं च कुरुते क्षयं पापचयस्य च ॥
स्मरणात्कीर्तनात्पापं सप्तजन्मार्जितं मुने ।
जयन्ती हरते पापं किं पुनश्चोपवासिनाम् ॥

End:

यत्र भागवतं श्रेष्ठं श्रूयते हरिसन्निधौ ।
तत्र जागरणं कुर्याद्विष्णुभक्तिपरायणः ॥
विष्णोर्जागरणं ये तु बोधयन्ति परस्परम् ।
पुराणादिप्रकारेण हरिस्तेषां प्रसीदति ।
तस्मात्सर्वप्रयत्नेन धर्मश्रवणमुच्यते ॥
* * * *
स एव विप्रेन्द्र नरस्सुशोच्यः स बन्धुवर्गस्य च शोचनीयः ।
जन्माष्टमीं यो न करोति मूढः स पापकारी कुलपांसुलश्च ॥

Colophon:

इति श्रीभविष्यत्पुराणोक्तजन्माष्टमीव्रतकथाश्रवणं समाप्तम् ॥

(*a*-54) राधाजन्माष्टमीव्रतकल्पः

RĀDHĀJANMAṢṬAMĪVRATAKALPAḤ.

Foll. 146*b*—153*b*.

Similar to the work described under subdivision (*a*-50) of the same number.

Complete.

Beginning:

श्रीशौनक उवाच—

आराधनानां सर्वेषां कृष्णाराधनमुत्तमम् ।
ततोऽ(प्य)धिकमस्त्यन्याराधनं चेद्वदस्व नः ॥

* * * *

श्रीनारद उवाच—

श्रुताः सर्वावतारास्ते कृष्ण विष्णो सनातन ।
राधिकाया महादेव्याः प्रादुर्भावं वदस्व मे ॥

* * * *

अस्मद्विनयबाहुल्यात्तत्कन्या राधिकाभवत् ।
भाद्रे मासि सिते पक्षे चाष्टमी या तिथिर्भवेत् ।
तस्यां दिनार्धेऽभिजिति नक्षत्रे चानुराधिके ।

* * * *

Colophon:

इति श्रीभविष्योत्तरे श्रीकृष्णनारदसंवादे श्रीराधाजन्माष्टमीव्रतकथा समाप्ता ॥

अथ पूजाविधिः—पूर्वकलशे गणपत्यादिपञ्चदेवताः पूजयेत् । मण्डलमध्ये पद्मकर्णिकायां श्रीराधिकां पूजयेत् ।

End:

एवं मध्ये विंशपदेषु विंशतिसखीः पूजयेत् । मध्ये पद्मस्य कर्णिकायां श्रीराधां पञ्चोपचारैः पूजयेत् ॥

Colophon:

इति श्रीभविष्यत्पुराणोक्तराधाजन्माष्टमीपूजाविधिः समाप्तः ॥

(*a*-55) कृष्णकवचः.

KṚṢṆAKAVACAḤ.

Foll. 153*b*—154*b*.

Similar to the work described under No. 6095 of the D.C.S. MSS., Vol. XII.

Complete; as found in the Skāndapurāṇa.

Beginning:

श्रीनारद उवाच—

श्रीकृष्णकवचं वक्ष्ये श्रीकीर्तिविजयप्रदम् ।
कान्तारे पथि दुर्गे च सदा रक्षाकरं नृणाम् ॥

* * * *

ओं अस्य श्रीकृष्णकवचस्य नारद ऋषिः अनुष्टुप् छन्दः श्रीकृष्णचन्द्रो देवता ममाभीष्टसिद्ध्यर्थे विनियोगः । ध्यानम् ।

End:

इति कृष्णबलोपेतं श्रीकृष्णकवचं पठेत् ।
गोसहस्रप्रदानस्य लभते फलमुत्तमम् ॥
सर्वतस्तु भयोन्मुक्तः कृष्णे भक्तिमवाप्नुयात् ॥

Colophon:

इति श्रीस्कान्दपुराणे श्रीकृष्णकवचं सम्पूर्णम् ॥

(*a*-56) उज्ज्वलचन्द्रिका.

UJJVALACANDRIKĀ.

Foll. 154*b*—157*a*.

Herein Rādhā explains to her friend Lalitā the true nature of Lord Kṛṣṇa and the intimate love between them.

Complete.

Beginning:

श्रीमद्वृन्दावने रम्ये यमुनानिकटे तटे ।
वसन्तकुसुमामोदप्रसूनदलमण्डितम् ॥
श्रीमद्वृन्दावनं नाम राधाकृष्णस्थितं ततः ।
परिपाकरसं तत्र रसभक्तिस्थितं ततः ॥

* * * *

ललितोवाच—

मम जन्म गतं व्यर्थं कृष्णप्रेम कुतोऽपि वा ।
कृपां कुरु मया देवि भक्तिपात्रं यथा मम ॥

* * * *

श्रीराधिकोवाच—

रूपं तथा भवेदन्या रमं चैव तथा वयः ।
रमणीयं परिमुक्तिमष्टोज्ज्वलप्रकीर्तितम्? ॥
* * * *
उज्ज्वलोचितभावश्च वैष्णवे कृतिलम्पटे ।
विना उज्ज्वलभावेन दूरे भक्तिरिस्थता ततः ॥

End :

श्रीकृष्णरसमूर्तिनानुभवो जायते हृदि ।
अनुभावं परं भाग्यं जायते नरदेहिनाम् ॥
रसेन कथितं सर्वमुज्वलं सुमनोहरम् ।
अतः परतरं नास्ति गोलोके रासमण्डले ॥

Colophon :

इति श्रीमद्रूपगोस्वामिना विरचिते राधाललितासंवादे उज्ज्वलचन्द्रिका सम्पूर्णा ॥

(*a*-57) त्रैलोक्यमङ्गलकवचः.
TRAILŌKYAMAṄGALAKAVACAḤ.

Foll. 157*b*—161*a*.

The repetition of this Kavacamantra is held to be efficacious in various ways. It is considered to be indispensable to the efficacious repetition of the Gōpālamantra.

Complete.

Beginning :

पुलस्त्य उवाच—

भगवन् सर्वधर्मज्ञ कवचं यत्प्रकाशितम् ।
त्रैलोक्यमङ्गलं नाम कृपया कथय प्रभो ॥
* * * *
त्रैलोक्यमङ्गलस्यास्य कवचस्य प्रजापतिः ।
ऋषिश्छन्दस्तु गायत्री देवो नारायणः स्वयम् ॥
परं ब्रह्म परं धाम गोपाल इति कीलकम् ।
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥
अथवास्य क्लीं बीजं श्रीं शक्तिः ह्रीं कीलकं तथा ।
विशुद्धिप्रेमभक्त्यर्थे विनियोग इतीरितः ॥

End :

कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः ।
त्रैलोक्यं मोहयत्येष त्रैलोक्यविजयी भवेत् ॥
*   *   *   *
इदं कवचमज्ञात्वा जपेद्गोपालमन्त्रकम् ॥
यत्किञ्चिद्वैष्णवं मन्त्रमथवा रामतारकम् ।
शतकोटिप्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ॥
रोगी दुःखी भवेत्सोऽपि स्त्रीपुत्रादिविवर्जितः ।
इह दुःखमवाप्नोति परत्र नरकं व्रजेत् ॥

Colophon:

इति श्रीसनत्कुमारसंहितायां पुलस्त्यसनत्कुमारसंवादे त्रैलोक्यमङ्गलं नाम कवचं सम्पूर्णम् ॥

(*a*-58) राधाकवचः.

RĀDHĀKAVACAḤ.

Foll. 161*b*—164*b*.

The repetition of this Mantra, which is addressed to Rādhā, is supposed to give one the power of protecting one's self from all dangers. This procedure forms the 53rd Adhyāya of the Prakṛtikhaṇḍa in the Brahmavaivartapurāṇa.

Complete.

Beginning:

श्रीपार्वत्युवाच—
पूजाविधानं स्तोत्रं च श्रुतमत्यद्भुतं प्रभो ।
अधुना कवचं ब्रूहि श्रोष्यामि त्वत्प्रसादतः ॥
*   *   *   *
ओं राधेति चतुर्थ्यन्तं वह्निजायान्तमेव च ।
कृष्णेनोपासितो मन्त्रः कल्पवृक्षशिरो विभुः ॥
ओं ह्रीं श्रीं राधिकाकान्तो वह्निजायन्त एव च ।
कपालं नेत्रयुग्मं च श्रोत्रयुग्मं सदावतु ॥

End:

श्रीनारायण उवाच—
इत्युक्त्वा राधिकाख्यानं स्मारं स्मारं च माधवम् ।
पुलकाङ्कितसर्वाङ्गः साश्रुनेत्रो बभूव सः ॥

*   *   *   *

हे ब्रह्मपुत्र धन्योऽसि यद्गुरुश्च महेश्वरः ।
श्रीभक्तियोगदाता यो भवान् पृच्छति मां च किम् ॥

Colophon :

इति श्रीब्रह्मवैवर्ते प्रकृतिखण्डे श्रीनारायणनारदसंवादे राधोपाख्याने श्रीराधाकवचं नाम त्रिपञ्चाशत्तमोऽध्यायः ॥

(*a*-59) महामन्त्रकवचः.

MAHĀMANTRAKAVACAḤ.

Foll. 165*a*—167*b*.

This Kavacamantra is addressed to Śrī-Kṛṣṇa and Śrī Rāma.

Complete.

Beginning :

श्रीनित्यानन्द उवाच—

कथय त्वं महाबाहो नाथनाथ जगद्गुरो ।
राधाकृष्णस्वरूपं च महामन्त्रं प्रकाशय ॥
हरे कृष्णादिकवचं मन्त्रबीजं फलप्रदम् ।
सर्वेषां वाञ्छितं श्रीम[ा]न् यदि योग्योऽसि(स्मि) मे वद ॥

*   *   *   *

हकारो नासिकां पातु रेकारो वदनं तथा ।
कृकारश्च भ्रुवोर्मध्यं ष्णकारस्तालुकं तथा ॥
राकारश्चक्षुषोर्मध्यं मकारस्तुण्डमध्यकम् ।

हरे कृष्ण राम इति ॥

End :

इदं रहस्यं परमं मया ते परिकीर्तितम् ।
अभक्ताय दाम्भिकाय न प्रकाश्यं कदाचन ।
शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् ॥

Colophon :

इति श्रीकृष्णचैतन्यसंवादे हरेकृष्णराममहामन्त्रकवचं सम्पूर्णम् ॥

(*a*-60) मन्त्रावली.

MANTRĀVALĪ.

Foll. 167*b*—172*a*.

Contains the following Mantras :—

१. हरिनामार्थरत्नदीपिका.
२. कामगायत्र्यर्थः.
३. कामबीजार्थः.
४. दशाक्षरगोपालमन्त्रार्थः.
५. अष्टादशाक्षरगोपालमन्त्रार्थः.
६. श्रीराधामन्त्रार्थः.
७. पञ्चगायत्री.
८. श्रीबलदेवगायत्री.
९. रूपगोस्वाम्यादिकृपासिद्धमन्त्रम्.

Complete.

Beginning :

एकदा कृष्णविरहाद्ध्यायन्ती प्रियसङ्गमम् ।
मनोबाष्पनिरासार्थं जल्पतीदं मुहुर्मुहुः ॥

अनन्तरं हरे कृष्णेत्यादि । अस्य मन्त्रस्यार्थः—हे हरे प्रथमं स्वमाधुर्येण मे चेतो हरसि । तत्र हेतुः हे कृष्णेति । कृषशब्दः सत्तार्थः, णश्चानन्दस्वरूपक इति स्वीयेन सार्वदिकपरमानन्देन प्रलोभे(ने)ति भावः ।

* * * *

Colophon :

इति श्रीहरिनामार्थरत्नदीपिका सम्पूर्णा ॥

कामगायत्र्यर्थः । कामान् स्वाभिलाषान् दीव्यति प्रकाशयतीति कामदेवः । तस्मै कामदेवाय, विद्महे जानीमहे ।

End :

श्रीरूपगोस्वामिनः कृपासिद्धमन्त्रं यथा—क्लीं राधाकृष्णम् । श्रीसनातनगोस्वामिनः कृपासिद्धमन्त्रं यथा—व्रजं कृष्णं गोविन्दम् ।

* * * *

लोकनाथाद्यदासाख्यो गोस्वामिपरिकीर्तितः ।
मञ्जुलालिरिति प्रोक्त इत्यष्टमञ्जरी मता ? ॥

Colophon :

इति मन्त्रावली समाप्ता ॥

---

a-61) अष्टसखीव्यवस्था, ओड्रभाषाव्याख्यासहिता.

AṢṬASAKHĪVYAVASTHĀ WITH ORIYA COMMENTARY

Foll. 172a—174b.

Gives a short description of the eight companions of Rādhā and also the Mantras relating to them.

Complete.

Beginning:

अथाष्टसखीनां वर्णरूपवयोवेषमातापितापतिसिद्धिसाधकदेहा लिख्यन्ते— साधकदेहरे स्वरूपदामोदरगोस्वामी । सिद्धदेहरे श्रीललितायुगोरोचनावर्णा मयूरपिञ्छवसना, वयः १४ वर्ष ३ मास १२ दिन, वामप्रखर माता शारदा, पिता विशोक, पति भैरव ताम्बूलसेवा ।

* * * *

अस्याः गायत्री यथा—श्रीं ललितायै विद्महे राधाप्रियायै धीमहि । तन्नो ललितायै प्रचोदयात् ॥

अस्या मन्त्रं यथा—श्रीं लां ललितायै स्वाहा । अस्या यूथम्—

रत्नप्रभा रतिकला सुभद्रा भद्ररेखिका ।
सुमुखी च धनिष्ठा च कलहंसी कलापिनी ॥

End:

नानावाद्ये तुङ्गविद्या इन्दुलेखा च नर्तने ।
सुदेवी जलसेवायां रागे च रङ्गदेविका ॥

Colophon:

इत्यष्टसखीनां व्यवस्था ॥

Foll. 174*b*—176*b* contain Ṣaṇmañjarīvyavasthā with Oriya Bhāṣā.

(*a*-62) उपासनाविधिः.

UPĀSANĀVIDHIḤ.

Foll. 176*b*—184*a*.

Contains the following subjects:—

१. स्मरणपद्धतिः.
२. उपासना.
३. गुरुप्रणाली.
४. साधकप्रणाली.
५. बृन्दावनध्यानम्.
६. अष्टसखीसेवा.
७. महामन्त्रध्यानम्.
८. गोपालमन्त्रजपः.
९. श्रीठाकुराणिमन्त्रध्यानम्.
१०. कामगायत्रीध्यानम्.

११. गौरगायत्रीध्यानम्.
१२. गुरुगायत्रीध्यानम्.
१३. श्रीचैतन्यदेवस्य साधकसेवा.
१४. सिद्धदेहभावना.
१५. सिद्धप्रणाली.
१६. मानसपूजा.

Complete.

Beginning:

ब्राह्मे मुहूर्ते चोत्थाय शुचिर्भूत्वा समाहितः ।
रात्रिवासः परित्यज्य परिधायांशुकान्तरम् ॥
गुरुपादं यथा दृष्टं प्रणमेन्मूर्ध्नि साधकः ॥
वन्देऽहं श्रीगुरुं श्रीयुतपदकमलं श्रीगुरून्वैष्णवांश्च
श्रीरूपं साग्रजातं सहगणरघुनाथान्वितं तं सजीवम् ।
साद्वैतं सावधूतं परिजनसहितं कृष्णचैतन्यचन्द्रं
श्रीराधाकृष्णपादान् सहगणललिताश्रीविशाखान्वितांश्च ॥

* * * *

अथोपासना लिख्यते—

श्रीगुरुभ्यो नमः श्रीपरमगुरुभ्यो नमः श्रीपरापरगुरुभ्यो नमः ।

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

End:

अथ मानसपूजा—

हे कृष्ण नीरदरुचे तठिदाभकाषपाङ्गप्रसादपरिफुल्लमुखारविन्द(?) ।
रासेलसमसुयाश्रमबिन्दुजालैः त्वां वीक्ष्य यामि ललितादनुकम्पयेव॥(?)

* * * *

गुरवे गौरचन्द्राय राधिकायै तदालये ।
कृष्णाय कृष्णभक्ताय तद्भक्ताय नमो नमः ॥
नित्यं नौमि महाभागान्महापतितपावनान् ।
सहायय(महाभाग)वतान्सर्वान वैष्णवान् कृष्णरूपिणः ॥

Colophon:

उपासनाविधिः समाप्तः ॥

Foll. 184*a*—186 contain Kṛṣṇarādhāvayōvēṣādi.

(*a*-63) कृष्णस्मरणपद्धतिः.

KṚṢṆASMARAṆAPADDHATIḤ.

Foll. 187*a*—192*a*.

On the manner of contemplating on Lord Kṛṣṇa.

Complete.

Beginning:

अथ स्मरणपद्धतिर्लिख्यते—

साधको निशावसान उत्थाय विहितमुखप्रक्षालनः त्यक्तरात्रिवासाः परिहितधौतवस्त्रस्सन् श्री(गु)र्वादीन् नत्वा श्रीराधाकृष्णयोः शय्योत्थानादिलीलां स्मरेत् । तत्र प्रणामप्रक्रमः—श्रीगुरवे नमः, श्रीपरमगुरवे नमः श्रीपरापरगुरवे नमः, श्रीपरमेष्ठिगुरवे नमः श्रीकृष्णचैतन्यचन्द्राय नमः ।

* * * *

ततश्च—

पञ्चतत्त्वात्मकं कृष्णं भक्तरूपस्वरूपकम् ।
भक्तावतारं भक्ताख्यं नमामि भक्तिशक्तिकम् १ ॥

इति प्रणम्य प्रार्थयेत् ।

End:

दैन्यार्णवे निमग्नोऽस्मि मन्त्रग्रावभरार्दितः ।
त्वत्कारुण्यप्रतीक्षोऽहं प्रसीद मयि प्रेमद ॥

* * * *

नैवेद्यमन्नं तुलसीविमिश्रं विशेषतः पादजलेन सिक्तम् ।
योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यम् ॥ इति ॥

Colophon:

इति मन्त्रविषयः ॥

(*a*-64) प्रभोरष्टकम्.

PRABHŌRAṢṬAKAM.

Foll. 192*b* and 193*a*.

A eulogy in eight stanzas addressed to Gaurāṅga and Gadāhhara, the leaders of the Caitanya school: by Acyutānandagōsvāmin, son of Advaitānanda.

Complete.

Beginning:

क्षितौ लुठद्गौरकलेबराभ्यां सदा महाप्रेमविलासकाभ्याम् ।
समुद्रतीरे नटनागराभ्यां नमोऽस्तु मे गौरगदाधराभ्याम् ॥

हा हा क राधेति मुहुः स्थिताभ्यां श्रीराधिकाकृष्णवपुर्धराभ्याम् ।
आनन्दलीलारसरञ्जिताभ्यां नमोऽस्तु मे गौरगदाधराभ्याम् ॥

End:

पठन्ति(ये) गौरगदाधराष्टकं पद्यं लभन्ते व्रजयुग्मपादम् ।
अद्वैतपुत्रेण मयोक्तमेतन्नाम्नाच्युतानन्दजनेन धीमता ॥

Colophon:

इति श्रीगौरगदाधरचरणकमलमधुकरायमाणश्रीअच्युतानन्दगोस्वामिवि-
रचितं प्रभोरष्टकं समाप्तम् ॥

(*a*-65) राधागदाधराष्टकम्.
RĀDHĀGADĀDHARĀṢṬAKAM.

Fol. 193.

A eulogy in eight stanzas addressed to Rādhā and Gadādhara, i.e., Kṛṣṇa: by Paramānandabhaṭṭācārya.

Complete.

Beginning:

कलिन्दनगनन्दिनीतटनिकुञ्जपुञ्जेषु य-
स्ततान वृषभानुजाकृतिरनल्पलीलारसम् ।
निपीय व्रजमङ्गलो य इह गौररूपोऽभवत्
स मे दिशतु भावुकं प्रभुगदाधरः श्रीगुरुः ॥

End:

अनल्पहरिकीर्तने हरति चित्तवित्तं बला-
त्तमस्ततिनिकृन्तने भवति चण्डरोचिश्च यः ।
प्रतप्ततनुसेवने शिशिरवारिपूरो हि यः
स मे दिशतु भावुकं प्रभुगदाधरश्रीगुरुः ॥

Colophon:

इति श्रीपरमानन्दभट्टाचार्यविनिर्मितम् ।
[श्री]राधागदाधरा[×]ष्टकमङ्गीकुर्वन्तु वैष्णवाः ? ॥

(*a*-66) गदाधरपण्डितगोस्वाम्यष्टकम्.
GADĀDHARAPAṆḌITAGŌSVĀMYAṢṬAKAM.

Fol. 194.

Eight stanzas by Dāmōdarasvarūpagōsvāmin in praise of Gadādhara Paṇḍita.

Complete.

Beginning :

स्वभक्तियोगलासिनं सदा व्रजे विहारिणं
हरिप्रियागणाग्रजं शचीसुतप्रियेश्वरम् ।
सराधकृष्णसेवनं प्रकाशकं महाशयं
भजाम्यहं गदाधरं सुपण्डितं गुरुं प्रभुम् ॥

End :

महारसामृतप्रदं सदा गदाधराष्टकं
पठेत्तु यः सुभक्तितो व्रजाङ्गनागणोत्सवम् ।
शचीतनूजपादपद्मभक्तिरत्नयोग्यतां
लभेत राधिकागदाधराङ्घ्रिपद्मसेवया ॥

Colophon :

इति श्रीदामोदरस्वरूपगोस्वामिविनिर्मितं श्रीयुतगदाधरपण्डितगोस्वाम्यष्टकं समाप्तम् ॥

(*a*-67) गदाधरपण्डितगोस्वाम्यष्टकम्.

GADĀDHARAPAṆḌITAGŌSVĀMYAṢṬAKAM.

Fol. 195.

Similar to the above. By Sanātanagōsvāmin.

Complete.

Beginning :

अखिलभुवनवन्द्यं प्रस्फुरत्प्रेमसारं प्रबलकरुणयाढ्यं प्रेमभक्तिस्वतन्त्रम् ॥
व्रजविपिनविराजच्छ्रीलबृन्दावनेन्द्रं मधुरमधुररूपं नौमि राधास्वरूपम् ॥

End :

राधास्वरूपस्य गदाधरस्य स्तोत्रं मुदाकारि सनातनेन ।
प्रेम्णा पठन्नित्यविलासशालिनः प्राप्नोति नाभीष्टपदं हि तस्य ॥

Colophon :

इति श्रीसनातनगोस्वामिविनिर्मितं श्रीयुतगदाधरपण्डितगोस्वाम्यष्टकं समाप्तम् ॥

(*a*-68) गदाधरपण्डितगोस्वाम्यष्टकम्.

GADĀDHARAPAṆḌITAGŌSVĀMYAṢṬAKAM.

Foll 195*b*—196*b*.

Similar to the above. By Rūpagōsvāmin.

Complete.

Beginning:

सर्वपाण्डित्यसाराख्यं प्रेमरत्नविभूषणम् ।
माधवात्मजवन्द्याग्र्यं वन्दे राधागदाधरम् ॥

End:

गदाधराष्टकं पद्यं हृद्यं नाममनोहरम् ।
यः पठेन्नियतं भक्त्या स प्रेम्णि प्रमिलेद्ध्रुवम् ॥

Colophon:

इति श्रीरूपगोस्वामिविनिर्मितं श्रीयुतगदाधरपण्डितगोस्वाम्यष्टकं समाप्तम् ॥

(*a*-69) गदाधरपण्डितगोस्वाम्यष्टकम्.

GADĀDHARAPAṆḌITAGŌSVĀMYAṢṬAKAM.

Foll. 196*b* and 197*a*.

Similar to the above. By Lōkanāthagōsvāmin.

Complete.

Beginning:

श्रीलवृन्दावनाधीशस्वरूपं सद्गुणाश्रयम् ।
पण्डिताख्यं प्रभुवरं वन्दे राधागदाधरम् ॥

End:

श्रीराधाहृदयं गदाधर इति ख्यातं महीमण्डले
यत्प्रेमाब्धिकणालवेन समलं मग्नं जगत्सर्वदा ।
मत्सर्वस्वपदाम्बुजं प्रभुवरं तं लोकनाथस्य मे
कृष्णप्रेमसुधाश्रयाङ्घ्रियुगलं श्रीपण्डिताख्यं भजे ॥

Colophon:

इति श्रीलोकनाथगोस्वामिविनिर्मितं श्रीयुतगदाधरपण्डितगोस्वाम्यष्टकं समाप्तम् ॥

(*a*-70) गदाधरपण्डितगोस्वाम्यष्टकम्.

GADĀDHARAPAṆḌITAGŌSVĀMYAṢṬAKAM.

Foll. 197*a*—198*a*.

Similar to the above. By Bhūgarbhagōsvāmin.
Complete.

Beginning:

प्रभुः प्रियगदाधरं प्रियगदाधरो हि प्रभुः
प्रतीतभुवनत्रयं सततमेष आनन्दयत् ।
क वां प्रणयमाधुरी जगति केन नास्वादिता
गदाधर मयि प्रभो कुरु कृपाकटाक्षच्छटाम् ॥

End:

इमां हरिरतिप्रदां रसविदां रसैकास्पदं
पठत्यपि मुहुस्सुधाझरकरम्बितां यस्स्तुतिम् ।
अभिन्नमतिता हरे स्फुरति तस्य लीलाद्वये
प्रयच्छति गदाधरो निजनिकुञ्जसेवामपि ॥

Colophon:

इति श्रीभूगर्भगोस्वामिविरचितं श्रीयुतगदाधरपण्डितगोस्वाम्यष्टकं समाप्तम् ॥

(*a*-71) गदाधरपण्डितगोस्वाम्यष्टकम्.
GADĀDHARAPAṆḌITAGŌSVĀMYAṢṬAKAM.
Foll. 198*a*—199*a*.
Similar to the above. By Śivānandacakravartigōsvāmin.
Complete.

Beginning:

राधाकृष्णरसप्रकाशजनकं श्रीराधिकासंपुटं
बृन्दारण्यसुखप्रचारककलं स्तम्भादिभावान्वितम् ।
श्रीगौराङ्गमहाप्रभोर्व्रजरसामोदावताराकरं
वन्दे श्रीलगदाधरं गुरुमहं श्रीपण्डिताख्यं प्रभुम् ॥

End:

निखिलनिगमसारश्रीमदीशाष्टकं यः स्मरति पठति नित्यं श्रीशिवानन्दकेन ।
भणितमिदमपूर्वं श्रीलगौराङ्घ्रिपद्मासवसुमधुरभावं प्राप्नुयात्प्रेमभाक् सः ॥

Colophon:

इति श्रीशिवानन्दचक्रवर्तिगोस्वामिविनिर्मितं श्रीमद्गदाधरपण्डितगोस्वाम्यष्टकं समाप्तम् ॥

(*a*-72) गदाधरगौराङ्गाष्टकम्.

GADĀDHARAGAURĀṄGĀṢṬAKAM.

Foll. 199*a*—200*a*.

Eight stanzas in praise of Kṛṣṇa: by Nayanānandadāsagōsvāmin.

Complete.

Beginning:

गोलोकादवतीर्य यः क्षितितले श्रीराधया संयुतो
बृन्दारण्यमुपासितोऽतिरभसात्तेने विहारादिकम् ।
गोपीगोकुलगोपविस्मयपदं गोवर्धनोद्धारणात्
सोऽयं गौरगदाधरो विजयते सानन्दमद्वैतकम् ॥

End:

प्रतिपदमनुभूयाशुद्धबुद्धाष्टकं यः
स्मरति पठति नित्यं नम्रतामेत्य मर्त्यः ।
सततमुरसि तस्य श्रीगदाधृक् स गौरो
निवसति निजभावैर्भिन्नभेदं विधूय ॥

Colophon:

इति श्रीनयनानन्ददासगोस्वामिविरचितं श्रीगदाधरगौराङ्गाष्टकं समाप्तम् ॥

(*a*-73) अद्वैतचन्द्रनामशतकम्.

ADVAITACANDRANĀMAŚATAKAM.

Foll. 200*a*—201*b*.

A eulogy on Caitanya, who is conceived as Kṛṣṇa himself, by the repetition of one hundred significant names relating to him: by Sārvabhaumabhaṭṭācārya.

Complete.

Beginning:

प्रणम्य श्रीमदद्वैत (कृष्ण)चन्द्रं मुदान्वितम् ।
तन्नामानि प्रवक्ष्येऽहं चैतन्यप्रीतिहेतवे ॥
सीतानाथो जगद्वन्द्यो जगद्गुरुरखण्डधीः ।
वैष्णवानामग्रगण्यो भक्तिदः प्रेमदः प्रभुः ॥

End:

एतानि श्रीमदद्वैतचन्द्रनामानि यः पठेत् ।
अष्टोत्तरशतान्येव स चैतन्ये रतिं लभेत् ॥

Colophon:

इति श्रीसार्वभौमभट्टाचार्यविरचितं श्रीलाद्वैतचन्द्रनामशतकं संपूर्णम् ॥

(*a*-74) अद्वैताष्टकम्.

ADVAITĀṢṬAKAM.

Foll. 201*b*—202*b*.

Eight stanzas in praise of Caitanya, Kṛṣṇa and Rāma, conceived as being identical with one another: by Sārvabhaumabhaṭṭācārya.

Complete.

Beginning:

हुं हुंकारगर्जनादि अहोरात्रसद्गुणं हाकृष्णराधिकानाथप्रार्थनादिकीर्तनम् ।
धूपदीपकस्तूर्यादिचन्दनादिलेपनं श्रीसीतानाथाद्वैतचरणारविन्दभावनम् ॥

End:

यज्जपन्ति यः पठति प्राप्नोति भक्तिनिर्मलं
सार्वभौमभट्टाचार्यवर्णनादिसद्गुणम् ।
श्रीअद्वैताष्टकं भक्तिभक्तकारणं
श्रीसीतानाथाद्वैतचरणारविन्दभावनम् ॥

Colophon:

इति श्रीसार्वभौमभट्टाचार्यविरचितं श्रीअद्वैताष्टकं सम्पूर्णम् ॥

(*a*-75) राधारसमञ्जरी.

RĀDHĀRASAMAÑJARĪ.

Foll. 202*b*—205*a*. Foll. 205*b* and 206 are left blank.

A eulogy setting forth the beauty of Rādhā in various ways: by Kṛṣṇacaitanyadēva.

Incomplete.

Beginning:

कुचकलशभराढ्या केसरिक्षीणमध्या विपुलतरनितम्बा पक्वबिम्बाधरोष्ठी ।
प्रणयमयवयस्यास्कन्धविन्यस्तहस्ता निधुवनरसपुञ्जं याति राधानिकुञ्जम् ॥

श्यामप्रेमविनोदिनी मधुरिमाधाराधरस्मेरिणी
गौरी प्रेममयी शुभा च सुभगा प्रेमाब्धिसन्दर्भिणी ।
गण्डे मण्डितकुण्डले कटितटे धौते मुदा किङ्किणी
लीलाकाञ्चनदेहिनी विजयते बृन्दावनस्थायिनी ॥

See under R. No. 3177(*a*) ante for the end.

R. No. 3054.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 362. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Tekkemaṭham, Trichur.

Bound in two volumes.

ईशानशिवगुरुदेवपद्धतिः.

ĪŚĀNAŚIVAGURUDĒVAPADDHATIḤ.

Foll. 1*a*—360*b*. Foll. 361*a*—362*a* contain the table of contents of this work. Fol. 362*b* is left blank.

A digest of the Āgamas dealing with the planning and construction of Śiva temples, the fixing and consecration of images of God Śiva as well as of Śaktī therein and with the details connected with the conduct of the worship and the celebration of the various religious festivals in those temples. This work is also called Tantrapaddhati.

Contains the Sāmānyapāda and Kriyāpāda.

Complete.

Beginning:

वागीश्वरं तं गिरिशं गिरं तां गौरीं गणेशं च मतङ्गजास्यम् ।
दुर्गां च दुर्गार्तिहरां विरिञ्चं लक्ष्मीं च लक्ष्मीशमपि प्रपद्ये ॥

गुरूनलं गौरवतो गरीयसः समाहितः सर्वसमान् महीयसः ।
महामहिम्ना मिहिरादिवोदितांस्तमोमहामोहहरान् नतोऽस्म्यहम् ॥

विस्तृतानि विशिष्टानि तन्त्राणि विविधान्यहम् ।
यावत्सामर्थ्यमालोच्य करिष्ये तन्त्रपद्धतिम् ॥

अनन्यतन्त्रसापेक्षस्वार्थसन्दोहसङ्गतिम् ।
ऋद्धैर्विधानमन्त्रार्थैर्वेद्यां श्रुतिमिवापराम् ॥
प्रसन्नां नातिकुटिलां नातिसङ्क्षेपविस्तराम् ।
चित्रां बहुगुणां विष्णोः शय्यां भोगवतीमिव ॥
विविधच्छन्दसं नानावृत्तालङ्कारवर्णकाम् ।
सेव्यां कामिजनस्येष्टां ललितां प्रमदामिव ॥

*　　*　　*　　*

पादैश्चतुर्भिर्नात्यर्थं भिन्नार्थप्रसवैर्युताम् ।
चतुर्युगक्रमायुक्तां(यत्तां) वैधसीमिव कल्पनाम् ॥

*　　*　　*　　*

सविधानाश्च लिख्यन्ते मन्त्रास्ते स्युश्चतुर्विधाः ।
बीजाान बीजमन्त्राश्च मन्त्रा मालाख्यमन्त्रकाः ॥

*　　*　　*　　*

अत्र रत्नत्रये—

मननात्सर्वभूतानां त्राणात् संसारसागरात् ।
मन्त्ररूपा हि तच्छक्तिर्मननत्राणधर्मिणी ॥ इति ।

* * * *

Colophon :

इति श्रीमदीशानशिवगुरुदेवपद्धतौ तन्त्रसारेऽग्निकल्पविधिर्नाम चतुर्दशः पटलः समाप्तः । इति सामान्यपादः प्रथमः समाप्तः ॥

End :

एवं शक्तिविजृम्भितेन विसरल्लिप्यर्णशब्दात्मकं
युक्तन्ते(?) विश्वं युक्तविधानदैवतमया मन्त्रस्वतन्त्रोदिताः ।
रक्षार्थं जनताङ्गरग्रहरुजाब्धं सो रिपूणां क्रमा-
दत्रेशानशिवेन नर्म वयुधाजैत्रं च सन्दर्शितम्(?) ॥

Colophon :

इति श्रीमदीशानशिवगुरुदेवपद्धतौ तन्त्रसारे मन्त्रपादे युद्धजैत्रादि-कर्मादिविधिपटलो द्विपञ्चाशः समाप्तः ॥

R. No. 3055.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 198. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Śrīmān Jugalakiśōra Pāṇigrāhi, B.A., College Lecturer, Parlakimedi.

भगवद्भक्तिविलासटीका—दिग्दर्शिनी.

BHAGAVADBHAKTIVILĀSAṬĪKĀ : DIGDARŚINĪ.

Foll. 1*a*—197*b*. Fol. 198*a* is left blank. Fol. 198*b* contains the colophon of this work which is called Digdarśanī.

A commentary on the Bhagavadbhaktivilāsa which is a treatise on devotion to Lord Kṛṣṇa according to the doctrines of the Caitanya school.

Complete in Vilāsas 1 to 12 only.

Beginning :

ब्रह्मादिशक्तिप्रदमीश्वरं तं दातुं स्वभक्तिं कृपयावतीर्णम् ।
चैतन्यदेवं शरणं प्रपद्ये यस्य प्रसादात्स्ववशेऽर्थसिद्धिः ॥

लिख्यते भगवद्भक्तिविलासस्य यथामति ।
टीका दिग्दर्शिनी नाम तदेकार्थांशबोधिनी ॥

सुदुष्करे कर्मणि प्रवर्तमानो ग्रन्थकारस्तत्सिद्धये प्रथमं परमगुरुरूपं श्रीमदिष्टदैवतं शरणत्वेनाश्रयति—चैतन्येति । चैतन्यं विशुद्धज्ञानं तद्रूपे। यो देवः जगत्प्रभुः तम् । देवेषु मध्ये यो ज्ञानघनस्तमित्यर्थः । यद्वा चैतन्यस्य चित्तस्य देवोऽधिष्ठाता यः श्रीवासुदेवस्तम् । अथवा चैतन्यं चेतनाचेतनजीवनहेतुस्तस्य देवो नाथस्तं प्राणेश्वरमित्यर्थः ॥

* * * *

Colophon:

इति श्रीभगवद्भक्तिविलासटीकायां दिग्दर्शिन्यां प्रथमो विलासः ॥

End:

एवं वैष्णवावैष्णवभेदेन व्यवस्थां लिखित्वा निर्णयप्रकरणमुपसंहरन् लिखति इत्थमिति । शास्त्रविचारणे यः शिष्टानामाचारः तदनुसारेण ; यद्वा न केवलं शास्त्रविचारेण किन्तु शिष्टाचारानुसारतश्च वैष्णवानां सम्मवत इत्यनेन वैष्णवेतराणां(रेषां) कामिनां गृहिणां विद्धायामप्युपवासस्तथा एकादशीद्वादश्योर्वृद्ध्यैव संपूर्णैकादशीत्यागः ।

* * * *

यद्वा शिवे च श्रीरुद्रे इतिहासमहाभारतादयस्तत्सहितानि हेतुभिः कुतर्कविजृम्भितहेतुवादैर्न हन्तव्यानि न खण्डयितव्यानि ॥

यस्य शक्त्यंशलाभेन ब्रह्मादेरपि शक्तयः ।
तास्ता विभान्ति तं वन्दे सर्वशक्तिप्रदं विभुम् ॥

Colophon:

इति श्रीभगवद्भक्तिविलासटीकायां दिग्दर्शिन्यां द्वादशो विलासः ॥
इति श्रीभगवद्भक्तिविलासव्याख्या दिग्दर्शिनी ॥

* * * *

R. No. **3056.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 145. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Edapalli Raja.

श्लोकवार्तिकव्याख्या—काशिका.

ŚLŌKAVĀRTIKAVYĀKHYĀ : KĀŚIKĀ.

Foll. 1*a*—144*b*. Foll. 24*b* 73*b*. and 145 are left blank.

Same work as that described under R. No. 2818 ante, wherein see for the beginning.

Contains the following subjects. For the portions wanting here after Śūnyavāda, see R. No. 3233.

१. शून्यवादः.
२. तद्भूताधिकरणम्.
३. वाक्याधिकरणम्.
४. वेदाधिकरणम्.

End:

एवमुपपादितं वेदानां प्रामाण्यमिदानीमुपसंहरति—इतीति । यद्यत्रैव प्रामाण्यं सिद्धं, कथं तर्हि कृत्स्नोऽध्यायः प्रमाणलक्षणमाख्यायते अत आह—अत इति । अयमभिप्रायः—परतोऽपि विध्यर्थवादमन्त्रात्मना त्रेधा वेदं विभज्य योऽर्थस्स वक्ष्यते विधेस्साध्यसाधनसम्बन्धः अर्थवादमन्त्रयोर्विधेयस्तुतिस्मृती । अनेन प्रकारेण विध्यर्थवादमन्त्राणां प्रामाण्यमुक्तं भवति । अतः प्रमाणप्रकारोऽपि प्रमाणान्तर्गत एवेति कृत्स्नस्याध्यायस्य प्रमाणलक्षणत्वोपपत्तिः । आह च चोदनासूत्रनिर्दिष्टोऽयं प्रमाणपरिग्रहः—

'सप्रकारस्स आद्येन लक्षणेन प्रदर्शितः' ।

इति निर्णय इति ॥

Colophon:

इत्युपाध्यायसुचरितमिश्रकृतायां काशिकाटीकायां वेदाधिकरणं समाप्तम् ॥

इति प्रथमस्याध्यायस्य प्रथमः पादः ॥

R. No. **3057**.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 100. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Raṅganāthamiśragāru, Changudi, Parlakimedi.

द्रव्यगुणाकरः.

DRAVYAGUṆĀKARAḤ.

This work is also called Satkaṇṭharatna.

A treatise on materia medica. The author says that he consulted Caraka, Vāgbhaṭa, Candrika and Trivikrama: by Hariśaraṇasēna, son of Gadādharābhidhānamahāsēna Pātrō.

Complete.

Deals with the following subjects :—

भूतपञ्चकवृक्षलतादिगुणाः—

१. कर्पूरादिश्रेष्ठसुगन्धिवर्गगुणाः.
२. जीरकादिमध्यगन्धवर्गगुणाः.
३ कर्कटाक्षादिगन्धवर्गगुणाः.
४. महाफेनादिसारजवर्गगुणाः.
५. माणिक्यादिरत्नवर्गगुणाः.
६. धातूपधातुवर्गगुणाः.
७. द्राक्षादिमधुरवर्गगुणाः.
८. दाडिम्याद्यम्लवर्गगुणाः.
९. जीवन्त्यादिमधुरशाकगुणाः.
१०. पाठादितिक्तशाकगुणाः.
११. जात्यादिपुष्पगणगुणाः.
१२. कूश्माण्डादिवल्लीफलगुणाः.
१३. कशेरुकादिकन्दवर्गगुणाः.
१४. न्यग्रोधादिमहावृक्षगुणाः.
१५. नन्दिवृक्षादिह्रस्वद्रुमगुणाः.
१६. दूर्वादिहीनवर्गगुणाः.
१७. ताम्बूल्यादिलतावर्गगुणाः.
१८. हरेण्वादिशिम्बिधान्यगुणाः.
१९. श्यामाकादिद्रव्यधान्यगुणाः.
२०. कृतान्नवर्गगुणाः.
२१. पानीयवर्गगुणाः.
२२. अभ्यङ्गादिद्वाविंशतिगुणाः.
२३. भौतिकवर्गगुणाः.

Beginning :

यत्काठिन्यं सा क्षितिर्यो रसोऽम्भः तेजो रूपं वर्धते यः स वातः ।
यद्यच्छिद्रं तन्नभः स्थावरस्य प्रोक्ता चैषा पञ्चभूतव्यवस्था ॥
तस्या वनस्पतिवृक्षप्रतापवत्यस्तथौषधिश्चेति ।
जन्याश्चतुर्विधमुक्तं विस्तर एषां निबोधितः शास्त्रे ॥
ज्ञेयः सोऽत्र वनस्पतिः फलति यः पुष्पैर्विना तैः फलैः
वृक्षः पुष्पफलादिकैरभिचितो ह्रस्वः क्षुपः स्यात्ततः ।
या वृद्धिं लभतेऽन्यसंश्रयवशादेषा तु वल्ली मता
शाल्यादिः पुनरोषधिः फलपरीपाकावसानान्वितः ॥
चतुर्विधस्यास्य रसा मताः षट् त्रयो विपाकाद्यदि धातुवीर्यम् ।
गुणाः पुनर्विंशतिरेव तत्तत्प्रभावभेदास्तु भवन्त्यचिन्त्याः ॥
* * * *

Colophon :

इति सत्कण्ठरत्नाभिधेये द्रव्यादिगुणाकरे कर्पूरादिश्रेष्ठसुगन्धिवर्गगुणाः ॥

End :

इति समहिमपञ्चभूतादिकः प्रभूतगुणगणैरयं भौतिकः ।
परिमितवचनेन वर्गोऽस्तु तामभिजिगमिषवस्त्रयोविंशतिः ॥

धन्वन्तर्यभिरायवैद्यपरिषत्संस्तूयमानोल्लस-
त्कीर्तिः सेनगदाधराभिधमहापात्रस्य पुत्रोऽभवत् ।
नानाकाव्यकृतश्रमः परिचितायुर्वेदशास्त्रावलि-
निष्णातो हरिरेव हन्त शरणं यस्येति सार्थान्वयः ॥

ग्रन्थान् गुणार्णवकिरीटनिघण्टुराजत्रैविक्रमांश्वरकवाग्भटचन्द्रिकादीन् ।
दुर्बोधभूरिविषयानवलोक्य तेभ्यः स्वावर्तनाय सुकरोऽयमकारि तेन ॥

ये स्युर्वैद्यकुलावतंससदृशो ये दर्भगर्भाङ्कुर-
स्थूलप्रायधियः स्वशास्त्रनिपुणास्तेषां कृतः प्रीतये ।
ये मूला गुरुपादसेवनधिया नाधीतशास्त्रान्तरा-
स्तेषामेष गुणावरोहितकरः सत्कण्ठरत्नाभिधः ॥

प्रागन्तवाचस्तेतेऽखिलजन्तुमङ्गलायतनम् ।
एते नवगुणकाः साम्प्रतमाकृष्टसत्त्वाः स्युः ॥

सम्प्रश्नं कृतवति भाग्यभाजि पुंसि द्रव्याणां गुणविषयेषु येष्वितीत्थम् ।
आख्यातं प्रतिरचनामिमामकार्षीद्वैद्यानां हरिशरणाभिधानसेनः ॥

Colophon:

इति भौतिकवर्गगुणावसानः सत्कण्ठरत्नाभिधेयो द्रव्यगुणाकरो ग्रन्थः समाप्तः ॥

R. No. **3058.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 231. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Raṅganāthamiśragāru, Changudi, Parlakimedi.

Bound in two volumes.

साहित्यदर्पणटीका.

SĀHITYADARPAṆAṬĪKĀ.

Foll. 1*a*—230*b*. Fol. 231*a* contains the table of contents of this work. Fol. 231*b* is left blank.

A commentary on the Sāhityadarpaṇa of Viśvanātha, described under R. No. 443 ante: by Mahēśvaratarkālaṅkāra.

Complete.

Beginning:

वक्षिय कौस्तुभगतं निजबिम्बं हृद्गतान्यवनिताजनबुद्ध्या ।
मानमाश्रितवतीं निजकान्तां चिन्तयाम्यनुनयन्तमनन्तम् ॥

चष्ट्वा भूरितरध्वनिप्रभृतिकालङ्कारशास्त्रं मुहुः
तन्मूलं च विमृष्टमर्थमखिलं काव्यप्रकाशस्य च ।
साहित्योत्तरदर्पणं विशदयन्नानन्दयन्सज्जनान्
भट्टाचार्यमहेश्वरो वितनुते विज्ञप्रियां टिप्पणीम् ॥

शरदिन्द्वित्यादिस्वीयश्लोकं ग्रन्थकृदुत्थापयति—ग्रन्थारम्भ इति ॥ ग्रन्थस्य प्रकृतग्रन्थस्य साहित्यदर्पणाख्यस्यारम्भे आरम्भकाले वाग्देवतायाः सांमुख्यमानुकूल्यमाधत्ते जनयतीत्यर्थः । तत्र ग्रन्थकृदेव कर्तृत्वेन बोध्यः । आरम्भकालस्यास्थूलत्वाद्योग्यतावशात् पूर्वकाल एव सांमुख्याधानं बोध्यम् ॥

* * * *

Colophon:

इति श्रीमहेश्वरन्यायालङ्कारविरचितायां साहित्यदर्पणटीकायां प्रथमपरिच्छेदविवरणम् ॥

End:

श्रीचन्द्रेति । अत्र सुधिय इति सम्बोधनम् । क्वचित्कवय इति पाठः । हे सुधियः श्रीचन्द्रेत्यादिकृतममुं साहित्यदर्पणं पुस्तकं विलोक्याखिलसाहित्यतत्त्वं सुखमेव सुखविशिष्टमेव यथा स्यात्तथा वित्त जानीतेत्यर्थः । यावदिति । प्रसन्नेन्दुनिभानना श्रीर्यावन्नारायणस्याङ्कमलङ्करोति तावत्कवीनां मनस्सम्मदयन् अयं प्रबन्धो लोके प्रथितोऽस्त्वित्यर्थः । इतीत्यादि । अखिलभाषितविलासिनी तस्या भुजङ्गः कामुकः तदनुशीलकत्वात् ॥

Colophon:

इति श्रीमहेशतर्कालङ्कारविरचितायां साहित्यदर्पणटीकायां दशमपरिच्छेदविवरणं समाप्तम् ॥ समाप्ता चेयं साहित्यदर्पणटीका ॥

R. No. **3059.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 60. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. N. Śrīkṛṣṇacakravartyācārya, Kōtāṇḍapaṭṭi, North Arcot district.

सिद्धान्तचन्द्रिका.
SIDDHĀNTACANDRIKĀ.

Foll. 1*a*—59*a*. Foll. 59*b* and 60 are left blank.

Same work as that described under R. Nos. 2194 and 2450 (*b*) ante. By Vēdāntācārya, son of Kōnēṭyaṁbā and Varāhācārya, who was the brother of Vēdāntācārya, son of Paravastu Vēṅkaṭadēśika of Śrīvatsa family. Illustrations are taken from various works, such as the Mahābhārata, Viṣṇu-Purāṇa, Sēśvaramīmāṁsā, Āgamaprāmāṇya, etc.

Contains the first two Paricchēdas.

Beginning:

अथ चमूषन्मन्त्रविचार आरभ्यते ।

अन्तस्तमिस्रपरिषच्छतपत्रबन्धोराम्नायमस्तकगुरोश्चरणारविन्दम् ।
ये संश्रिता भुवि जनाः प्रणतेन मूर्ध्ना तेषामदक्षिणपदाम्बुजमुद्वहामः ॥

कविकथकगजानां गर्वभङ्गे प्रवीणो निगमशिखररूपे कानने न्यस्तचित्तः ।
श्रुतिजनपदरीतिं खण्डयन् कोऽपि सिंहः शरणमशरणानामस्तु नस्संश्रितानाम् ॥

एवं चमूषन्मन्त्रोऽपि मानं चक्रादिधारणे ।
इत्येवं चिन्त्यते न्यायैः परोक्तिपरिपन्थिभिः ॥

ऋचि साम्नि च श्रूयते—

चमूषच्छ्येनश्शकुनो बिभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् । अपामूर्मिं सचमानस्समुद्रं तुरीयं धाम महिषो विवक्तीति ॥

* * * *

Colophon:

इति श्रीवत्सकुलजलधिकौस्तुभवैदिकसार्वभौमवेदान्तदेशिकसंप्रदायप्रवर्तकपरवस्तुवेङ्कटदेशिकसुकृतपरिपाकसर्वतन्त्रस्वतन्त्रमहावेदान्ताचार्यानुजश्रीमदादिवराहार्यतनयस्य तच्चरणारविन्दचञ्चरीकस्य कोनेट्यम्बागर्भसंभवस्य निजहृदयकमलविहरमाणवेदान्तदेशिकप्रेरितस्य वेदान्ताचार्यस्य कृतौ सिद्धान्तचन्द्रिकायां पवित्रश्रुतेस्सुदर्शनधारणपरत्वसमर्थनप्रकारस्संपूर्णः ॥

End:

तस्मान्महाभारतादिवचनानुरोधेन पञ्चरात्राधिकरणं तत्प्रामाण्यपरम् । तथाच पञ्चरात्रप्रामाण्यं वज्रलेपायितमित्युपरम्यते ॥

Colophon:

इति श्रीवत्सजलधिकौस्तुभवैदिकसार्वभौमवेदान्तदेशिकसंप्रदायप्रवर्तकपर-वस्तुवेङ्कटदेशिकसुकृतपरिपाकसर्वतन्त्रस्वतन्त्रमहावेदान्ताचार्यानुजश्रीमदादिव-राहार्यतनयस्य तच्चरणारविन्दचञ्चरीकस्य कोनेय्यम्बागर्भसंभवस्य निजहृदय-कमलविहरमाणवेदान्तदेशिकप्रेरितस्य तदेकदेवस्य वेदान्ताचार्यस्य कृतौ सि-द्धान्तचन्द्रिकायां द्वितीयपरिच्छेदे भगवच्छास्त्रप्रामाण्यसमर्थनप्रकारस्समाप्तः ॥

R. No. **3060.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 76. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Payyūr Patteri, Porkulam, Malabar district.

(*a*) देवीचरितम्.

DĒVĪCARITAM.

Foll. 1*a*—27*a*.

An alliterative poem (Yamakakāvya) stating that the goddess Dēvī, worshipped under the name Gōpālī in Vēdāraṇya or Kannangolam in Malabar, is no other than Durgā who is said to have born as the eighth issue of Dēvakī and the sister of Lord Kṛṣṇa: by Vāsudēva, son of Gōpālī and Maharṣi.

Contains two to six Āśvāsas only.

Beginning:

. . . वेदान्तानां दृश्यायार्थाय सकलवेदान्तानाम् ।
इति कौतुक . . . . ॥

. . . भासुरदेहा पृथगन . मच्चातिनम्रभासुरदेहा ।
. . . . ॥

पृष्टस्सदये ताभ्यां निरताभ्यां सुरगणोऽथ सदयेताभ्याम् ।
गद्गदरव्यापारं यतश्शुगाहस्म तमसुरव्यापारम् ॥

. . (दैवतयोः) बभूव कोपो जगन्महितदैवतयोः ।
प्राक् परिभूतिमभूतां भ्रुकुटी कुटिले मुखे विभूतिमभूताम् ॥

गौरीपरमापत्योर्निरगाज्ज्योतिस्सकोपपरमापत्योः ।
. मुखतोर . (परम)स्य स्रष्टुर्मुखतश्च भास्वरं परमस्य ॥

* * * *

इति श्रीमद्देवीचरिते काव्ये द्वितीय आश्वासः ॥

End:

भक्त्या देवीतमदश्चरितमितं यच्छिवामुदे वीतमदः ।
काव्यं परममरचयं पठन्निदं मोदयति हि परममरचयम् ॥

* * * *

स सुधाशानां भूताराध्या जगतां चतुर्दशानां भूता ।
माता वेदवनमिताधिजनार्या विजयतां च वेदवनमिता ॥

* * * *

सदा शिवा शिवापरा परा जयत्वनुत्तमा ।
निकेतवेदकाननापरा जयत्वनुत्तमा ॥

Colophon:

इति श्रीमत्कात्यायनीपादाम्बुजमधुव्रतेन श्रीमद्गोपालीसुतेन श्रीवासुदेवेन विरचिते श्रीमद्देवीचरिते काव्यरत्ने षष्ठ आश्वासः ॥

तत्तद्वाञ्छितसिद्धये सुरगणैस्सिद्धर्षिविद्याधरै-
र्गन्धर्वाप्सरसां गणैर्दितिसुतैर्यक्षाहिरक्षोगणैः ।
अन्यैश्चाखिलजन्तुभिस्सततमेवाभ्यर्च्यमानां शिवां
वेदारण्यनिवासिनीं तनुमनोवाग्भिर्नमस्कुर्महे ॥

(*b*) सत्यतपःकथा.

SATYATAPAḤKATHĀ.

Foll. 27*b* – 36*a*. Fol. 36*b* is left blank.

The story relating to Satyatapas, also called Maharṣi, who is stated to be one of the ancestors of the author, and who is said to have made penance in Vēdāraṇya and also on the banks of the river Nīḷā now called Bhāratappoḷe: by the same author as that of the previous work.

Contains one to three Āśvāsas.

Beginning:

स्वस्ति भवेदमितायै वेदवनं श्रूयमाणवेदमितायै ।
देव्यै नामागस्य स्थितं तटाकं श्रितश्च नामागस्य ॥

* * * *

म(ग)दितं परमाख्यानं नाशितवन्तौ मयेह परमाख्यानम् ।
भक्तेनाम्नायमितं भूतमृषौ सत्यतपसि नाम्ना यमितम् ॥
सत्यतपा नामा स व्यघ ऋषिरग्र्यो द्विजाधिपानामा(स) ।
स पुनर्वेदमहार्थं नाकसदां भूसदाञ्च वेद महार्थम् ॥

* * * *

Colophon:

इति सत्यतपःकथायां प्रथम आश्वासः ॥

End:

चरितमिदं परमान्यं हा सिध्यन्नृषु ददन्मुदं परमान्यम् ॥
स्वस्ति भवेदेताभ्यां वेदे ताभ्यामृभुक्षवैकुण्ठाभ्याम् ।
संयुतसत्यतपोभ्यां सत्यतपोभ्यां जनैरवाप्यपदाभ्याम् ॥
भूतायामद्भुताद्गोपालीतस्त्वतो हि गोपालीत ।
मुदिता भूतार्या नो वेदवने सादरा भवेदवने सा ॥
जयन्तु सर्वदैवतान्ययन्त्रिता त्रयीव नः ।
शिवास्सरोऽपि सामगीर्जयन्तु सर्वदैवताः(?) ॥

Colophon:

इति सत्यतपःकथायां तृतीय आश्वासः ॥

(*c*) शिवोदयः.
ŚIVŌDAYAḤ.

Foll. 37*a*—44*b*.

Herein the author Vāsudēva gives the history of bimself and his eight brothers.

Contains the first two Āśvāsas.

Beginning:

स्वस्ति भवेदवनायैवार्यायै गोरवाप्तवेदवनायै ।
ससमीद्धेदवनायैकात्ताश्रमगर्षिजपगवेदवनायै ॥

* * * *

वेदारण्यन्नामस्तर्षि यदि तमखिलतो हिरण्यन्नाम ।
शुचिसदरण्यन्नाम ह्येति यशो यन्नतश्शरण्यन्नाम ॥

अस्ति प्राकाराणां राशिः स्वर्णात्मनान्धकाराणाम् ।
इह न वराका(रा)णां नाम्नोऽस्य वशे स्युरघधुराकाराणाम् ॥

* * * *

Colophon :

इति शिवोदये प्रथम आश्वासः ॥

End :

शम्भवे देवभवते सभार्याय सदाशिव ।
शम्भवे देवभवते सभार्याय सदाशिव ॥
रते निर्वेदकानने नु वत्स वेदकानने ।
जयार्तवेदकानने स्थितेऽम्ब वेदकानने ॥

Colophon :

इति शिवोदये द्वितीय आश्वासः ॥

(*d*) अच्युतलीला.

ACYUTALĪLĀ.

Foll. 45*a*—66*a*.

A Yamaka poem narrating some of the sportive deeds of Śrī-Kṛṣṇa and stating that he is the same as God Acyuta, worshipped in Vēdāraṇya : by the same author as that of the previous work.

Contains one to four Āśvāsas.

Beginning :

जयति श्रुतिकान्तारं श्रितागुणोल्लासिवेदरुतिकान्तारम् ।
देवी नानावर्णाश्रितवृषमुनिमज्जगत्पुनानापर्णा ॥
यास भुवि विधात्राद्य त्रिदशान्नत्वाच्युतस्य विविधात्राद्यः ।
लीलासद्यमकेन ग्रन्थेन मयोच्यते लसद्यमकेन ॥
वंशे तारेशस्य स्वगुणै राजा बभूव तारेशस्य ।
अर्थिजने वसुदेवस्थितिमान् मधुराख्यनिलयने वसुदेवः ॥

* * * *

Colophon :

इति श्रीमदच्युतलीलायां प्रथम आश्वासः ॥

End :

प्रणतोऽस्मि गतं भवसागरं नाविकसद्धृदयं भवदासमहम् ।
भवभक्ततयानुभवन्तमितं विकसद्धृदयं भवदासमहम् ॥

*   *   *   *

कात्युतश्रितोद्भवाखिलेश्वरी सदात्तभद्रकाल्युतश्रिता मुदं जयत्वरत् ॥

Colophon:

इत्यच्युतलीलायां तुरीय आश्वासः ॥

(*e*) कौमारिलयुक्तिमाला.

KAUMĀRILAYUKTIMĀLĀ.

Foll. 66*b*—76*b*.

A narration of the principles as maintained in his arguments in the Mīmāṁsāvārtika of Kumārila. The sentences of Vararuci, which are useful in the preparation of Indian calendars, are incorporated by the author in this treatise and form the beginning in each stanza: by the same author as that of the above.

Complete.

Beginning:

गीर्नः श्रेयस्करीह श्रुतिरिति पठनीयेति पित्रादिवाचा
विप्रं साङ्गश्रुतीतं गुरुनिलयनतः स्नानतो यातुकामम् ।
आपातज्ञातधर्मश्रुतिविषयमृषिर्मार्गमस्या विचारे
वैधे धर्मस्य रूपादिषु च विविदिषुस्सूत्र आहेत्यथेति ॥

धेनवः श्रीरितीष्टकृफलोऽर्थो न तु श्येनवज्रादि नो चैत्यपूजादि च ।
वेद उक्तो न बाह्यागमे धर्म इत्यर्थतश्चोक्तितश्चोदनेत्युच्यते ॥

*   *   *   *

भद्रकरोऽर्थो नित्यो दोषापेतो हितस्सतां मान्यः ।
वेदस्सपरिकरोऽयं प्रथमेऽध्याये प्रमाणमिति सिद्धम् ॥

End:

मङ्गलञ्च श्रुतौ श्रौतकर्मश्रितेऽङ्गे प्रसङ्गोक्तिकृद्द्वादशं लक्षणम् ।
पाद आद्ये प्रसङ्गोऽथ निर्णीतिरस्योर्ध्वगे मेलनं सद्विकल्पोऽन्तिमे ॥

कवेश्शब्दयं प्राप्तुं परमभिलषन् ग्रन्थकृतितो
यशो मन्दो हास्यो भवति हि विशेषेण महति ।
इह श्रीमत्कौमारिलपरमशास्त्रेऽथ च मया
व्यधायीदं दुर्गागुरुजनमहानुग्रहजुषाम् ॥

भवेत्सुखं वर्यगुणेह गोपाल्यसौ चिरं मंत्रभवत्वगेता ।
दिव्यव्यमेयर्षिवराद्दता सन्नुतानमश्रुत्यटवी शिवार्यैं ॥
. . . . |
सुरराट् तैरागत्य प्रणमाति यां साग्निसूर्यहिमघृणिभः ॥
जवतोऽतिशयिनि गरुडे स्थितः श्रियामाहरिरिशिवस्सोमः ।
धटकचपाद्यङ्गचामा गिराच कटकुवलयोऽपि सहनृवरः ॥
सनिभो ब्राह्माल्लोकाद्देदारण्यालयो महानस्याः ।
मणिमान्देव्या हैमस्त्वया निषेव्यस्सनिगममुनिचयतः ॥

Colophon:

इति श्रीमच्छ्रुतिकान्तारावस्थितव्रषावितृभूतार्यानन्दायि भास्वच्छबरार्यकृष्णनतमहर्षिगोपालीनन्दनकृतिः कौमारिलयुक्तिमाला . . . .
पदश्रितसदाद्दतश्रीमद्वासुदेवार्यश्रीमत्परमेश्वरार्यपदश्रिताशिव . . . . . श्रीपार्थसारथिसुचरितपरितोषगकृतिकौमारिलतिलकं समाप्तम् ॥

R. No. 3061.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 143. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. acquired through Pandit Gōpīnāthānandaśarma of Parlakimedi.

कालिकार्चनप्रकाशिनी.

KĀLIKĀRCANAPRAKĀŚINĪ.

Foll. 1*a*—143*a*. Fol. 143*b* is left blank.

Breaks off in the 14th Paricchēda.

A work in Śaktism laying down certain details for the worship of the Gōddess Kālī. It is intended to be observed by the followers of the Kaula sect of the Śāktas: by Gōpīnāthatripāṭhin, who quotes Gautamītantra, Tantrarāja, Vasiṣṭhasaṁhitā, Rudrayāmala, Śukapraśna, etc.

Deals with the following subjects:—

१. ब्राह्ममुहूर्तविधानम्.
२. स्नानादिविधिः.
३. सूर्यार्घ्यद्वारपूजादि.
४. देवीपूजाद्रव्यसम्पादनम्.
५. प्राणायामादिप्राणप्रतिष्ठान्तविधिः.
६. मातृकादिव्यापकन्यासान्तविधिः
७. भावनाचतुष्टयाद्यन्तर्यजनम्.
८. बहिर्यागाद्यावरणपूजाविधिः.
९. देवीपुष्पाञ्जलिः.
१०. धूपादिनैवेद्यान्तम्.
११. नित्यहोमाशीर्वादस्तोत्रादि.

१२. दीक्षाक्रमादि.
१३. कूर्मचक्रादिप्रतिमालक्षणान्तम्.
१४. स्रुक्स्रुवलक्षणादिपूजान्तम्.

Incomplete.

Beginning :

सञ्चिन्तयामि घननीरदमङ्गयष्टिं (देहभाजं)
मुण्डालिदामपरिलम्बितकण्ठदेशाम् ।
सृकद्वयस्रवदसृग्विकटाननां तां
कर्णावतंसशवयुग्मवृतां त्रिनेत्राम् ॥

* * * *

आशाम्बरां सकलभूषणभूषिताङ्गीं मन्दाट्टहासपरिपूरितसर्वकाष्ठाम् ।
आजानुलम्बितमनोहरकेशभारां सञ्चिन्त्य लोकजननीं हृदि कालिदेवीम् ॥

* * * *

गौतमीतन्त्रे—

इदानीं पूर्वकृत्यं च प्रसङ्गात्कथयामि ते ।
यः कृत्वाधिकारिणं याति मन्त्रतन्त्रार्चनादिषु ॥

* * * *

तन्त्रराजे—

मान्त्रिकः प्रातरुत्थाय पृथिवीं प्रार्थयेत्ततः ।
मलापकर्षणं कृत्वा मृज्जलैः शौचमाचरेत् ॥

ब्राह्मो मुहूर्तो यथा वसिष्ठसंहितायाम्—

रात्रेः पश्चिमयामस्य मुहूर्तो यस्तृतीयकः ।
स ब्राह्म इति विज्ञेयो विहितः संप्रबोधने ॥

रुद्रयामले—

त्रिदण्डावस्थिता रात्री ब्राह्मीति प्रोच्यते बुधैः ।
गुरुदैवतमन्त्राणां तत्र संस्मरणं भवेत् ॥

* * * *

Colophon:

इति श्रीगोपीनाथत्रिपाठिकृतश्रीदक्षिणकालिकार्चनप्रकाशिन्यां ब्राह्ममुहूर्ते (र्तो नाम) प्रथमः परिच्छेदः ॥

End:

शुकप्रश्ने—

अङ्गुष्ठे च मध्यमायामिति मानं द्विजस्य तु ।
अङ्गुष्ठानामिकायान्तु गोकर्णं क्षत्रियस्य च ॥
तथाङ्गुष्ठकनिष्ठाभ्यां वितास्तिर्वैश्यजन्मनाम् ।
अङ्गुष्ठतर्जनीभ्यान्तु प्रादेशं शूद्रजन्मनाम् ॥
एतत्समानं सर्वत्र प्रमाणं होमकर्मणि ।

Colophon:

इति श्री . . . . . ॥

अथ स्रुक्स्रुवयोर्लक्षणम्—

वक्ष्यामि स्रुक्स्रुवयोर्लक्षणमथ वीक्ष्य सम्मतं पक्षम् ।
तदपक्षकर्मदक्षाः साधयताभिमतलक्षणानि(?) ॥ ग्रन्थान्तरे ।
* * * *
वह्निप्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिधं सर्वतोमुखम् ॥

इति सम्प्रार्थ्याग्निं पूजयेत् । यथा ।

R. No. 3062.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 112. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Śrīmān Bṛndāvanacandra Pāṇigrāhī, Parlakimedi.

भक्तिरसामृतसिन्धुटीका—दुर्गमसङ्गमनी.

BHAKTIRASĀMṚTASINDHUṬĪKĀ : DURGAMASAṄGAMAṆĪ.

Foll. 1*a*—112*a*. Fol. 112*b* is left blank.

A commentary on the Bhaktirasāmṛtasindhu which is a treatise explaining the different varieties of Bhakti or devotion to Lord Kṛṣṇa. The commentary is called Durgamasaṅgamanī and for further details about it see the India Office Catalogue, Vol. IV, No. 2503.

Deals with the following subjects :—

I. पूर्वविभागः—

१. भक्तिसामान्यलहरी.
२. साधनभक्तिलहरी.
३. भावभक्तिलहरी.
४. प्रेमलहरी.

II. दक्षिणविभागः—

१. विभावलहरी.
२. अनुभावलहरी.
३. सात्त्विकलहरी.
४. व्यभिचारलहरी.
५. स्थायीभावलहरी.

III. पश्चिमविभागः—

१ शान्तभक्तिरसलहरी.
२. प्रतिभक्तिरसलहरी.
३. प्रेयोभक्तिरसलहरी.
४. वत्सलभक्तिरसलहरी.
५. मधुरभक्तिलहरी.

IV. उत्तरविभागः—

१. हास्यभक्तिरसलहरी.
२. अद्भुतभक्तिरसलहरी
३. वीरभक्तिरसलहरी.
४. करुणभक्तिरसलहरी.
५. रौद्रभक्तिरसलहरी.
६ भयानकभक्तिरसलहरी.
७. बीभत्सभक्तिरसलहरी.
८. मैत्रीवैरस्थितिलहरी.
९. रसाभासलहरी.

Complete.

Beginning :

सनातनसमो यस्य ज्यायान् श्रीमान् सनातनः ।
श्रीवल्लभोऽनुजः सोऽसौ श्रीरूपो जीवसद्गतिः ॥

अथ श्रीमान् सोऽयं ग्रन्थकारः सकलभागवतलोकहिताभिलाषपरवशतया प्रकाशितैः सहृदयदिव्यकमलकोशविलासिभिः श्रीमद्भागवतरसैरेव भक्तिरसामृतसिन्धुनामकं ग्रन्थमपूर्वरचनमाचिन्वानस्तद्वर्णयितव्यस्यैव च सर्वोत्तमतां निश्चिन्वानस्तद्व्यञ्जनेनैव मङ्गलमासञ्जयति । एवं सर्व एव ग्रन्थोऽयं मङ्गलरूप इति च विज्ञापयति—अखिलेति । विधुः श्रीकृष्णः । जयति सर्वोत्कर्षेण वर्तते ॥

* * * *

Colophon :

इति दुर्गमसङ्गमनीनाम्न्यां भक्तिरसामृतसिन्धुटीकायां लहरीचतुष्टयात्मके पूर्वविभागे भक्तिसामान्यं नाम प्रथमलहरी ॥

End :

रामाङ्केति शालिवाहनस्य संवत्सरगणनया विक्रमादित्यस्यापि सा ज्ञेया । अङ्कस्य वामा गतिरिति प्रसिद्ध्या त्रिषष्ट्यधिकचतुर्दशशतीगणित इत्यर्थः (१४६३) । विक्रमादित्यस्य तु अष्टनवत्यधिकं पञ्चदशशतीगणित इति ज्ञेयम् (१५९८) ॥

* * * *

यदपि च नातिविशुद्धा तदपि च सद्भिः कदाप्युरीकार्या ।
दुर्गमसङ्गमनीयं नौकेवास्यामृताम्भोधेः ॥
समाप्ता चेयं टीका तेषामेव प्रीतये भवतु ॥

Colophon :

इति दुर्गमसङ्गमनीनाम्न्यां हरिभक्तिरसामृतसिन्धुटीकायां चतुर्थो विभागः समाप्तः ॥

The scribe adds—

करणकुलसुदुग्धाम्भोधिजन्मा शकाब्दे
मुनिशरमुनिराका (१७५७) प्रेष्ठसङ्ख्ये लिलेख ।
सदसि शरणनामा पूर्वराधो(धा)मुरारेः
भजनरससुधाब्धिप्रख्यकं ग्रन्थमेकम् ॥

R. No. **3063.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 36. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Kōṭi Rāmamūrti Śāstrigāru, Pōtanapūḍi Agrahāram, Vaddadi post.

अनङ्गरङ्गव्याख्या.

ANAṄGARAṄGAVYĀKHYĀ.

Foll. 1*a*—36*a*. Fol. 36*b* is left blank.

A commentary on the Anaṅgaraṅga of Kalyāṇamalla which work has been described under No. 3888 of the D.C.S. MSS., Vol. VIII. The name of the commentator is not given. The commentary is called Anaṅgaraṅgaprakāśikā.

Breaks off in the sixth Sthala.

Beginning :

श्रीमान् यस्त्वरुषा ददाह मदनं रत्या ततः प्रार्थितः
तं लोके प्रथितं विधातुमनिशं व्यङ्गं कृपाम्भोनिधिः ।
स्वार्धाङ्गे ललिताभिधां नगसुतां प्रेम्णा दधाराम्बिकां
देवो मत्प्रतिभां करोतु विमलां कामेश्वरो दक्षिणः ॥
प्रणम्य करुणाम्भोधी श्रीनिवासविनायकौ ।
सन्मुदे क्रियते व्याख्यानङ्गरङ्गप्रकाशिका ॥

अनेकदोषसंवृतामपि स्फुटार्थबोधदा-
मिमां परानुकम्पया विलोकयन्तु कोविदाः ।
तमिस्रसंवृतायने प्रकाशकारिणीं जनाः
कुचेलखण्डनिर्मितां किमुत्सृजन्ति दीपिकाम् ॥

अथ तत्र भवान् कल्याणमल्लनामा कविः चिकीर्षिताविघ्नसमाप्तये प्रकृत-ग्रन्थप्रतिपाद्यार्थनियन्तृकामदेवनमस्कारपूर्वकं मङ्गलमाचरति—अतिललितेति। अहं कामं नौमि स्तौमीत्यन्वयार्थः । कीदृशमतिललितविलासम् । अतिललिता अतिरमणीया विलासा यस्येत्येवम्भूतम् ।

* * * *

इति, प्रकरणसमाप्तिबोधकम्। अनङ्गरङ्गे अनङ्गस्य कामस्य रङ्ग इव रङ्गस्त-स्मिन् तन्नामकग्रन्थे पद्मिन्यादिजातीनां वर्णनं यस्मिन्नित्येवम्भूतं नामेति प्रसिद्धौ । प्रथमं स्थलमिव स्थलं यथा रङ्गभूमौ नानाविधानि स्थलानि क्रियन्ते तत्रैकं प्रथमं स्थलं तिष्ठति तद्वदत्रापीदं बोध्यमिति ॥

Colophon:

इत्यनङ्गरङ्गव्याख्यायां प्रथमस्थलव्याख्या ॥

End:

कामिनीनां योषितां प्राणैस्समत्वमुपयाति, तासां प्रीत्याश्रयो भवती-त्यर्थः । शेषं स्पष्टम् ॥

Colophon:

इत्यनङ्गरङ्गे कामशास्त्रे पञ्चमस्थलव्याख्या समाप्ता ॥

अथ द्रावणादिविधय उच्यन्ते । अथ, देशधर्मनिरूपणानन्तरम्। शेषं स्पष्टम् । अथ वक्ष्यमाणद्रावणविधेः प्रयोजनमाह—प्रागेवेति ।

* * * *

तत्तैलेन तादृशतिलोत्थतैलेन लिप्ताः केशाः शुक्लास्स्युः । अत्रैतद्विषये संशयो नास्तीति ॥ अथ मुख.

R. No. **3064.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 194. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Dāmera Cina Bucci Veṅkaṭa Rao Gāru, Palteru, Vizagapatam district.

नैषधव्याख्या—अन्वयबोधिका.

NAIṢADHAVYĀKHYĀ; ANVAYABŌDHIKĀ.

Foll. 1*a*—194*a*.

A commentary on the Naiṣadha, which work has been described under No. 11543 of the D.C.S. MSS., Vol. XX. By Prēmacandra-Nyāyaratna.

Contains the Sargas one to seven only.

Beginning:

या काङ्क्षितामलपदा नियतं जनानां
शब्दार्थसञ्चयसमन्वयने च योग्या ।
व्यक्तीकरोति निखिलं हृदि भावजातं
वाग्देवतामभिमतामहमाश्रये ताम् ॥
अन्यासु भावबहुलासु सदर्थिकासु
टीकासु चेदिह भवेद्विफलः प्रयासः ।
सद्भिस्तथापि मृदुबोधविबोधनार्थं
जातोद्यमोऽहमिह संप्रति नावबुध्ये ॥

अस्य ग्रन्थस्य महाकाव्यतया वर्णनीयप्रसिद्धनायकत्वेन सहृदयानां झटिति साभिनिवेशशुश्रूषाप्रवर्तकतया च प्रथमं सन्नायकनामकीर्तनरूपं वस्तु निर्दिशति—निपीयेति । बुधाः पण्डिताः । यस्य क्षितिरक्षिणः, क्षितिं पृथिवीं साधु रक्षितवानिति तस्य । न्यायेन पृथिवीपालयितुरित्यर्थः ।

* * * *

Colophon:

इति श्रीप्रेमचन्द्रन्यायरत्नविरचितायां नैषधीयटीकायामन्वयबोधिका-समाख्यायां प्रथमस्सर्गस्समाप्तः ॥

End:

श्रीहर्षमिति । गौडोर्वीशकुलस्य गौडभूमीशकुलस्य वंशस्य प्रशस्तस्तुतिः तस्याः फणितेः रचनायाः भ्रातरि एकजनकत्वात्सहोदरे । साप्यनेन कृतेति भावः । अन्यत्पूर्ववत्प्रशस्तभगिनीभ्रातर्ययमिति क्वचित्पाठः । प्रशस्ते स्त्रीलिङ्गत्वाद्भगिनीत्वम् ॥

Colophon:

इति श्रीप्रेमचन्द्रन्यायरत्नविरचितायामन्वयबोधिकाव्याख्यायां सप्तमसर्गस्समाप्तः ॥

The scribe adds—

नैषधसप्तमसर्गव्याख्यानं विश्वनाथविदुषासीत् ।
लिखितं प्रमाधिवर्षे फाल्गुनशुक्लाष्टमार्यदिवसेऽस्ये ॥

R. No. 3065.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 126. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Mahāmahōpādhyāya Nārāyaṇa Nambūdirippāḍ, Sabhāmaṭham, Kunnangulam post.

(*a*) भावनाविवेकः.

BHĀVANĀVIVĒKAḤ.

Foll. 1*a*—14*b*.

Herein the author Maṇḍana discusses the nature of Bhāvanā according to the Mīmāṁsā-Śāstra and gives his own Siddhānta or conclusion.

Complete.

Beginning:

संसर्गमोहितधियो विविक्तं धातुगोचरात् ।
भावात्मानं न पश्यन्ति ये तेभ्यः स विविच्यते ॥
सामानाधिकरण्यात्तदर्थभेदाभिधानुमा ।
न तादर्थ्यानुमा नाह वृक्षतां शिंशपाश्रुतिः ॥

इह खलु गगन(कुसुम)शशविषाणयोरभवतोरक्रियमाणत्वाद्भवितुश्च घटादेस्तत्त्वात् भवत्यर्थस्य कर्तुः करोतिकर्मता । तथा च भवितुः करोत्यर्थस्य कर्ता प्रयोजक इति भवतेः प्रयोजकव्यापारे णिजुत्पद्यमानः करोत्यर्थमवलम्बते । तेन सा भावना । करोतिसमानाधिकरणाश्च पचत्यादय इति तेषां तादर्थ्यानुमानम् । तदसत् । एकाधिकरणता हि तदर्थविशेषाभिधाननिमित्तं नैकार्थ्यमवगमयति । तादृशोः सहप्रयोगानुपपत्तेः । न खलु वृक्षता शिंशपा शब्दगोचरः । अपितु अभिधेयपरिप्रापिततया गम्यमाना । तदिदमैकाधिकरण्यं स्फुटम् ।

End:

स्यादेतत् । स्वर्गसिद्धाविच्छापगमे नियोगनिष्पत्तिः । अन्यथा कृतयागोऽपि नियोज्य एव स्यात् न तु कृतनियोगः । अतो नियोगार्थनिष्पत्तिसामर्थ्यात् स्वर्गादिसिद्धिप्रतीतिः न विषयसिद्ध्या नियोगनिष्पत्तेः । स्वर्गादेश्च नियोज्यविशेषणपरत्वेनाविषयत्वात् । अन्यथा गृहदाहादेरपि प्रसङ्गः । तस्मात् फलपराः स्वर्गकामश्रुतय इति मनोहरम् ॥

Colophon:

इत्यार्यमण्डनस्य कृतिर्भावनाविवेकोऽवसितः ॥

(*b*) भावनाविवेकटीका — विषमग्रन्थभेदिका.

BHĀVANĀVIVĒKAṬĪKĀ : VIṢAMAGRANTHABHĒDIKĀ.

Foll. 14*b*—82*b*.

A commentary on the above-mentioned work : by Nārāyaṇa, son of Viṣṇu.

Complete.

Beginning :

यत्पादसेवैकनिबन्धनानि पुंसां समस्तानि समीहितानि ।
सेन्द्रामराभ्यर्चितपादपद्मं विघ्नेश्वरं तं प्रणतोऽस्मि मूर्ध्ना ॥
उज्जहारागमाम्भोधेर्यो धर्मामृतमञ्जसा ।
न्यायैर्निर्मथ्य भगवान् स प्रसीदतु जैमिनिः ॥
स्वान्तध्वान्तनुदं देवं सर्वज्ञं पुरुषोत्तमम् ।
प्रणतोऽस्म्यखिलेशानं स दिश्यान्नो मनोरथम् ॥
श्रीमन्मण्डनमार्ताण्डसन्न्यायोक्तिगभस्तयः ।
स्फुरन्तो हृदयव्योम्नि मोहध्वान्तं हरन्तु नः ॥
भावनाया विवेकस्य तात्पर्यप्रतिपत्तये ।
टीकेयं क्रियतेऽस्माभिर्विषमग्रन्थभेदिका ॥

सर्वोऽपि सांशयिकस्सप्रयोजनश्चार्थो विचारगोचरो भवति नान्यः । अत्रास्य प्रारिप्सितस्य प्रकरणस्य तथाविधो विषयो वक्तव्य इति प्रथमं तत्प्रतिपादनायाह—

संसर्गमोहितधियो विविक्तं धातुगोचरात् ।
भावात्मानं न पश्यन्ति ये तेभ्यः स विविच्यते ॥

अयमर्थः—अस्य प्रकरणस्य भावनापदार्थो विषयः तस्य च स्वरूपसद्भावे शब्दार्थत्वे च विप्रतिपद्यन्ते । न संयोगविभागादेर्गुणविशेषात् भेदेन क्रियात्मा भावनापदार्थो विद्यते ।

* * * *

Colophon :

इति भावनाविवेकटीकायां नारायणविरचितायां पूर्वपक्षः समाप्तः ॥

End :

एवमुक्तेन न्यायेन स्वर्गादीनां फलभावस्यानन्यलभ्यत्वात् सामर्थ्यलभ्यत्वाच्च नियोज्यविशेषणस्य स्वर्गकामादिश्रुतयः फलपरा इत्येष एव पक्षश्शोभन इति ॥

Colophon :

इति भावनाविवेकविवृतौ नारायणकृतौ भावनाविवेकविवृतिः समाप्ता ॥

श्रीमन्मण्डनमार्ताण्डसन्न्यायोक्तिगभस्तिभिः ।
उन्मीलितावगाढेयं भावनानलिनी मया ॥

भावनाया विवेकस्य विवृतिं विष्णुनन्दनः ।
लघ्वीं नारायणश्चक्रे नारायणपरायणः ॥

(*c*) विभ्रमविवेकः.

VIBHRAMAVIVĒKAḤ.

Foll. 82*b*—90*b*.

An investigation of the four theories of erroneous cognition that are technically known as Ātmakhyāti, Asatkhyāti, Anyathākhyāti, and Akhyāti: by the same author—Maṇḍana.

Complete.

Beginning:

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा ।
परीक्षकाणां विभ्रान्तौ विवादात्सा विविच्यते ॥
असच्चकास्ति न व्योमकुसुमं न तथोदितम् ।
अर्थः प्रकाशतेऽतो धीस्तदाकारेति केचन ॥
असम्भवि च यावच्च तावत्सम्परिहीयताम् ।
संवेद्याकारसन्त्यागो न भ्रान्तित्वेऽवकल्पते ॥
एकदेशावबोधेन कल्प्यमाने च बाधके ।
न सर्वबाधनं युक्तमिति न्यायविदः स्थिताः ॥
अन्यो बहिर्भासमानो नान्तरर्हति धारणम् ।
असक्तै(त्तै)व परं तस्य भ्रान्तित्वानुगुणा हि सा? ॥
* * * *
युज्यते नान्यथाख्यातिर्निरधिष्ठानविभ्रमे ।
स्वप्ने हि निरधिष्ठानो विभ्रमो वीतसंशयः ॥
तत्राप्यवर्तमानं चेत् गृह्यते वर्तमानवत् ।
अवर्तमानस्यासत्ता खपुष्पान्न विशिष्यते ॥

End:

आत्मख्यातौ सर्वमेवान्तराहुः शून्यख्यातौ शून्यमेवेति केचित् ।
अख्यातौ नो तत्त्वमिथ्याविभागस्तस्मादेषां विभ्रमाणां विवेकः ॥

Colophon:

इत्याचार्यमण्डनकृतौ विभ्रमविवेकस्समाप्तः ॥

(*d*) काव्यादर्शः.

KĀVYĀDARŚAḤ.

Foll. 91*a*—121*a*.

Same work as that described under No. 12830 of the D.C.S. MSS., Vol. XXII. By Ācāryadaṇḍin.

Contains the Paricchēdas one to three complete.

(e) श्रौतविषयः.

ŚRAUTAVIṢAYAḤ.

Foll. 121b—125a. Foll. 125b and 126 are left blank.

A treatise laying down certain rules to be observed by a sacrificer (Yajamāna) and the duties to be performed by him. The name of the author is not given.

Wants the beginning and the end.

Beginning:

दीक्षितोऽसि । हे यजमान त्वामध्वर्युरनुशास्ति शिक्षयति । दीक्षितोऽसीति । दीक्षितनामासि त्वम् । इदानीमनुष्ठितैः कर्मभिर्जितेन्द्रियोऽसीत्यर्थः । किमर्थमिति? सोमयागं कर्तुम् । ननु यजमानं प्रति . . . ज्ञापनं व्यर्थमस्मिन् सोमयागे अती(धी)तसाङ्गवेदनिर्णीतसकलवेदार्थस्य दाराग्निश्रद्धावतः

आहिताग्निश्शुचिश्शक्तस्सश्रद्धोऽपतितो द्विजः ।
स्वर्गं कामयमानोऽन्यद्यत्किञ्चिद्वा फलान्तरम् ॥

इत्यादिस्मृतिदर्शनात् शक्तिमत एवाधिकारः ।

End:

कदाचिदपि कृष्णाजिनं दण्डं च न त्यजति । अवभृथतीर्थ एव कृष्णाजिनस्य त्यागविधानात । दण्डस्यापि विच्छेदोच्छेत्ता भेत्ता वरुणाय दण्डं ददातीत्यत्र मेखला कृष्णविषाणोत्तरीश(य)ः ततः.

R. No. **3066.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 36. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Malabar district.

पाणिनीयसूत्रोदाहरणकाव्यम्, सव्याख्यम्.

PĀṆINĪYASŪTRŌDĀHARAṆAKĀVYAM WITH COMMENTARY.

Foll. 1a—35a. Foll. 35b and 36 are left blank.

A poem dealing with the story of the Śrī-Bhāgavata. It is written with a view to illustrating the grammatical Sūtras of Pāṇini. The name of the author is not given.

Incomplete.

Beginning:

अथ द्वितीयाध्यायोदाहरणरूपं द्वितीयसर्गमारभते—

शूरात्मजोऽथ सुमहत्तरभाग्यभूमा छद्मात्तबालवपुषं परिगृह्य देवम् ।
सूत्यालयाज्जिगमिषुः प्रतिनन्दगेहं यावद्बभूव निगलो व्यगलत्पदाभ्याम् ॥
इति ॥

अथ भगवद्वचनश्रवणानन्तरम् । सुमहत्तरभाग्यभूमा भगवत्पितुस्तस्य महाभाग्यत्वं किमुच्यत इति भावः । तादृशः शूरात्मजो वसुदेवः । छद्मना व्याजेनात्तं परिगृहीतं बालवपुर्मर्त्यबालस्वरूपं येन तमित्युक्तानुवादः । देवं श्रीहरिं परिगृह्य हस्तेनादाय सूत्यालयात् सूतिकागृहात् । प्रतिनन्दगेहं नन्दगोपाधिवासभूतं व्रजं प्रति यावत् जिगमिषुर्गन्तुमिच्छुर्बभूव तावत् निगलः कंसेनार्पिता पादबन्धनशृङ्खला । पदाभ्यां वसुदेवस्येत्यर्थात् व्यगलत् स्वयमेव पतिता इति । अस्मिन् समर्थःपदविधिः, प्राक्कडारात्समासः, सह सुपा, अव्ययीभावः, इति चत्वारि सूत्राणि । शूरात्मज इत्यत्र शूरात्मजयोस्समर्थत्वात् षष्ठीसमास इति समर्थःपदविधिरिति दर्शितम् । भूमा छद्मेत्यत्र सन्धौ समर्थत्वाभावे पदान्ताद्वेति तुग्विकल्पस्य पदविधित्वादप्राप्तिः । ततो दीर्घादिति नित्यं तुगेवेति प्रत्युदाहरणञ्च दर्शितम् ॥

* * * *

Colophon:

इति प्रथमपादोदाहरणम् ॥

End:

भासा घनेन सदृशं वदनेन चेन्दोरादाय बालमबलाः प्रददुर्जनन्यै ।
अस्मै सुभद्रमुदियादमुना सुखं नो भूयादिति स्तनमपाययदात्मजं सा ॥

* * * *

इति प्रार्थयन्ती आत्मजं स्तनमपाययत् इति । अस्मिन् तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्, चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः इति द्वे सूत्रे । घनेन सदृशमिन्दोस्सदृशमित्यनयोः तुल्यार्थैरित्यादिना तृतीया षष्ठी च । अस्मै सुभद्रमुदियान्नस्सुखं भूयादित्यनयोः चतुर्थी चाशिष्यायुष्येत्यादिनाशिषि द्योत्यायां चतुर्थी षष्ठी च । इति ॥

Colophon:

इति तृतीयपादोदाहरणम् ॥

R. No. 3067.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 50. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Agadhācārya of Mandasa.

गोपालार्चनविधिः.
GŌPĀLĀRCANAVIDHIḤ.

Foll. 1*a*—49*b*. Fol. 50 is left blank.

On the details connected with the worship of God Gōpāla in the sacred shrine at Nīlādri (Jagannath). This is taken from the Āgāmakalpataru of Puruṣōttamadēva.

Complete.

Beginning :

स्नातो निर्मलशुद्धसूक्ष्मवसनो धौताङ्घ्रिपाण्याननः
स्वाचान्तं(न्तः) सुपवित्रमु(उ)द्धृतकरं(रः) श्वेतोर्ध्वपुण्ड्रोज्ज्वलः ।
प्राचीदिग्वदनो निबध्य सुदृढं पद्मासनं स्वस्तिकं
आ(ह्वा)सीनः स्वगुरून् गणाधिपमथो वन्देत बद्धाञ्जलिः ॥

अथ नीलाद्रिनाथस्य पूजाविधिर्लिख्यते—

प्रातर्मन्त्रकृतस्नानः कृतपूर्वाह्निकक्रियः ।
प्रयत्नतोऽहःपूर्वांशे पुण्यकाले स्वशक्तितः ॥

क्रिया ब(फ)लवती लोके क्रियाहीने कुतः फलम् ।
नित्यं देवार्चनं कुर्यादन्यथा दोषदर्शनात् ॥

प(व)रं प्राणपरित्यागः शिरसो वापि कृन्तनम् ।
न त्वसंपूज्य भुञ्जीत भगवन्तं सनातनम् ॥

अथ अवकाशविधिः ।

प्रथमतः तालत्रयध्वनिपूर्वकं कवाटमुत्पा(द्घा)ट्य भगवन्तं प्रबोध्य साञ्जलिर्देवस्य दक्षिणपार्श्वे उपविश्य आसनशुद्धिं कुर्यात् । आसनमन्त्रस्य मेरुपृष्ठ ऋषिः, सुतलं छन्दः, श्रीकूर्मो देवता ; अनन्तो बीजं, पृथिवी शक्तिः, आसने विनियोगः, आसने कमलासनाय नमः, शिरसि जलप्रवेष्टनमित्यासने ।

End :

विष्वक्सेनाय देवाय बलिमाधारणं क्षिपेत् ।
नाश्नीयात्साधको नान्यं विष्वक्सेननिवेदकम् ॥
एवन्तु भ्रामयित्वा तु . . कैः प्रक्षिपेद्बलिम् ।
भगवत्प्रीतये दद्यात्सधूपैर्दीपविस्तरैः ॥
बलिदानक्रियाद्येषु सर्वकर्मसु कारकः ।
देशिकाय प्रदद्यात्तु गाश्च वत्सश्च काश्चनम् ॥

Colophon :

इति श्रीआगमकल्पतरौ वैष्णवस्कान्दे(स्कन्धे) गोपालशाखायां मन्त्रपल्लवे महाग(रा)जाधिग(रा)जपुरुषोत्तमदेवविरचिते गोपालार्चनविधिः समाप्तः ॥

R. No. **3068.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 116. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of Śrīmān Purōhita Nīlamaṇi Ratha of Parlakimedi.

हलधरसंहिता.

HALADHARASAṀHITĀ.

Foll. 1*a*—113*b*. Foll. 114*a*—115*a* contain the table of contents of this work. Foll. 115*b*—116*b* are left blank.

A treatise mostly dealing with horoscopy : by Haladharamiśra, son of Padmāvatī and Dinakara of Śaṁbhukara family. The subjects dealt with herein are apparent from the names of the 12 Adhyāyas given below :—

१. राश्यादिनिर्णयाध्यायः.
२. ग्रहदोषादिनिर्णयाध्यायः.
३. चन्द्रताराशुद्धिनिर्णयाध्यायः.
४. वारादिनिर्णयाध्यायः.
५. विवाहादिनिर्णयाध्यायः.
६. पुष्पवत्यादिनिरूपणाध्यायः.
७. रिष्टाध्यायः.
८ रव्यादिग्रहस्थफलाध्यायः.
९. योगाध्यायः.
१०. षडङ्गषड्वर्गस्त्रीजातकाध्यायः.
११. जातकर्माद्यगृहारम्भान्ताध्यायः
१२. यात्राध्यायः.

Complete.

Beginning :

कटीतटपटीकृतायतगजाजिनो धूर्जटिः
जटापटलमण्डितस्त्रिपुरखण्डने पण्डितः ।

कुचान्तरभरातुरावनिकृतावनो मे मनः
विदो(नो)दभरभूर्विभुः सपदि सन्निधत्तां हृदि ॥
वराहरचिताध्याने ज्योतिषामयने घने ।
यथा यथार्थबुद्धिस्स्यात्तथानुज्ञापय प्रभो ॥

अथ सत्सु अपराधनिरसनमाह—

असुवसुगतदुःखे संप्रवृत्तेऽपि सन्तः
परकृतमपराधं सर्वथा यत्क्षमन्ते ।
स्वपररचितपद्यैः संहितां कर्तुमिच्छन्
मम तदखिलमन्तुं क्षन्तुकामा भवन्तु ॥

तस्मादिह मनो देयं परार्थधृतविग्रहाः ।
सारासारविवेकाय श्रमे हलधरस्य मे ॥

ननु सन्ति ज्योतिश्शास्त्रेषु पुस्तकानि बहूनि सन्ति तत्र तव श्रमेणालमित्याशङ्क्याह—

यत्रास्ते वाक्यगुरुता शब्दार्थगुरुतापि च ।
अस्मत्कृतेन पद्येन सुगमं तद्विधीयते ॥

* * * *

अथ ज्योतिश्शास्त्रस्य तिथिनक्षत्रादिनिर्णायकत्वात् तस्य च कालमूलत्वात्प्रथमं कालनिर्णयमाह—

सूक्ष्मसूच्या(ब्ज)पुष्पस्य दलभेदस्त्रुटि स्मृतम् ।
लवतच्छतभेदेन ते त्रुटि तु . निमेषकः(?) ॥
निमेषसप्तविंशत्या कालो गुर्वक्षरस्य च ।
दशगुर्वक्षरोच्चारैः कालः प्राणः प्रकीर्तितः ॥
षड्भिः प्राणैर्विनाडी स्यात् तत्षष्ट्या नाडिका मता ।
नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम् ॥

* * * *

Colophon:

इति श्रीहलधरमिश्रकृतायां हलधरसंहितायां राश्यादिनिर्णयो नाम प्रथमोऽध्यायः ॥

End :

अथोपसंहारः—

इति मनुजपतिर्यथोपदेशं भगणविदां प्रकरोति यो वचांसि ।
स सकलनृपमण्डलाधिपत्यं व्रजति दिवीव पुरन्दरोऽचिरेण ॥

अथ कर्तुः मातृपितृपूर्वकात्मनामकथनम्—

माता यस्य पवित्रकीर्तिरमला पद्मावती यत्पिता
सारासारविचारविद्दिनकरो नीरोद्भवाक्षः क्षमी ।
जातश्शम्भुकरे कुलेऽतिविमले सोऽहं पुरारातये
नव्यं ग्रन्थमिमं मुदा हलधरो देवेशपादे ददौ ॥

Colophon :

इति श्रीहलधरमिश्रविरचितायां हलधरसंहितायां यात्राध्यायो द्वादशः ॥
समाप्तश्चायं ग्रन्थः ॥

R. No. **3069.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 12. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nambiyattan Patteri, Āvur-mana, Urakam post, Cochin State.

शास्त्रोपन्यासमालिका.

ŚĀSTRŌPANYĀSAMĀLIKĀ.

Foll. 1*a*—12*a*. Fol. 12*b* is left blank.

An elaborate exposition of the first Sūtra of the Pūrvamīmāṁsā following the reasoning adopted in the Nītitattvāvirbhāva and its commentaries: by Subrahmaṇya, disciple of Subrahmaṇya. The author quotes Nyāyaratnamālā of Pārthasārathimiśra, Nayavivēka (of Bhavanātha) and Bhaṭṭaviṣṇu, whose views are mostly criticised.

Incomplete.

Beginning :

वन्दे . . . . ।
. . . ब्रह्माखिलावासं वटमूलाश्रितं महः ॥
तत्त्वाविर्भावतद्व्याख्याद्युक्तयुक्त्यनुसारिणीम् ।
आद्यसूत्रे विधास्यामः शास्त्रोपन्यासमालिकाम् ॥
सति विभवे दान्तस्य स्फुटतरहृदयावभासिवेदान्तस्य ।
एनां सुब्रह्मण्यस्यान्तेवासी करोति सुब्रह्मण्यः ॥

अर्थबोधविधायित्वात्स्वाध्यायाधीतिवाक्यवत् ।
यो विभाति नमस्तस्मै लोकदीपाय भानवे ॥

अथातो धर्मजिज्ञासा—

अष्टवर्षं ब्राह्मणमुपनयीत, वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं शरदि वैश्यमित्यादिभिरुपनयनविधिभिरुपनीतान् माणवकानुद्दिश्य स्वाध्यायोऽध्येतव्य इत्ययमध्ययनविधिः । तदनुसारेणाधीतसाङ्गवेदेभ्यस्त्रैवर्णिकेभ्यो मीमांसा सिद्धा । नापि(न हि)न्यायकलापानव्यवस्थितैरेव शब्दैराचार्याः समुपदिशन्ति। एवं शब्दावष्टम्भेन विना मीमांसा बादरायणपर्यन्तं प्रावर्तिष्ट । ततश्च न्यायपिण्डात्मना नित्यैव मीमांसा । यथाहुः—

नित्यैव खलु मीमांसा न्यायपिण्डात्मनेष्यते । इति ॥

End :

नाद्यः । बालकप्रवृत्तौ कार्यबोधाभावप्रसङ्गात् । न हि प्रेरकस्योद्देश्यं बालकस्य कृतिं प्रति प्रधानम् । अथ बालकस्याभिलषितमेव किमप्युद्देश्यमुररीकरोति तर्हि नियोज्यपर्यवसानप्रसङ्गः । नापि द्वितीयः । अध्ययनविधेः स्वविधिप्रयुक्तत्वप्रसङ्गात् ।

'हितकारिभिरेवासौ ज्ञायमानः प्रयोजकः ।'
इति हि न्यायरत्नमालायां पार्थसारथिभिरुक्तम् ॥

R. No. 3070.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Paravastu Veṅkaṭaraṅganāthācārya of Vizagapatam.

अर्जुनादिमतसारः.

ARJUNĀDIMATASĀRAḤ.

Foll. 1*a*—14*a*. Foll. 14*b*—16*b* are left blank.

Similar to the work described under No. 12999 of the D.C.S. MSS., Vol. XXII. By Śuddhasattva Vēṅkaṭācārya, who has compiled this treatise from the works of Arjuna and others.

Breaks off in the fifth Adhyāya.

Beginning :

तच्छ्रुत्वा तु स सन्तुष्टस्तस्मै प्रोवाच शाश्वत ।
प्रयोगतश्च सर्वार्थान्प्रादर्शयदभीप्सितम् ॥
ततस्ते देवगन्धर्वा यक्षराक्षसकिन्नराः ।
अप्सरोभिरधीतं तन्नृत्तमद्भुतदर्शनम् ॥
लास्यताण्डवभेदेन प्रसिद्धं ब्रह्मनिर्मितम् ।
अवलोक्य सुखं प्रापुरधिगम्य पुनः पुनः ॥
तदितन्दि . . पौत्रं भरतेन प्रदर्शितम् ।
प्रवर्तितं सुरस्त्रीभिः गन्धर्वैः परिशीलितम् ॥
सरस्वत्या तुम्बुरुणा नारदेन हनूमता ।
मुनीश्वरैश्च बहुभिः प्रख्यापितमिलातले ॥

* * * *

Colophon :

इति श्रीशुद्धसत्त्ववेङ्कटाचार्यसङ्गृहीतेऽर्जुनादिमतसारे भरतशास्त्रे प्रथमोऽध्यायः ॥

End :

अङ्कादृतां लध्वन्तगुर्वन्ताद्यद्भुतान्तरान् ।
तालस्तत्तत्कोष्ठगतां दर्शयन्ति क्रमादमी ॥
तिर्यक्पङ्क्तिस्थकोष्ठाङ्कवामभागाङ्कसम्मतः ।
अतो द्रुतान्तर्लधवस्तद्भक्रास्तत्स्वतामिताः ॥
इति सर्वपातालः ॥

Colophon :

इति श्रीशुद्धसत्त्ववेङ्कटाचार्य(सं)गृहीते अर्जुनादिमतसारे नाट्यशास्त्रे चतुर्थोध्यायः ॥

एवं तत्तन्मुनीन्द्रोक्तग्रन्थार्थास्ते प्रकाशिताः ।
अद्याद्भुतमतं गूढं केषांचित्सम्प्रदायतः ॥

* * * *

आदौ वर्ज्यं परश्रेण्यां कोष्ठांस्त्यक्त्वान्यमुल्लिखेत् ।
ऊर्ध्वपङ्क्तिस्थसर्वाङ्कैस्तत्तत्तालविशेषधीः ॥

R. No. 3071.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 214. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Trittala, Malabar district.

Bound in two volumes.

मालतीमाधवव्याख्या—रसमञ्जरी.
MĀLATĪMĀDHAVAVYĀKHYĀ : RASAMAÑJARĪ.

Fol. 213*b* is left blank.

Same work as that described under R. No. 2858 ante. Herein the author Pūrṇasarasvatī states that he was a disciple of Pūrṇajyōtis.

Breaks off in the ninth Aṅka.

Beginning:

अस्तु हस्तिमुखं वस्तु सच्चिदानन्दविग्रहम् ।
प्रत्यूहव्यूहविहतिवहनाय सदा मम ॥
यस्य भासा जगद्भाति यद्भासा भाति तन्महः ।
अविद्याविद्विषे तस्मै श्रीपूर्णज्योतिषे नमः ॥

* * * *

यद्गीतार्थश्रवणरसतो ध्वस्तमोहान्धकारः
कृष्णानन्दी त्रिजगति नरो जिष्णुभूतं जिहीते ।
स्वस्मिन्नेव प्रकटितमहाविश्वरूपं तदेकं
पूर्णज्योतिः स्फुरतु हृदि मे पुण्डरीकायताक्षम् ॥

* * * *

भवसमभवभूतिप्राज्यवैदग्ध्यसीम्नि
प्रकरणतिलकेऽस्मिन्मालतीमाधवाख्ये ।
विवरणकृतिनाम्ना कर्तुमीहे विगाहं
तनुतरगुणगृह्यास्तत्र सन्तो रमन्ताम् ॥

* * * *

मालतीमाधवस्योच्चैरामोदं स्वं वितन्वती ।
धार्या सहृदयैः प्रीत्या व्याख्येयं रसमञ्जरी ॥

प्रथमं प्रबन्धमुखलक्षणेरितां परदेवतास्मरणमङ्गलादिकाम् ।
रसिकान् प्रति प्रकरणक्रियोन्मुखः कविराट् करोति भवभूतिराशिषम् ॥

सानन्दमित्यादि । आनन्दसहितमित्याह—"अजस्रमास्फालितवल्लकीगुण-क्षतोज्ज्वलाङ्गुष्ठनखांशुभिन्नया" इति, "अमन्दमारब्धमृदङ्गवाद्या" इति ,, ताम्बूलीपटलैः पिनद्धफलितव्यानम्रपूगद्रुमाः " इत्यादिवदानन्दताण्डवोद्दण्ड-खण्डपरशुपरिचर्याविसरलाभमुदितहृदयं यथा तथेत्यर्थः । नन्दी परमेश्वरपा-र्षदमुख्यो नन्दीश्वरः । आहतः ताडितः, मुरवः(जः) आनद्धवाद्यविशेषः । आहूतः स्निग्धगम्भीररवश्रवणानन्तरमेव जलदबृंहितशङ्कया सहर्षं समागतत्वा-दाकारित इत्युत्प्रेक्षा ॥

* * * *

Colophon :

मालतीमाधवस्येत्थं प्रथमाङ्कार्थवर्णनम् ।
पूर्णज्योतिःप्रसादेन चक्रे पूर्णसरस्वती ॥

इति पूर्णसरस्वतीकृतायां मालतीमाधवव्याख्यायां रसमञ्जर्यां प्रथमोऽङ्कः समाप्तः ॥

End :

सौदामिनीस्फुरणचञ्चल सौदामिनी विद्युत् तस्या विलसितमिवास्थिरमिति लोकस्वभावकथनम्(नेन) अस्माकमपीयं दशा भवति चेत्कथं निवार्यतामिति मतिः प्रकाश्यते । अत्रार्थान्तरन्यासोऽलङ्कारः । सामान्येन विशेषस्य समर्थ्य-मानत्वात् । सौदामिनीस्फुरणचञ्चलमित्यनेन नासूचितस्य प्रवेश इति न्यायात् अनन्तराङ्के विष्कम्भपात्रत्वेन प्रविशन्त्याः सौदामिनीसंज्ञायाः पूर्वप्रस्तुतायाः कामन्दकीशिष्याया योगिन्याः प्रवेशमपि सूचयति । रससंविधानप्रपञ्चोदञ्चन-चुञ्चुः कविविरिञ्च इत्यशेषमतिमङ्गलम् ॥

Colophon :

मालतीमाधवस्येत्थमष्टमाङ्कार्थवर्णनम् ।
पूर्णज्योतिःप्रसादेन चक्रे पूर्णसरस्वती ॥

इति पूर्णसरस्वतीविरचितायां मालतीमाधवव्याख्यायामष्टमोऽङ्कः समाप्तः ॥

॥ नवमोऽङ्कः ॥

अथ निर्वहणसन्ध्युपयोगिनीं योगिनीं विष्कम्भपात्रत्वेन प्रवेशयति—

बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥

तस्य च सन्ध्यादीनि चतुर्दशाङ्गानि ।

* * * *

जलदभ्रमणादीनान्तु लोकोपकारकत्वात् सुहृत्कार्यत्वात्स्वधर्माच्च सप्रयोज . . . . रूपत्वादनिष्टफ . . ॥

R. No. **3072.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 290. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Tekkemaṭham, Trichur. Bound in two volumes.

ब्रह्मसूत्रभाष्यप्रकटार्थः.

BRAHMASŪTRABHĀṢYAPRAKAṬĀRTHAḤ.

Fol. 290*b* is left blank.

A learned commentary on the Brahmasūtrabhāṣya of Śaṅkara. The name of the author is not given. He is referred to as Prakaṭārthakāra by Appayyadīkṣita in his Siddhāntalēśasaṅgraha.

Complete.

Beginning:

सत्यं ज्ञानमनन्तं यत्कूटस्थं सुखविग्रहम् ।
नित्यमुक्तं परं ब्रह्म भवामि तदहं सदा ॥

ज्ञात्वापि यस्य बहुकालमचिन्तनेन व्याख्यातुमक्षमतया परितापि चेतः ।
तस्योपतापहरणाय मयेह भाष्ये प्रारभ्यते विवरणं प्रकटार्थमेतत् ॥

श्रीमच्छारीरकं व्याचिख्यासुर्भगवान् भाष्यकारो विषयाद्यसम्भवेनाव्याख्येयत्वमाशङ्क्य बन्धमिथ्यात्वाङ्गीकारेण विषयादिकं संभावयन् व्याख्येयत्वं प्रतिजज्ञे—युष्मदस्मदित्यादिना । तत्प्रत्याचिख्यासू चामृतानन्दब्रह्मप्रकाशिकाकारावाचख्यतुः व्यर्थमिदमनर्थानृतत्ववर्णनं शास्त्रप्रामाण्यात् । ज्ञानेन सत्यबन्धध्वंससंभवात् । अथ लोके ज्ञानात्सत्यस्य ध्वंसो न दृष्टस्तत्किमिदानीमामुष्मिकफलं कर्मशास्त्रं नोपेयते ।

* * * *

Colophon:

इति श्रीमच्छारीरकमीमांसाभाष्यविवरणे प्रकटार्थे प्रथमस्याध्यायस्य प्रथमः पादः समाप्तिमगमत् ॥

End:

तस्मादविद्यानास्पदब्रह्मप्राप्त्यैवानावृत्तिः सिद्धा । पदाभ्यासस्यार्थमाह—अनावृत्तिरिति ।

शुद्धं ब्रह्मास्म्यहं नित्यमक्षरं परमं पदम् ।
तिष्ठामि क्व क्व गच्छामि जगदापूरितं मया ॥

Colophon:

इति श्रीमच्छारीरकमीमांसाभाष्यविवरणे प्रकटार्थे चतुर्थाध्यायः समाप्तः ॥

R. No. **3073.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 25. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Śaṅkaran Nambūdiri, Paḻeyaḍam, Urakam post, Cochin State.

प्रक्रियादीपिका.

PRAKRIYĀDĪPIKĀ.

Fol. 25*b* is left blank.

Same work as that described under R. No. 2541 ante.

Breaks off in Vibhaktyavatāra.

Beginning:

सृष्टिस्थित्यादिकर्तारमीश्वरं चाम्बिकामपि ।
नत्वा गणाधिपं वक्ष्ये प्रक्रियादीपिकां वराम् ॥

अइउण् । ऋऌक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् । इति प्रत्याहारसूत्राणि । अत्रामीषु प्रथमचित्ये(मान्त्ये)षु प्रत्याहारो गृह्यते । अइउण् इत्यस्मिन् सूत्रेऽकारा(र आ)दि(ः) ऐऔच् इत्यास्मिन् सूत्रे चकारोऽन्त्यः । अन्त्यचकारस्य हलन्त्यमितीत्संज्ञायां तस्य लोप इति लोपः । प्रयोजनमादिरन्त्येन सहेतेति प्रत्याहारग्रहणार्थम्(णम्) ।

End:

शुचिशब्दस्य तु प्रथमाद्वितीययोर्वारिशब्दवत् । तृतीयादिष्वजादिषु शुचि ऐ(ए) तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति तृतीयादिषु पुंवद्भावात् ।

* * * *

शुचौ } शुच्योः } शुचिषु.
शुचिनि } शुचिनोः }

R. No. 3074.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of Śrīmān Gōvardhanadāsbhāvāji, Rādhākāntamaṭham, Karṇam street, Parlakimedi.

सम्बन्धोपदेशः, सव्याख्यः.

SAṀBANDHŌPADĒŚAḤ WITH COMMENTARY.

Foll. 1*a*—19*b*. Fol. 20*a* contains the table of contents of this work. Fol. 20*b* is left blank.

The Sambandhōpadēśa is a treatise by Carcādāsa, on Pāṇini's grammar. The name of the commentator is not given.

Deals with the following subjects:—

१. सामान्योद्देशः.
२. कृदुद्देशः.
३. कारकोद्देशः.
४. समासोद्देशः.
५. तद्धितोद्देशः.

Beginning:

ग्रन्थादौ विघ्नोपशमनाय शिष्टाचारपरिपालनाय(च) चर्चादासोऽभीष्टदेवतामुपश्लोकयतीत्याह—

पूर्णाः पारमिता येन शास्ति यद्वचनं जगत् ।
सुगताय नमस्तस्मै कृतकृत्याय तायिने ॥

पूर्णा इत्यादि । अत्रेयं योजना । नमस्तस्मै कस्मै सुगताय । किंविशिष्टाय कृतकृत्याय । पुनः किंविशिष्टाय यद्वचनं शास्ति किन्तज्जगत् । पुनः किंविशिष्टाय येन पूर्णाः पारमिताः अथ वा हेतुत्वेन योज्यम् ।

* * * *

Colophon:

सामान्योद्देशः ॥

End:

सम्बन्धे कारके बृन्दे भावे गोत्रे परत्र च ।
दृश्यन्ते तद्धितारूढाः समासान्ताव्यया अपि ।

Colophon:

इति चर्चादासविरचिते सम्बन्धोपदेशे तद्धितोद्देशः समाप्तः ॥

* * * *

गोत्रे उपगोरपत्यमौपगवः । अपरत्र च नगरस्येदं नगरे भवं नागरम् । समासान्ताः महांश्चासौ राजा चेति महाराजः । अव्ययाः, सर्वस्मात्सर्वत इत्यादि ॥

R. No. 3075.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 50. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Śrīmān Jugulakiśōra Pāṇigrāhī, B.A., College Lecturer, Parlakimedi.

उद्धवसन्देशः, सव्याख्यः.

UDDHAVASANDĒŚAḤ WITH COMMENTARY.

A commentary on the Uddhavasandēśa, which is described under No. 11830 of the D.C.S. MSS., Vol. XX.

Complete.

Beginning :

आभीरीबृन्दमौलौ विलसदभिनवश्रीलनीलोत्पलाली-
कालाभाकायकान्तिप्रचुरमधुरिमा वृष्णिवंशावतंसः ।
कालिन्दीकेलिकुञ्जाहितमतिरखिलोल्लासिलीलाकलापः
पायादायासहारी जगदिदमखिलानन्दकन्दोऽयमिन्दुः ॥

* * * *

अतः प्रारिप्सितग्रन्थसमाप्तिकामनया इष्टदेवतास्मरणरूपं मङ्गलमाचरन्नादौ वस्तुनिर्देशं कविराह—

सान्द्रीभूतैर्नवविटपिनां पुष्पितानां वितानैः
लक्ष्मीवत्तां दधति मधुरापत्तने दत्तनेत्रः ।
कृष्णः क्रीडाभवनवलभीमूर्ध्नि विद्योतमानो
दध्यौ सद्यस्तरलहृदयो गोकुलारण्यमैत्रीम् ॥

सान्द्रीभूतैरिति । कृष्णः गोकुलारण्यमैत्रीं गोकुलवनस्य मित्रभावं स्नेहसंबन्धमिति यावत् । दध्यौ स्मृतवान् । स्मरण(णे)हेतुगर्भविशेषणमाह । मधुरापत्तने मधुरानामके नगरे । दत्तनेत्रो दत्तचक्षुः ।

End :

अथ च प्रभोः कथंभूतस्य रूपेण रूपनाम्ना कविना आश्रयं पदसरोजन्म यस्य तस्य रूपाश्रयपदसरोजन्मनः । प्रतीते प्रथितः ख्यात इत्यमरः ॥

Colophon :

इति श्रीमदुद्धवदूताख्यस्य खण्डकाव्यस्य टीका समाप्तिमगमत् ॥

R. No. 3076.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 269. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇan Nambūdirippāḍ, Puliyannūr-mana, Tiruppanatturai post, Cochin State.

Bound in two volumes.

ऋक्संहिताव्याख्या—ऋगर्थदीपिका.

ṚKSAMHITĀVYĀKHYĀ : ṚGARTHADĪPIKĀ.

Foll. 156*a*, 158*b*, 234*b*, 236*b* and 268*b* are left blank. Fol. 269 contains the contents of the work.

A commentary on the Ṛksaṁhitā described under No. I of the D.C.S. MSS., Vol. I, Part I : by Mādhava, son of Sundarī and Veṅkaṭācārya, whose genealogy is given below :—

(In the family of Viśvāmitra.)

Aṣṭakācārya.
|
Lōhitācārya.
|
Bharatācārya.
|
Gōpanācārya.
|
Baṇṇayācārya.
|
Mādhavācārya—wife Cintayantī.
|
(son)
Veṅkaṭācārya (father of the author)—wife Sundarī, born in the Vaśiṣṭha family, mother of the author, daughter of Bhavagōla and probably grand-daughter of Yajñyanārāyaṇa.
|
Mādhavācārya. (author.) — Kṛṣṇācārya.

Sons of Mādhavācārya (author): Gōvinda. — Vēṅkaṭa.

Contains the Aṣṭakas one and two complete, and third incomplete ; but wants the beginning in the first Adhyāya of the first Aṣṭaka.

Beginning :

सहवर्षशीलस्तत्समीपमागच्छति युक्त्वा हि योजय . . . केशावश्वौ तरुणौ मेदुरतया कक्ष्यायाः पूर . . . . तारावथास्माकमिन्द्र सोमस्य चातस्तुतीनामुपश्रवणं चर ।

* * * *

यजमानो दूतं देव परिचरति तस्य त्वं प्रकर्षेण रक्षको भव स्मेति पूरणम् । योऽग्निं यज्ञार्थं हविष्मान् परिचरति तस्मै पावक सुखमुत्पादय ।

* * * *

ऋक्संहितायाः प्रथममध्यायं व्याकरोति यः ।
कुशिकानां कुले जातो माधवः सुन्दरीसुतः ॥
अयं देवाय जन्मनो माधवो व्याचिकीर्षति ।
तत्रामन्त्रितशब्दानामादौ वृत्तिः प्रदर्श्यते ॥
आमन्त्रिताद्युदात्तत्वमुच्चैरामन्त्रणे भवेत् ।
नीचैरामन्त्रणे कार्ये पदं सर्वं निहन्यते ॥

* * * *

इत्थं चतुर्थमध्यायं व्याकरोत्प्रथमेऽष्टके ।
अष्टकस्य कुले जातो माधवो वेङ्कटात्मजः ॥

* * * *

इति पञ्चममध्यायं व्याकरोत्प्रथमेऽष्टके ।
लोहितस्य कुले जातो माधवो वेङ्कटात्मजः ॥

* * * *

इति(त्थं)षष्ठमध्यायं व्याकरोत्प्रथमेऽष्टके ।
भरतस्य कुले जातो माधवो वेङ्कटात्मजः ॥

* * * *

इत्थं सप्तममध्यायं व्याकरोत्प्रथमेऽष्टके ।
(स) जातो गोपनकुले माधवो वेङ्कटात्मजः ॥

* * * *

Colophon :

ऋगर्थदीपिका सेयं (प्रथमस्याष्टकस्य हि) ।
कर्ता श्रीवेङ्कटार्यस्य तनयो माधवाह्वयः ॥
द्वितीयोऽथाष्टकस्तस्मिन्नध्यायादिषु वक्ष्यते ।
यत्किञ्चिदिह वक्तव्यमाख्यातेष्वस्ति वैदिकैः ॥

* * * *

प्र वः पान्तं कक्षीवान् भरध्वं यूयं पानीयं हे लघुस्तुतयः साम यज्ञं च रुद्राय सेक्त्रे दिवो वीरैर्मरुद्भिस्सह स्तुतिः क्रियेत ।

* * * *

द्वितीयस्याष्टकस्याद्यमध्यायं व्याकरोदिति ।
बण्णयस्य कुले जातो माधवः सुन्दरीसुतः ॥

* * * *

द्वितीयस्याष्टकस्यायमध्यायं व्याकरोदिति ।
द्वितीयं माधवार्यस्य पौत्रः श्रीवेङ्कटात्मजः ॥

* * *

व्याख्यत्पौत्रश्चिन्तयन्त्यास्तुरीयं माधवाह्वयः ।
अध्यायं वेङ्कटसुतो द्वितीयाष्टकगोचरम् ॥

* * * *

षष्ठं व्याख्यद्द्वितीयस्य माधवोऽध्यायमञ्जसा ।
सङ्कर्षणानुजो यस्य भ्रातासीदनुजः कविः ॥

* * * *

व्याख्यत्सप्तममध्यायं द्वितीयस्येति माधवः ।
गोविन्दो यस्य तनयो ज्येष्ठः पुत्रश्च वेङ्कटः ॥

* * * *

ऋगर्थदीपिका सेयं द्वितीयश्चायमष्टकः ॥
चक्रे श्रीवेङ्कटार्यस्य तनयो माधवाह्वयः ॥
तृतीयोऽथाष्टकस्तस्मिन्नध्यायादिषु वक्ष्यते ।
यद्वक्तव्यं निपातेषु ब्राह्मणैश्छान्दसैरिह ॥
इयन्त इति सङ्ख्यानं निपातानां न शक्यते ।
उपसर्गास्तु विज्ञेयाः क्रियायोगेषु विंशतिः ॥

* * * *

प्र ये विश्वामित्रः प्रगच्छन्ति ये नीलपृष्ठस्योदकस्य
ऋजीषी पातुरग्ने रश्मयस्ते द्यां च पृथिवीं चाविशन्ति ।

* * * *

तृतीयस्याष्टकस्याद्यमध्यायं व्याकरोदिति ।
जाता वासिष्ठस्य कुले सुन्दरी यमजीजनत् ॥

* * * *

व्याख्यत्पञ्चममध्यायं तृतीयस्याष्टकस्य सः ।
यज्ञनारायणकुले यस्य मातुः समुद्भवः ॥

* * * *

व्याकरोत्षष्ठमध्यायं तृतीयस्याष्टकस्य सः ।
दुहिता भवगोलस्य सुन्दरी यमजीजनत् ॥

End:

बृहस्पते इन्द्राबृहस्पती वर्धयतमस्मान् । सा युवयोः सुमतिरस्मासु संवृत्ता भवति रक्षतं कर्माणि प्रकाशयतं प्रज्ञा उपक्षपयतं या पितृणां धनान्यप्रयच्छन्ति शत्रुभूताः ॥

Colophon:

अष्टकस्य तृतीयस्य माधवः सुन्दरीसुतः ।
व्याख्यत्सप्तममध्यायमित्थं श्रीवेङ्कटात्मजः ॥
इदमु त्यत्पुरुतमं व्याचिख्यासति माधवः ।
उपसर्गेषु वक्तव्यमनुक्तं संप्रदर्शयन् ॥
आकारोऽधिपरी चौभौ स्पष्टीकुर्वन्ति कारके ।
अपादानाधिकरणे घनोरधि दिवस्परि ॥

* * * *

जुषस्व—जुषस्वाग्ने समिधमस्मदीयामिलया यतमानश्च सूर्यरश्मिभिरत्रह । तथा हे जातवेदोऽस्माकं समिधं सेवस्वावह च देवान् हविषो भक्षणाय । जुष्टः पर्याप्तो दमना अतिथिर्भवन् गृह इमं नो यज्ञमुपगच्छ ।

* * * *

अस्माकमग्ने यज्ञं सेवस्व सहसस्पुत्र त्रिस्थान ह.

R. No. **3077.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 232. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. N. Kṛṣṇacakravartyācāriyār of Kētāṇḍapaṭṭi, North Arcot district.

श्रीभाष्यव्याख्या--सुबोधिनी.

ŚRĪBHĀṢYAVYĀKHYĀ: SUBŌDHINĪ.

A commentary on the Śrībhāṣya of Rāmānuja, which work has been described under No. 4943 of the D.C.S. MSS., Vol. X. The name of the commentator is not given. In the beginning, he praises Rāmānuja, Vēdāntadēśika, Ramyajāmātṛmuni, who was the great grandson of

Kaṇṭhīravācārya of Māḍābhūṣi family, Rāmānujamuni, Śaṭhakōpamuni, Vēṅkaṭēśa of Vādikaṇṭhīrava family. He says that he has written an easy and short commentary on the Śrībhāṣya at the instance of Vēṅkaṭēśa, as the Śrutaprakāśikā is too high for easy comprehension.

Breaks off in the Jijñāsādhikaraṇa.

Beginning :

जयतु जयतु नित्यं श्रीनिवासो वृषाद्रौ
जयतु जयतु नित्यं भाष्यकृद्भूतपुर्याम् ।
जयतु जयतु नित्यं सर्वतन्त्रस्वतन्त्रो
जयतु जयतु नित्यं वादिकण्ठीरवार्यः ॥

माडभूषिकण्ठीरवाचार्यनप्ता वरगुणान्वितः ? ।
रम्यजामातृनामासौ वर्धतां यतिशेखरः ॥

श्रीरङ्गजयकेतुश्रीरामानुजजयध्वजम् ।
नताज्ञानतमस्सूर्यं रामानुजमुनीश्वरम् ॥

श्रीरामावरलब्धबोधमनघं तत्पादपद्माश्रयं
तत्सूनुं शठजिन्मुनीन्द्ररचितग्रन्थार्थनिर्वाहकम् ।
श्रीमद्वादिमृगेन्द्रवंशतिलकं वेदान्तविद्यागुरुं
श्री . . . . . . न्वभुवं श्रीवेङ्कटेशं भजे ॥

तेन सञ्चोदितः कुर्वे व्याख्यां भाष्यार्थबोधिनीम् ।
श्रुतप्रकाशिकां गुर्वीं . . . . प्रकाशिकाम् ॥
सङ्गृह्य सुखबोधाय श्रीभाष्यार्थो विलिख्यते ।

श्रीभाष्यस्य यतीट्कृतस्य सुलभाः त्रय्यन्तवाचार्भजी(टी)-
व्याख्याः प्रौढधियां सुदर्शननगे(रे)ड्विष्ण्वादिभि . . . ।
बोधार्थं मतधीजुषामपि मया व्याख्या कृता श्रीपते-
र्वेद्या स्याद्यतिराट्सुदर्शननरेट्श्रीशाश्च रक्षन्तु नः ॥

श्रीरामानुजयोगिसूक्तिरलसद्बुद्धेर्ममाव . . . -
(यन्म)ध्यस्थसमक्षमुज्ज्वलधियामद्वैतिनां वा शतम् ।
वादे जेतुमदात्पटुत्वमुरुधीभाजां तु किन्नो दिशे-
दार्याणां हि गिरस्तथा . . . . . . प्रमाणं तु सः ॥

इह खलु श्रीमान् कारुणिको भवतप्तजनभागधेयेन भूमाववतीर्णो भगगवान्व्यासापरपर्यायो ना . . . . . रः प्रमाणाधीनप्रमेयनिश्चयानां सर्वेषां

पुरुषार्थानामुपादित्सितजिहासितेष्टानिष्टतत्साधनानां शतैकसमधिगम्यालौकिकपुरुषार्थतत्साधनानां सकलपुरुषार्थतत्साधकप्रतिपादि, ... ध्यस्पष्टस्य निर्दोषस्य वेदस्यैव प्रभावः ।

* * * *

मङ्गलं शिष्यशिक्षार्थं श्लोकतो निबध्नाति—अखिलेत्यादिना ।

* * * *

किमपूर्वग्रन्थनिर्माणतत्प्रवर्तनयत्नगौरवेणेत्याशङ्कायामाह—भगवदिति । शङ्करादिवदनाप्तत्वं नास्तीति भगवच्छब्देनाभिप्रेतम् । बोधायनपदेन पूर्वाचार्यसुरक्षितामिति श्लोकस्थपूर्वाचार्यशब्दोऽपि अर्थाद्विवृतः ।

End :

एवं शास्त्रोपक्रमे वासुदेवाख्यमुभयलिङ्गं वस्तु प्रतिपाद्यमुक्तम् । शास्त्रोपसंहारे षष्ठेंशेऽपि तथोक्तमित्याह—प्रकृतिरिति ।

* * * *

तस्मादेतद्ब्रह्म नामरूपमन्नं च जायत इत्यत्र ब्रह्मशब्दस्य प्रधानपरत्ववत् ।

'द्वे रूपे ब्रह्मणस्तस्य.

R. No. 3078.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 146. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Śrīmān Purōhita Nīlamaṇi Ratha, through the Agent and Manager, Parlakimedi.

भुजबलनिबन्धः.

BHUJABALANIBANDHAḤ.

Foll. 1*a*—142*b*. Foll. 143*a*—144*a* contain the table of contents of this work. Foll. 144*b*—146*b* are left blank.

A treatise bearing on astrology and dealing with the subjects mentioned below : by Bhōjarāja.

Contains the chapters 1—18 :

१. रिष्टाध्यायः.
२. स्त्रीजातकलक्षणम्.
३. योगाध्यायः.
४. निन्दितयोगाध्यायः.
५. अष्टोत्तरशतवर्षदशाविधिः.
६. कर्णादिवेधनम्.
७. व्रतप्रकरणम्.
८. विवाहमेलकदशकम्.

Beginning :

इन्दीवरदलश्यामं पीताम्बरधरं हरिम् ।
नत्वा तु क्रियते यस्माज्ज्योतिश्शास्त्रमनुत्तमम् ॥
न तत्सहस्रकरिणां वाजिनां वा चतुर्गुणम् ।
करोति देशकालज्ञो यदेको दैवचिन्तकः ॥
शशाङ्कतारयोः शुद्धिः कर्तव्या सर्वकर्मसु ।
ग्रहाणामपि सर्वेषां तद्विशुद्धौ विशुद्धता ॥
विविधमुखशशाङ्के जन्मजाया तृतीये
षट्दशरिपुनाशोऽप्यायमर्थं च लाभः ।
धननिधनचतुर्थे वित्तनाशं करोति
व्ययतनयर(नुभव)चन्द्रे सर्वहानिश्च चन्द्रः ॥
चतुर्थे द्वादशे कृष्णे शुक्ले द्वे नव पञ्चमे ।
एषु स्थाने स्थिते चन्द्रे कल्याणं शुभदं भवेत् ॥

* * * *

Colophon :

इति श्रीभोजराजकृतौ भुजबलनाम्नि ज्योतिश्शास्त्रे रिष्टाध्यायः प्रथमः समाप्तः ॥

End :

निशि शस्ता प्रतिष्ठा च प्रशस्तफलभाग्भवेत् ।
विपरीतकृतात्मा च प्रत्यनीकफलागमा ॥
इति मण्डपादिप्रतिष्ठा ॥
शुभग्रहार्कवारेषु मृदुक्षिप्रध्रुवेषु च ।
शुभराशिविलग्नेषु शुभं शान्तिकपौष्टिकम् ॥

Colophon :

इति श्रीभोजराजकृतौ भुजबलनिबन्धे ज्योतिश्शास्त्रे द्वादशमासकृत्यं समाप्तम् ॥

R. No. 3079.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 66. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūṭalūr-mana, Nareri, Trittala, Malabar district.

भक्तिमुक्ताफलम्.

BHAKTIMUKTĀPHALAM.

Foll. 1a—65b. Fol. 66a contains the table of contents of this work. Fol. 66b is left blank.

Slightly different from the work described under No. 5807 of the D.C.S. MSS., Vol. XII.

A treatise bringing out the greatness of God Viṣṇu, the necessity and importance of devotion to Him and the manner of cultivating this sentiment: by Boppadēva, son of Kēśava and pupil of Vidvaddhanēśa. The author states that he composed the work under the orders of Hēmādri, the author of Caturvargacintāmaṇi and the Minister of King Rāmacandra.

Contains the following subjects, 1—23 :—

१. विष्णोर्लक्षणं भेदाश्च.
२. विष्णुरूपम्.
३. विष्णोरवताररूपाणि.
४. विष्णोरधिष्टानरूपाणि.
५. विष्णोर्महिमा.
६. विष्णुभक्तिलक्षणम्.
७. विष्णुभक्तेरधिकारः.
८. विष्णुभक्तिमहिमा.
९. विष्णुभक्त्यङ्गप्रकारः.
१०. विष्णुनामश्रवणम्.
११. विष्णुनामकीर्तनम्.
१२. विष्णुनामस्मरणम्.
१३. श्रवणकीर्तने.
१४. विष्णुभक्तलक्षणम्.
१५. विष्णुभक्तानां सम्भोगशृङ्गारः.
१६. " विप्रलम्भशृङ्गारः.
१७. " करुणारसः.
१८. " रौद्ररसः.
१९. " भयानकरसः.
२०. " बीभत्सरसः.
२१. " शान्तरसः.
२२. " अद्भुतरसः.
२३. " वीररसः.

Beginning:

विष्णुं पञ्चात्मकं वन्दे भक्त्याष्टादशभेदया ।
साङ्गवर्गोनविंशत्या भक्तैर्नवभिराश्रितम् ॥
विष्णुप्रीत्यै चतुर्वर्गचिन्तामण्यामजीगणत् ।
भेदान् व्रतानां दानानां तीर्थानां मोक्षवर्त्मनाम् ॥

मूर्तिप्रसादौ(द)पूजानां हेमाद्रिर्गणकाग्रणीः ।
विष्णुभक्त्यङ्गभक्तानां गणयत्युक्तसारधीः ॥
मुक्ताफलेन ग्रन्थेन सद्भागवतशुक्तिना ।
भक्तिस्वाद्वम्बुना मुग्धमार्कण्डेयशिशुश्रिया ॥
मुक्ताफलं सुखचितस्फुटभक्तिभेदं प्रत्यक्षराजितलसत्पदपद्मरागम् ।
हेमाद्रिसम्भवसुवर्णनिवेशरम्यं कण्ठे कुरुध्वमवरुद्धमपूर्वलक्ष्मीम् ॥
तत्रादौ विष्णुप्रकरणं तत्र विष्णोर्लक्षणं भेदाश्च ।
अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥

स द्वेधा निराकारस्साकारश्च । अनवच्छिन्नं चैतन्यं निराकारः । सत्त्वावच्छिन्नः साकारः । स चतुर्द्धा रजस्तमोभ्यां युक्ते सत्त्वे पुरुषः, रजसा ब्रह्मा, तमसा रुद्रः ।

* * * * *

Colophon:

इति श्रीमद्बोप्पदेवपण्डितविरचिते मुक्ताफलके विष्णोर्लक्षणं भेदाश्च ॥

End:

चतुरेण चतुर्वर्गचिन्तामणिवणिज्यया ।
हेमाद्रिणार्जितं मुक्ताफलं पश्यत कौतुकात् ॥
निर्मथ्य पयसां राशिं मन्दरः कौस्तुभं न्यधात् ।
हेमाद्रिवचसां मुक्ताफलं रत्नं हृदि प्रभोः ॥
हेमाद्रिमाद्रियत एव गुणेन येन तेनैव पूरितसुखेन सुनद्धमेतत् ।
मुक्ताफलं प्रतिफलं जगदीशरूपं यत्कर्णकण्ठहृदये सुषुमास्य काचित् ॥
द्वे एव चित्रे रामस्य सिन्धुर्बद्धः पुराधुना ।
हेमाद्रिः स्वमुपानीतः सूर्यावृत्तप्रदक्षिणः ॥
विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ।
हेमाद्रिर्बोप्पदेवेन मुक्ताफलमचीकरत् ॥
स्वर्गे गीर्वाणनार्यस्सुरपतिमभितः शाब्दिकानां वरेण्यं
पाताले नागराजं प्रति फणिसुदृशो यस्य गायन्ति कीर्तिम् ।
यस्तीर्णश्शास्त्रपाथोनिधिमखिलमदो ग्रन्थरत्नं सुवृत्तं
चक्रे शिष्यो धनेशः कविकुलतिलकः केशविर्बोप्पदेवः ॥

Colophon :

इति विबुधचक्रचूडामणिश्रीमदाचार्यबोप्पदेवविरचितं भक्तिमुक्ताफलं समाप्तम् ॥

R. No. **3080.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 108. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūṭalūr-mana, Nareri, Trittala, Malabar district.

मीमांसासूत्रार्थसङ्ग्रहः.

MĪMĀṀSĀSŪTRĀRTHASAṄGRAHAḤ.

Fol. 108*b* is left blank.

A brief commentary on the Mīmāṁsāsūtras of Jaimini: by Mahōpādhyāya Ṛṣiputraparamēśvara, pupil of Vāsudēvācārya. The author herein praises Jaimini, Śabara, Kumārila, Sucarita, Paritōṣa, Pārthasārathi, Uṁbēka, and the author of Vijayā (the commentary on Ajitā), Maṇḍana and Vācaspati, the prior writers on the Mīmāṁsā philosophy.

Contains from the first Pāda of the first Adhyāya to the end of the third Pāda of the second Adhyāya.

Beginning :

इष्टानिष्टप्राप्तिहान्योर्जागरूका भवन्तु नः ।
ऋषयः पितरो देवाः सर्वदार्याश्च मातरः ॥

समस्तजगदुद्भवस्थितिनिरोधकृत्तस्थिवं ?
. धीमहिषमस्तयोः सतनु कृत्तिवासस्तपः ।
अनस्तिजनिवस्तुतस्तुहिनसानुमत्संभवं ?
मुग(मह)स्तदतनु स्तुमः शमितभक्तचेतस्तमः ॥

जैमिनिशबरकुमारिलसुचरितपरितोषपार्थसारथयः ।
लम्बे(उम्बे)कविजयकारौ मण्डनवाचस्पती च विजयन्ताम् ॥

आम्नायोऽनिर्भुजिनि प्रतृण्णवत्युदयभाजि ।
पूर्णाङ्केऽध्यापिति नः प्रणमामि वासुदेवाचार्यान् ॥

अग्निहोत्रं दर्शपूर्णमासेष्टिः पशुबन्धनम् ।
चातुर्मास्यानि सोमश्च यज्ञाः पान्त्वप्यवन्तु नः ॥

भाष्यवार्तिकतद्व्याख्याद्युक्तसूत्रार्थसङ्ग्रहः ।
पितुर्मातुः पितृव्यस्य प्रसादात् प्रविलिख्यते ॥

इह खलु सकललोकाभीष्टपुरुषार्थचतुष्टयावाप्तिहेतुभूतानि वेदतदङ्गोपाङ्गोपवेदाख्याविशिष्टानि अष्टादशविद्यास्थानानि मन्वादिभिरुपदिष्टानि ।

*   *   *   *

तत्र चैतच्छास्त्रमध्ययनानन्तरमारब्धव्यमनारब्धव्यं वेति सन्दिह्यावैधत्वाप्रयोजनत्वाभ्यामनारब्धव्यमित्युत्सूत्रं पूर्वपक्षं कृत्वा वैधत्वप्रयोजनवत्त्वाभ्यामारब्धव्यमिति सिद्धान्तं वक्तुमिदं सूत्रम्—

अथातो धर्मजिज्ञासा । इति ।

त्रिपदम् । तस्य चास्यायमवतारप्रकारः ।

*   *   *   *

तत्राथशब्दो वेदाध्ययनानन्तर्यमाह । अतः शब्दस्तस्यैव हेतुत्वमभिधत्ते । नन्वत्र कस्यानन्तरं कुतश्च हेतोरिति वृत्तहेतुविशेषयोरनिर्दिष्टत्वादथातःशब्दमात्राच्च तदसिद्धेः कथमध्ययनवृत्तत्वतद्धेतुत्वयोः पारिशेष्यसिद्धिरिति वक्तव्यम् ।

*   *   *   *

इति षट्सूत्रसहितं वेदाधिकरणं स्थितम् ।

Colophon:

इति श्रीमदृषिपुत्रपरमेश्वरविरचिते सूत्रार्थसङ्ग्रहे प्रथमस्याध्यायस्य प्रथमः पादः ॥

End:

अन्यार्था वा पुनः श्रुतिः । इति ।

त्रिपदम् । अत्र सिद्धान्तिनोऽप्याग्नेयैकत्वस्येष्टत्वान्न तन्निवृत्त्यर्थो वाशब्दः किन्तु वैकल्पिकत्वे वचनद्वयस्यैकस्यावश्यमानर्थक्यप्रसङ्गात्तन्मात्रनिवृत्त्यर्थो द्रष्टव्यः ।

*   *   *   *

ऐन्द्रस्तु सन्नयद्दर्शे माहेन्द्रो वा विकल्पितः ।
द्वितीयः स्यात्पुरोडाश उभयत्रापि नापरः ॥

अत्राग्नेयाधिकरणे त्रीणि सूत्राणि ।

Colophon:

इति श्रीमहोपाध्यायश्रीमदृषिपुत्रपरमेश्वरविरचिते मीमांसासूत्रार्थसङ्ग्रहे द्वितीयस्याध्यायस्य तृतीयः पादः ॥

R. No. 3081.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 194. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūṭalūr-mana, Nareri, Trittala, Malabar district.

सङ्गीतसुधा.

SAṄGĪTASUDHĀ.

Foll. 1*a*—191*b*. Foll. 193 and 194 contain the table of contents of this work. Fol. 192 is left blank.

A treatise on the details connected with singing (including musical notes, tunes, modes, etc.), instrumental music and dancing : by Raghunāthabhūpāla, King of Tanjore, who gives his genealogy thus :

Cinaceppabhūpa and Mūrtyaṁbāḷ
|
Acyutadēva
|
Raghunāthabhūpāla.

The work gives much useful historical information.

Complete.

Beginning :

श्रीचोलदेशाभरणश्चकास्ति तञ्जापुरीति प्रथिताभिधाना ।
रमानटीनर्तनरङ्गशाला पुरी दरी भूव(प)रिणाहरीणाम् ॥
* * * *

तत्रेन्दिरामन्दिरनामधेये सभाविशेषे सह मन्त्रिवर्यैः ।
कर्णाटसिंहासनमुख्यराजकुमारवर्गैरुपसेव्यमानः ॥
* * * *

चिरन्तनैर्नैगमवृद्धवर्गैरन्यैश्च धन्यैर्विनयावनम्रैः ।
षड्दर्शनीसागरपारगैश्च महीसुरैर्भूषितपार्श्वभागः ॥
कविप्रवेकैरपि कालिदासमयूरसौमिल्लमुरारिदेश्यैः ।
कर्णाटकान्ध्रद्रमिडप्रबन्धनिर्माणविद्यानिपुणैश्च कैश्चित ॥
* * * *

नानाविधाशानरपालवर्गसन्देशकृद्भिस्समुपास्यमानः ।
आस्तेऽपि भद्रासनमच्युतेन्द्रतनूभवः श्रीरघुनाथभूपः ॥
* * * *

भवत्कटाक्षैरभिरक्षितानां क्षेमं समस्तीति किमत्र चित्रम् ।
पितामहस्ते चिनचेप्पभूपः समृद्धतेजास्सकलानरक्षीत् ॥

* * * *

तत्तादृशैर्धर्मभरैरमुष्मादाविर्बभूवाच्युतभूमिपालः ।
मूर्त्यम्बिकायां जगदम्बिकायां बालेन्दुमौलेरिव बाहुलेयः ॥
आरभ्य बाल्यादतिभक्तिशाली मुदा सदासेवत रङ्गनाथम् ।
अवाप्य तञ्जापुरमप्रतीपः कौमार एवाभृत राज्यभारम् ॥

* * *

अजाद्यथा पङ्क्तिरथश्च तस्माद्रघूद्वहोऽजायत रम्यकीर्तिः ।
श्रीचेप्पभूपाच्च तथाच्युतेन्द्रस्तथाभवस्त्वं रघुनाथभूप ॥

* * * *

सदाशिवः शैलसुता विरिञ्चः शिलादसूनुर्भरतश्च दुर्गा ।
शक्तिश्च शार्दूलककौहलौ च समीरणः काश्यपमारुती च ॥
रम्भार्जुनौ नारद् ुम्बुरू च पौलस्त्यविश्वावसुदत्तिलाश्च ।
पुरुद्विषत्कुण्डलकुम्बलाश्च नरावुभौ याष्टिकदेवराजौ ॥
एतैस्समस्तैरपि च प्रणीतं सङ्गीतशास्त्राम्बुनिधिं मथित्वा ।
धीमन्दरेणाखिलमानवेभ्यः सङ्गीतसाराख्यसुधां ददामि ॥
नृत्ते च वाद्ये च निरूप्यमाणे सङ्गीतमात्रस्य कथं प्रतिज्ञा ।
अत्रोच्यते नृत्तमिदञ्च वाद्यं गीतञ्च सङ्गीतमितीरयन्ति ॥

* * * *

अतश्च गीतं भवति प्रधानमित्येतदादौ प्रतिपादयामः ।
सङ्गीतसारस्य वदामि सप्ताध्याय्यां क्रमेण प्रतिपाद्यमर्थम् ॥
आदौ शरीरप्रभवप्रभेदो नादस्य तस्मादथ संभवश्च ।
स्थानानि चैव श्रुतयश्च पश्चात्ततः स्वरास्सप्त च षड्जमुख्याः ॥

End:

गीतस्य दोषा दश ये निरुक्ताः यथाक्रमं गायकबोधहेतोः ।
निरूपितोऽस्माभिरिह प्रबन्धाध्यायो बुधानां परितोषहेतोः ॥

Colophon:

इति प्रबन्धाध्यायः ॥

R. No. **3082.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 66. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. P. C. Mugalilkuṭṭi Anujan Tambirān, Chalapuram, Calicut.

सङ्गीतसुधाकरः.

SAṄGĪTASUDHĀKARAḤ.

Foll. 1*a*—60*a*. Fol. 60*b* gives the name of the former owner of the manuscript and the date of transcription. Foll. 61*a*—66*a* contain the table of contents of this work. Fol. 66*b* is left blank.

Same work as that described under R. No. 779 ante, wherein see for the beginning. By Haripāladēva.

Contains the Prakaraṇas three to five only :

३. वाद्याधिकरणम्.
४. नाट्याधिकरणम्.
५. गीतप्रकरणम्.

End :

तालो मूलमभूत्स्वराः श्रुतिसुखाः (गीतं) प्रवालोद्गमो
रागाणां निवहः प्रसूनकलिका यस्मिन्नवा मूर्छना ।
सोऽयं नादमहीरुहो हरिमहीभर्तुः सुधासोदरैः
सिक्तस्सूक्तिरसैस्सतां वितनुते छायामपायोज्झिताम् ॥
प्रौढः पाटविकल्पनासु चतुरो गूढार्थसन्दर्शने
शास्त्रे विस्तृतिशालिनि प्रणयवान् सङ्गीततत्त्वाश्रयः ।
नीतौ संभृतकौशलः सुमनसां रक्षैकदीक्षागुरुः
चक्रे श्रीहरिभूमिपः प्रकरणं गीताश्रयं शाश्वतम् ॥

Colophon :

इति विचारचतुर्मुखश्रीहरिपालदेवविरचिते सङ्गीतसुधाकरे पञ्चमं गीतप्रकरणं सम्पूर्णम् ॥

R. No. **3083.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 15. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Rāmagōvinda Śāstrin of Narasāpuram.

अन्यथाख्यातिवादः.

ANYATHĀKHYĀTIVĀDAḤ.

Similar to the work described under No. 3918 of the D.C.S. MSS., Vol. VIII. By Jayarāmapañcānana.

Complete.

Beginning:

अलौकिकप्रत्यासत्तिस्तु ज्ञानलक्षणा-सामान्यलक्षणा-योगजधर्मभेदात्रिविधा। अथाद्यस्य प्रत्यासत्तित्वे किं बीजमिति चेदिदं रजतमित्यादिस्मर्यमाणरजतान्यथाख्यात्यनुपपत्तिरिति । अथान्यथाख्यातौ किं प्रमाणमिति चेत् ।

नत्वा शम्भोः पदाम्भोजं नानामतकराञ्चितम् ।
अन्यथाख्यातिमाख्याति जयरामस्समासतः ॥

अन्यथाख्यातौ ज्ञानत्वं शुक्तिविशेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्ववद्वृत्ति न वेत्याद्या विप्रतिपत्तयः ।

End:

निरुक्तकार्यकारणभावेऽपि घटत्वादिसमवायादेश्च सविकल्पकोत्तरं विनश्यदवस्थतज्जातीयतादृशविषयतासाक्षात्कारस्य निरुक्तकार्यकारणभावेऽपि घटत्वादिसमवायेऽप्यन्यथासिद्धत्वस्य दुर्वचत्वात् दुर्वारत्वादिति कृतं पल्लवितेन॥

अपरिकलितमन्यैरन्यथाख्यातितत्त्वं यदपि च जयरामन्यायपञ्चाननेन ।
सपदि विमतवादिव्यूहगर्वापहारि प्रतिपदमिदमास्तां कोविदानन्दकारि ॥

Colophon:

इति जयरामकविविरचितः अन्यथाख्यातिवादः समाप्तः ॥

R. No. 3084.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 46. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Kōṭa Rāmamūrti Śāstrulugāru of Patanapudi, Chodavaram.

महिम्नस्तुतिः, व्याख्यासहिता.

MAHIMNASTUTIḤ WITH COMMENTARY.

Foll. 1*a*—44*b*. Foll. 45 and 46 are left blank.

Similar to the work described under No. 11119 of the D.C.S. MSS., Vol. XIX.

Contains stanzas 2—30 only.

Beginning :

गुणो ज्ञेयत्वेऽप्यनन्तत्वादिगु . . . . ज्ञेयत्वाभावान्न स्तुत्यश्चेच . . . . . . प्रणामावधिगृणन्निति पूर्वोक्त . . . . वेत्यत आह—पदे त्विति ।

*   *   *   *

एवं हरिहरयोः स्तुत्यत्वं सफलस्तुतिकत्वं च निरूप्य ये केचित्पापीयांसस्तद्भावे विवदन्ते तान्निराकुर्वन् स्तौति—हे वरद, ईप्सितप्रद । यत्तवैश्वर्यं तद्विहन्तुं निराकर्तुम्, एके जडधियः, केचिन्मन्दबुद्धयः, व्याक्रोशीं विदधते । साक्षेपमुच्चैर्भाषणमाक्रोशः तस्य व्यतीहारो व्याक्रोशी ।

End :

एवं जातभक्त्युद्रेकः नमस्कारमेवानुवर्तयन् दुरूहमहिमत्वेन भगवन्तं स्तौति—

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरप(ह) रमहिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमस्सर्वस्मै ते तदिदमतिसर्वाय च नमः ॥

हे प्रियदव निर्जन . . . ररत । तुभ्यं नेदिष्ठाय अत्यन्तनिकटवर्तिने दविष्ठाय चात्यन्तदूरवर्तिने च नमो नमः ।

*   *   *   *

अधुना पूर्वोक्तसर्वार्थसङ्क्षेपेण नमस्कुर्वन् स्तुतिमुपसंहरति—

R. No. **3085.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 104. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūṭalūr-mana, Nareri, Trittala, Malabar district.

(*a*) सर्वदर्शनकौमुदी

SARVADARŚANAKAUMUDĪ.

Foll. 1*a*—99*a*.

An epitome of the various philosophical systems of thought by Mādhava Sarasvatī, pupil of Vidyēndravana. The author lived in the town of Sōmadāpurī (east to Gōkarṇa, in the Gōrāṣṭra country) while the king Arasēndrabhūpāla was ruling.

The author's other works are (1) Cintāmaṇiṭīkā: Mayūkhamālā, (2) Saptapadārthīṭīkā ; Mitabhāṣiṇī, (3) Kusumāñjalipadyaṭīkā ; Mandānukampinī, (4) Vāsiṣṭhavyākhyā: Vāsiṣṭhapañjikā and (5) Abhinavasaptapadārthī.

Similar to the work described under No. 4760 of the D.C.S. MSS., Vol. IX.

Contains the following Darśanas:—

१. न्यायवैशेषिकदर्शनम्.
२. मीमांसाशास्त्रदर्शनम्.
३. साङ्ख्ययोगमतदर्शनम्.
४. चार्वाकाद्यवैदिकमतदर्शनम्.
५. वेदान्तशास्त्रदर्शनम्.

Beginning:

यत्पादपङ्केरुहरेणुपुञ्जैस्संरञ्जिताङ्गा अपि पामराद्याः ।
त्रिलोकवन्द्या भुवि भान्ति सद्यो जयन्ति कर्णाटयतीश्वरास्ते ॥
पुरा माधवभारत्या बालबोधाय निर्मितम् ।
यथाशक्ति लिखाम्येनां सर्वदर्शनकौमुदीम् ॥

* * * *

विद्येन्द्रवननामानं श्रीगुरुं प्रणमाम्यहम् ।
विनेयभृङ्गसंलीढपादपङ्केरुहासवम् ।
पदवाक्यप्रमाणज्ञो माधवाख्यसरस्वती ।
कुरुते बालबोधाय सर्वदर्शनकौमुदीम् ॥

ननु किमिदं ग्रन्थाद्यभिमतकार्यारम्भे आदौ नमस्कारादि क्रियते । मङ्गलार्थमिति चेत् किं तस्य फलम् । किं वा तस्य कर्तव्यतायां प्रमाणम् ।

* * * *

तत्रादौ वैशेषिकं दर्शनं दर्शयामः । तत्र द्रव्यगुण(कर्म)सामान्यविशेषसमवायाभावाख्यास्सप्तैव पदार्थाः । अयोगान्ययोगव्यवच्छेदार्थ एवकारः । तत्र सप्त पदार्था एवेति विशेषणसङ्गत एवकारः । शङ्खः पाण्डुर एवेतिवदयोगं व्यवच्छिनत्ति । तेन पदार्थानां न्यूनसङ्ख्यानिरासः ।

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यविद्येन्द्रवनशिष्यपरमहंसमाधवसरस्वतीरचितायां सर्वदर्शनकौमुद्यां कणाददर्शनं यथाबुद्धि निरूपितम् ॥

सर्वदर्शनकौमुद्यामिति वैशेषिकं मतम् ।
महाबलेश्वरैस्साकमस्माभिर्लिखितं चिरात् ॥

अथ नैयायिकदर्शनं निरूप्यते । तत्र गौतमीयं प्रथमसूत्रं विषयप्रयोजनपरम् ।

* * * *

Colophon:

पदवाक्यप्रमाणज्ञो माधवाख्यसरस्वती ।
सङ्क्षेपतो न्यायशास्त्रमदर्शत्स्वशक्तितः ॥

End:

तदेवं श्रुतिस्मृतिपुराणादिष्वाघुष्यमाणा जीवन्मुक्तिरपलपितुं न शक्यते ।

तस्मादविद्यास्तमयो मोक्षस्स च परात्मता ।
जीवतोऽजीवतो वापि भवेच्छ्रुत्यादिमानतः ॥

गोराष्ट्रदेशमध्ये गोकर्णात्पूर्वतोऽपूर्वा ।
अरसेन्द्रभूपवसतिः सोदानगरी समस्ति सत्पुरुषा ॥
तत्रास्ते यतिवर्यो माधवसंज्ञः सरस्वतीपूर्वः ।
ग्रन्थमिमं विरचितवान् यत्र सुबोधानि दर्शनानि स्युः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविद्येन्द्रवनशिष्यपरमहंसपरिव्राजकमाधवसरस्वतीविरचितायां सर्वदर्शनकौमुद्यां वेदान्तदर्शनसङ्क्षेपः समाप्तः ॥

समाप्ता च सर्वदर्शनकौमुदी ॥

मयूरवमाला चिन्तामणिटीका। मितभाषिणी नाम सप्तपदार्थीटीका । मन्दानुकम्पिनी नाम कुसुमाञ्जलिपद्यटीका। वासिष्ठपञ्चि(ञ्जि)का नाम वासिष्ठव्याख्या। अभिनवसप्तपदार्थी । सर्वदर्शनकौमुदी ॥

आभिः षड्भिः(सत्)कृतिभिरीश्वरः प्रीयतां सदा ।
अरसेन्द्रमहीपालपालित सोमदापुरे ॥
स्थितो माधवकर्मन्दी व्यधाच्छास्त्राणि तत्परः ।
माधवाख्यसरस्वत्यास्सरस्वत्यास्सरस्वती ।
विस्वरायास्सुस्वरायाः सरस्वत्यास्सरस्वती ॥

The scribe adds—

मातृदत्तेन (शङ्करेण स्वरसात्) लिखितम् ॥

(b) वेदान्तसारसर्वस्वम्.

VĒDĀNTASĀRASARVASVAM.

Foll. 99a—103b. Fol. 104 contains the table of contents of this work.

A summary of the leading principles of the Advaita school of the Vēdānta: by the same author as that of the above. Herein it is stated that the author's Guru lived on the banks of the river Caṇḍikā.

Complete.

Beginning:

प्रह्लादहृदि दैत्येन्द्रवक्षोदारणदारुणम् ।
नखाग्रं श्रीनृसिंहस्य निर्हरेदान्तरं तमः ॥
वेदान्तविज्ञानसुनिश्चितार्थैर्योगीश्वरैर्ध्येयमजं विशुद्धम् ।
उमानुमाभ्यामधिगम्यमानं वन्दे महेशं सदनुग्रहाशम् ॥
पदवाक्यप्रमाणज्ञो माधवाख्यसरस्वती ।
वेदान्तसारसर्वस्वं कुरुते बुद्धिशुद्धये ॥
वेदा ऋगादयो ज्ञेयास्तदन्तस्तच्छिरो मतम् ।
तस्य सारो महावाक्यं तत्त्वमस्यादिरूपकम् ॥
सर्वस्वं तेन यद्बोध्यं ब्रह्मात्मैक्यं परं पदम् ।
तस्य सर्वं स्वमित्येवं व्युत्पत्त्या त्वभिधीयते ॥
यद्वेदशिर इत्युक्तं सा चोपनिषदुच्यते ।
तस्या निर्वचनं कार्यं तत एतदुती(दी)र्यते ॥

End:

एवं वेदान्तसिद्धान्तसङ्ग्रहो लेशतः कृतः ।
गुरुशास्त्रोक्तमार्गेण वर्ततां सत्सु सर्वदा ॥
चण्डिकाख्यनदीतीरे विद्येन्द्रवननामकः ।
यतिवर्यस्तपोमूर्तिर्विद्वदग्रेसरस्स्थितः ॥
तच्छिष्यः करुणारसार्द्रहृदयो विद्यानिधिस्सन्ततं
व्याकर्ता निखिलस्य शास्त्रनिवहस्यैको गुरुश्चाभवत् ।
नाम्ना माधवशारदेति विदितो वादीन्द्रपञ्चाननो
भक्तानामवलोकनेन दुरितं येनैव संक्षीयते ॥
सोऽयं शास्त्रनिबन्धकृद्यतिवरो ब्रह्मानुसन्धानतो
नीत्वा हायनमाश्रमे चिरमुमानाथप्रिये कापिले ।

सोदार्या पुरि सन्निकृष्टममलं निश्चित्य देहावधिं
पम्पाक्षेत्रमगात्तदैव स गुरुः पुण्यं सुमुक्तिप्रदम् ॥
रौद्म्यब्दः प्रयतोत्तरायणयुते मासे च चैत्रोदिते
पक्षे बाहुलके तिथौ दिनकरे मध्ये चतुर्थ्यामसौ ।
सत्यज्ञानसुखात्मको यतिवरो मुक्तो वसिष्ठाश्रमे
तं पम्पाधिपतिं स्मरन् हृदि शुचौ श्रीतुङ्गभद्रातटे ॥

* * * *

आसीन्माधवभारतीति विदितस्सन्न्यासिवर्यः पुरा
तेनेयं किल सर्वदर्शनपदोपेता कृता कौमुदी ।
आनीता च महाबलेश्वरयतिश्रेष्ठैरिमां केरल-
क्षोणीं तां मलिना वयं लिखितवन्तोऽमी यथापौरुषम् ॥

R. No. **3086.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 10. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Mahāmahōpādhyaya Tāta Subbarāyuḍu Śāstrigāru, Vizianagram.

ब्रह्मविचाराधिकारिनिरूपणम्.

BRAHMAVICĀRĀDHIKĀRINIRŪPAṆAM.

Foll. 1*a*—9*a*. Fol. 9*b* gives the name of the former owners of the manuscript and the date of the transcription and fol. 10 is left blank.

A treatise written in accordance with the Advaita-Vēdānta and laying down the requisite characteristics determining the eligibility of a person for investigating the nature of Brahman: by Rāma Śāstrin alias Kūrellōpa, disciple of Saccidānandāśrama who states that he has also written another philosophical work called Muktivivēcana, and quotes illustrations from the Jīvanmuktivivēka of Vidyāraṇya. Herein the author salutes Śiva, Viṣṇu, Brahman, Vyāsa, Śaṅkarācārya and other commentators on the Brahmasūtra, etc., Gaṇēśa and Sarasvatī.

Complete.

Beginning:

नत्वा श्रीसच्चिदानन्दाश्रमपादाम्बुजद्वयम् ।
निरूप्यते मया ब्रह्मविचाराधिकृतः पुमान् ॥
श्रीमद्विद्यारण्यमुनीन्द्रविरचिते जीवन्मुक्तिप्रकरणे.

वक्ष्ये विविदिषान्यासं विद्वन्न्यासं च भेदतः ।
हेतू विदेहमुक्तेश्च जीवन्मुक्तेश्च तौ क्रमात् ॥ इति ।

तौ विविदिषासन्न्यासविद्वत्सन्न्यासौ क्रमात् विदेहमुक्तिजीवन्मुक्त्योर्हेतू भवतः । अयं भावः—

तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये ।
जीवन्नेव सदा मुक्तः कृतार्थो ब्रह्मवित्तमः ।
उपाधिनाशाद्ब्रह्मैव सन्ब्रह्माप्येति न द्वयम् ॥

* * * *

तस्मादनेकजन्मार्जितसुकृतपरिपाकविशेषान्नितान्तनिर्मलस्वान्तानां विवेकवैराग्यादिमत्त्वेन मुमुक्षूणां गृहस्थानामपि ब्रह्मविचारात्मकश्रवणमननादावधिकारो दुरपह्नव इति सुधीभिर्विभावनीयम् ।

Colophon:

कूरेल्लोपाभिधानेन निबद्धं रामशास्त्रिणा ।
यथामतीदं बालानां वेदे च विदुषां मुदे ॥
शिवं हरिविधिव्यासभाष्यकारादिदेशिकान् ।
नत्वा गणेशं वाणीं च जीवश्रेशो निरूप्यते ॥
क्व दुर्ज्ञेयं ब्रह्मतत्त्वं क्व मेऽल्पविषया मतिः ।
गुरोः प्रसादाद्यत्किञ्चिद्बुद्ध्या मन्ये यथामति ॥

End:

तथापि व्यावहारिकस्य स्थूलभुजस्संसारिणः प्रमातुरेव ब्रह्मविचाराधिकारित्वेनोपदेशयोग्यत्वेन च मुख्यत्वात्तस्य शोकमोहापनयनेन स्वस्वरूपसाम्राज्यदाने प्रवृत्ता सकलजीवमाता श्रुतिस्तं प्रत्येव नासि त्वं संसारी किं तु तत्त्वमसि, त्वं ब्रह्मासि, अविचारकृतो बन्धः, विचारान्मोक्षो भवति ।

* * * *

ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ।
तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म सम्पद्यते ध्रुवम् ॥

इत्याद्याश्श्रुतयोऽत्रानुसन्धेयाः । महावाक्यार्थविचारादिकमन्यदस्मत्कृतमुक्तिविवेचने प्रपञ्चितमित्यास्तां विस्तरः ॥

Colophon:

कूरेल्लोपाभिधानेन निबद्धं रामशास्त्रिणा ।
यथामतीदं बालानां विवेच(को)विदुषां मुदे ॥

R. No. 3087.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 82. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala, Malabar district.

न्यायसिद्धान्तमञ्जरीव्याख्यानम्—दिव्यपरिमलम्.

NYĀYASIDDHĀNTAMAÑJARĪVYĀKHYĀNAM : DIVYAPARIMALAM.

A commentary on Jānakīnātha's Nyāyasiddhāntamañjarī, which work has been described under No. 4215 of the D.C.S. MSS., Vol. VIII : by Appayadīkṣita alias Avadhāni Yajvan, son of Rāyamakhin and pupil of Yajñēśvara.

Contains the Pratyakṣaparicchēda only.

Beginning :

अम्बामीशकुटुम्बिनीमवनतश्रीनाथदेवेण्मुख-
श्रीमन्मौलिलगत्किरीटविलसन्माणिक्यकान्तिस्थिते ।
राजत्स्वप्रतिबिम्बिते प्रतितनुं स्वीयां समीक्ष्य स्फुटं
हासाङ्कूरकरम्बिताधरमुखीं प्रत्यूहशान्त्यै भजे ॥

विघ्नान्धकारतरणिं श्रुतशाखिमूलं विद्याप्रसूनसुरशाखिनमिन्दुशोभम् ।
वीक्षासमेधितविनम्रजनेहितार्थं वन्दे शिवं यतिवरं मम देशिकं च ॥

यज्ञेश्वराख्यादधिगम्य तर्कान् गुरोर्मखीन्द्रादवधानियज्वा ।
व्याख्यामसौ रायमखीन्द्रसूनुः श्रीजानकीनाथकृतेस्तनोति ॥

इह खलु प्रारिप्सितग्रन्थपरिपन्थिविघ्नसङ्घोपशमनाय जानकीनाथो नाम सुधीश्वरः शिष्टाचारसमागतसमुचितेष्टदेवताप्रणामरूपं मङ्गलं स्वाचरितं शिष्यहिताय विरचयन्

* * * *

न्यायप्रकरणं प्रतिजानीते—प्रणम्येति । भक्तिश्रद्धादिपूर्वकत्वं नतेः प्रकर्षः । तेन सर्वप्रबन्धहर्त्रे साहसकर्त्रे नमो नमस्तुभ्यमित्याद्युपहासादिप्रयुक्तनतिव्युदासः । परमात्मानमीश्वरम् ।

* * * *

न्यायसिद्धान्तमञ्जरी क्रियत इति । प्रतिज्ञायते ज्ञाप्यते विवक्षितोऽर्थोऽनेनेति व्युत्पत्त्या प्रतिज्ञाहेतूदाहरणोपनयनिगमनात्मकपञ्चावयवानुमानवाक्यं न्यायः ।

End:

सोपाधिकत्वाच्चाणुरूपमेव मन इति नाणुत्वघटितलक्षणासम्भव इति भावः ॥

Colophon:

इत्यपया(प्पय)दीक्षितकृतौ सिद्धान्तमञ्जरीव्याख्यायां दिव्यपरिमलसमाख्यायां प्रत्यक्षपरिच्छेदः समाप्तः ॥

R. No. **3088.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Trittala, Malabar district.

सूत्रोद्देश्यविधेयभावनिर्णयः.

SŪTRŌDDĒŚYAVIDHĒYABHĀVANIRṆAYAḤ.

Fol. 18*b* is left blank.

The author, whose name is not given, points out herein what is Uddēśya उद्देश्य and Vidhēya विधेय with reference to the Sūtras of Pāṇini.

Complete in eight Adhyāyas.

Beginning:

नत्वा गुरुं जगन्नाथं सूत्रे श्रीपाणिनिस्मृते ।
ब्रुवे विधेयश्चोद्देश्यमधिकारप्रसिद्धये ॥

वृद्ध्यादि द्वाभ्यां पृथक् संज्ञे विधीयेते । इक इति तत्स्थाननियमपरिभाषा । नेत्यादि त्रिभिस्तयोर्निषेधः । हल इति त्रिभिः पृथक् संज्ञाः । नाज्झेति सवर्णनिषेधः । ईदादि नवभिः प्रगृह्यसंज्ञा । अदस इत्यत्र ईदूतोरनुवृत्तिः । आ(ओ)दित्यत्र निपातस्यानुवृत्तिः । संबुद्धावित्यत्र ओतः । उञ इति द्वयोश्शाकल्यस्य । दाधेति घुसंज्ञा ।

End:

अनुस्वारस्येत्यादि त्रिभिः परसवर्णः । उदस्थादि(ति द्वा)भ्यां पूर्वसवर्णः । शश्छोऽटीत्यत्र झय इत्यनुवृत्तिः, अन्यतरस्यामिति त्रिष्वनुवृत्तिः । उदात्तादिति द्वाभ्यां स्वरः । अन्त्येनाकारस्य संवृतत्वकथनम् ॥

Colophon:

इत्यष्टमोऽध्यायः ॥

R. No. **3089.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 36. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Payyūr Paṭṭeri, Kunnankulam post, Malabar district.

वेदान्तसप्तशती.

VĒDĀNTASAPTAŚATĪ.

Foll. 1*a*—35*a*. Fol. 35*b* gives the name of the owner of the manuscript and the year of transcription. Fol. 36 is left blank.

A treatise in 700 stanzas explaining the Advaita-Vēdānta: by Viśvānubhavabhikṣu, who states that he was a devotee of Rāma.

Wants the beginning; otherwise complete.

Beginning:

. . . मक्षयफलं प्रवक्ष्यामि यथाबलम् ।
आत्मा ब्रह्मादिवाक्यादेरेकत्वमवगम्यते ॥
तत्र विप्रतिपद्यन्ते वादिनोऽनेकधा मुधा ।
क . . . . . . चिद्योगशास्त्रदृशो बुधाः ॥
परात्मनोर्विभिन्नत्वं वर्णयन्ति सुबृष्टितः ।
अन्यभेदमभेदं च तयोर्व्याचक्षते बलात् ॥
अन्ये त्वभावं वाञ्छन्ति परस्य मतिविभ्रमात् ।
प्रपञ्चस्यापि सत्यत्वं सर्वे एते प्रचक्षते ॥
परात्मनोर्न भिन्नत्वमभेदः केवलं तयोः ।
इति व्याचक्षते केचिच्छास्त्रयुक्तिवपुर्भृतः ॥
प्रपञ्चस्यापि मिथ्यात्वं रज्जुसर्पद्विचन्द्रवत् ।
इयन्त एव पक्षाः स्युर्वेदवर्त्मानुगामिनाम् ॥
एतेषां कस्य हेयत्वमादेयत्वं च कस्य च ।
इति निश्चयसिद्ध्यर्थं विचारः क्रियते मया ॥
जीवात्मनोः पृथक्त्वं यदुक्तं तत्प्रतिभाति नः ।

End:

अतः सन्न्यस्य कर्माणि शान्तिदान्त्यादिसंयुतः ।
वेदान्तश्रवणादौ स्यादात्मज्ञानाय यत्नवान् ॥
तदेतदात्मचिन्तनं कृतं मयातिभक्तितः ।
हरौ गुरौ च भक्तिदं(सम)स्ततृड्विनाशनम् ॥

अतो मुमुक्षुभिस्सदा परं पदं दिदृक्षुभिः ।
प्रपाठ्यमेव सर्वदा तदेतदात्मचिन्तनम् ॥
तदेतत्कृतवान् भिक्षुर्विश्वानुभवसंज्ञिकः ।
हृदा रामतनुं ध्यायन्नात्मत्वेनात्मचिन्तनम् ॥
हरिरेव रघुश्रेष्ठो यदुश्रेष्ठश्च यद्यपि ।
तथापि मे रघुश्रेष्ठे किं करोमि मनो न(ग)तम् ॥
प्रत्यगद्वैतमानन्दमात्मानं केवलं परम् ।
नमामि कारणं विष्णुं सर्वस्य जगतः प्रभुम् ॥

Colophon :

वेदान्तसप्तशती समाप्ता ॥

R. No. 3090.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 222. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Koṭikalapūḍi Śivarāmadāsa Pantulugāru of Bobbili.

सूर्यसिद्धान्तः, आन्ध्रटीकासहितः.

SŪRYASIDDHĀNTAḤ WITH TELUGU MEANING.

Fol. 222 is left blank.

Same text as that described under Nos. 13508—13512 of the D.C.S. MSS., Vol. XXIV, wherein see for the beginning.

The work is accompanied with meaning in Telugu: by Kalpakurti Allanāryasūri.

Complete in 14 Adhyāyas—(13th Yantrādhyāya and 14th Muhūrtādhyāya).

Name of the scribe: Sunarao Vēṅkaṭakṛṣṇamma. Date of transcription: Wednesday, the 3rd day of the bright fortnight of the Bhādrapada month in the year Śukla.

End :

जीवन्मुक्तस्तु तद्विद्वान्पूर्वोपाधिगुणांस्त्यजेत् ।
स सच्चिदादिधर्मत्वात्पेचे भ्रमरकीटवत् ॥
नानोपाधिवशादेव जातीनामाश्रमादयः ।
अत्र(आत्म)न्यारोपितास्ते ये रसवर्णादिभेदवत् ॥
रहस्यमेतद्देवानांदुर्लभं ज्ञानमुत्तमम् ।
एतज्जनं वदेद् ज्ञात्वा ब्रह्मणा सह मोदते ॥

* * * *

मध्यस्फुटोपकरणग्रहणद्वयं च भेद्याधिकारखगसंयुतयोगताराः ।
दीप्तास्तमानविधुशृङ्गकपातभूपगोलौ मुहूर्त इति चात्र चतुर्दश स्युः ॥

Colophon:

इति श्रीसूर्यसिद्धान्ते कल्पकृतिज्यौतिषगजकेसर्यल्लनार्यसूरिविरचितान्ध्रभाषाटीकायां मुहूर्तपिण्डोत्पत्तिसहितायां चतुर्दशोऽध्यायः ॥

For the remaining portion see R. No. 1708 ante.

R. No. **3091.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 82. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nambiyan Sōmayājippāḍ, Villiyaṭṭu-mana, Urakam post, Cochin State.

प्रक्रियासर्वस्वम्.

PRAKRIYĀSARVASVAM.

Fol. 82*a* gives the name of the former owner of the manuscript, and the year of transcription.

This contains the further portion of the work described under R. No. 3024 ante: By Nārāyaṇa.

Contains the Uṇādi and Svarakhaṇḍas.

Beginning:

धात्वर्थमाश्रित्य भवन्त्युणादिका उणाद्यधीना निगमेऽपि च स्वराः ।
अतः कृदन्तर्गतमप्युणादिकं धातोः परं छान्दसतोऽपरं ब्रुवे ॥

क्वचित्सुयोजा धात्वर्थाः क्वाप्ययोज्या उणादिषु ।
क्वचित्कथञ्चिद्योज्या स्युर्वक्ष्यन्ते तत्र तत्र के ॥
अर्थं विनापि धातूक्तिर्व्युत्पत्त्यावश्यकं कृताः ।
कृत्तद्धितादिसिद्धाश्च स्वसिद्धाश्च पुनः क्वचित् ॥
उच्यन्तेऽत्र हि पूर्वेषां मतभेदाविलुप्तये ।
व्युत्पत्तेश्च बहुत्वेन शब्दासन्देहसिद्धये ॥

कृवापाजिमिस्वदिसाध्यशूभ्य उण् । एभ्यस्संज्ञायामुण् स्यात् । कृत्त्वात्कर्तरि णित्त्वाद्वृद्धिः । करोतीति कारुः । शिल्पी । कार्यं कारुरिति कर्तृमात्रेऽप्याह भट्टिः । न लोकेति षष्ठ्यभावः । आतो युक् ।

* * * *

Colophon:

उणादिवृत्तित्रितयं नण्डनालङ्कृतिन्तथा (?) ।
दृष्ट्वैतत्कृतमस्माभिर्देवनारायणाज्ञया ॥

इति श्रीमत्केरलभूवलयभूषणदेवनारायणधरणीपतिकरुणाशरणेन नारायणचरणपरायणेन नारायणकविना विरचिते प्रक्रियासर्वस्वे उणादिखण्डः ॥

End:

न सुब्रह्मण्यायां स्वरितस्य तूदात्तः । सुब्रह्मण्याह्वानमन्त्रे यज्ञेऽप्यस्याध्ययने च प्राप्तयोर्न विधिः । प्राप्तस्य स्वरितस्य तूच्चस्स्यात् । सुब्रह्मण्योमिन्द्रागच्छ ।

* * * *

देवब्रह्मणोरनुदात्तः । मन्त्रे देवब्रह्मणोस्स्वरितस्य अनुच्चस्स्यात् । देवा ब्रह्माणः । अत्र द्वयोरामन्त्रितयोराद्यु . ।

R. No. 3092.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 10. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala, Malabar district.

(*a*) तर्कदीपिका.

TARKADĪPIKĀ.

Foll. 1*a*–6*b*.

An investigation of the nature of speculation and true knowledge. By Viśvanāthāśrama, pupil of Mahādēvāśrama.

Complete.

Beginning:

जिह्वारङ्गतले मृगाङ्ककलया सम्प्रोतमौलिंमु(र्मु)दा
नित्यं नृत्यतु नूपुरामलरवोदाराभिरामाङ्घ्रिका ।
हेलास्फालनलोकनाखिलजगत्सन्दर्शनी नर्तकी
क्षोणीरङ्गतलस्थसंसद इयं विस्मापनी भारती ॥
यत्पादाम्बुजभृङ्गालीछलादिव सुरासुराः ।
वितर्कयन्ति सौन्दर्यं तं नमामि गजाननम् ॥

ननु किं तर्कलक्षणम् । व्याप्यारोपे(ण) व्यापकारोप इति चेन्न । प्रमेयत्वादावतिव्यापकत्वात् । यदि प्रमेयत्वं स्वस्मिन् वर्तते आत्माश्रयः स्यादित्यादि-

कोऽपि तर्कस्स्यात्। नानयोरापाद्यापादकयोर्नच(योश्च) कापि व्याप्तिरस्ति । व्याप्त्या च भवितव्यम् । व्याप्यव्यापकयोर्व्याप्तिगर्हत्वात् । व्याप्तिरहितस्य च तर्कत्वे यदीश्वरः कर्ता स्यात्तर्हि घटः स्यादित्यादिकोऽपि तर्कस्स्यात् ।

End :

न चैवं सकलकेवलान्वयिषु प्रसङ्गः । अदृष्टं कस्यचित्प्रत्यक्षं प्रमेयत्वादित्यसंभवात्तत्र विपक्षाभावेऽपि पक्षवृत्तित्वशङ्कासम्भवेन तन्निवृत्त्यर्थं तर्काकाङ्क्षासम्भवेन तर्कविरहादीनामदूषणत्वादिति ।

विना येन प्रमाणानि प्रामाण्यं न मनागपि ।
यान्ति यान्ति च येनातस्तर्कस्तर्क्यः स तार्किकैः ॥
तरसोज्ज्वलवाक्यविहीनास्सन्ति नरा जडबुद्धियुक्तयः ।
तन्मतिवाक्यसुकौशलसिद्ध्यै तर्कनिरूपणमीरितमेतत् ॥

Colophon :

इति श्रीमयमहादेवाश्रमशिष्येण विश्वनाथाश्रमेण विरचिता तर्कदीपिका समाप्ता ॥

(*b*) **वैशेषिकवस्तुनिर्णयः.**

VAIŚĒṢIKAVASTUNIRṆAYAḤ.

Foll. 6*b*—10.

Explains the six categories of the Vaiśēṣika philosophy. By Nṛsiṁha.

Complete.

Beginning :

मध्येसभमनुस्मृत्य तेजस्ताण्डवलक्षणम् ।
वैशेषिकस्य तन्त्रस्य क्रियते वस्तुनिर्णयः ॥
अभिधेयं पदार्थाः षट् अपवर्गः प्रयोजनम् ।
तेन तस्याभिसम्बन्धः कार्यकारणलक्षणः ॥
द्रव्यं तत्र गुणः कर्म सामान्यं च परापरम् ।
विशेषः समवायश्च षट् पदार्थाः प्रकीर्तिताः ॥
भूजलाग्निमरुद्व्योमकालदिक्चित्तचेतनाः ।
नव द्रव्याणि लक्ष्यन्ते स्वात्मजारम्भकत्वतः ॥
आदौ चतुर्णां द्वैविध्यमणुतत्कार्यभेदतः ।
नित्यानित्यत्वभेदाच्च तथा द्वैविध्यमुच्यते ॥

End:

उत्पत्तिमत्त्वाद्भूम्यादि कुम्भवत्कर्तृपूर्वकम् ।
स हि कर्ता समस्तस्य चन्द्ररेखावतंसकः ॥
उदर्कविरसैस्तर्कैरतर्क्यैश्वर्यमीश्वरम् ।
अन्ये निह्नोतुमिच्छन्ति न गच्छन्ति परां गतिम् ॥
यस्यानुग्रहमात्रेण सम्यग्ज्ञानं प्रवर्तते ।
तेनापवर्गस्सर्वेषां सिध्यत्येव न संशयः ॥
वैशेषिकस्य तन्त्रस्य प्रणीतस्य महर्षिणा ।
नृसिंहनामधेयेन कृतोऽयं वस्तुनिर्णयः ॥

R. No. **3093.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 204. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of Śrīmān Jugulakiśōra Pāṇigrāhī, B.A., of Parlakimedi.

अभिनवचिन्तामणिः.

ABHINAVACINTĀMAṆIḤ.

Foll. 1*a*—202. Fol. 203 contains the table of contents of this work. Fol. 204 is left blank.

A treatise on pathology and medicine: by Cakrapāṇidāsa, who states at the end that the work was completed on the full-moon day of lunar month Kārttika in the Śālivāhana Śaka year 1721.

Contains the Kiraṇas 30—36 only;

३०. आमवातनिरूपणम्.
३१. शूलरोगनिरूपणम्.
३२. उदावर्तरोगनिरूपणम्.
३३. गुल्मरोगनिरूपणम्.
३४. हृद्रोगनिरूपणम्.
३५. मूत्रकृच्छ्रलक्षणम्.
३६. मूत्राघातलक्षणम्.
३७. मेहलक्षणम्.
३८. सोमरोगलक्षणम्.
३९. प्रमेहरोगलक्षणम्.
४०. उदररोगलक्षणम्.
४१. शोथलक्षणम्.
४२. वृद्धिरोगलक्षणम्.
४३. गलगण्डलक्षणम्.
४४. श्लीपदरोगलक्षणम्.
४५. विद्रधिरोगलक्षणम्.
४६. व्रणशोथलक्षणम्.
४७. भगन्दररोगः.

४८. उपदंशलक्षणम्.
४९. शूकदोषः.
५०. कुष्ठरोगः.
५१. शीतपित्तलक्षणम्.
५२. अम्लपित्तलक्षणम्.
५३. विसर्पिरोगः.
५४. मसूरिका.
५५. क्षुद्ररोगः.
५६. मुखरागेः.
५७. कर्णरोगनिरूपणम्.
५८. नासारोगनिरूपणम्.
५९. नेत्ररोगनिरूपणम्.
६०. शिरोरोगनिरूपणम्.
६१. स्त्रीरोगनिरूपणम्.
६२. बालरोगनिरूपणम्.
६३. विषरोगनिरूपणम्.
६४. रसायननिरूपणम्.
६५. वाजीकरणनिरूपणम्.
६६. वमनादिनिरूपणम्.

Beginning:

मन्दाग्नेश्च विरुद्धभोजनवशाद्व्यायामतो निश्चला-
दामः प्रेरित आशुगेन युगपत्स्रोतांस्यभिष्यन्दतः ।
यस्तब्धं कुरुते शरीरमखिलं सैवामवातश्चतु-
स्सङ्कचस्स्याज्ज्वरगौरवारुचितृषालस्याङ्गशोथान्वितः ॥

चिकित्सा—

लङ्घनं स्वेदनं रूक्षं कटुतिक्तानि दीपनम् ।
विरेकः स्नेहपानं च वस्तयश्चाममारुते ॥
वालुकापुटके स्वेदस्तुषायां पञ्चकोलजम् ।
पानीयं च हितं यूषं कौलुत्थं चणकस्य च ॥
उत्सादनं गोजलपिष्टविश्वैश्शुण्ठीवचाकुष्ठकृतैस्तथा वा ।
वल्मीकमृच्छिग्रुभवैश्च कल्कैस्स्नुगस्थिसंहारवचाकृतैर्वा ॥

*   *   *   *

सैरण्डतैलं पथ्यं वा पिबेदुष्णेन वारिणा ।
आमवाते चिग्रुधस्यां वृद्धिरोगे विशेषतः ॥

*   *   *   *

Colophon:

इत्यभिनवचिन्तामणौ आमवातनिरूपणो(णं) नाम त्रिंशः किरणः ॥

End:

वमनं कफनाशाय पित्तनाशाय रेचनम् ।
मर्दनं वातनाशाय ज्वरनाशाय लङ्घनम् ॥

इति वमनाधिकारः ॥

*   *   *   *

हस्ताभ्यङ्गे पादयोः स्वास्थ्यमाहुः पादाभ्यङ्गे नेत्रयोः स्वास्थ्यमाहुः ।
नेत्राभ्यङ्गे श्रोत्रयोः स्वास्थ्यमाहुः श्रोत्राभ्यङ्गे हन्ति दन्ताक्षिरोगान् ॥

इति सार्वकालिकपथ्यम् ॥

* * * *

श्रीमद्रामपदाम्बुजस्तुतिकथामाधुर्यधौरेयता-
पूर्णश्रीलपराङ्कुशाभिधसुधाम्भोधेरगाधात्मनः ।
कल्लोलायितचक्रपाणिभगवद्दासेन लीलोद्धृतः
सन्तस्सन्ततमन्तरङ्गकरुणं चिन्तामणिर्धार्यताम् ॥
शालिवाहनभूपस्य भूनेत्रमुनिभूमिते (१७२१) ।
अब्दे कार्त्तिकराकायां ग्रन्थोऽयं पूर्णतां गतः ॥

Colophon:

इति श्रीमच्चक्रपाणिदासविरचिते अभिनवचिन्तामणौ वमनाधिकारादिषड्ड्तु-
निरूपणो(णं) नाम षट्षष्टितमः किरणः ॥

R. No. 3094.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919–20 from a MS. of the Maharaja's Library, Vizianagram, Vizagapatam district.

शङ्करीसङ्गीतम्.
ŚAṄKARĪSAṄGĪTAM.

Foll. 1*a*—18*a*. Foll. 18*b*—20 are left blank.

A poem narrating the leading incidents that led up to the marriage of Goddess Śaṅkarī or Pārvatī with God Śiva: by Jayanārāyaṇa, whose genealogy is given in the next page.

Contains 1—12 Paṭalas as given below :—

१. गात्रोत्थानम्.
२. बाललीलावर्णनम्.
३. नारदसमागमः.
४. मेनाविलापः.
५. कालीप्रस्थानम्.
६. वसन्तवर्णनम्.
७. शिवसम्भाषणम्.
८. एकाम्रवनगमनम्.

९. गोष्ठवर्णनम्.
१०. विरहवर्णनम्.
११. दूतसंवादः.
१२. रासवर्णनम्.

Rāmamahāmati—head of the author's family.

|

Udha

|

Kōca

|

Ābha

|

Paśa

|

Udaya

|

Vāṇīśvara

|

Viśvanātha

|

Kaṁsāri

|

Gōpīkānta

|

Rāmakṛṣṇa

|

Rājēndra

|

Viṣṇudēva

Dulala.	Kandarpa.
	Kṛṣṇacandra—father of the author.
	Jayanārāyaṇa—author of the work.
	Kālīśaṅkara—son of the author.

1. Kāśīkānta, 2. Satyaprasāda, 3. Satyakiṅkara, 4. Satyacaraṇa alias Ghōṣāla, 5. Satyaśaraṇa, 6. Satyaprasanna, 7. Satyabhakta.

Beginning :

आनन्दतुन्दिलपुरन्दरमन्दमुक्तमन्दारदामविगलन्मकरन्दसिक्तम् ।
वन्दे गिरीन्द्रतनयाचरणारविन्दं योगीन्द्रबृन्दहृदयभ्रमरावलीढम्
क्व त्रिलोकजननीचरित्रकं क्वापि मन्दविषया मतिर्मम ।
भूस्थितो ह्यपचिचीर्षुरस्म्यहं नाकशाखिकुसुमानि पाणिना ॥
अथवास्मिन् प्रयत्ने मे निष्प्रत्यूहं फलिष्यति ।
जगदम्बाचरित्रं हि प्रत्यूहव्यूहनाशनम् ॥

* * * *

द्रुतम्—
त्वममरतरुरिति गदित इह जगति फलयसि याचककामम् ।
विपदमतिशमय मम परिपूरय हृदभिलषितमविरामम् ॥
तव करुणालवभवबोधनमवबाधितविषयविकारम् ।
भवनिगलदलनकारणमतुलसमागमकृतमिति सारम् ॥

* * * *

श्रीजयनारायणफणिताखिलमेनावचनमुदारम् ।
परिकलयत इह दुर्गा निदिशतु दुर्गभवार्णवपारम् ॥
इत्याकर्ण्य गिरं प्रबोधजननीं मायाजनन्याश्शुभां
विश्वेषां जननी मुखाब्जरुचिभिर्विद्योतयन्ती दिशः ।
ईषद्धास्यवती सती त्रिजगतीचैतन्यरूपा मुहुः
श्रुत्वेशं शयनात्समुत्थितवती पायाज्जगत्पार्वती ॥

Colophon :

इति श्रीशङ्करीसङ्गीते गात्रोत्थानं नाम प्रथमः पटलः ॥

End :

कृतगु(रु)पदयुगनतिना जयनारायण(वर)कविना
कविकुलमुदे फणितं गीतं कुरुतां सुमतिम् ।
अखिलमहीपतितनयाचरणसरोजं भजतां शमयतु भव-
भयनिचयं सततं हरतु च कुमतिम ॥

* * * *

आसीद्ब्रह्मकुलोद्भूतश्शिरो राममहामतिः ।
तस्माज्जात उधो धीरस्ततः कोच इति स्मृतः ॥
तत आभरसमाजज्ञे सञ्जातश्च ततः पशः ।
उदयश्च ततो जातस्ततो वाणीश्वरोऽभवत् ॥

तत्पुत्रो विश्वनाथाख्यः कंसारितिस्तत्सुतो महान् ।
गोपीकान्तस्तस्य पुत्रो रामकृष्णश्च तत्सुतः ॥
राजेन्द्रस्तनयस्तस्य विष्णुदेवस्ततोऽभवत् ।
दुलालश्चापि कन्दर्पो विष्णुदेवसुतावुभौ ॥
कन्दर्पात्कृष्णचन्द्रोऽभूद्गुणवान् विजितेन्द्रियः ।
अभवत्कृष्णचन्द्रस्य जयनारायणः स्मृतः ॥
अजायत सुतस्तस्य कालीशङ्करसंज्ञकः ।
तस्य षट् तनयाः ख्याताः काशीकान्तोऽग्रजो महान् ॥
सत्यप्रही(सा)दस्तदनु तृतीयस्सत्यकिङ्करः ।
चतुर्थस्सत्यचरणो घोषालः परिकीर्तितः ॥
पञ्चमस्सत्यशरणः षष्ठस्सत्यप्रसन्नकः ।
इति षण्णां कुमाराणां सत्यभक्तस्तु सप्तमः ॥

सत्प्रज्ञाविषयानुरूपरचितं क्षेमंकरं यन्मया
सद्भक्ताय जना(या)दिना द्विजनुषा नारायणेनाचिरात् ।
क्रूरा कारणदुर्विवादघटना पर्यस्यतां शङ्करी-
सङ्गीतं तदिदं सतां वितनुतां संशृण्वतां श्रीतताम् ॥

Colophon:

इति श्रीशङ्करीसङ्गीते रासवर्णनं नाम द्वादशः पटलः ॥

R. No. **3095**.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 28. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919-20 from a MS. of Saṁsthānam Library, Bobbili.

कृष्णकर्णामृतम्, सव्याख्यानम्.

KṚṢṆAKARṆĀMṚTAM WITH COMMENTARY.

Same work as that described under R. No. 2615 ante.

The commentator Rāmacandra was also called Mōhanabilvamaṅgalakavi.

Contains 1—57 stanzas in the first Āśvāsa.

Beginning:

वक्षोजस्तबकाञ्चितावनिसुतावल्लीमतल्लीदृढा-
श्लिष्टं स्कन्धमहोन्नतं निजभुजाशाखाग्रहस्ताङ्कुरम् ।

सत्यामोदरसप्रसारिसुमनोनित्याश्रयं सर्वदा
भक्तारामसुरद्रुमं रघुपतिं श्रीकृष्णरूपं भजे ॥

* * * *

श्रीमांस्त्रैलिङ्गदेशे विलसति विबुधश्रेणिकोटीरकोटी-
कोटीमाणिक्यभूतागणितगुणगणोऽखण्डपाण्डित्यशौण्डः ।
धीरश्शाण्डिल्यगोत्रस्सकलकविकुलाह्लादिसूक्तप्रवीणो
वीणोदाहारविद्याविवरणनिपुणो रामचन्द्रो बुधेन्द्रः ॥

* * * *

सोऽहं मोहनबिल्वमङ्गलकविर्वेश्यानुरक्तस्तया-
वज्ञातोऽननुरूपकार्यवशतो निर्विद्य वैराग्यभाक् ।
चक्रे सोमगिरिश्शुकाह्वयमुनिः श्रीकृष्णकर्णामृत-
स्तोत्रं भक्तिरसायनाख्यमिह तद्व्याख्यानमाख्यापये ॥

* * * *

अथ खल्वत्रभवान् सकलकलाकलापवाग्विलासवाचस्पतिर्भगवद्भक्ताग्र-गण्यः कृष्णलीलाशुकमुनिर्नाम महाकविः तापत्रयखिन्नलोकानुजिघृक्षया स्वस्य च कृतार्थतानुविलिप्सया च,

* * * *

मङ्गलमादौ निबध्नाति—

चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे शिक्षागुरुश्च भगवान् शिखिपिञ्छमौलिः ।
यत्पादकल्पतरुपल्लवशेखरेषु लीलास्वयंवररसं लभते जयश्रीः ॥

चिन्तामणिरिति । मे मम । गुरुः हितोपदेशकश्चिन्तामणिर्नाम पूर्वं स्वेनैवोपभुक्ता काचित् वराङ्गना । जयति सर्वोत्कर्षेण वर्तते । अथवा चिन्तामणिरिति सोमगिरेर्विशेषणं चिन्तामणिवदभीष्टप्रदातृत्वात् । चिन्तामणिः मे गुरुः महावाक्योपदेष्टा । गृणात्युपदिशतीति गुरुरिति विग्रहः ।

End:

मौलिरिति । मौलिः केशपाशी । चन्द्रकः मयूरपिञ्छं भूषणमलङ्कारो यस्यास्सा ।

* * * *

मधुरावीथीं मधुरापत्तनरथ्याम् । मन्दंमन्दं शनैश्शनैः । गाहते प्रविशति ॥ ९७ ॥

R. No. **3096.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919-20 from a MS. of Saṁsthānam Library, Bobbili.

भागवतव्याख्या—पदरत्नावली.

BHĀGAVATAVYĀKHYĀ : PADARATNĀVALĪ.

Same work as that described under No. 2233 of the D.C.S. MSS., Vol. IV, Part I. By Vijayadhvajabhaṭṭāraka.

Contains the Adhyāyas one and two complete and three incomplete in the 11th Skandha.

Beginning :

जयति जगति जन्माद्यस्य विश्वस्य यस्मात्
अमलनिगममुख्यावेद्यमाहात्म्यधाम ।
द्रुहिणतनय ऊचे चा(शौ)रये यत्स्वरूपं
यदुपतिरपि यास्यन्नुद्धवाय स्वधाम ॥
वेदव्यासमहं वन्दे वेदव्यासैकवेदिनम् ।
वेदव्यासजनारातिं वेदव्यासमुनीनपि ॥
रत्नानामम्बुधिः पात्रं तेजसामुष्णदीधितिः ।
एम(व)मेकादशस्कन्धो वेदान्तैकार्थसन्निधिः ॥
दशमस्कन्धरथ्याया गत्वान्तं सार्थवत्पुरः(नः) ।
गाह एकादशस्कन्धतीर्थं विष्णुपदीमिव ॥

इह नानाव्यसनराशिभारावभुग्नशिरसां कलिमलावकुण्ठितमनसां

* * * *

एकादशस्कन्धमुत्थापयितुं वृत्तमनुवदाति—कृत्वेति ।

End :

रूप्यत्वात्तद्दशत्वाच्च तद्रूपं चैतदीर्यते ।
नतु तस्य स्वरूपत्वान्निर्दोषानन्दरूपिणः ॥

कथं जडाजडैक्यम्.

R. No. **3097.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919-20 from a MS. of the Zamindar of Sherumahammadupuram, Vizagapatam district.

चिद्गगनचन्द्रिका.

CIDGAGANACANDRIKĀ.

Fol. 20*b* is left blank.

A work in Mantraśāstra in the form of a eulogy addressed to Śakti who is a manifestation of Pārvatī; by Kālidāsa. The work is quoted by Kaivalyāśrama.

Complete in four Vimarśas.

Beginning :

क्षीरोदं पौर्णमासीशशधरणवयःप्रस्फुरन्निस्तरङ्गं
चिद्व्योमस्फारनादं रुचिविसरलसद्बिन्दुवक्रोर्मिमालम् ।
आद्यस्स्पन्दस्वरूपः प्रथयसि सकृदोङ्कारशुण्डः क्रियादृक्
दन्त्यास्योऽयं हठाद्वश्शमयतु दुरितं शक्तिजन्मा गणेशः ॥
स्थूलं सूक्ष्मं परं च त्रिविधमिह जगद्यत्प्रथावेशसिद्धा
युक्तं सत्ता यदीया स्फुरति च परतः स्वप्रथैकस्वभावा ।
भामूर्तिं यं विमर्शक्रियमनुपतिता लक्ष्यते लोकवृत्तिः
सन्मार्गालोकनाथ व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥
इह कालिदासचन्द्रप्रसूतिरानन्दिनी स्तुतिर्व्याजात् ।
चिद्गगनचन्द्रिकाब्धेश्शमयतु संसारदावदवथुं वः ॥

* * * *

विश्वसद्मानि सदात्मनीश्वरे पूरणात्पुरुषतामुपेयुषे(षि) ।
ये मनः प्रणिदधुर्महर्षयः तान् पतञ्जलिमुखानुपास्महे ॥
खेचरीमुखमरीचिजालकं व्योमशक्तितनुसंश्रयं सदा ।
शम्भुदक्षतनुजावभासया यत्र विश्वमनुकर्तुमीहते ॥
खण्डसत्प्रसरगर्भया यया लक्षितं स्फुरति पूर्णस(र)त्नया ।
तत्त्वमैश्वरमखण्डमम्बिकां तां प्रणौम्यखिलतत्त्वनायिकाम् ॥

* * * *

Colophon :

इति श्रीकालिदासस्य कृतौ चिद्गगनचन्द्रिकायां तृतीयो विमर्शः ॥

End :

पूर्णपीठमवगम्य मङ्गले त्वत्प्रसादनकृते मया कृतः ।
एष चिद्गगनचन्द्रिकास्तवः किन्नु वाञ्छितमसूत मां प्रति ॥
यः पठेज्जपति देवि ते स्तुतिं योऽर्घ(र्थ)मत्र विवृणोति वेत्ति यः ।
योऽनुगात्यभिनयत्यभीप्सितां तच्च तस्य कुरु सिद्धमीश्वरि ॥

कालवर्षिणि शतैस्त्रिभिस्स्तुतिं तावकीमिह नवोत्तरैः कृताम् ।
त्रैष्टुभैरहरहः परामृशन् कालचक्रमतियन् प्रसीदति ॥

* * * *

पूर्णपीठकृतं सिद्धेः तद्भावस्तवमादरात् ।
वासरार्धं महागुह्यं श्रीवत्सो विदधेषु तु ? ॥

Colophon:

इति श्रीकालिदासमहाकविविरचिता चिद्गगनचन्द्रिका सम्पूर्णा ॥

R. No. 3098.

Paper. 10⅞ × 9⅝ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūḍalūr-mana, Nareri, Trittala, Malabar district.

उद्भटालङ्कारविवृतिः

UDBHAṬĀLAṄKĀRAVIVṚTIḤ.

Foll. 1*a*—33*b*. Fol. 34 is left blank.

A commentary on the Alaṅkārasūtras of Udbhaṭa, which work treats of poetics and rhetoric. The commentator is apparently Mukula who quotes Bhāmaha.

Contains the Vargas 1—6 complete.

Beginning:

सर्वत्र विकस्वरता प्रमोददा भवति नायमेकान्तम् ।
मुकुलोच्चयनन्तेन क्वचिदपि कर्तव्यतां धत्ते ॥

पुनरुक्तवदाभासः छेकानुप्रास एव च ।
अनुप्रासस्तथा लाटानुप्रासो रूपकं चतुः ॥
उपमा दीपकं चैव . . . . तथा ।
इत्येत एत्रालङ्कारा वाचां कैश्चिदुदाहृताः ॥

वर्गैर्वर्गैरलङ्कारोपादानं चिरन्तनालङ्कारकृतामल्पदर्शितां प्रकटयितुम्। वक्तीति उच्यत इति च वाक् शब्दोऽर्थश्च

* * * *

भामहो हि द्विविधं रूपकं चानुप्रासं चावादीत् । परे इत्यादिवक्ष्यमाणबहुवचनस्यायमेत्राशयो ज्ञेयः । रूपकजात्युपलक्षितव्यक्तिगतप्रतीयमानं भवति। क्रियाभ्यावृत्तिगणने कृत्वसुजित्यत्र द्वित्रिचतुर्भ्यस्सुजिति सुच् । तेन चतुर्भेदं रूपकमिति तात्पर्यार्थः ।

End :

त्वयि दृष्ट एव तस्य निर्वाति मनो मनोभवज्वलितम् ।
आलोके हि हिमांशोर्विकसति कुमुदं कुमुद्वत्याः ॥

इत्युदाहरणं च ददते । अत्र हि निर्वाणस्याविकासः प्रतिबिम्बत्वेनोपात्तः ॥

Colophon :

इत्युद्भटालङ्कारविवृतौ षष्ठो वर्गः ॥

R. No. 3099.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 130. Lines, 20 in a page. Grantha. Good.

Transcribed in 1919-20 from a MS. of M.R.Ry. Nigamānta Kṛṣṇacakravartyācāryar of Ketandapatti, North Arcot district.

Bound in two volumes.

विष्णुपुराणव्याख्या—नरहरीया.
VIṢṆUPURĀṆAVYĀKHYĀ : NARAHARĪYĀ.

Foll. 56 and 130*b* are left blank.

The further portion of the work described under R. No. 2909 ante, Contains the Adhyāyas 12 to 36 of the fifth Aṁśa, and breaks off in the 37th Adhyāya.

Colophon :

इति श्रीविष्णुपुराणव्याख्यायां नरहरीयाख्यायां पञ्चमे अंशे षट्त्रिंशोऽध्यायः ॥

एवं दैत्यवधं कृष्णो बलदेवसहायवान् ।
चक्रे दुष्टक्षितीशानां तथैव जगतः कृते ॥

कृष्णः बलदेवसहायवान् सन्, एवं पूर्वोक्तप्रकारेण ।

* * * *

End :

तत्तस्मात्कारणात् क्षितेरसुमहाभारमहमवतार्य अमरलोकस्य नित्यसूरिणां सङ्घस्स(स्य) पालनाय यास्यामीति देवान् प्रति ब्रवीहि ।

इत्युक्तो वासुदेवेन देवदूतः प्रणम्य तम् ।
मैत्रेय दिव्यया गत्या देवराजान्तिकं ययौ ॥

R. No. **3100.**

Palm-leaf. 16 × 1⅛ inches. Foll. 93. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1919–20 by M.R.Ry. Kālanāthabhaṭṭanārāyaṇa Śāstrigāru, Aryavatam, Cocanada taluk.

(*a*) तत्त्वदीपः.

TATTVADĪPAḤ.

Foll 1*a*—11*a*. Fol. 11*b* is left blank.

Same work as that described under No. 5250 of the D.C.S. MSS., Vol. XI.

Incomplete.

(*b*) वसन्ततिलकभाणः.

VASANTATILAKABHĀṆAḤ.

Foll. 12*a*—37*b*.

Same work as that described under R. No. 1466(*e*) ante and No. 12644 of the D.C.S. MSS., Vol. XXI.

Complete.

(*c*) नरकासुरविजयः.

NARAKĀSURAVIJAYAḤ

Foll. 38*a*—52*b*.

Same work as that described under R. No. 821(*f*) ante.

Complete.

(*d*) अनङ्गतिलकभाणः.

ANAṄGATILAKABHĀṆAḤ.

Foll. 53*a*—72*a*. Fol. 72*b* is left blank.

Same work as that described under R. No. 2308 ante.

Incomplete.

(*e*) सुदर्शनशतकम्.

SUDARŚANAŚATAKAM

Foll. 73*a*—75*b*.

Same work as that described under No. 10648, Vol. XIX.

Breaks off in the 18th stanza.

(*f*) प्रहसनम्

PRAHASANAM.

Foll. 76*a*—91*b*.

Same work as that described under R. No. 821 ante.

Incomplete.

Foll. 92 and 93 contain Vēṅkaṭēśastōtra and a few Dhyānaślōkas (Taniyan) relating to the Ācāryas of the Śrīśaila family.

R. No. **3101.**

Palm-leaf. 17 × $1\frac{3}{8}$ inches. Foll. 191. Lines, 8 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. V. N. Tirumalācāriyar of Vīravanallūr, Ambasamudram taluk, Tinnevelly district.

भागवतव्याख्या—शुकपक्षीया.

BHĀGAVATAVYĀKHYĀ: ŚUKAPAKṢĪYĀ.

Foll. 2*a*—190*a*. Foll. 1, 190*b* and 191 are left blank.

Same work as that described under No. 2228 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Skandhas 11 and 12 only.

R. No. **3102.**

Palm-leaf. $20\frac{5}{8}$ × $1\frac{1}{2}$ inches. Foll. 33. Lines, 7 in a page. Grantha and Tamil. Fair.

Presented in 1919-20 by M.R.Ry. V. N. Tirumalācāriyar of Vīravanallūr, Ambasamudram taluk, Tinnevelly district.

रहस्यत्रयसारगाथार्थवर्णनम्.

RAHASYATRAYASĀRAGĀTHĀRTHAVARṆANAM.

Fol. 33*b* is left blank.

Same work as that described under No. 5342 of the D.C.S. MSS., Vol. XI.

Complete.

R. No. **3103.**

Palm-leaf. 17 × $1\frac{5}{8}$ inches. Foll. 101. Lines, 9 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Viñjamūr Tirumalācāriyar of Āḻvārtirunagarī, Tinnevelly district.

(*a*) तोताद्रिमाहात्म्यम्.

TŌTĀDRIMĀHĀTMYAM.

Foll. 1*a*—41*a*.

Same work as that described under No. 2441, Vol. IV, Part II, wherein see for the beginning.

Complete in 12 Adhyāyas.

End:

ये तु शृण्वन्ति तोताद्रिस्थलमाहात्म्यमुत्तमम् ॥
सर्वपापहरं नृणां मुक्तिमार्गप्रदीपकम् ॥
तेषु श्रीवल्लिभङ्केशः सुप्रसन्नो भविष्यति ॥
एवमेतत् पुरावृत्तमाख्यातं भद्रमस्तु वः ॥
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ।

Colophon:

इति श्रीब्रह्माण्डपुराणे क्षेत्रवैभवखण्डे तोताद्रिमाहात्म्ये द्वादशोऽध्यायः ॥

Fol. 42*a* contains the title of Yādavagirimāhātmya. Foll. 41*b* and 42*b* are left blank.

(*b*) यादवगिरिमाहात्म्यम्.

YĀDAVAGIRIMĀHĀTMYAM.

Foll. 43*a*—101*b*.

Same work as that described under No. 2506 of the D.C.S. MSS., Vol. IV, Part II, wherein see for the beginning.

Complete in 1—12 Adhyāyas.

End:

मुनिवर गिरमेनामित्थमाकर्ण्य केचित्
व्यधिषत यदुशैले वीतरागा निवासम् ।
कतिचन सहसाद्यं धाम संप्राप्य विष्णो-
रकृषत सह सेवां शेषशेषाशनाद्यैः ॥

Colophon:

इति श्रीनारदीये पुराणे ज्ञानकाण्डे श्रीमद्यादवगिरिमाहात्म्ये भगवत्सन्दर्शनं नाम द्वादशोऽध्यायः ॥

रक्ताक्षिवत्सरे कन्यामासे शुक्लपक्षे इन्दुवारे श्रीमद्यादवगिरिमाहात्म्यं लिखित्वा समाप्तम् ॥

R. No. **3104**.

Palm-leaf. 15⅝ × 1½ inches. Foll. 69. Lines, 7 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Viñjanūr Tirumalācāriyar of Āḻvārtirunagarī, Tinnevelly district.

नवक्षेत्रमाहात्म्यम्.

NAVAKṢĒTRAMĀHĀTMYAM.

Foll. 17b and 69b are left blank.

On the greatness and religious importance of nine holy places, viz., वैकुण्ठक्षेत्र, वरगुणक्षेत्र, पुलिनालयक्षेत्र, बालिकावनक्षेत्र, तुलाकार्मुकमङ्गलक्षेत्र, निधिवनक्षेत्र, पिशुनक्षेत्र, श्रीबेरक्षेत्र and कुरुकापुरीक्षेत्र. This forms a part of the Kṣētramāhātmyakāṇḍa in the Brahmāṇḍa-purāṇa.

Contains 1—21 Adhyāyas.

Beginning :

शुक्लाम्बरधरं विष्णुं (. .) शान्तये ॥
नैमिशे पुण्यनिलये क्षेत्रे बहुगुणान्विते ।
सत्रं कर्तुं समायाता ऋषयो ब्रह्मवादिनः ॥

* * * *

नित्यकल्याणनिलयं वैष्णवानन्दवर्धनम् ।
मलयाद्रेः पुरोभागे पूजितं सुरमानुषैः ॥

* * * *

अनेकतीर्थसंयुक्तं सिद्धक्षेत्रमनुत्तमम् ।
यत्र वै तिन्त्रिणीवृक्षो . . . . पापनाशनः ॥
इति मुनिकथितं तत्क्षेत्रमाहात्म्यमेवं
तटभुवि शुभना(दाया)स्तिन्त्रिणीवृक्षमूले ।
स्थितमनघमपत्रं ज्ञानमुद्रां वहन्तं
हरिमपि मुनिमुख्याः प्रीतियुक्ता बभूवुः ॥

Colophon :

इति ब्रह्माण्डपुराणे क्षेत्रमाहात्म्यकाण्डे ताम्रतटक्षेत्रप्रशंसनं नाम प्रथमोऽध्यायः ॥

* * * *

इदानीं संप्रवक्ष्यामि प्रथमक्षेत्रवैभवम् ।
नवानां क्षेत्रमुख्यानां हरेरद्भुतकर्मणाम् ॥
क्रमेणाहं प्रवक्ष्यामि तन्निबोध[य]त सत्तम ।
ताम्रपर्ण्युत्तरतटे नानापादपसङ्कुले ॥

* * * *

वैकुण्ठक्षेत्रमाहात्म्यं तीर्थस्य सकलस्य च ।
माहात्म्यं चोरनाथस्य हरेरद्भुतरूपिणः ॥

End:

एतस्य पश्चिमे भागे कुरुकाख्यमनुत्तमम् ॥
क्षेत्रं पुण्यतमं लोके यत्रास्ते तिन्त्रिणीनगः ।
विराजते महाशङ्खं कल्पद्रुमसमो भुवि ॥
इतीदमाकर्ण्य नृपोऽतिधीरः सम्पूज्य योगिप्रवरं वरेण्यम् ।
श्रीविग्रहाधीशकथाद्वि(थावि)चित्रं ननन्द चानन्दपयोधिमग्नः ॥

Colophon:

इति ब्रह्माण्डपुराणे क्षेत्रमाहात्म्यकाण्डे श्रीबिरक्षेत्रमाहात्म्यं नाम एकविंशोऽध्यायः ॥

R. No. **3105.**

Palm-leaf. $15\frac{3}{4} \times 1\frac{1}{2}$ inches. Foll. 61. Lines, 6 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Viñjimūr Tirumalācāriyar of Ālvārtirunagarī, Tinnevelly district.

(*a*) यतिलिङ्गसमर्थनम्.

YATILIṄGASAMARTHANAM.

Foll. 1*a*—9*a*. Fol. 9*b* is left blank.

Same work as that described under No. 2956 of the D.C.S. MSS., Vol. V.

Contains the Skandhas one to three complete.

This MS. is said to have belonged to Emberumānār Sannidhi in Tirunagari.

(*b*) यतिधर्मसमुच्चयः.

YATIDHARMASAMUCCAYAḤ.

Foll. 10*a*—57*b*.

Same work as that described under Nos. 2949 and 2950 of the D.C.S., MSS., Vol. V.

Contains the Parvas 1—11 complete.

This work is said to have been completed on 25th of Āḍi in Pramādīca year (1069), by Emberumānār Jīyar.

Foll. 58 and 61 are left blank.

R. No. **3106.**

Palm-leaf. $16\frac{3}{8} \times 1\frac{3}{4}$ inches. Foll. 15. Lines, 10 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Viñjimūr Tirumalācāriyar of Ālvārtirunagarī, Tinnevelly district.

कूरेशविजयः, सव्याख्यः.

KŪREŚAVIJAYAḤ WITH COMMENTARY.

Same work as that described under Nos. 5221 and 5227 of the D.C.S. MSS., Vol. XI, but with slightly different readings in the beginning and the end.

Complete.

Beginning:

श्रीवत्सचिह्नमिश्रेभ्यो नमउक्तिमधीमहे ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥
कूरेन्द्रेणेति सार्धं(र्धैः) सदसि शतविधैः दूषणैस्सप्तरात्रं
वादे क्षिप्ता विपक्षाः प्रतिवचनजडा विस्मयान्मौनमापुः ।
तच्छ्रुत्वा जैत्रघोषं व्यतनुत स महापूर्णनामार्यवर्यः
श्रुत्वा चैतत्तदानीं समजनि विमतश्चोलभूपस्समन्त्री ॥
पत्युः पशूनां परतां पद्यैः पञ्चभिरावृताम् ।
निराकरोत् कूरेशो बुधसङ्घागतैस्तुतैः ॥

अथ भगवद्रामानुजाचार्यशिष्यावतंसाः श्रीमन्महापराशरभट्टारकपदप्रशंसाः ।

* * * *

पद्मद्वयेन द्वादशभिर्दूषणैर्निराचक्षते—गायत्रीत्यादिना ।

End:

एतत्स्वरूपापवर्गयुक्त(त्वा)देव न पशुपतिः, विष्णुरेव प्रकृष्ट इति भावः ।

Colophon:

कूरेशविजयव्याख्यानं समाप्तम् ॥

R. No. 3107.

Palm-leaf. $14\frac{1}{2} \times 1\frac{1}{8}$ inches. Foll. 56. Lines, 7 in a page. Grantha. Good.

Presented in 1919–20 by Kṛṣṇamma, daughter of Aṇṇāvayyaṅgār, Vaḍakkurathavīthi, Āḻvārtirunagarī, Tinnevelly district.

गोदापरिणयचम्पूः.

GŌDĀPARIṆAYACAMPŪḤ.

Foll. 1*a*—53*b*. Fol. 54*a* contains the time of Gōdādēvī's marriage. Foll. 54*b*—56*b* contain the Tamil and Sanskrit names of certain medicinal plants.

Same work as that described under Nos. 12230 and 12231 of the D.C.S. MSS., Vol. XXI.

Complete in five Stabakas.

Name of the scribe—Aṇṇāvayyaṅgār, son of Vēṅkaṭācār. Date of transcription—10th day of the bright fortnight which is the 24th of Tai month in the year Nala, 1032 Kollam.

R. No. 3108.

Palm-leaf. $11\frac{1}{4} \times 1\frac{1}{2}$ inches. Foll. 187. Lines, 8 in a page. **Grantha.** Good.

Presented in 1919–20 by Kṛṣṇamma, daughter of Aṇṇāvayyaṅgār, Vaḍakkurathavīthi, Āḻvārtirunagarī, Tinnevelly district.

(*a*) कुशलवोपाख्यानम्

KUŚALAVŌPĀKHYĀNAM.

Foll. 1*a*—43*a*.

Same work as that described under Nos. 1979 and 1980 of the D.C.S. MSS., Vol. IV, Part I.

Complete in 12 Adhyāyas.

Foll. 43*a*—44*b* contain some pithy stanzas.

(*b*) नवक्षेत्रमाहात्म्यम्.

NAVAKṢĒTRAMĀHĀTMYAM.

Foll. 45*a*—167*a*. Fol. 167*b* contains one Nīti stanza.

Same work as that described under R. No. 3104 ante, wherein see for the beginning.

The names of Navakṣētras are given below:—

१. श्रीवैकुण्ठक्षेत्रमाहात्म्यम्.
२. वरगुणक्षेत्रमाहात्म्यम्.
३. पुलिनालयक्षेत्रमाहात्म्यम्.
४. बालिकावनक्षेत्रमाहात्म्यम्.
५. तुलाकार्मुकमङ्गलक्षेत्रमाहात्म्यम्.
६. निधिवनक्षेत्रमाहात्म्यम्.
७. पिशुनक्षेत्रमाहात्म्यम्.
८. श्रीबेरक्षेत्रमाहात्म्यम्.
९. कुरुकापुरीक्षेत्रमाहात्म्यम्.

Complete in 31 Adhyāyas.

Name of the scribe—Varadārya. The 31st Adhyāya is said to have been completed on Monday, the 12th day, i.e., 27th day, of th Kanyā month in the year Plava, 1017 Kollam.

End:

अष्टौ क्षेत्राणि मुख्यानि कथितानि द्विजोत्तम ।
नवमक्षेत्रमाहात्म्यं प्रवक्ष्यामि सुशोभनम् ॥

* * * *

श्रृणु राजन् महाभाग वक्ष्यमाणं मयाधुना ।
कुरुकाक्षेत्रमाहात्म्यं सर्वपापप्रणाशनम् ॥

* * * *

कथितं विस्तरेणैव सर्वापहार(र्वपापह)मद्भुतम् ।
नव क्षेत्राणि राजन्ते खे यथा च नव ग्रहाः ॥
श्रुतिसुखमनुगीतं सूतपुत्रस्य वाक्यं
मधुरमतिरहस्यं नैमिशीया मुनीन्द्राः ।
मुनिवरमुपचारैस्सम्यगाकर्ण्य हृष्टाः
तदनु मधुरवाग्भिः पूजयन्ति स्म पूज्यम् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे क्षेत्रकाण्डे कुरुकामाहात्म्ये एकत्रिंशोऽध्यायः ॥

R. No. 3109.

Palm-leaf. 17 × 1⅜ inches. Foll. 58. Lines, 5 in a page. Grantha. Good.

Presented in 1919-20 by Kṛṣṇamma, daughter of Aṇṇāvayyaṅgār, Vaḍakkurathavīthi, Āḻvārtirunagarī, Tinnevelly district.

(*a*) ब्रह्मसूत्रम्.
BRAHMASŪTRAM.

Foll. 1*a*—17*b*.

Same work as that described under No. 4649 of the D.C.S. MSS., Vol. IX.

Foll. 17*b* and 18*a* give the year, month and date of transcription of this work. Fol. 18*b* gives the contents of this work.

Name of the scribe—Aṇṇāvyyaṅgār. Date of the beginning of transcription—Sunday, the 13th day of the dark fortnight of the month Āḍi in the year Prajōtpatti. The date of completion—Thursday, the 17th Āvaṇi of the same year.

(*b*) ब्रह्मसूत्राधिकरणसङ्ग्रहः.
BRAHMASŪTRĀDHIKARAṆASAṄGRAHAḤ.

Foll. 19*b*—21*a*. Fol. 19*a* gives the Brahmasūtrasaṅkhyāślōka.

A summary in verse indicating the Adhikaraṇas or topical subdivisions of the Uttarmīmāṁsā in accordance with the interpretations

of Rāmānuja: by Vēṅkaṭadēśika, grandson of Śrīnivāsācārya of Kauśikagōtra.

Complete.

Beginning:

कौशिकश्श्रीनिवासार्यपौत्रो वेङ्कटदेशिकः ।
शारीरकाधिकरणसङ्क्षेपं करवाण्यहम् ॥
अथातो ब्रह्मजन्मादिशास्त्रयोनिसमन्वयात् ।
ईक्षानन्दान्तराकाशात एव ज्योतिरित्यपि ॥
प्राणस्तथा दशैकं च प्रथमे चरणे मताः ।

End:

कार्यं बादरिपञ्चैते तृतीये चरणे मताः ॥
संपद्याविर्भावस्स्वेन ब्रह्मणोऽपि तथैव च ।
सङ्कल्पादेव वाभावं जगद्व्यापारमन्तिमे ॥

(*c*) यतिराजस्तवः.

YATIRĀJASTAVAḤ.

Fol. 21*b*.

Similar to the work described under No. 9688 of the D.C.S. MSS., Vol. XVIII.

Contains six stsnzas only.

Beginning:

शोभाकरेन्द्र(न्दु)निभवक्त्र शठारिपाद-
शोणाब्जहंस करुणाकर लक्ष्मणार्य ।
श्रीभाष्यमध्यगतमर्थमहं प्रवक्तुं
स्वामिन् यतीन्द्र कुरु मे सततं कृपां त्वम् ॥

End:

श्रीमच्छठारिपदपङ्कजचञ्चरीक शितारुणाब्जदलसन्निभनेत्रयुग्म ।
मामद्य ते करुणया कुरु भाष्यभाण्डं नित्यं त्वदीयसहवासरतं गताशम् ॥

(*d*) ब्रह्मसूत्रोपसूत्रसङ्ग्रहः.

BRAHMASŪTRŌPASŪTRASAṄGRAHAḤ.

Foll. 22*a*—26*a*. Fol. 26*b* is left blank.

Indicates the subsidiary Sūtras in each of the Adhikaraṇas of the Brahmasūtra. Some Adhikaraṇas however have only the principal Sūtras, but no subsidiary Sūtras: by Aṇṇācārya, son of Vēṅkaṭācārya of Kauṇḍinyagōtra.

Complete.

Beginning:

कौण्डिन्यलक्षणश्रीमद्वेङ्कटार्यतनूभुवा ।
शारीरके च शास्त्रेऽस्मिन्नुपसूत्रस्य सङ्ग्रहः ।
कथ्यतेऽधिकृतौ ज्ञातुमण्णाचार्येण धीमता ॥
ईक्षाधिकरणे प्रोक्तान्युपसूत्राणि सप्त वै ।
गौणतन्निष्ठहेयत्वप्रतिज्ञास्वागतिश्रुताः ॥

End:

विकारावर्ति च प्रत्यक्षोपदेशान्न पञ्च वै ।
जगद्व्यापारसूत्रे स्युर्व्युत्क्रमेणान्तिमे पदे ॥

इति चतुर्थोऽध्यायः ॥

प्रथमाध्यायमारभ्य चतुर्थावधि वै क्रमात् ।
सङ्ख्या तु गुणसूत्राणां त्रिशतं द्विनवत्यपि ॥
पादानां समुदायस्य सूत्रसङ्ख्या तु कथ्यते ।
एकविंशतिसूत्राणि उपपूर्वाणि चादिमे ॥
द्वितीये गुणसूत्राणि सप्तविंशतिरुच्यते ।

(*e*) श्रीरङ्गराजस्तवः

ŚRĪRAṄGARĀJASTAVAḤ.

Foll. 27*a*—37*a*. Fol. 37*b* is left blank.

Same work as that described under R. No. 174(*g*) ante, and No. 10260 of D.C.S. MSS., Vol. XVIII.

Contains the second Śataka only.

Fol. 38*a* contains a few stanzas of Śaṭhakōpa. Fol. 38*b* is left blank. Foll. 39*a* and 40*b* give a small portion of Brahmasūtrōpasūtrasaṅgraha. Foll. 39*b* and 40*a* are left blank.

(*f*) जितन्तेस्तोत्रम्.

JITANTĒSTŌTRAM.

Fol. 41.

Same work as that described under R. No. 174(*i*) ante.

Contains the fifth Jitantē only.

(*g*) पाद्मतन्त्रम्.

PĀDMATANTRAM.

Foll. 42—50*b*.

Same work as that described under No. 5?93 of the D.C.S. MSS., Vol. XI.

Contains the Adhyāyas one to five in the Yōgapāda.

Transcribed by Aṇṇāvayyaṅgār on the 27th day of the Paṅguni month in the year Akṣaya (60).

(*h*) ज्ञानसारः, द्राविडगाथासहितः.

JÑĀNASĀRAḤ WITH TAMIL PĀṬṬU.

Foll. 51*a*—54*b*.

See the Tamil Part R. No. 52(*a*) of the Triennial Catalogue for remarks. This is taken from the Sanatkumārasaṁhitā, etc.

Complete.

Beginning:

உண்ணவுடல் । सनत्कुमारसंहितायाम्—

यदा परानन्वयिभिर्दुश्शकस्मृतिभिर्विना ।
तेन तत्पुरतः पातरसा प्रपत्तिस्तदा भवेत् ॥

* * * *

यस्त्वया सह स स्वर्गो निरयो यस्त्वया विना ।
इति जानन्परां प्रीतिं गच्छ राम मया सह ॥
प्रपन्नश्चातको यद्वत् प्रपत्तव्यः कपोतवत् ।
रक्ष्यरक्षकयोरेतल्लक्ष्यं लक्षणमेतयोः ॥

End:

वासुदेवं प्रपन्नानां यान्येव चरितानि वै ।
तान्येव धर्मशास्त्राणीत्येवं वेदविदो विदुः ॥
न शुध्यति तदा जन्तुः तीर्थवारिशतैरपि ।
लीलयैव यथा भूप वैष्णवानां हि वीक्षणैः ॥

(*i*) श्रीभाष्योपोद्घातः.

ŚRĪBHĀṢYŌPŌDGHĀTAḤ.

Foll. 55*a* – 56*b*.

A preface to the Śrībhāṣya of Śrī-Rāmānuja.

Beginning:

अयोगास्पष्टसुस्पष्टप्रधानानुकृतिपादकाः ? ।
. . तर्कस्मृत्युभयलिङ्गपादा द्विकाद्यगाः ॥

* * * *

जिज्ञासापाद एव अयोगव्यवच्छेदपादः । सर्वप्रसिद्ध एव अस्पष्टजीवलिङ्गकपादः । द्युभ्वादिपाद एव स्पष्टजीवलिङ्गकपादः, आनुमानिकपाद एव प्रधानानुकारिपादः ।

भगवान् भाष्यकारः भगवता बादरायणेन प्रणीतानां ब्रह्मसूत्राणामर्थं भाष्यमुखेन विवृणोति । तत्र प्रबन्धारम्भाक्षेपशङ्कापरिहारप्रकारः सर्वेषां पुरुषाणामित्यादिना शारीरकं शास्त्रं व्याचिख्यासितमित्यन्तेन श्रुतप्रकाशिकाया प्रथमग्रन्थेनाभिप्रेतः । स तावत्प्रदर्श्यते ।

End:

अतस्तत्त्वज्ञानोत्पादनमुखेन परोज्जीवनमेव प्रबन्धप्रणयनप्रयोजनम् । तदुज्जिजीवयिषैव हेतुः । अतो हेतुप्रयोजनसद्भावाद्भाष्यारम्भ उपपन्न इति ॥

Fol. 57*a* gives the names of the 18 Purāṇas together with the total number of Granthas contained in each of them. Foll. 57*b* and 58 are left blank.

R. No. **3110.**

Palm-leaf. $12\frac{5}{8} \times 1\frac{5}{8}$ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Presented in 1919-20 by Kṛṣṇammāḷ, daughter of Aṇṇāvayyaṅgār, Vaḍakkurathavīthi, Āḻvārtirunagarī, Tinnevelly district.

प्रमेयमाला.

PRAMĒYAMĀLĀ.

Foll. 2*a*—27*b*. Foll. 1 and 28 are left blank.

Same work as that described under R. No. 2477 ante.

Contains from the Adhyayanavidhi to the Apaśūdranayādivirōdhōpapādana. The colophon is apparently wrong.

Colophon:

प्रमेयमाला सम्पूर्णा ॥

R. No. **3111.**

Palm-leaf. $13\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 81. Lines, 8 in a page. Grantha. Good.

Presented in 1919-20 by Kṛṣṇammāḷ, daughter of Aṇṇāvayyaṅgār, Vaḍakkurathavīthi, Āḻvārtirunagarī, Tinnevelly district.

Fol. 1*a* gives the name of this work. Foll. 1*b*, 2 and 81 are left blank.

सिद्धान्तन्यायचन्द्रिका.

SIDDHĀNTANYĀYACANDRIKĀ.

Foll. 3*a*—80*a*. Fol. 80*b* is left blank.

Same work as that described under R. No. 1834(*a*) ante, wherein see for the beginning.

Incomplete.

End :

अनेनापेक्षितसमर्थनाभावात् अभिध्योपदेशाच्चेति द्वितीयसूत्रार्थोऽपि त्वदुक्तोऽनुपपन्नः । मायां तु प्रकृतिं विद्यादिति श्रुतौ प्रकृतिशब्दस्य प्रधानवाचकत्वेन तच्छब्दवाचकत्वाभावात्त्वया सारास(ा)र

R. No. **3112.**

Palm-leaf. 15¼ × 1¼ inches. Foll. 80. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1919–20 by Kṛṣṇammāḷ, daughter of Aṇṇāvayyaṅgār, Vaḍakkurathavīthi, Āḻvārtirunagarī, Tinnevelly district.

(*a*) संप्रदायचन्द्रिका.

SAṀPRADĀYACANDRIKĀ.

Foll. 1*a*—49*b*.

Same work as that described under R. No. 97 (of the Tamil Part) ante, wherein see for the remaining portion.

Contains the Prakāśas one to seven complete.

Beginning :

श्रीमान् कृष्णः प्रपन्नानां फलदश्शरणं फलम् ।
प्राचामाचार्यवर्याणामिति सिद्धान्तपद्धतिः ॥

ननु शरणपदेनोपायत्वमुच्यते। उपायत्वं च भगवतः फलप्रदत्वमेव । अतः फलदश्चेति पदं निरर्थकमिति चेन्मैवम् । शरणवरणाधिकारिणं प्रति भगवतः फलप्रदत्वव्यतिरेकेण उपायभावस्य दुर्निरूपत्वात ॥

(*b*) श्रीवैकुण्ठस्तवः.

ŚRĪVAIKUṆṬHASTAVAḤ.

Foll. 50*a*—59*a*.

Same work as that described under R. No. 174(*p*) ante.

Complete.

(*c*) अतिमानुषस्तवः.

ATIMĀNUṢASTAVAḤ.

Foll. *59a—65a.*

Same work as that described under No. 9820 of the D.C.S. MSS., Vol. XVIII.

Complete.

श्रीवत्सचिह्नमिश्रेभ्यो नमउक्तिमधीमहे ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥
श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतश्श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

Colophon:

इति श्रीवत्सचिह्नविरचितातिमानुषचेष्टितस्तोत्रं संपूर्णम् ॥

Fol. 65*b* is left blank.

(*d*) सुन्दरराजस्तवः.

SUNDARARĀJASTAVAḤ.

Foll. 66*a*—79*a*.

Same work as that described under R. No. 174(*o*) ante.

This work is also called Sundarabāhustava.

Incomplete.

Foll. 79*b* and 80 are left blank.

R. No. **3113.**

Śrītāla. $10\frac{7}{8} \times 1\frac{3}{4}$ inches. Foll. 29. Lines, 12 in a page. Grantha. Fair.

Presented in 1919–20 by M.R.Ry. Anantanārāyaṇa Śāstrigaḷ, Arumukhamaṅgalam post, Kottarakurichi village, Tinnevelly district.

जनार्दनस्तवः.

JANĀRDANASTAVAḤ.

Foll. 28 and 29 are left blank.

A eulogy addressed to God Janārdana, a form of Viṣṇu, in the Janārdanakṣētra, the sanctity of which is fully brought out herein. This Kṣētra is about 20 miles south of Quillon on the shore of the Arabian sea.

Contains the Adhyāyas 1—10 and 22—27 complete and 28 incomplete.

Beginning:

बालेन्दुमौलितनयस्य महाविभूते-
र्विघ्नेश्वरस्य चरणद्वयमम्बुजाभम् ।
ध्यायामि चेतसि भवार्णवबाडबाम्भ(ग्नि)-
तापत्रयप्रशमनाम्बुदबृन्दलीलम् ॥

ऋषयः—

बादरायणसच्छिष्य प्रियपूर्णकथारस ।
पृच्छामस्त्वामिदं तत्त्वं सूत पौराणिकोत्तम ॥
कल्पक्रोडस्य माहात्म्यं श्रुतं कर्णरसायनम् ।
इदानीं श्रोतुमिच्छाम जनार्दनमहास्थलम् ॥
केन वा निर्मितं क्षेत्रं किमाश्चर्यं वदस्व भो ।
इति पृष्टस्तदा सूतो नैमिशारण्यवासिभिः ॥

* * * *

Colophon:

इति श्रीकाशीखण्ड जनार्दनस्थलमाहात्म्ये प्रथमोऽध्यायः ॥

* * * *

Colophon:

इति श्रीकाशीखण्डे जनार्दनस्थलमहिमानुवर्णनं नाम दशमोऽध्यायः ॥

* * * *

इति प्रसादितो धात्रा भगवान् भक्तवत्सलः ।
प्रसन्नश्च महात्मानः विधिं वचनमब्रवीत् ॥

Colophon:

इति जनार्दन(स्थल)माहात्म्ये द्वाविंशोऽध्यायः ॥

End:

Colophon:

इति जनार्दनस्थलमाहात्म्ये सप्तविंशोऽध्यायः ॥

अथ काले गते दीर्घे कदाचित्पाण्ड्यभूमिपः ।
श्रीमानुरुयशा नाम ब्रह्महत्याभिपीडितः ॥
पर्यटन् विपुलान् देशान्मन्त्रिमात्रसहायवान् ।
क्षेत्राणिचैव तीर्थानि वनानि च विलोकयन् ॥

* * * *

शाकलश्च महात्मा तु विस्मयं परमं गतः ।
क्षेत्रप्रवेशमात्रेण ब्रह्महत्याविनाशनात् ॥

R. No. **3114.**

Palm-leaf. 17¼ × 1⅜ inches. Foll. 77. Lines, 9 in page. Grantha. Fair.

Presented in 1919-20 by M.R.Ry. Anantanārāyaṇa Śāstrigaḷ, Kottarakurichi village, Arumukhamaṅgalam post, Tinnevelly district.

ताम्रपर्णीमाहात्म्यम्.

TĀMRAPARṆĪMĀHĀTMYAM.

Same work as that described under No. 2430 of the D.C.S. MSS., Vol. IV, Part II.

Contains the Adhyāyas 1—32 only.

The scribe adds—

This was transcribed by Ādinārāyaṇaśarman, grandson of Ādinārāyaṇaśarman of Bhāradvājagōtra and Āśvalāyanasūtra, on the 11th day of the dark fortnight of the lunar month Kārttika in the year Vijaya.

R. No. **3115.**

Palm-leaf. 14 × 1½ inches. Foll. 132. Lines, 10 in a page. Grantha. Injured.

Presented in 1919-20 by M.R.Ry. Rāmasvāmivādyār, Mukkani, Attur post, Tinnevelly district.

ताम्रपर्णीमाहात्म्यम्.

TĀMRAPARṆĪMĀHĀTMYAM.

Foll. 1*a*—131*b*.

Same work as that described under No. 2430 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

Fol. 132*a* gives some stanzas on the river Tāmraparṇī. Fol. 132*b* is left blank.

R. No. **3116.**

Palm-leaf. 17¼ × 1¼ inches. Foll. 22. Lines, 7 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Garuḍappa Āḻvārayyaṅgār Sannidhi street, Āḻvārtirunagarī, Tinnevelly district.

शठकोपसहस्रम्.

ŚAṬHAKŌPASAHASRAM.

Similar to the work described under R. No. 3025 ante. By Vēṅkaṭācārya who salutes Madhurakavi and Rāmānujamuni. The author was also called Śaṭhāridāsa and was the disciple Bhaṭṭamunīndra.

Contains the stanzas 501—700 only.

Beginning:

भरो मे विन्यस्तः पदकमलयोस्ते परगुरो
स्थिरोपायस्त्वं मे स्थित इह यतः स्वीकृतभरः ।
सरोभूतादींस्ते सरसभवसार्वज्ञ्यमहितान्
शिरोबाह्वाद्यङ्गं चिरगुरजशिक्षाः खलु विदुः ॥
विदामग्र्यो भक्त्या विमलमतिदीपं व्रजपुरीं
पदान्तर्देहल्यां प्रभुमभिमुखीकृत्य परमम् ।
मुदा भूताख्यो यो मुनिरकृत मुख्यं तमिह ते
विदामासुर्मौलिं विबुधमणयो वेद्मि शठजित् ॥
जितं ते देव श्रीशठरिपुमुने यो ह्रदमुनिः
घृतं सिन्धुं(पात्रं) क्षितिमपि रविं दीपमतनोत् ।
युतं लक्ष्म्या साक्षादकुरुत हरिं योऽप्यथ महान्
मतं तौ ते दिव्यांसकयुगलमित्यार्य महताम् ॥

* * * *

इहामुत्राप्यङ्घ्री तव शरणयन्तावभिमतौ
महाभूमानौ तौ मधुरकविरामानुजमुनी ।
दुहानौ मोदं मे दुरितहरणौ दिव्यसरसी-
रुहाभौ भावत्कौ रुचिरचरणौ हे शठरिपो ॥
शठार्यङ्घ्रौ भक्त्या चतुरमतितद्दासगदितं
दृढाशा चेन्मोक्षे दशकमिदमार्याश्रितजन ।
पठाद्य प्रावण्यं भज परगुरौ ते पुनरिदं
हठात्कुर्यादंहो हरिपदमहानन्ददमथ ॥

End:

एवं शठारिपदमेव गतिं ब्रुवाणो भावं दधान इह भट्टमुनीन्द्रशिष्यः ।
श्रीवेङ्कटार्य इदमाह शठारिदासो दैवं पुरं शतकमीरयतां वशे स्यात् ॥

* * * *

मणिः पङ्के मग्नो मलिन इव मायामसृणितो
ह्यणीयान्य(न)प्या(व्या)संशठजिदनुकम्पास्पदमिति ।
प्रणीतं भट्टेशप्रणयिविदुषा पद्यदशकं
फणन्तो विन्देरन् पदमपुनरावृत्तिपरमम् ॥

R. No. 3117.

Palm-leaf. $9\frac{1}{8} \times 1\frac{1}{8}$ inches. Foll. 47. Lines, 7 in a page. Grantha and Tamil. Fair.

Presented in 1919-20 by M.R.Ry. Sarvaṅgam V. Ayyāsāmi Ācāri, Veyilugautamam street, Tiruchendur, Tinnevelly district.

सनत्कुमारवास्तुशास्त्रम्, द्राविडटीकासहितम्.

SANATKUMĀRAVĀSTUŚĀSTRAM WITH TAMIL MEANING.

Foll. 2*a*—47*b*. Fol. 1*a* gives the name and time of the transcription of the MS. Fol. 1*b* is left blank.

Same work as that described under No. 13060 of the D.C.S. MSS., Vol. XXII, wherein see for the beginning.

Incomplete.

End :

अथ वक्ष्ये विशेषेण आयादि(देः) लक्षणं शृणु ।
नृप कर्तुश्च वास्तूनां सर्वसम्पत्करार्थकम् ॥
क्षुद्रग्रहविहारे च देव्यका(गा)रे तथैव च ।
छायायां गृहसंस्थानं वर्जनीयं प्रयत्नतः ॥

* * * *

एतेषु क्षेत्रदोषेषु न कुर्या(त्)देशकं तथा ॥

R. No. 3118.

Palm-leaf. $22\frac{7}{8} \times 1\frac{3}{4}$ inches. Foll. 192. Lines, 10 in a page. Grantha. Slightly injured.

Presented in 1919-20 by M.R.Ry. Periyanambi Daivachilai Ayyaṅgār, Srivaikuntham, Tinnevelly district.

(*a*) सम्प्रदायचन्द्रिका.

SAMPRADĀYACANDRIKĀ.

Foll. 1*a*—15*b*.

Same work as that described under R. No. 3112 ante.

Contains the Prakāśas one to seven complete.

Foll. 16, 19*b*, 20 and 21*b* are left blank. Foll. 17 and 18 give the Tamil meanings of the Avyayas. Fol. 19*a* gives the Śaraṇāgatipraśaṁsā. Fol. 21*a* gives the third Prakaraṇa of the Śabdamañjarī.

(*b*) पाराशर्यविजयः.

PĀRĀŚARYAVIJAYAḤ.

Foll. 22*a*—192*b*.

Same work as that described under No. 4928 of the D.C.S. MSS., Vol. X.

Contains the first Pāda incomplete in the first Adhyāya. By Mahācārya.

R. No. **3119.**

Palm-leaf. 15¾ × 1½ inches. Foll. 152. Lines, 10 in a page. Grantha. Good.

Presented in 1919–20 by M.R.Ry. Periyanambi Daivachilai Ayyaṅgār, Srivaikuntham, Tinnevelly district.

(*a*) गदाधरीयव्याख्या.

GADĀDHARĪYAVYĀKHYĀ.

Foll. 1*a*—7*a*. Fol. 7*b* is left blank.

Similar to the work described under No. 4077 of the D.C.S. MSS., Vol. VIII.

Contains a small portion of the Pañcalakṣaṇī.

Beginning:

प्रश्नस्थमिति । नञा नामार्थस्यान्योन्याभावबोधने प्रथमान्तानुयोगिवाचकपदसमभिव्याहारस्यात्यन्ताभावबोधने सप्तम्यन्तानुयोगिवाचकपदसमभिव्याहरस्य नियामकतया अनुयोगिवाचकपदाभावे तात्पर्यनिश्चयासम्भवेनाव्यभिचरितत्वमित्यतश्शाब्दबोधासम्भवादिति भावः । जिज्ञासाबोधकवाक्यं प्रश्नः । तच्चानुमितिहेतु(भूत)व्याप्तिज्ञाने का व्याप्तिरिति । तदर्थश्च लिङ्गविशेष्यतानिरूपितानुमितिजनकतावच्छेदकविषयतावती परिभाषया व्याप्तिपदप्रतिपाद्या जिज्ञासाविषय इत्यर्थः ।

End:

नच तथापि तद्धटीयरूपप्रागभावात्मकाभावमादाय अतिव्याप्तिवारणसम्भवादिदमसङ्गतमिति वाच्यम् । दीधितिकृता प्रागभावानङ्गीकारादिति ध्येयम् ॥

(*b*) तत्त्वसङ्ग्रहः.

TATTVASAṄGRAHAḤ.

Foll. 8*a*—12*b*. Foll. 10 and 11 are left blank.

A treatise on Viśiṣṭādvaita-Vēdānta explaining that the universe is composed of God as the ordainer, the soul as the enjoyer, and the things in the world as objects of enjoyment.

Incomplete.

Beginning :

प्रणम्य प्रणतार्तीनां हर्तारं हरिमिन्दिराम् ।
आचाच(र्यांश्चा)त्मतत्त्वज्ञान् क्रियते तत्त्वसङ्ग्रहः ॥

विश्वं चेदं भोक्तृभोग्यनियन्तृरूपेण कोटित्रयेऽन्तर्भवति । अत्र भोग्यं ज्ञेयतैकस्वरूपं वस्तु । भोक्ता च ज्ञातृतैकस्वरूपः । नियन्तृतैकस्वरूपश्च नियन्ता । अत्रैकशब्दैः भोक्तृनियन्तृनियम्यत्वानि निषिध्यन्ते । न चतदतिरिक्तमस्ति । अभोक्तुरभोग्यस्यानियन्तुरन्यस्य कस्यचिदपि प्रतीतिपथानारोहात् ।

End :

अन्यथा सर्वगतत्वनिर्देशस्य स्वरूपव्याप्तिपरत्वे उभयोस्सर्वत्र व्याप्त्युपपादनात् । न तु पुंलिङ्गकाः पदार्थरूपं स्त्रीलिङ्गकाः लक्ष्मीरूपमिति विभागो नोपपद्यते । एवमुत्तरत्राप्युपपादितम्—

भागैर्यथा जगत्स्वामी देवदेवो जनार्दनः ।
अवतारं करोत्येषा तथा श्रीस्तत्सहायिनी ॥ पु.

Foll. 13—17*b* contain the Pañcalakṣaṇī, Siṁhavyāghrī and Caturdaśalakṣaṇī being certain portions of the Tattvacintāmaṇi and Dīdhiti. Foll. 17*b* and 18 contain some discussion about Siṁhavyāghrī. Foll. 19 and 20 contain Vyāptivādārthaṭippaṇī written by a disciple of Kauśika-Śrīkṛṣṇa.

(*c*) तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Foll. 21*a*—146*a*.

Same work as that described under Nos. 4041 and 4049 of the D.C.S. MSS., Vol. VIII.

Contains the Pañcalakṣaṇī, Siṁhavyāghrī, Sārvabhaumapariṣkāra; and breaks off in the Kūṭaghaṭitalakṣaṇa of the Caturdaśalakṣaṇī.

The scribe adds—

युवाख्यसंवत्सरशैशव(शिरे) ऋतौ मीने तु संयुक्तदिवाकरेऽस्मिन् ।
सुरार्यवारे शुभतारके च श्रीसार्वभौमस्य कृतं लिखन्मया ? ॥

Foll. 54*b*, 146*b*, 149—152 are left blank. Fol. 147*a* gives the Nāndīślōka as found in the Śākuntalanāṭaka. Fol, 147*b* contains something relating to astrology. Fol. 148 contains some private household accounts.

R. No. **3120.**

Palm-leaf. $18\frac{1}{8} \times 1\frac{3}{4}$ inches. Foll. 94. Lines, 12 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Periyanambi Daivachilai Ayyaṅgār, Srivaikuntham, Tinnevelly district.

(*a*) ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रदीपिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ : ŚRUTAPRADĪPIKĀ.

Foll. 1*a*—44*a*. Foll. 38*b*, 39, 44*b*, 45 and 46 are left blank.

Same work as that described under Nos. 4961 and 4962 of the D.C.S. MSS., Vol. X.

Contains the Jijñāsādhikaraṇa incomplete.

(*b*) सिद्धान्तन्यायचन्द्रिका.

SIDDHĀNTANYĀYACANDRIKĀ.

Foll. 47*a*—89*b*. Foll. 90—94 are left bank.

Same work as that described under R. Nos. 1834(*a*) and 3111 ante. Incomplete.

R. No. **3121.**

Palm-leaf. $17\frac{1}{8} \times 1\frac{5}{8}$ inches. Foll. 93. Lines, 11 in a page. Grantha. Slightly injured.

Presented in 1919-20 by M.R.Ry. Periyanambi Daivachilai Ayyaṅgār, Srivaikuntham, Tinnevelly district.

विष्णुपरत्वनिर्णयः.

VIṢṆUPARATVANIRṆAYAH.

Foll. 52*b*, 60*b*, 67*b* and 69*a* are left blank.

Similar to the work described under No. 4891 of the D.C.S. MSS., Vol. X.

Incomplete and wants the beginning.

Beginning :

भगवदवतारनिष्ठोत्पत्त्यादयः प्रसज्येरन्निति चेन्न, उत्पत्तिविनाशवृद्धिक्षयकर्मवश्यत्वादिहेयगुणराहित्यस्य . . . . शोकादिच(वि)काराणामभिनयरूपत(ा)याश्च सात्त्विकानेकोपबृंहणसिद्धत्ववत् ब्रह्मरुद्रविषये तादृशघटकवचन-

लेशाभावाच्च । तथा चाम्नायते चतुर्वेदशिखायां वासुदेव(:)सङ्कर्षणः प्रद्युम्नोऽनिरुद्धः

*   *   *   *

सुबालोपनिषदि स एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः । तापनीयोपनिषदि—ओङ्कारं सर्वेश्वरं . . . . . नारसिंहं तत्त्वमित्यनुसन्दध्यात् ।

End:

विमलान्यूर्ध्वपुण्ड्राणि सान्तरालानि यो नरः ।
करोति विपुलं तत्र मन्दिरं मे करोति सः ॥
ऊर्ध्वपुण्ड्रस्य मध्ये तु विशालेऽतिमनोहरे ।
लक्ष्म्या सार्धं समासीनो रमेऽहं तत्र निर्वृतः ॥
-निरन्तरालं यः कुर्यादूर्ध्वपुण्ड्रं द्विजाधमः ।

R. No. 3122.

Palm-leaf. $15\frac{7}{8} \times 1\frac{1}{4}$ inches. Foll. 30. Lines, 7 in a page. Grantha. Injured.

Presented in 1919–20 by M.R.Ry. Periyanambi Rāmānujayyaṅgār, Mēlatirumāḻikai, Srivaikuntham, Tinnevelly district.

फुल्लारण्यमाहात्म्यम्.

PHULLĀRAṆYAMĀHĀTMYAM.

Foll. 2*a*—30*a*. Fol. 1 gives again the beginning of the work. Fol. 30*b* is left blank.

A treatise on the greatness and religious sanctity of Phullāraṇya (Tiruppullāṇi) in the Ramanad district.

Contains the Adhyāyas 67—76 only. Taken from the Agni-purāṇa.

Beginning:

श्रीमानादिजगत्प्रभुश्श्रुतिशिरोमृग्यः त्रिपाद्वैभवः
श्रीवैकुण्ठनिकेतनादिह समागत्य श्रिया सादरम् ।
फुल्लारण्यमुपेत्य पुष्पितमिदं फुल्लर्षिमानन्दयन्
सल्लापेन चिरं निवासमकरोद्यो नस्स पायाद्धरिः ॥

*   *   *   *

आविर्भूय श्रिया सार्धमास्तेऽश्वत्थतरोरधः ।
दर्भासनस्थो भगवानादिदेवो जगत्प्रभुः ॥

Colophon:

इत्याग्नेयपुराणे भुवनकोशवर्णने फुल्लारण्यमाहात्म्ये सप्तषष्टितमोऽध्यायः ॥

End:

य इदं पुण्यमाख्यानं सर्वसम्पत्प्रदायकम् ।
आयुष्यमारोग्यकरं पुत्रपौत्राभिवर्धकम् ॥
पठन्ति दिव्यचापस्य सन्निधौ सततं हरेः ।
शृण्वन्त्यपि च ये भक्त्या सर्वान् कामानवाप्नुयुः ॥

Colophon:

इत्याग्नेयपुराणे भुवनकोशवर्णने फुल्लारण्यमाहात्म्ये षट्सप्ततितमोऽध्यायः ॥

The scribe adds—

महापूर्णकुलोद्भूतचोरनाथार्यसूनुना ।
लिखितं फुल्लमाहात्म्यं दिव्यचापार्यपाणिना ॥

R. No. **3123.**

Palm-leaf. $15\frac{7}{8} \times 1\frac{1}{4}$ inches. Foll. 5. Lines, 5 in a page. Grantha. Slightly injured.

Presented in 1919–20 by M.R.Ry. Periyanambi Rāmānujayyaṅgār, Mēlatirumāḷikai, Srivaikuntham, Tinnevelly district.

मन्त्रार्थकारिका.

MANTRĀRTHAKĀRIKĀ.

Foll. 1*a*—4*b*. Fol. 5*a* contains one stanza by way of explaining the Tirumantra. Fol. 5*b* is left blank.

Explains in verse the meaning of the Tirumantra or the eight-syllabled prayer-formula of the Śrī-Vaiṣṇava. By Nārāyaṇa who salutes Vīrarāghavācārya, son of Raghunāthācārya of Kandāḍai family (Kūrakula).

Complete.

Beginning:

श्रीकूरकुलकन्दाडवंशवार्धिसुधाकरम् ।
रघुनाथार्यजं वीरराघवार्यं भजाम्यहम् ॥
अष्टाक्षरमनावाद्यपदत्रयविभागतः ।
शेषत्वं पारतन्त्र्यं च कैङ्कर्यं प्रतिपादितम् ॥
प्रणवोक्तमात्मरूपं विरोध्युपायौ नमःपदेनोक्तौ ।
नारायणायपदयोः प्रमितौ च परस्वरूपपुरुषार्थौ ॥

एवं प्रतिपादितेऽर्थपञ्चके प्रत्येकमेकैकार्थस्य पञ्चविधं तत्त्वम् । यथा—

नित्या मुक्ताश्च बद्धाश्च केवलाश्च मुमुक्षवः ।
एवं पञ्चविधा जीवा विद्वद्भिः परिकीर्तिताः ॥

End:

मोक्षयिष्यामीति पदे तन्निवृत्तिः प्रकीर्त्यते ।
पदेन मा शुच इति शोकोपहतिपूर्वकम् ॥
निर्भरत्वानुसन्धानमनुसन्धानमुच्यते ।
रुच्या हितं तु तात्पर्यं शरण्यस्य महात्मनः ॥
वाक्यार्थः प्रापकस्यात्र स्वरूपस्य निरूपणम् ।
शेषित्वरूपकथनं प्रधानार्थ इति स्फुटम् ॥
चिन्तापत्तनवंशाब्धिचन्द्रो नारायणाह्वयः ।
चक्रे हिताय मन्त्रार्थकारिकामालिकां सताम् ॥

R. No. **3124.**

Palm-leaf. $14\frac{7}{8} \times 1\frac{5}{8}$ inches. Foll. 51. Lines, 10 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Bhūmipālaka Ayyaṅgār, Sannidhi street, Srivaikuntham, Tinnevelly district.

Fol. 1 contains some Nāyikāviṣayavacanas.

(*a*) व्युत्पत्तिदीपिका.

VYUTPATTIDĪPIKĀ.

Foll. 2*a*—17*b*. Foll. 18—22 are left blank.

A treatise in grammar, the stanzas given as illustrations being in praise of Saint Śaṭhakōpamuni alias Nammāḻvār.

Contains the first Paricchēda incomplete.

Beginning:

प्रणम्य प्रज्ञयोत्तुङ्गं पद्मया पत्रलं महः ।
साधुप्रीत्यै करिष्यामि साध्वीं व्युत्पत्तिदीपिकाम् ॥

अर्थानां वाचकाश्शब्दाः । ते प्रत्ययांशव्यतिरिक्तांशेषु प्रकृतिनामधेयमनुभवन्ति । प्रकृत्याश्रयिणस्तदर्थमात्रवाचिनश्च । अर्थविशेषवाचिनश्च प्रत्ययाः । तद्भेदान्परि वक्ष्यामः । शब्दा धातवो नारायणादयोऽव्ययाश्चेति त्रिविधाः । तत्र धातवो भूवादयः भवनादिक्रियावाचिनस्तिबादिप्रत्ययाननुभवन्ति । ते पुन-

रकर्मकास्सकर्मकाश्चेति द्विविधाः । कर्मलक्षणमुपरि वक्ष्यामः । अकर्मकाश्च स्वाभाविकाकर्मका वैवक्षिकाकर्मका उपसर्गकृताकर्मकत्वकाश्चेति त्रिविधाः ।

अत्र स्वाभाविकाकर्मकोदाहरणम्—

अहंपूर्विकयामोदैरामोदितदिगन्तया ।
विराजते शठारातिर्वरया वकुलस्रजा ॥

अत्र विराजत इति स्वाभाविकाकर्मको धातुः । एवमेकोदाहरणेनैव तत्सदृशधातूदाहरणान्यप्यूह्यानि ।

वैवक्षिकाकर्मको यथा—

सकृद्विमानं द्रष्टारश्शठारेश्शुद्धचेतसः ।
स्वयमेव विमुच्यन्ते संसारादपि पापिनः ॥

End:

शठरिपुमुनिपुर्यां श्रीमतां मन्दिराणां
बहुविधमणिभाजां भाभिरायामिनीभिः ।
कुलिशभृदुचितानां कोटिशः कार्मुकाणां
कुलशिखरिदृढानां काननानि क्रियन्ते ॥

अत्र श्रीमतामिति मतुप् । यामिनीत्यत्र शिखरीत्यत्र(च)इनिप्रत्ययः.

(*b*) रसमञ्जरी.

RASAMAÑJARĪ.

Foll. 23*a*—50*b*. Foll. 24*b*, 27*b*, 32*b* and 39*b* are left blank. Fol. 51*a* gives the Padminyādilakṣaṇa.

Same text as that described under R. No. 680 ante. By Bhānu, son of Gaṇēśvara of Vidēha country.

Complete.

तातो यस्य गणेश्वरः कविकुलालङ्कारचूडामणिः
देशो यस्य विदेहभूस्सुरसरित्कल्लोलकिम्मीरिता ।
पद्येन स्वकृतेन तेन कविना श्रीभानुना योजिता
वाग्देवीश्रुतिपारिजातकलिकास्पर्धाकरी मञ्जरी ॥

The scribe adds—

श्रीभानुदत्तकलिता गोपालाख्येन (वि)लिखिता सेयम् ।
रसमञ्जरी रसज्ञश्रोत्रपुटीं दिशतु दीर्घतराकुलम् (?) ॥

R. No. 3125.

Palm-leaf. $14\frac{7}{8} \times 1\frac{1}{2}$ and $14\frac{1}{8} \times 1\frac{3}{8}$ inches. Foll. 72. Lines, 6 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Bhūmipalaka Ayyaṅgār, Sannidhi street, Srivaikuntham, Tinnevelly district.

(*a*) प्रमेयमाला.

PRAMĒYAMĀLĀ.

Foll. 1*a*—12*b*.

Same work as that described under R. No. 2477 ante. By Varadasūri of Śrīvatsagōtra.

Contains the Prapañcamithyātvabhaṅga, Bhēdadūṣaṇanistāra, Bhāvāntarābhāvasamarthana and Akhaṇḍavākyārthabhaṅga (incomplete).

(*b*) श्रीसूक्तभाष्यम्.

ŚRĪSŪKTABHĀṢYAM.

Foll. 13*a*—27*b*.

Similar to the work described under No. 25 of the D.C.S. MSS., Vol. I, Part I.

Complete.

Beginning :

व्यापनभरणनियमनस्वाम्यादिना सर्वेश्वरीत्वं, सुरासुरमनुष्यादिस्तुत्यत्वतत्समाराध्यत्वाखिलहेयप्रत्यनीकत्वकल्याणैकतानत्वं, सर्वलोकस्य तत्कटाक्षलवसमुल्लसितत्वं, लोकस्य सर्वस्य कटाक्षाभावमात्रविनाशित्वं, यज्ञदानतपस्सत्यशुद्धिसमृद्धिबुद्धिप्रभृतीनामपि तत्कटाक्षायत्तत्वं, भोगमोक्षप्रदत्वमशरण्यशरण्यत्वमित्याद्यर्थजातं तदसाधारणमनन्यगोचरं प्रतिपादयता वसिष्ठपुलस्त्यवरप्रसादलब्धपरदेवतापारमार्थ्यज्ञानेन भगवता पराशरेण श्रीरेव सर्वेश्वरीति सर्वासां श्रुतीनामुपबृंहणं बहुभिस्तात्पर्यलिङ्गैस्सुदृढं समुद्भावितम् ।

* * * *

एवं श्रुतिस्मृत्यादिषु प्रतिपाद्यमानानां लक्ष्मीस्वरूपविभवानां सामर्थ्यं श्रीसूक्ते प्रदश्य(दृश्य)ते ।

हिरण्यश्रीपुत्रश्रीसूक्तस्य ऋषिः स्मृतः ।
देवता सैव विज्ञेया छन्दश्चात्र निगद्यते ॥
चतुर्थी पञ्चमी चात्र त्रैष्टुभौ छान्दसौ स्मृतौ

* * * *

हे जातवेदः लक्ष्मीपते, जातं स्वतस्सिद्धं, वेदं धनं ज्ञानं वा यशो वा यस्य, स्वतस्सिद्धसर्वज्ञत्वादिकं नारायणस्यैव ब्रह्मादीनां सर्वज्ञत्वस्य नारायणाधीनत्वात् ।

End :

श्रियं पञ्चदशर्चं तु श्रीकामस्सततं जपेत् ।

इति । पुराणान्तरेष्वपि—

श्रीसूक्तं (तु)जपेन्नित्यमृग्भिस्तामर्चयेत् श्रियम् ।
श्रीकामो जुहुयादग्नौ पद्मैर्बिल्वैस्तथा फलैः ॥

(c) क्षमाषोडशी, सव्याख्या.

KṢAMĀṢOḌAŚĪ WITH COMMENTARY.

Foll 28*a*—48*a*. Fol. 48*b* is left blank.

Same work as that described under No. 9934 of the D.C.S. MSS., Vol. XVIII, but with the commentary described under R. No. 88*b* (of the Tamil Part) ante, and with two additional stanzas in the beginning.

यश्चक्रे रङ्गिणस्तोत्रं (. .) वेदाचार्यं तमाश्रये ॥
श्रीपराशरभट्टार्यः (. . .) मेऽस्तु भूयसे ॥
श्रीरङ्गेश (. . .) विजयतां क्षेमाय सर्वात्मनाम् ॥

(d) ब्रह्मसूत्रभाष्यम्.

BRAHMASŪTRABHĀṢYAM.

Foll. 49*a*—57*a*. Fol. 57*b* is left blank.

Same work as that described under No. 4943 of the D.C.S. MSS., Vol. X, but seven additional stanzas are given in the beginning.

Contains the Jijñāsādhikaraṇa incomplete.

वरदगुरुवेङ्कटेशौ रामानुजवरदविष्णुचित्तार्यान् ।
कुरुकेश्वरभाष्यकृतौ नमामि नाथेन यामुनं व्यासम् ॥
यतीन्द्रकृतभाष्यार्था यद्व्याख्यानेन दर्शिताः ।
वरं सुदर्शनार्यं तं वन्दे कूरकुलाधिपम् ॥

* * * *

शमदमादिगुणैकनिकेतनं चरमपर्वणि निश्चलचेतसम् ।
यतिवराङ्घ्रिसरोरुहषट्पदं समरपुङ्गवसद्गुरुमाश्रये ॥

(e) ब्रह्मसूत्रम्.

BRAHMASŪTRAM.

Foll. 58*a*—72*b*.

Same work as that described under No. 4649 of the D.C.S. MSS., Vol. IX.

Complete.

R. No. 3126.

Palm-leaf. 15 × 1⅜ inches. Foll. 98. Lines, 9 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Ādinārāyaṇa Śrautigaḷ of Kallidakurichi, Tinnevelly district.

Fol. 1*a* gives the names of the works in this MS. Foll. 1*b*—3*b* are left blank.

(*a*) जयन्तीपुरमाहात्म्यम्.

JAYANTĪPURAMĀHĀTMYAM.

Foll. 4*a*—43*b*.

On the origin and religious sanctity of Jayantīpura (Tiruccendūr) on the seashore, near the Gandhamādana mountain in the Tinnevelly district. The sacred shrine in that place is dedicated to the worship of God Skanda or Subrahmaṇya.

Complete in 1—18 Adhyāyas. Taken from the Skānda-purāṇa.

The copying of this MS. is said to have been completed on the 15th day of the Paṅguni month in the Śaka year 1316.

Beginning:

शुक्लाम्बरधरं विष्णुं (. . .) सर्वविघ्नोपशान्तये ॥

* * * *

नैमिशेऽनिमिषक्षेत्रे तपोधर्मसमृद्धिदे ।
(सु)समृद्धे समित्पुष्पकुशादिभिरलङ्कृते ॥
सत्रमारब्धवान् तत्र शौनको भगवान् ऋषिः ।
तत्राजग्मुर्महात्मानो मुनयः क्षीणकल्मषाः ॥

* * * *

इदानीं श्रोतुमिच्छामो गुहस्य परमात्मनः ।
कथां कलिमलौघानां विध्वंसनविनोदिनीम् ॥
पुरा तारकसंहारं शूरसंहारमेव च ।
विधाय लोक्ष(क)रक्षार्थं देवर्षिविधिपूजितः ॥
ऋषिभिः प्रार्थितो देवः सर्वेषां सर्वकामदः ।
सिन्धुतीरे जयन्त्याख्ये गन्धमादनपर्वते ॥

दर्शनात्स्मरणान्नृणां भुक्तिमुक्तिफलप्रदः ।
सान्निध्यं कुरुतेऽद्यापि शक्तिद्वयसमन्वितः ॥
इति त्वत्तः श्रुतं पूर्वं षण्मुखस्य महेशितुः ।
सिन्धुतीरं कथं विद्वन् जयन्त्याख्या कथं च तत् ॥
केन चादौ समानीतं गन्धमादनपर्वतम् ।
तीर्थस्य वैभवं किं तत् श्रीमदागमनं कथम् ॥
वल्ल्याश्च देवसेनायाः कथं कल्याणमातनोत् ।
भृत्यानाञ्च मुनीन्द्राणां गुहपादाब्जसेविनाम् ॥
* * * *

Colophon:

इति स्कान्दे पुराणे उपरिभागे स्थानवैभवखण्डे श्रीजयन्तीपुरमाहात्म्ये प्रथमोऽध्यायः ॥

End:

एतत् जयन्तिमाहात्म्यं ये शृण्वन्ति समाहिताः ।
ते सर्वे सर्वकामार्थमोक्षवल्लीसमाहिताः ॥
* * * *
जगन्नाथं शार्ङ्गपाणिं षण्मुखं वीरबाहुकम् ।
वल्लीं च देवसेनां च मयूरं कुक्कुटं ध्वजम् ॥
विमानरूपं ब्रह्माणं गन्धमादनपर्वतम् ।
अस्वतन्त्रैर्मुनिवरैश्श्रीमत्पादाब्जसेवकैः ॥
सेवितं गणनाथैश्च महासेनं मुनीश्वराः ।
प्रतिवर्षं निषेव्यैव कृतकृत्यो भविष्यति ॥

Colophon:

इति स्कान्दे पुराणे उपरिभागे स्थानवैभवखण्डे व्यासशुकसंवादे श्रीजयन्तीपुरमाहात्म्ये अष्टादशोऽध्यायः ॥

(*b*) कुशलवोपाख्यानम्.

KUŚALAVŌPĀKHYĀNAM.

Foll. 44*a*—74*a*. Fol. 74*b* is left blank.

Same work as that described under No. 1979 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

(c) हरिश्चन्द्रोपाख्यानम्.
HARIŚCANDRŌPĀKHYĀNAM.

Foll. 75*a*—98*b*.

Same work as that described under No. 2101 of the D.C.S. MSS., Vol. IV, Part I, but two additional stanzas are given in the beginning.

शुक्लाम्बरधरं विष्णुं (. . .) सर्वविघ्नोपशान्तये ॥
यस्याः प्रसादमात्रेण वाग्विभूतिर्विजृम्भते ।
सा भारती चिरं नित्यं रमन्तां मन्मुखाम्बुजे ॥

R. No. 3127.

Palm-leaf. $16\frac{1}{8} \times 1\frac{1}{2}$ inches. Foll. 83. Lines, 12 in a page. Grantha and Tamil. Slightly injured.

Presented in 1919-20 by M.R.Ry. Ādinārāyaṇa Śrautigaḻ of Kalliḍakurichi, Tinnevelly district.

नामलिङ्गानुशासनव्याख्या—अमरपञ्जिका.
NĀMALIṄGĀNUŚĀSANAVYĀKHYĀ: AMARAPAÑJIKĀ.

Foll. 1*a*—76*a*. Foll. 14*b*, 76*b*, 77, 81*b*, 82 and 83 are left blank.

Same work as that described under No. 1708 of the D.C.S. MSS., Vol. III.

Foll. 78*a*—81*a* give the names of several medical shrubs, with Tamil meaning.

R. No. 3128.

Śrītāla. $13\frac{1}{2} \times 1\frac{3}{4}$ inches. Foll. 37. Lines, 11 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Veṅkaṭarāmavādyār, Brahmadēśam village, Ambāsamudram taluk, Tinnevelly district.

तत्त्वविवेकटिप्पणी—अद्वैतरत्नकोशपूरणी.
TATTVAVIVĒKAṬIPPAṆĪ: ADVAITARATNAKŌŚA-PŪRAṆĪ.

Foll. 1*a*—33*b*. Foll. 34—37 are left blank.

Same work as that described under No. 4591 of the D.C.S. MSS., Vol. IX.

This commentary is also called Tattvavivēcinī.

Contains the first Paricchēda incomplete.

R. No. 3129.

Palm-leaf. $15\frac{1}{2} \times 1\frac{3}{8}$ inches. Foll. 17. Lines, 8 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. B. I. Veṅkaṭarāma Ayyar, Brahmadēśam village, Ambasamudram taluk, Tinnevelly district.

अघपञ्चषष्टिः, सव्याख्या.

AGHAPAÑCAṢAṢṬIḤ WITH COMMENTARY.

Same work as that described under R. No. 163 ante ; but without colophon.

Complete.

मधुसूदनस्यायं ग्रन्थस्स्वहस्तालिखितः ॥

R. No. **3130.**

Palm-leaf. $14\frac{3}{4} \times 1\frac{5}{8}$ inches. Foll. 49. Lines, 5 in a page. Grantha. Good.

Presented in 1919–20 by M.R.Ry. B. I. Veṅkaṭarāma Ayyar, Brahmadēśam village, Ambasamudram taluk, Tinnevelly district.

(*a*) विश्वगुणादर्शव्याख्या—सारमञ्जरी.

VIŚVAGUṆĀDARŚAVYĀKHYĀ : SĀRAMAÑJARĪ.

Foll. 1*a*—21*a*. Fol. 21*b* is left blank.

A brief commentary on the Viśavaguṇādarśa of Ātrēya-Vēṅkaṭādhvarin, which is described under R. No. 1067 ante ; by Prabhākarakavi, son of Lakṣmīdhara.

Complete.

Scribe : Muddusvāmin, son of Kṛṣṇa, who completed the transcription in the Tai month of the Śaka year 1017.

Beginning :

लक्ष्मीधरसुतः कश्चित् प्रभाकरकविर्व्यधात् ।
व्याख्यां विश्वगुणादर्शकृतेस्तां सारमञ्जरीम् ॥

श्रीराजीवेति । मुरारेः नाभिपद्मे । श्रीराजीवाक्षवक्षस्स्थलनिलयरमाहस्तवास्तव्यलोलल्लीलाब्जात् ।

* * * *

पुरोभागिपदं दोषैकदृक्स्थानम् । विशिनष्टि विशेषतः उत्पादयति । हेमवर्णम् ण(स्वर्ण)वर्णम् इत्युपचारः । महारम्भः उत्सवारम्भः । अमिषतां स्तब्धानाम् । पश्यच्चरणः गौतमः । रोबको बाणः । कृषी करोतु ।

End :

शबरादयः एतन्नामकाः केचन मीमांसकमतप्रवर्तकाः । सत्तां स्थितिम् । वीश्वरमीश्वररहितम् । तेषां कर्मब्रह्मवादित्वादिति भावः ।

* * * *

कृशानु(न)वन्तु कृशानुवदाचरन्तु । विश्वावसवन्तु विश्वावसुवदाचरन्तु इत्यर्थः । सन्तः शुभगुणपूर्णाः ॥

Colophon :

विश्वगुणादर्शसङ्ग्रहव्याख्यानं सम्पूर्णम् ॥

Scribe : Brahmadēśam Hariharavēṅkaṭēśa. Date of completion 17th day in the month Tai of the Śaka year 1317.

(b) वसन्ततिलकभाणः.

VASANTATILAKABHĀṆAḤ.

Foll. 22a—33a. Foll. 33b—49b are left blank.

Same work as that described under R. No. 1467 ante.

Incomplete.

R. No. **3131.**

Palm-leaf. 15½ × 1¼ inches. Foll. 82. Lines, 7 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Veṅkaṭarāmavādyār, Brahmadēśam village, Ambasamudram taluk, Tinnevelly district.

(a) आतुरसन्न्यासविधिः.

ĀTURASANNYĀSAVIDHIḤ.

Foll. 1a—10a. Fol. 10b is left blank.

Same work as that described under R. No. 1492(e) ante.

Complete.

(b) सर्वप्रायश्चित्तविधिः.

SARVAPRĀYAŚCITTAVIDHIḤ.

Foll. 10a—13a. Fol. 13b is left blank.

Similar to the work described under R. No. 1523(b) ante, but with Anukramaṇikā and with slight difference in the beginning and the end.

Incomplete.

Beginning :

अथ सर्वप्रायश्चित्तविधिरुच्यते—आदौ जलस्नानं, सभ्यार्चनं, विज्ञापनप्रकारः, सभायाः स्मृतिमार्गेण प्रायश्चित्तनिर्णयः, विधायकवरणतद्दाक्षिणानुवादकवरणं, तद्दक्षिणा, विधायकानुवादकानां वाक्यप्रकारः ।

(c) ग्रामोत्पातशान्तिः.

GRĀMŌTPĀTAŚĀNTIḤ.

Foll. 14a—18b.

Similar to the work described under No. 3617 of the D.C.S. MSS., Vol. VII.

Complete.

Beginning :

अथ ग्रामोत्पात[न]शान्तिविधिं व्याख्यास्यामः—ग्रामाग्निदाहे महाव्याधिपीडने बहुप्राणिमरणे सृगालरोदने ग्राममध्ये मधूत्पन्ने रक्तवल्मीकोत्पन्ने पर्वतनिवेशपतने गोवायससन्दर्शने पुच्छनक्षत्रदर्शने प्रतिसूर्यदर्शने च धूमकेतुदर्शने

* * * *

एतेषां दोषाणां तत्तद्दोषनिवारणार्थं ग्रामशान्तिं कुर्यात् ।

End:

एवंप्रकारेण सप्तदशाहं च सप्तदिनं च कुर्यात् । एवं समस्तदोषोत्पातशान्तिर्भविष्यतीत्याह भगवान् बोधायनः ॥

Colophon:

इति ग्रामोत्पातशान्तिः समाप्ता ॥

(*d*) गृहनिर्माणविधिः, वास्तुहोमसहितः.

GṚHANIRMĀṆAVIDHIḤ WITH VĀSTUHŌMA.

Foll. 18*b*—20*b*.

On the ceremonial procedure, etc., to be observed in connection with the construction of a house with a view to make its occupation happy and auspicious.

Complete.

Beginning:

एवंगुणविशेषणविशिष्टायां पुण्यतिथौ गृहानिर्माणं करिष्ये । दक्षिणाप्रत्यक्प्रवणमगारावकाशमुद्धृत्य पालाशेन शमीमयेन बोदूहेने(दे)तामेव दिशमुत्तरयोदूहति ।

* * * *

एवं गृहनिर्माणं कृत्वा अनन्तरं सङ्कल्प्य अस्यां पुण्यतिथौ गृहप्रवेशवास्तुहोमं करिष्ये ।

End:

उत्तरेण यजुषा अगारं त्रिः प्रदक्षिणं निवेशनं वा परिषिच्य, अभ्युदयपुण्याहं च कृत्वा ब्राह्मणान् भोजयेदपूपैस्सक्तुभिरोदनेनेति ।

Colophon:

इति वास्तुहोमं(मः) समाप्तम्(ः) ॥

(*e*) कुहूशान्तिः.

KUHŪŚĀNTIḤ.

Foll. 21*a* and 21*b*.

Same work as that described under No. 3278 of the D.C.S. MSS., Vol. VI.

Incomplete.

(*f*) सर्पशान्तिः.

SARPAŚĀNTIḤ.

Foll. 21*b*—24*a*.

Sarpaśānti (Bōdhāyanīya) is the same as that described under No. 3457 of the D.C.S. MSS., Vol. VII.

Contains the Sarpaśānti (Bōdhāyanīya and Śaunakīya) complete.

Beginning :

शौनकोक्तसर्पशान्तिः । रुद्रकुम्भे—नमस्ते रुद्र, अग्नाविष्णू, त्वमग्ने रुद्र, मृत्युसूक्तम्, अपैतु मृत्युः ।

End :

ऋतुकाले पिबेद्वन्ध्या फलार्धं क्षीरमिश्रितम् ।
उद्वेजन्ति विनिद्रां च त्यजेत् ध्यायेत्सनातनम् ॥

(*g*) नागप्रतिष्ठाविधिः.

NĀGAPRATIṢṬHĀVIDHIḤ.

Foll. 24*a*—26*a*. Fol. 26*b* is left blank.

Similar to the work described under No. 3651 of the D.C.S. MSS., Vol. VII.

Incomplete.

Beginning :

अथातो नागप्रतिष्ठां व्याख्यास्यामः—मृतप्रजा काकवन्ध्या जन्मवन्ध्या नदीतीरे पिप्पलमूले वा चत्वा(तु)रो ब्राह्मणानाचार्यपुरस्सरं पूर्वं वरणं कृत्वा पुण्ये नक्षत्रे आश्लेषानक्षत्रे चतुर्थ्यां वा पुण्याहं कुर्यात् ।

End :

सर्पस्य दोषं शमयतु प्रभुः स्वाहा । प्रजापतय इदं

* * * *

कालरूपी व्यपोहतु स्वाहा । सूर्याय इदम्.

(*h*) सिद्धान्तशिक्षा, सव्याख्या.

SIDDHĀNTAŚIKṢĀ WITH COMMENTARY.

Foll. 27*a*—81*a*. Fol. 81*b* is left blank. Fol. 82*a* contains a few stanzas of Āśaucaviṣaya and fol. 82*b* contains the names of three works.

Same work as that described under No. 1012 of the D.C.S. MSS., Vol. II.

Name of the scribe : Śēṣagiri. Date of transcription : Tuesday, the 11th day of Cittirai in the year Khara.

R. No. **3132.**

Śrītāla. 7¼ × 1⅓ inches. Foll. 171. Lines, 13 in a page Grantha and Malayālam. Slightly injured.

Presented in 1919-20 by M.R.Ry. Veṅkaṭarāmavādyār, Brahmadēśam village, Ambasamudram taluk, Tinnevelly district.

(*a*) ब्रह्मसूत्रम्.

BRAHMASŪTRAM.

Foll. 1*a*—11*a*. Fol. 11*b* is left blank.

Same work as that described under No. 4649 of the D.C.S. MSS., Vol. IX.

Wants the beginning; otherwise complete.

(*b*) मनीषापञ्चकम्, लघुविवरणसहितम्.

MANĪṢĀPAÑCAKAM WITH LAHGUVIVARAṆA.

Foll. 12*a*—25*a*. Fol. 25*b* is left blank.

A short commentary on the Manīṣāpañcaka, which work has been described under No. 4705 of the D.C.S. MSS., Vol. IX.

Complete.

Beginning:

यद्वेदादौ स्वर इति बुधैः प्रोच्यते यः परस्मात्
ब्रह्मादेरप्यधिकविभवं यत्स्थितं नैगमान्ते ।
यस्सर्वस्य प्रकृतिजनितस्यास्य लोकस्य हेतुः
प्रत्यक्ज्योतिः परमममृतं धीमहि ब्रह्म तत्सत् ॥
यत्पादाब्जप्रभवविमलश्रीपरागालिभास्व-
न्मत्स्वान्तस्थं प्रणुदति तमःपुञ्जमत्यन्तचण्डम् ।
यत्कारुण्यप्लवपरिजुषा तारिता(तोऽ)नेन तूर्णं
संसाराब्धिः प्रणतिरनिशं स्याद्गुरूणां पदाब्जे ॥
यद्भाष्योक्तेर्लवपरिजुषाः छात्रवर्गा महान्तः
निर्भिन्दन्ति प्रबलमतयो वादिशैलं समस्तम् ।
यैर्वेदाब्धेरमृतमिव यद्भाष्यमात्मप्रकाशं
य(त)त्पादाब्जं स्फुरतु हृदये ह्यद्वयं सर्वदा मे ॥

अत्र खलु जगतीविचित्रानेककर्मफलभूतानन्तसुकृतपरिपाकवशात्

* * * *

जुगुप्सितान्त्यजवेषधारी स्वदूरीकरणेच्छं द्विजवरं प्रत्याचष्टे—अन्नमयादन्नमयमिति ।

अन्नमयादन्नमयं त्वथवा चैतन्यमेव चैतन्यात् ।
द्विजवर दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति ॥

हे द्विजवर ब्राह्मणश्रेष्ठ । अन्नमयात् अन्नमयविकारात् ।

End :

स तु सुरेन्द्रवन्दितपदः, सुरेन्द्रैः [वन्दितः] ब्रह्मादिभिः वन्दितं नमस्कृतं वि(प)द्यतेऽहमिति ज्ञायत इति पदं प्रत्यगभिन्नपरमानन्दब्रह्मस्वरूपं यस्य सः । ब्रह्मज्ञानिनः ब्रह्मस्वरूपत्वात् ब्रह्मादिभिरप्यनुसन्धेय इति भावः । स तु मम गुरुरिति मनीषा । निश्चयं नूनम् ॥

Colophon :

इति मनीषापञ्चरत्नलघुविवरणं सम्पूर्णम् ॥

(c) वेदान्तदर्शनम्.

VĒDĀNTADARŚANAM.

Foll. 26a—36b.

A treatise in Advaita-Vēdānta, explaining the importance of learning, reflecting and deeply meditating upon the significance of Tat (Paramātman), Tvam (individual soul) and Asi (identity) in the Mahāvākya Tattvamasi (That thou art) showing the identity of the individual soul with the Supreme Brahman.

This is also called Ātmōllāsa.

Complete in the following ten Ullāsas :—

१. तत्त्वदर्शनम्.
२. त्वंपदश्रवणम्.
३. त्वंपदमननम्.
४. त्वंपदनिदिध्यासनम्.
५. तत्पदश्रवणम्.
६. तत्पदमननम्.
७. तत्पदनिदिध्यासनम्.
८. असिपदश्रवणम्.
९. असिपदमननम्.
१०. असिपदनिदिध्यासनम्.

Beginning :

यत्कृपालव एवात्मा भक्तान् संसारसागरात् ।
उत्तारयति तं वन्दे(स्व)गुरुं करुणामयम् ॥
यदज्ञानादुदेतीदं यज्ज्ञानाल्लीयते क्षणात् ।
तत्पदार्थावगम्यं यत्तन्महः परमं भजे ॥
सत्यादिवर्णकं तुर्यं तुर्यातीतं त्रयीमयम् ।
तत्त्वमस्यादिलक्ष्यं यत्तद्धाम समुपास्महे ॥

* * * *

यत्त्वं पृच्छसि मां वत्स तच्छृणुष्व वदाम्यहम् ।
वेदान्तदर्शनमिदं सारं सूर्यप्रकाशकम् ॥

अन्यान्यखिलशास्त्राणि खद्योता भान्ति सुव्रत ।
तस्मादिदं प्रवक्ष्यामि गुह्यं वेदान्तदर्शनम् ॥

* * * *

Colophon:

इति वेदान्तदर्शने आत्मोल्लासे तत्त्वदर्शनं नाम प्रथमोल्लासः ॥

* * * *

शिष्याः—

भगवन् करुणासिन्धो तवानुग्रहशक्तितः ।
दृढीभूतमशेषं तत् यथोक्तं श्रवणे मम ॥

End:

इति वाक्यं गुरोश्श्रुत्वा शिष्यः परमभक्तिमान् ।
दीर्घदण्डनमस्कारं कृत्वेदमवदत् सुधीः ॥
नमोऽस्तु ते महायोगिन् श्रीगुरो करुणालय ।
ब्रह्मानुभवसिद्धोऽस्मि भवत्कारुण्यलेशतः ॥
अहं ब्रह्मास्मि विमलो ब्रह्मैवास्म्यहमच्युत ।
परिपूर्णश्चिदानन्दस्वरूपोऽस्म्यमृतोऽस्म्यहम् ॥

Colophon:

इति वेदान्तदर्शने आत्मोल्लासे असिपदनिदिध्यासनं नाम दशमोल्लासः ॥
इति वेदान्तदर्शनं समाप्तम् ॥

Foll. 37 and 38 contain the Tattvaśāstranirṇaya with Tamil meaning.

(*d*) अद्वैतमकरन्दः.

ADVAITAMAKARANDAḤ.

Foll. 39*a*—40*a*. Fol. 40*b* is left blank.

Same work as that described under No. 4521 of the D.C.S. MSS., Vol. IX, but the additional introduction is given thus in the beginning:

इह खलु लक्ष्मीधरो नाम कश्चित्कवीन्द्रः निरन्तरनित्याद्यनुष्ठानशुद्धस्वान्ततया सञ्जातविवेकवैराग्यशमादिमुमुक्षावतः आत्मविविदिषया सन्त्यक्तलोकवेदधर्मवतः

* * * *

शिष्यशिक्षायै ग्रन्थतो निबध्नाति ।

नित्यं निरन्तरानन्दाचिद्घनं ब्रह्म निर्मलम् ।
श्रुत्या तर्कानुभूतिभ्यामहमस्म्यद्वयं सदा ॥
कटाक्षकिरणाचान्त (. . .) जगन्मङ्गलमूर्तये ॥

(*e*) துர்யாதிதக்கட்டளை.

TURYĀTĪTAKKAṬṬAḶAI.

Foll. 41*a*—71*b*.

See the Tamil part of the Triennial Catalogue.

(*f*) वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Foll. 72*a*—75*a*. Fol. 75*b* is left blank.

Similar to the work described under No. 8470 of the D.C.S. MSS., Vol. XVI.

Taken from the 55th Adhyāya of Bhaviṣyōttara-purāṇa.

Complete.

Beginning:

शुक्लाम्ब (. . .) न्तये ॥ प्राणायामं कृत्वा तदेव लग्नं सुदिनं तदेव (. . .) शुभतिथौ वरलक्ष्मीमुद्दिश्य वरलक्ष्मीप्रसादसिद्ध्यर्थं वरलक्ष्मीपूजां करिष्ये इति सङ्कल्प्य तदङ्गं महागणपतिपूजां कृत्वा कलशपूजां, शङ्खपूजां, पीठपूजामात्मपूजां, गुरुपूजां, कृत्वा अनन्तरं श्वेततण्डुलसाङ्कितस्वर्णकलशे वरलक्ष्मीमावाहयेत् ।

End:

य इदं शृणुयान्नित्यं श्रावयेद्यस्समाहितः ।
सिध्यन्ति स(र्वकार्याणि) वरलक्ष्मीप्रसादतः ॥

Colophon:

इति भविष्योत्तरपुराणे उमामहेश्वरसंवादे वरलक्ष्मीव्रताध्यायो नाम पञ्चपञ्चाशोऽध्यायः ॥

(*g*) रामवैभवः.

RĀMAVAIBHAVAḤ.

Foll. 76*a*—107*a*. Fol. 107*b* is left blank.

On the greatness of Rāma, the leading incidents in whose life are briefly described herein.

Taken from the 12th Adhyāya to the 20th Adhyāya of Pādma-purāṇa.

Beginning:

शुक्लाम्बरधरं विष्णुं (. . .) सर्वविघ्नोपशान्तये ॥
कूजन्तं रामरामेति (. . .) वन्दे वाल्मीकिकोकिलम् ॥
* * * *
मनोजवं मारुततुल्यवेगं (. . .) श्रीरामदूतं शिरसा नमामि ॥

धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि ।
पौरुषे चाप्रतिद्वन्द्वं(न्द्वस्तदैनं)जहि रावणिम् ॥

शङ्करः—

स्वायम्भुवो मनुः पूर्वं द्वादशाख्यं महामनुम् ।
जजाप पर्वसाहस्रं नैमिशे गौतमीतटे ॥
पूजितस्तेन लक्ष्मीशः प्रसन्नवरदोऽवदत् ।
मत्तो वरं वृणीष्वेति तेनोक्तो मुनिरब्रवीत् ॥

* * * *

Colophon:

इति श्रीपाद्मे पुराणे उत्तरखण्डे उमामहेश्वरसंवादे श्रीरामवैभवं नाम त्रयोदशोऽध्यायः ॥

End:

एतावच्चरितं विष्णोः रामस्याक्लिष्टकर्मणः ।
यः पठेत् शृणुयाद्वापि श्लोकं श्लोकार्धमेव वा ॥

* * * *

कोटिजन्मार्जितात्पापात् ज्ञानतोऽज्ञानतः कृतात् ।
स मुक्तो वैष्णवं लोकं पुत्रदारसबान्धवैः ॥
समाप्नुयाद्योगिगम्यमनायासेन माधवः ।
एतत्ते कथितं देवि रामस्य चरितं महत् ॥
धन्योऽस्म्यहं त्वया देवि रामचन्द्रस्य कीर्तनात् ।
किमन्यत् श्रोतुमिच्छामि तत् ब्रवीति(तु) वरानने ॥

Colophon:

इति श्रीपाद्मे पुराणे उमामहेश्वरसंवादे उत्तरखण्डे श्रीरामवैभवं नाम विंशोऽध्यायः ॥

Fol. 108 gives some Cāṭuślōkas.

(*h*) कर्मविपाकः.

KARMAVIPĀKAḤ.

Foll. 109*a*—114*b*.

Similar to the work described under No. 3590 of the D.C.S. MSS., Vol. VII.

Contains the following Prakaraṇas :—

१. पादस्वेद.
२. गुल्मरोग.
३. वातरोग.
४. अक्षिरोग.
५. नेत्रशूलान्ध्यरोग.
६. राजयक्ष्म.

Beginning:

पादस्फोटनिदानं तु रसचौर्यमुदाहृतम् ।
निष्कृतिस्तस्य तु प्रोक्तश्चान्द्रायणविधिर्बुधैः ॥
कुर्यात्प्रतिकृतिं चापि साधारणविधानतः ।
अन्यान्यपि च दानानि तत्रोक्तान्याचरेद्बुधः ॥
बोधायनोक्तमथवा धेनुदानं प्रकल्पयेत् ।
प्रस्विन्नपाणिपादस्याद्यो हरेत रसादिकम् ॥

* * * *

Colophon:

इति पादस्वेदप्रकरणं समाप्तम् ॥

End:

एवं कृत्वा प्रतीकारं गोपवेषधरस्य तु ।
तत्क्षणादेव स सुखी जायते नात्र संशयः ॥
अक्षिरोगस्य विकृतेः घृणी पाशधरश्शुचिः ।
वरदाभयहस्तश्च भू(ष)णैरुपशोभितः ॥

Colophon:

इति नेत्ररोगशूलान्ध्यप्रकरणं समाप्तम् ॥

* * * *

पद्मेन राजतेनेह प्रदानाच्च त्रिणेत्रज ।
जातं कर्मविपाकेन क्षयं नाशय मेऽनघ ॥

Colophon:

राजयक्ष्मविधिः समाप्तः ॥

(*i*) வைத்தியப்பாடல்.

VAITTIYAPPĀḌAL.

Foll. 115*a*—118*b*.

See the Tamil part of the Triennial Catalogue.

(*j*) आत्मबोधः.

ĀTMABŌDHAḤ.

Foll. 119*a*—124*a*. Fol. 124*b* is left blank.

Same work as that described under No. 4547 of the D.C.S. MSS., Vol. IX, but with the additional stanzas and introduction as given below.

Complete.

द्वाभ्यां विभ्राजमानं वरकनकमहाशृङ्खलाभ्यां कराभ्यां
बीजापूरादि बिभ्रद्दशभुजमरुणं नागभूषं त्रिनेत्रम् ।
सन्ध्यासिन्दूरवर्णं स्तनभरनमितं तुन्दिलं स . . .
. . . . स्तौमि देवं गणेशम् ॥

इह खलु सकललोकानुग्रहैकप्रयोजनोपात्तदिव्यविग्रहैः सर्वज्ञैः श्रीमद्भगवत्पादाचार्यैः उत्तमाधिकारिणां प्रस्थानत्रयं निर्माय तदवलोकनासमर्थानामपि

* * * *

आत्मबोधाख्यप्रकरणं निरूप्यते—तपोभिः ।

(*k*) आत्मानात्मविवेकः.

ĀTMĀNĀTMAVIVĒKAḤ.

Foll. 125*a*—130*a*.

Same work as that described under No. 4560 of the D.C.S. MSS., Vol. IX.

Complete.

Foll. 130*b*—133*b* give some stanzas relating to Advaita-Vēdānta.

(*l*) अद्वैतमकरन्दः, सव्याख्यः.

ADVAITAMAKARANDAḤ WITH COMMENTARY.

Foll. 134*a*—155*b*.

Same work as that described under No. 4522 of the D.C.S. MSS., Vol. IX, but without the introductory portion in the beginning.

Contains from the 7th stanza to the 18th stanza complete, the 19th being incomplete.

Beginning :

. . . . प्रत्यगात्मनो ब्रह्मत्वं युक्त्या सम्भावयन्नाह—

अहमस्मि सदा भामि कदाचिन्नाहमप्रियः ।
ब्रह्मैवाहमतस्सिद्धस्सच्चिदानन्दलक्षणः ॥

(*m*) മന്ത്രവിഷയഃ.

MANTRAVIṢAYAḤ.

Foll. 156*a*—171*b*.

See the Miscellaneous part for further particulars.

R. No. **3133.**

Śrītāla. 18⅝ × 2 inches. Foll. 94. Lines, 11 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Ayyāvayya, Brahmadēśam village, Ambasamudram taluk, Tinnevelly district.

(*a*) विष्णुसहस्रनामस्तोत्रम्, लघुविवरणसहितम्.

VIṢṆUSAHASRANĀMASTŌTRAM WITH LAGHU-VIVARAṆAM.

Foll. 1*a*—71*a*. Fol. 71*b* is left blank.

Same work as that described under R. No. 2721 ante, but with the two additional stanzas as given below, from which it is made out that the commentator is Nīlakaṇṭha, son of Brahmadatta and grandson of Nārāyaṇa of Viśvāmitragōtra :—

मानेन्तानर्जुनाधीनाधुनाधिनुधनादिना ।
यनास्तेनेदिनदिना सर्वप्रहरणायुधः (?) ॥
जज्ञे यज्ञेश्वरे(रः) प्रागुपनिलम(धि)पो यज्वनामाहितानि(ग्निः)
तद्वंशोद्भूतनारायणबुधवरजाद्गोत्रजाद्गाथिसूनोः ।
नागश्रेण्याख्यदेशोद्भवभवनजुषो ब्रह्मदत्तात् द्विजेन्द्रात्
जातो नाम्नां सहस्रं व्यवृणुत गुरुकारुण्यतो नीलकण्ठः ॥

Complete.

Name of the scribe: Veṅkaṭēśvara, son of Veṅkaṭarāmāvadhānin of Gargagōtra, who lived in the village Anantasamudra, belonging to Nagarakoil in the Nañjināḍu country.

(*b*) विष्णुसहस्रनामावलिः.

VIṢṆUSAHASRANĀMĀVALIḤ.

Foll. 72*a*—77*b*.

Same work as that described under No. 9038 of the D.C.S. MSS., Vol. XVII.

Complete.

Fol. 78*a* gives the numbers of the Viṣṇusahasranāma in every stanza. Fol. 78*b* is left blank. Fol. 79 gives the Jayantyarghya stanzas, Trailōkyamōhanamantra and Saptaśuddhimantra. Foll. 80*a* and 80*b* contain Śivāṣṭōttara and Kṛṣṇāṣṭōttara. Fol. 81 gives the Śivārcanā. Foll. 81*b* and 82*a* give Kṛṣṇārcanā. Fol. 82*b* gives Rāmārcanā. Foll. 83*a*—84*a* contain a few stanzas of Tantrasamuccaya with Tamil meaning. Fol. 84*b* is left blank.

(c) चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Foll. 85*a*—92*a*. Foll. 89*b*, 91*b* and 92*b* are left blank.

Similar to the work described under No. 12012 of the D.C.S. MSS., Vol. XX.

Beginning:

धीमन् सद्गुणवारिधेस्तव मनोवृत्तिर्महाकोविदैः
दुर्ज्ञेया स्वत एव लोलहृदयैर्नारीजनैः किं पुनः ।
तत्सन्दिष्टमिदं किमर्थमिति नो निश्चिन्महे क्रीडितुं
किं वा हन्त किमस्मदीयहृदयं ज्ञानाय हासाय वा ॥
शङ्कां पङ्कजिनीषु किं मधुलिहः कुर्वन्ति भृङ्गाधिपाः
मिथ्यैतत्तु विकत्थनं ननु सतां युक्तं किमेवंविधम् ।
आकाङ्क्षा भवतोऽपि कामिसुलभा दैवादिदानीं यदि
मन्ये नूनमनन्यलोलहृदया धन्येयमम्भोजिनी ॥

End.:

इन्दीवराक्ष्याः स्फुटविद्रुमोष्ठ्यास्सङ्केतमुद्दिश्य वने चरन्त्याः ।
चोरास्समस्ताभरणानि हृत्वा नासामणिं नापहरन्ति चित्रम् ॥
इन्दीवरेण नयनं मुखमम्बुजेन दन्तेन(बिम्बेन)चोष्ठमधरं नवपल्लवेन ।
अङ्गानि चम्पकदलैश्च विधाय वेधाः कान्ते कथं रचितवानुपलेन चेतः ॥

(d) दक्षिणामूर्त्यष्टकम्.

DAKṢIṆĀMŪRTYAṢṬAKAM.

Fol. 93.

Same work as that described under R. No. 118(*b*) ante, except the first stanza.

(e) आर्याष्टकम्.

ĀRYĀṢṬAKAM.

Fol. 93*b*.

A eulogy in eight stanzas addressed to Goddess Āryā who is no other than Durgā.

Complete.

Beginning:

करस्थकदलीचूतपनसेष्टकमोदकम् ।
बालसूर्यप्रतीकाशं वन्दे बालगणाधिपम् ॥

आर्यां कात्यायनीं देवीमभीष्टफलदायिनीम् ।
देहि विद्यां महादेवीं नमामि त्वां महेश्वरीम् ॥

End :

आर्याष्टकमिदं पुण्यं यः पठेत्सततं नरः ।
महादेवीप्रसादेन षण्मासात् स कविर्भवेत् ॥

Colophon :

आर्याष्टकं समाप्तम् ॥

Fol. 94 contains some Vaidyaviṣayakaślōkas (with Tamil and Malayalam meaning.

R. No. 3134.

Palm-leaf. $16\frac{3}{8} \times 1\frac{3}{8}$ inches. Foll. 276. Lines, 7 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Pakṣirāja Ayyaṅgār of Mannārkōvil, Ambasamudram taluk, Tinnevelly district.

भागवतम्, शुकपक्षीयव्याख्यासहितम्.

BHĀGAVATAM WITH THE COMMENTARY ŚUKAPAKṢĪYA.

Foll. 2*a*—275*a*. Fol. 276*a* gives a few stanzas explaining the expression of Akṣauhiṇī. Foll. 1, 242*b*, 251*b*, 265*b*, 275*b* and 276*b* are left blank.

Same commentary as that described under No. 2228 of the D.C.S. MSS., Vol. IV, Part I, wherein see for the end. By Gōpāla, born in the Vādhūlagōtra.

Contains the Skandhas one to three complete.

Beginning :

वेतण्डाचलहेमशृङ्गसुभगश्रीपुण्यकोटीमहा-
पेटीगर्भगृहोचितासितमहारत्नाच्युतश्रीपद ।
श्रीदेवीवदनारविन्दतरणे हे देवराजप्रभो
भक्ताधीन पयोधिमन्दिर हरे मच्चित्तवासी भव ॥
आम्नायद्रुमशाखाग्रनिरतं द्विजसेवितम् ।
हरिपक्षाश्रयं वन्दे हृद्यवर्णमुखं शुकम् ॥
शुकपक्षानुसारेण पुराणं सत्पथं व्रजन् ।
न श्वभ्रेण न पङ्केन न च क्लिश्यति कण्टकैः ॥
वाधूलगोत्रजातेन गोपालाख्येन सूरिणा ।
श्रीमद्भागवतव्याख्या लिख्यते शुकपक्षगा ॥

शुकपक्षस्य सङ्क्षेपाद्विरोधाच्छ्रीधरीयके ।
विरोधांशं परित्यज्य गृहीत्वान्यत्र सारतः ॥
शुकपक्षानुसारेण व्याख्यानं लिख्यते मया ।

उपनिषद्भागोपबृंहणपरेषु तत्रापि सात्त्विकतया प्रत्यक्षश्रुत्यनुगुणार्थतया च प्रबलेषु प्रबन्धेषु

* * * *

इष्टदेवतोपासनात्मकं मङ्गलमाचरति प्रथमेन श्लोकेन जन्मादीत्यादिना । अत्र गायत्र्युपक्रमत्वं प्रतीयते । धीमहिशब्दतत्पदान्तरैरर्थतश्च तदुपक्रमत्वावगमः ।

* * * *

एवं प्रदर्शितया धिया गायत्र्युपक्रमत्वसिद्धिरनुसन्धेया ।
जन्माद्यस्य (. . .) सत्यं परं धीमहि ॥

अत्र पदानि योज्यन्ते । प्रबन्धस्य वेदान्तोपबृंहणतां द्योतयति—जन्मादीति । तद्गुणसंविज्ञानो बहुव्रीहिः ।

R. No. **3135**.

Palm-leaf. 18 × $1\frac{1}{4}$ inches. Foll. 80. Lines, 7 in a page. Grantha. Very much injured.

Presented in 1919–20 by M.R.Ry. Raṅgavādyār, Kallidakurichi, Tinnevelly district.

Foll. 79*b* and 80 are left blank.

तर्कभाषाव्याख्या—भावार्थदीपिका.

TARKABHĀṢĀVYĀKHYĀ: BHĀVĀRTHADĪPIKĀ.

Same work as that described under No. 4134 of the D.C.S. MSS., Vol. VIII.

Incomplete.

R. No. **3136**.

Palm-leaf. $14\frac{5}{8}$ × $1\frac{3}{4}$ inches. Foll. 10. Lines, 11 in a page. Grantha and Telugu. Good.

Presented in 1919–20 by M.R.Ry. Rāmasvāmi Ayyaṅgār, Kārakurichi, Ambasamudram taluk, Tinnevelly district.

प्रमेयमाला.

PRAMĒYAMĀLĀ.

Foll. 1*a*—7*b*. Foll. 8 and 9 are left blank.

Same work as that described under R. No. 2477 ante.

Wants the beginning in Aikaśāstryasamarthana and the end Sarvaśārīrakavāda.

Fol. 10 contains some Ṛk of the Ṛgvēda.

R. No. 3137.

Palm-leaf. 16½ × 1⅜ inches. Foll. 98. Lines, 8 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. B. Ponnappa Ayyaṅgār, Āḻvārtirunagarī, Tinnevelly district.

(a) महानाटकसुधानिधिः.

MAHĀNĀṬAKASUDHĀNIDHIḤ.

Foll. 1*a*—40*b*.

Same work as that described under R. No. 1504(*a*) ante. By king Immaḍidēvarāya.

Breaks off in the Sundarakāṇḍa.

(b) राघवयादवीयम्, सव्याख्यानम्.

RĀGHAVAYĀDAVĪYAM WITH COMMENTARY.

Foll. 41*a*—81*a*.

Same work as that described under R. No. 135 ante, but the colophon is different. The first stanza is not given in the beginning of this work.

Contains only the first part.

Colophon:

इत्यात्रेयवेङ्कटार्ययज्वनः कृतिषु यादवराघवीयं सम्पूर्णम् ॥

Fol. 81*b* gives a stanza regarding Svarṇarajatōtpatti.

Name of the scribe: Veṅkaṭācāriyar. Date of transcription: Wednesday, the 11th day of Kārttika month in the year Bhava.

(c) श्यामलादण्डकः.

ŚYĀMALĀDAṆḌAKAḤ.

Foll. 82*a*—84*a*. Fol. 84*b* is left blank.

Same work as that described under No. 10837 of the D.C.S. MSS., Vol. XIX, but the first stanza is given in the end of this work.

Complete.

(d) बिल्हणचरित्रम्.

BILHAṆACARITRAM.

Foll. 85*a*—95*b*.

Same work as that described under No. 11975 of the D.C.S. MSS., Vol. XX, but with additional stanzas in the end, which are given below. This work is also called Cōrapañcāśat.

Complete.

पद्यान्यस्य निशम्य चात्मपुरुषात्पुत्र्या च सम्प्रार्थितः
कोपं तन्मदनाभिराम‍नृपतिस्त्यक्त्वा सुसन्तोषवान् ।

आहूयैनमदात्स्वकीयतनयां मन्दारमालायुतः(तां)
तस्मै बिल्हणनाममुख्यकवये लग्ने शुभंयौ तदा ॥
यामिनीपूर्णतिलकां प्राप्यैवं बिल्हणः कविः ।
रेमे सुखेन रोहिण्या चन्द्रमा इव सोऽनया ॥
य इमं चोरपञ्चाशद्ग्रन्थं पठति बुद्धिमान् ।
प्रसन्ना तस्य वाणी स्यात् सततं नात्र संशयः ॥

The scribe adds :

वेङ्कटेशेन लिखितं चोरपञ्चाशदाख्यके ।
अब्दे विद्यमानेऽपि मदनुग्रहतत्परः ॥

(*e*) हयग्रीवदण्डकः.

HAYAGRĪVADAṆḌAKAḤ.

Fol. 96.

Same work as that described under No. 10464 of the D.C.S. MSS., Vol. XVIII.

(*f*) घटकर्परीयम्.

GHAṬAKARPARĪYAM.

Foll. 97*a*—98*b*.

Same work as that described under No. 11839 of the D.C.S. MSS., Vol. XX.

The former owner of the MS. is said to be Veṅkaṭadāsa of Śaṭhakōpanagara or Āḻvārtirunagarī.

R. No. **3138.**

Palm-leaf. 15½ × 1⅛ inches. Foll. 124. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1919–20 by M.R.Ry. Tiruvēṅkaṭācāriyār of Āḻvārtirunagarī, Tinnevelly district.

न्यायशास्त्रार्थदीपव्याख्या—प्रभा.

NYĀYAŚĀSTRĀRTHADĪPAVYĀKHYĀ : PRABHĀ.

This is a commentary on the Nyāyaśāstrārthadīpa of Śaśadhara, which is described under No. 4205 of the D.C.S. MSS., Vol. VIII. By Dēvarāja of Anantārya family.

Contains the Maṅgalavāda, Andhakāravāda, Kāraṇatāvāda, complete and Mōkṣavāda incomplete.

Beginning:

नमाम्यहमहीशाद्रेर्नाथं मम कुलस्य च ।
यमाश्रयन्ते विविधा जनास्तत्तत्फलाप्तये ॥
अनन्तार्यकुलोद्भूतो देवराजो महामतिः ।
न्यायदीपप्रभां रम्यां तनुते तुष्टये सताम् ॥

इह खलु शशधरशर्मा नाम कश्चिद्विपश्चित् सूत्रभाष्यटीकादिग्रन्थ-ग्रन्थियोजनाग्रन्थिलतया दुर्विवेचं तर्कसिद्धान्तसारभूतं तत्तत्प्रसिद्धप्रमेयजातं

* * * *

फलं च प्रकाशयन् स्वकीर्त्यनुवृत्तये स्वनाम च प्रकटयन् चिकीर्षितं प्रति जानीते—ध्वंसितेति । परेषां सिद्धान्तः स एव ध्वान्तं परसिद्धान्तध्वान्तं ध्वंसितम् ।

End:

दुःखध्वंसस्यासाध्यतयापुरुषार्थत्वमत एव मूलग्रन्थे एकविंशतिप्रभेददुःख-विच्छित्तिर्मोक्ष इति ।

* * * *

सुखसाधनपापध्वंसस्य स्वतः पुरुषार्थत्वेन तदुद्दिश्य प्रवृत्तिः, तदा मोक्षे प्रागभावाभावेऽपि तच्चिन्ताया अप्रयोजनतया दुःखहेतुसंसारना . . . . . प्रत्यूहेति भावः.

R. No. 3139.

Palm-leaf. $18\frac{1}{4} \times 1\frac{5}{8}$ inches. Foll. 96. Lines, 10 in a page. Grantha. Fair.

Presented in 1919–20 by M.R.Ry. Tiruvēṅkaṭācāriyār, Āḻvārtirunagarī, Tiruchendur taluk, Tinnevelly district.

तत्त्वचिन्तामणिप्रकाशव्याख्या.

TATTVACINTĀMAṆIPRAKĀŚAVYĀKHYĀ.

Foll. 1*a*—94*a*. Fol. 94*b* is left blank.

A commentary on the Tattvacintāmaṇiprakāśa of Rucidatta, which is described under No. 4013 of the D.C.S. MSS., Vol. VIII.

Contains from the beginning of Anyathākhyātivāda to the end of Manōṇutvavāda (Manōṇutvavāda incomplete) and a small portion in Nirvikalpakavāda.

Beginning:

ननु सर्वज्ञानानामित्यादिना व्यावर्त्याप्रसिद्धिशङ्कानिरासार्थत्वमन्यथाख्यातिनिरूपणस्योच्यते । इदमसङ्गतम्, न हि तदर्थमेव तत्साधनीयं, स्वायत्त-

त्वेन तद्विशेषणाप्रदानेनापि तन्निराससम्भवादित्याशङ्क्य शास्त्रार्थत्वेन निरूप्यस्य तस्य सङ्गतिमात्रपरोऽयं ग्रन्थ इत्याह—उपोद्धातेति। उपोद्धातः तादर्थ्यं प्रमालक्षणार्थत्वमन्यथाख्यातेरतस्तदाकाङ्क्षायां तन्निरूप्यत इति भावः।

* * * *

तत्र व्याप्यत्वं नाम नियतसामानाधिकरण्यं, तत्र सामानाधिकरण्यमित्येव साध्यमस्त्वित्यत आह—सत्यस्थलीयेति । नियमांशविवक्षया इष्टसिद्धिमाह—तथाचेति । तादृशानुभवेति । रजतत्वप्रकारकानुभवेत्यर्थः ।

End:

विषयप्रत्यासन्नेति । शरीरादिना सिद्धसाधनवारणायेन्द्रियपदमावश्यकम् । तस्य चायमर्थः—अनेनापि तद्व्यावृत्तेरिति भावः । तत्संयोगीति । इदं च त्वचः सर्वज्ञानकारणत्वपक्षे तथा सिद्धसाधनवारणाय । अन्यथा इन्द्रियशब्दस्य मुख्यार्थत्वाङ्गीकारे । मनोगर्भतयेति ।

* * * *

सामान्यप्रत्यासत्तिजन्यज्ञानान्तर(स्य) सविकल्पकत्वे अनवस्थानात् निर्विकल्पकस्य च तथासम्भवा.

Fol. 95 contains a small portion of Vidhivicāraviṣaya. Fol. 96 contains some Vēdāntavacanas in Tamil language.

R. No. 3140.

Palm-leaf. 17 × 1⅝ inches. Foll. 115. Lines, 9 in a page. Grantha. Injured.

Presented in 1919-20 by M.R.Ry. Tiruvēṅkaṭācāriyār of Āḻvārtirunagarī, Tiruchendur taluk, Tinnevelly district.

(*a*) पादुकासहस्रम्.

PĀDUKĀSAHASRAM.

Foll. 1*a*—56*b*.

Same work as that described under No. 10571 of the D.C.S. MSS., Vol. XIX, but with additional stanzas containing the Upōdghāta in the beginning.

Complete.

अस्ति खलु वेदोपबृंहणाय वल्मीकसम्भवेन महर्षिणा श्रीमद्रामायणे रामात्मनावतीर्णस्य भगवतः श्रीरङ्गनाथस्य . . . .

* * * *

पादुके ते तु रामस्य गृहीत्वा भरतः स्वयम् ।
चरणाभ्यां नरेन्द्रस्य योजयामास धर्म(तः) ॥

* * * *

एतत्ते रक्षितं राज्यं न्यासं निर्यातितं मया ।
अद्य जन्म यथार्थं मे संवृत्तश्च मनोरथः ॥ इति ।

इति . . . .

(पदक)मलसनाभेः पादुकायाः प्रभावम् ।
स्तुतिसुरभितसूक्तिस्स्तोतुमैच्छन्निशम्य
स्थितपरिणतभक्तिः श्रेयसे वेङ्कटेशः ॥

इति पादुकासहस्रे प्रस्तावना ।

Fol. 57*a* contains one Bandhaślōka. Foll. 57*b*—58*b* are left blank.

(*b*) पादुकासहस्रव्याख्या—प्रदीपिका.
PĀDUKĀSAHASRAVYĀKHYĀ : PRADĪPIKĀ.

Foll. 59*a*—115*b*.

Same commentary as that described under No. 10580 of the D.C.S. MSS., Vol. XIX. By Nṛsiṁha of Hārīta-gōtra, disciple of Śrīnivāsaguru of Bhāradvāja-gōtra.

Breaks off in the 20th Paddhati.

Beginning :

सन्तु श्रीशपदाम्भोजशरणागतिशालिनः ।
सन्तः श्रीभाष्यसंसक्तचेतसश्श्रेयसे मम ॥
भारद्वाजकुलोत्तंसं श्रीनिवासगुरुं भजे ।
श्रीभाष्यं सरहस्यार्थं यतोऽधीतं मया गुरोः ॥
असूयावेतालीविवशजनतावाक्यनिचयै-
स्समारोप्यो दोषो न खलु परिगण्येत विबुधैः ।
प्रमादात् चेत् दोषः कृतिषु तदभिज्ञैर्बहुगुणैः
समर्थ्यो दोषज्ञैर्गुण इति कृतार्था हि कृतयः ॥
श्रुत्यन्तगुरुरत्यन्तं सन्तोषयति सज्जनान् ।
स्वहृन्निष्ठहयग्रीवहेषाघोषैस्स्ववाग्भरैः ॥
प्रकाशयति रङ्गेशपादुकास्तुतिपद्धतिम् ।
हारीतश्रीनृसिंहोक्तव्याख्याभिख्या प्रदीपिका ॥

इह खलु वेदान्ताचार्यो नाम कश्चित् विपश्चित् सकलसात्त्विकजनस-
मुज्जीवनाय श्रीरङ्गेशपादुकासहस्रं नाम स्तोत्रमारभमाणः तस्य निर्विघ्नपरि-

समाप्तिमुद्दिश्य विशिष्टभागवतप्रशंसारूपं मङ्गलमाचरति—सन्त इति । श्रीरङ्गपृथ्वीशस्य रङ्गभूनायकस्य । चरणत्राणं पादरक्षा सैव शेखरः शिखाभूषणं येषान्ते तथोक्ताः भुवनत्राणपदपङ्कजरेणवः ।

* * *

Colophon:

इति श्रीहारीतश्रीनृसिंहविरचिते पादुकासहस्रव्याख्याने प्रस्तावपद्धतिप्रदीपिका प्रथमा ॥

End:

समीक्ष्यते प्रतिबिम्बात्मना प(वा)यः कश्चिदिति समीक्ष्यते । सा त्वं लक्ष्म्याः स्थलकमलिनीव भासीत्यन्वयः ॥

Colophon:

इति श्रीहारीतश्रीनृसिंहविरचितपादुकासहस्रव्याख्याने मरकतपद्धतिप्रदीपिका नाम एकोनविंशी ॥

हरिणेति । हरिणा रङ्गपतिना । हरिनीलैः इन्द्रनीलैश्च, सदा प्रतियत्नवतीमलङ्कारवतीम् अयत्नलभ्यनिर्वा . . . . पादुकामाश्रये भजे ।

* * * *

क्लृप्तेति । हे मणिपादरक्षे वलभिदश्मसमुद्भवैः इन्द्रनीलमणिसञ्जातैः लीलांशुकैः लीलार्थाः शोभार्थाः.

R. No. 3141.

Palm-leaf. 15 × 1⅝ inches. Foll. 34. Lines, 7 in a page. Grantha. Good.

Presented in 1919–20 by M.R.Ry. Aḻagappa Ayyaṅgār, North street, Āḻvārtirunagarī, Tinnevelly district.

(a) कुरुकापुरीमाहात्म्यम्.

KURUKĀPURĪMĀHĀTMYAM.

Foll. 1*a*—25*a*. Fol. 25*b* is left blank.

Same work as that described under R. No. 514 ante.

अ[illegible]lete.

रामात्मनावत.

क्षेत्रमाहात्म्यम्.

पादुक THAKṢĒTRAMĀHĀTMYAM.

चरणाभ्यं; Fol. 33*b* is left blank.

Same work as that described under R. No. 3104 ante, which is included in the Navakṣētramāhātmya—vide No. 3104.

Breaks off in the fourth Adhyāya.

Fol. 34 contains some household accounts.

R. No. **3142.**

Śrītāla. $6\frac{3}{4} \times 1\frac{3}{8}$ inches. Foll. 100. Lines, 8 in a page. Malayalam. Fair.

Presented in 1919-20 by M.R.Ry. Rāma Śāstrin Śēkharipuram, Palghat taluk, Malabar district.

धर्मशास्त्रम्.

DHARMAŚĀSTRAM.

Similar to the work described under No. 2765 of the D.C.S. MSS., Vol. V. This appears to be a collection from various Smṛtis, Itihāsas, Āgamas, Purāṇas and Nibandhana granthas.

Incomplete.

Beginning:

गुरोरनिष्टाचरणं गुरोरिष्टविवर्जितम् ।
गुरोश्च सेवाकरणं ज्ञानानुत्पत्तिकारणम् ॥
आचार्यनिन्दाकरणं तद्बाधस्य च दर्शनम ।
विवादश्च तथा तेन ज्ञानानुत्पत्तिकारणम् ॥ इति स्कान्दपुराणम् ।
अत्यन्तरोगयुक्तेऽङ्गे राजचोरभयादिषु ।
गुर्वग्निदेवकृत्येषु नित्यहानौ न दोषभाक् ॥ इति शैवागमे ।

मनुरप्याह—

यस्मिन्देशे यश्चा(रः) पारम्पर्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ॥

* * * *

देवलः—

गुरोरभावे तत्पुत्रं तद्भार्यां तत्सुतां तदा ।
पौत्रं प्रपौत्रं दौहित्रमन्यं वा तत्कुलोद्भवम्॥ इति स्कान्दपुराणे ।

* * * *

प्रत्यादित्यं प्रत्यनलं प्रतिगां च(धेनु) प्रतिद्विजम् ।
मेहन्ति ये च पथिषु ते भवन्ति गतायुषः ॥ इति भारते ।

End:

एवं श्राद्धं निरूप्य तत्कर्ता निरूप्यते—

पितुः पुत्रेण कर्तव्याः पिण्डदानोदकक्रियाः ।
पुत्राभावे तु पत्नी स्यात् पत्न्यभावे तु सोदरः ॥
पुत्रः कुर्यात्पितुः श्राद्धं पत्नी तु तदसन्निधौ ।
धनहार्यथ दौहित्रः ततो भ्राता च तत्सुतः ॥
मातुस्सहोदरो भ्राता कुर्यादादौ हि तत्सुतः ।
ततस्त्वसोदरो भ्राता तदभावे तु तत्सुतः ॥

इति स्मृतिसङ्ग्रहे । पुत्रशब्देन मुख्यगौणाश्च पुत्रा गृह्यन्ते । तेषां सर्वेषामभावे पौत्रः कुर्यात् । तस्याभावे पत्नी ।

पुत्राभावे सपिण्डास्तु तदभावे सहोदकाः ।
मातुस्सपिण्डा ये वा स्युः ये वा मातुस्सहोदराः ॥

* * * *

स्मृतिसङ्ग्रहे—

कामयतन्त्रेण नित्यस्य तन्त्रं श्राद्धस्य . . . ।

R. No. 3143.

Paper. 14 × 6 inches. Foll. 261. Lines, 12 in a page. Telugu. Injured.

Presented in 1919–20 by M.R.Ry. Raṅgavādyār of Kallidakurichi, Ambasamudram taluk, Tinnevelly district.

(*a*) महाभाष्यप्रदीपोद्द्योतनम्.

MAHĀBHĀṢYAPRADĪPŌDDYŌTANAM.

Foll. 1*a*—241*a*.

Same work as that described under R. Nos. 271 and 2248 ante.

Contains the first leaf from the beginning of the eighth Āhnika of the first Pāda in the first Adhyāya to the end of 70th Sūtra of the second Pāda of the same Adhyāya, a small portion (4 pages) of the third Pāda of the fourth Adhyāya and from the 99th Sūtra to the end of the eighth Adhyāya.

Beginning:

शिवयोरशाश्वतैकत्वं तनोतु शुभसन्ततिम् ।
निदर्शयितुमद्वैतं भजतामिव सङ्गतम् ॥
श्रीशेषवीरेश्वरपण्डितेन्द्रं शेषायितं शेषवचोविशेषे ।
सर्वेषु तन्त्रेषु च कर्तृतुल्यं वन्दे महाभाष्यगुरुं ममाग्र्यम् ॥

महाभाष्यप्रदीपस्य कृत्स्नस्योद्द्योतनं मया ।
क्रियते पदवाक्यार्थतात्पर्यस्य विवेचनात् ॥

सर्वाकारमिति । सर्वस्वरूपं सर्वोपादानमिति यावत् । प्रपञ्चस्योपादानव्यतिरिक्ताबाधितस्वरूपाभावात् । अनाकारं वास्त(वा)कारान्तररहितं विश्वमध्यक्षं यस्य विश्वसाक्षिणमिति यावत् । अनाकारत्व:दतीन्द्रियम् ।

Fol. 241*b* contains a portion of the colophon.

(*b*) अवयवविचारविषयः.

AVAYAVAVICĀRAVIṢAYAḤ.

Foll. 242*a*—261*a*. Fol. 261*b* is left blank.

A discussion on the five limbs of a syllogism.

Wants the beginning and the end.

Beginning:

शब्दार्थानुरोधेन गुरुतरलक्षणस्योक्तत्वादन्यस्य लक्षणान्तरत्वेनोक्तलक्षणस्यादूषकत्वाच्चेत्याहुः । प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाघटितत्वमिति द्वितीयलक्षणे प्रतिज्ञादिभेदानुयोगितावच्छेदकत्वमेव प्रतिज्ञाद्यघटकतावच्छेदकत्वमिति वस्तुतस्त्वित्यादिना भट्टाचार्येणोक्तम् ।

End:

तादृशप्रतिज्ञायामव्याप्त्यापत्तेः तादृशविषयत्वांशे विशेषणं सत् यदनुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणं तदवच्छिन्नविषयतानिष्ठावच्छेदकताकप्रतिबन्धकतानिवेशे च तादृशविषयत्वांशे विशेषणं सत् यदनुमितिजनकता.

R. No. **3144.**

Palm-leaf. $14\frac{3}{8} \times 1\frac{1}{4}$ and $9\frac{1}{4} \times 1$ inches. Foll. 54. Lines, 6 in a page. Grantha. Good.

Presented in 1919-20 by Alarmēlmaṅgammaṅgār of Āḻvārtirunagarī, Tiruchendur taluk, Tinnevelly district.

Fol. 1*a* gives the title of the work. Fol. 1*b* contains the table of contents of the work.

(*a*) गोदापरिणयम्.

GŌDĀPARIṆAYAM.

Foll. 2*a*—33*b*.

A drama describing the story of the marriage between God Raṅganātha and Gōdā or Āṇḍāḷ: by Śrīnivāsācārya alias Lōkārya, son of Kēsarabhūṣaṇācārya and grandson of Śrīnivāsācārya of Śrīśaila family. There is a similar work described under No. 12513 of the D.C.S. MSS., Vol. XXI.

Complete.

Beginning :

श्रीवत्सकौस्तुभलसत्सुविशालवक्षः श्रीरङ्गमङ्गलनिधिर्धृतशङ्खचक्रः ।
आकल्पमम्बुनिधिकन्यकया समेतः श्रेयः परं दिशतु नः श्रितपारिजातः ॥

नान्द्यन्ते सूत्रधारः । सहर्षं नेपथ्याभिमुखमवलोक्य । आर्ये इत इतः । प्रविश्य नटी—इयं हि आणवेदु अंओ । आर्ये आदिष्टोऽस्मि सकलसुरासुरमकुटमणिकिरणनिकरनीराजितपदकमलचतुर्मुखसमभ्यर्चितचरणनलिनयुगलस्य लक्ष्मीभूमिनीलानायकस्य

* * * *

भगवतश्श्रीपूर्णस्थितेशस्य चैत्रयात्रोत्सवसेवासमवेतैर्निरवद्यनिगमान्तविद्यापरिनिष्ठितमानसैः प्रतिवादिमत्तगजकण्ठीरवैरार्यमिश्रैः । रे भरतशेखरापूर्वनिर्मितस्यातिललितसन्दर्भसुन्दरस्य कस्यचिद्रूपकस्याभिनयेनानन्दयास्मानिति ।

* * * *

सूत्रधारः । विचिन्त्य सहर्षम् । आर्ये अस्ति खलु अचिरनिर्मितमखिलबुधजनहृदयानन्दकरमतिविचित्रसन्दर्भं गोदापरिणयं नाम नाटकम् ।

* * * *

सू—आर्ये ।

वाचस्तस्य कवेर्निसर्गमधुराश्चित्रं चरित्रं पुन-
र्गोदाया जगदेकमङ्गलनिधेरस्माकमत्यद्भुतम् ।
चातुर्यं भरतागमेषु भगवान् पूर्णस्थितेशस्सभा-
नाथस्सारगुणैकलुब्धमनसस्सभ्याः कुतश्शङ्कसे ॥

नटी—अंअ कोण सो कई ।

सू—सप्रणयकोपमार्ये ।

श्रीशैलेशकुलाब्धिशीतकिरणश्श्रीश्रीनिवासार्यस-
त्पौत्रः केसरभूषणार्यतनयः पाण्डित्यचिन्तामणिः ।
लोकार्यः करुणापदं शठरिपोश्श्रीश्रीनिवासाभिधः
किं ते न श्रुतिमागतः कृतधियां सम्माननीयः कविः ॥

End :

तथापीदमस्तु (भरतवाक्यम्)—

पृथ्वीशस्य निरन्तरा भवतु तां रक्षन्तु भूपा भवान्
लक्ष्मीशो विजयी भवेत् भवतु सा नित्यं सतां सद्मसु ।
विद्वांसः कवयन्तु भूरि करुणा तेष्वस्तु नित्यं श्रियः
श्रीमत्यस्य कवेर्भवत्वनुपमा भक्तिः परस्मिन् त्वयि ॥

तदागच्छत समङ्गलोपायनहस्ताः प्रतिपालयन्ति बन्धुजनाः । वत्साम-होत्सवावलोकनेन तानानन्दयिष्याम इति निष्क्रान्तास्सर्वे ॥

Colophon:

पञ्चमोऽङ्कः ॥

Fol. 34 gives the index of the stanzas of this work. Fol. 35*a* gives two stanzas in praise of Viṣṇu and Śiva. Fol. 35*b* is left blank. Foll. 36—38*a* contain a small portion of the drama described above. Fol. 38*b* is left blank.

(*b*) गद्यषट्कम्.

GADYAṢAṬKAM.

Foll. 39*a*—41*b*.

Contains the following Ṣaṭkas:—

१. पूर्णस्थितेशगद्यम्.
२. रघुवीरगद्यम्.
३. आदिनाथगद्यम्.
४. शठकोपगद्यम्.
५. कुरुकावल्लीगद्यम्.
६. श्रीबेरेशगद्यम्.

Complete.

Beginning:

जय जय देवदेव चन्दनमन्दारपूगपुन्नागचम्पकचाम्पेयादितरुवरसङ्कीर्णताम्र-पर्णीतटविराजमानश्रीनगरीनिवास,

*   *   *   *

पुराणपुरुष पूर्णस्थितेश मां पाहि पाहि ॥

श्रीदेवदेव लक्ष्मीनीलानन्तगरुडविष्वक्सेनादि (. . .) साकेतकेतनसहस्रालङ्कृत-निजभवनकलितपट्टाभिषेकपरितोषितसमस्तपरिवार रघुवीर मां पाहि पाहि ॥

जय जय दयिततमसकलसाधुजनावनकलित (. . .) आदिनाथ मां पाहि पाहि ॥

जय जय सूरिव[ा][रगीतकीर्ति] (र्त्ते)(. . .) श्रीशठकोप मां पाहि ॥

जय जय हरिवल्लभे (. . .) श्रीकुरुकावल्लि मां पाहि पाहि ॥

End:

जय जय देवदेव त्रिभुवनमहनीयविपुलैश्वर्यविराजमानश्रीबेरपुरनायक-(. . .)मकरायतकर्णपाश पाहि मां पाहि मां पाहि ॥

Foll. 42*a*—44*a* contain a few miscellaneous stanzas on gender and the beginnings of some stanzas. Fol. 44*b* is left blank.

(*c*) शृङ्गारभूषणभाणः.

ŚṚṄGĀRABHŪṢAṆABHĀṆAḤ.

Foll. 45*a*—52*b*.

Similar to the work described under No. 12704 of the D.C.S. MSS., Vol. XXI. By the same author as that of R. No. 3144(*a*).

Incomplete.

श्रीमान् क्षीरार्णवान्तः फणिपतिशयने चन्द्रखण्डातिगौरे
भूमानीलासमेतस्सकलभुवनसंरक्षणोपायचिन्ताम् ।
निद्राव्याजेन कुर्वन्निरवधिमहिमा नित्यमुक्ताभिवन्द्यः
शेते यश्श्रीनिवासः प्रदिशतु सुतरां सन्ततं मङ्गलं वः ॥

* * * *

नान्द्यन्ते सूत्रधारः । सपरितोषं नेपथ्याभिमुखमवलोक्य, आर्ये इत इतः। प्रविश्य नटी । अंअ इअंहि ।

* * * *

भगवतः श्रीमदादिनाथस्य चैत्रयात्रोत्सवसेवासमागतैः

* * * *

प्रतिवादिमत्तगजकण्ठीरवैस्सामाजिकैरार्यमिश्रैः । रे भरतशेखर ।

यश्श्रीमच्छठवैरियोगिविमलश्रीमत्प्रबन्धात्मजः
श्रीशैलेश इति प्रसिद्धमहिमा वेदान्तविद्यानिधिः ।
यं शंसन्ति विचक्षणास्त्रिजगदाचार्यं गुणाम्भोनिधिं
भक्तानुग्रहणेच्छया भुवि पुनर्जातं परं श्रीपतिम् ॥
ताद्दक्छ्रीशैलनाथान्वयजलधिलसत्कौस्तुभश्रीनिवासा-
चार्यस्य ज्ञानराशेर्गुणमणिजलधेः पौत्रताधन्यधन्यम् ।
यं श्रीमच्छ्रीनिवासं वकुलसुममहाभूषणाचार्यसूनुं
लोकाचार्यं प्रशंसन्त्यखिलबुधजनश्रेणयस्साधुबुद्धिम् ॥

* * * *

तेन कविसार्वभौमेन प्रणीतमतिगम्भीरमधुरललितवाग्गुम्भं विविधरसभरभरितमखिलजनहृदयानवधिकानन्दकन्दलविदग्धं शृङ्गारभूषणं नाम भाणतिलकं भवताभिनेतव्यमिति ।

निपुणं निरूप्य। अये विदितास्मदभिप्रायः अङ्गीकृतकन्दर्पशेखरभूमिकापरिग्रहः स्यालो मे रङ्गवर्धनः । तदावामप्यनन्तरकरणीयाय सज्जीभवावेति निष्क्रान्तः। प्रस्तावना ॥

ततः प्रविशति रङ्गवर्धनः ।

Foll. 53*a*—54*a* contain the Stōtras on Viṣṇu and Śaṭhakōpa. Fol. 54*b* is left blank.

R. No. **3145.**

Palm-leaf. $16\frac{7}{8} \times 1\frac{1}{3}$ inches. Foll. 232. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1919-20 by Alarmēlmaṅgammaṅgār of Āḻvārtirunagarī, Tiruchendur taluk, Tinnevelly district.

(*a*) सुभद्राधनञ्जयम्.

SUBHADRĀDHANAÑJAYAM.

Foll. 1*a*—30*a*.

Same work as that described under No. 12723 of the D.C.S. MSS., Vol. XXI, but with additional stanzas and passages in the end, which are given below :—

पुण्यश्लोकतमस्य तत्रभवतः पुत्रः स्वयंभूगुरोः
दौहित्रः कवितानिरूढयशसश्श्रीराजनाथस्य च ।
रामः कृष्णविलासनाम कृतवान् काव्यं तदर्हन्त्यमी
सन्तश्शोधयितुं समाहितगुणग्राहा दुरूहादृते ॥
सभ्याश्शौरिनिबन्धनां कृतिमिमां (. . .)मुग्धा तितिक्षिष्यते ॥
साहित्यैतिह्यमर्थं (. . .) गुरुकुलोत्तंसरामप्रबन्धम् ॥

अस्ति सकलत्रिदशनिवह . . . . . . रस्यां दिशि धर्मसंवर्धिन्यम्बासमेतश्रीकुलशेखरसान्निध्यः द्विजभक्तियुक्तश्रीरामवर्मभूपालेन सम्यक् परिपालनात् बहुसज्जनसद्भावासः . . . . . . ।

The scribe adds :

तस्मिन् स्थितेन लिखितः खलु नन्दनाब्दे
मासे सहे रवियुते रविपुत्रवारे ।
पक्षे सिते प्रतिपदि श्रवणे च ऋक्षे
कृष्णस्वसाविजय (नाटकसत्प्रबन्धः) ॥
. . . विश्वपतिना धनञ्जयसुभद्रयोः ।
यो रामकविना पूर्वं कृतोऽसौ लिखितः क्रमात् ॥

इदं(अयं)ग्रन्थः श्रीशैलनाथकुलतिलकस्य लोकाचार्यापरनामधेयस्य श्रीनिवासगुरोः श्रीरामपुत्र इति एकेनानुजेन लिखितः ॥

Foll. 30*b*—32*a* and 33 are left blank. Fol. 32*b* gives some Rāmāyaṇaślōkas. Foll. 34*a*—36*a*, 38*a* and 39 give the contents of the stanzas of the Mālatīmādhava. Foll. 36*b* and 38*b* are left blank. Fol. 37*a* contains the name of the Mālatīmādhava. Fol. 37*b* gives one witty stanza. Foll. 40*a*, 42 and 43 give the contents of the Mālatīmādhavaślōkas. Foll. 40*b* and 41 are left blank.

(*b*) मालतीमाधवम्.

MĀLATĪMĀDHAVAM.

Foll. 44*a*—77*b*.

Same work as that described under No. 28 of M. Seshagiri Sastri's Report, No. II, and No. 12589 of the D.C.S. MSS., Vol. XXI.

Complete.

The scribe adds :

श्रीशैलनाथकुलतिलकश्रीनिवासगुरुसूनोर्वकुलभूषणमहादेशिकस्य दासेन लोकाचार्यापरनामधेयेन श्रीनिवासेन लिखितं मालतीमाधवं नाम प्रकरणं संपूर्णम् ॥

Fol. 78*a* gives the title of the Vēṇīsaṁhāra. Foll. 78*b* and 79 give the Nāgādibandhaślōkas.

(*c*) वेणीसंहारम्.

VĒṆĪSAṀHĀRAM.

Foll. 80*a*—107*b*.

Same work as that described under No. 12691 of the D.C.S. MSS., Vol. XXI.

Complete.

(*d*) मालविकाग्निमित्रीयम्.

MĀLAVIKĀGNIMITRĪYAM.

Foll. 108*a*—127*b*.

Same drama as the one noticed under R. No. 602 ante, and described under No. 12605 of the D.C.S. MSS., Vol. XXI.

Complete.

Fol. 128*a* gives the Prākṛta-passages of the Mālavikāgnimitra, 128*b* is left blank. Fol. 129 contains the process of preparing a medicinal oil in the Tamil language.

(*e*) विक्रमोर्वशीयम्.

VIKRAMŌRVAŚĪYAM.

Foll. 130*a*--148*b*.

Same work as that described under No. 12655 of the D.C.S. MSS., Vol. XXI.

Complete.

The scribe adds :

श्रीशैलनाथकुलतिलकश्रीनिवासगुरुवर्यसूनोर्वकुलभूषणमहादेशिकस्य दासेन लोकार्यापरनामधेयेन श्रीनिवासेन लिखितम् ।

(*f*) जानकीपरिणयम्.

JĀNAKĪPARIṆAYAM.

Foll. 149*a*--199*b*.

Same work as that described under No. 12518 of the D.C.S. MSS., Vol. XXI, but with a different stanza containing the Bharatavākya as given below :--

आचन्द्रार्कमिदं भवेदविरलं गोब्राह्मणेभ्यश्शुभं
भूरस्त्वागमवृन्दसेविभिरियं राजन्वती राजभिः ।
लाल्यन्तां सरसोक्तयश्च कवयश्शाश्वद्रसज्ञैस्समं
स्यादेतस्य कवेश्च भक्तिरचला देवे रघूणां प्रभौ ॥

Colophon :

इति यज्ञरामदीक्षितकृतौ जानकीपरिणयनामनाटके सप्तमोऽङ्कः ॥

Foll. 200, 201*b* and 202*b* are left blank. Fol. 201*a* gives the name of the Mukundānandabhāṇa and 202*a* contains two stanzas of Lakṣmīstuti.

(*g*) मुकुन्दानन्दभाणः.

MUKUNDĀNANDABHĀṆAḤ.

Foll. 203*a*--232*b*.

Complete.

Same work as that described under No. 12613 of the D.C.S. MSS., Vol. XXI, but with the additional stanzas given below :--

मुकुन्दानन्दनाम्ना मे भाणेनानेन तोषितः ।
कमलाकमनः कामं कल्लोलयतु मङ्गलम् ॥
कृतिं लसदलङ्कृतिं रसविदो बुधा ये मम
प्रसन्नहृदया दयाजलधयो बहूकुर्वते ।

तदीयपदपद्मयोरयमयं प्रणामाञ्जलिः
सरोजमृदुलाकृतिः . . . . ॥

The scribe adds:

इदंग्रन्थः श्रीशैलनाथकुलतिलकस्य लोकाचार्यापरनामधेयस्य श्रीनिवासगुरोः श्रीरामपुत्र इति एकेनानुजेन लिखितः "

R. No. **3146.**

Palm-leaf. $14\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 149. Lines, 9 in a page. Grantha and Tamil. Good.

Presented in 1919-20 by Alarmēlmaṅgammaṅgār of Āḻvārtirunagarī, Tiruchendur taluk, Tinnevelly district.

(*a*) **व्युत्पत्तिदीपिका.**

VYUTPATTIDĪPIKĀ.

Foll. 1*a*—18*b*.

Same work as that described under R. No. 3124(*a*) ante, wherein see for the beginning. By Vēṅkaṭēśa.

The work is divided into the following three Paricchēdas:—

१. शब्दविवरण.
२. कारकविवरण.
३. समासविवरण.

Colophon:

इति श्रीवेङ्कटेशकृतौ व्युत्पत्तिदीपिकायां शब्दविवरणं नाम प्रथमपरिच्छेदः ॥

सालङ्कारा सगुणा सुपदा व्युत्पत्तिदीपिका सेयम् ।
साध्वी सत्यपि वितरति सर्वेषां सम्यगनुभवं सततम् ॥

अत्र सालङ्कारा उपमाद्यलङ्कारसहिता । सगुणा प्रसादादिशब्दगुणसहिता । सुपदा शोभनसुबन्ता । साध्वी समीचीना ! सम्यगनुभवं सम्यक्ज्ञानम । अन्योऽर्थः स्पष्टः ।

End:

उक्तेषु समासेषु पूर्वमनुक्तानामपि केषाञ्चित्पदानामुदाहरणम्—

उद्भासमानोन्नतराजदन्ता घण्टा(रवा)पूरितदिग्विभागाः ।
आरोहयन्ति स्वयमेव नागाश्शठारियोगीन्द्रमहोत्सवेषु ॥

अत्र दन्तानां राजानो राजदन्ता इत्यर्थः । (पूर्वं) प्रयोक्तव्यस्य दन्तशब्दस्य परनिपातः । आरोहणकर्मभूतानां शब्दानां (नागानां) हस्तिपकर्तृकारोहणानायासत्वद्योतनार्थम् । प्रापक(ण)कर्तृत्वान्नागा इत्यारोहणकर्तारः । ननु

कर्मवत् कर्मणा तुल्यक्रियमि(इ)ति सूत्रोक्तकर्मवद्भावेनारोहणकर्तृत्वे सति प्रेषणाभावाव(दा)रोहयन्त इति णिच्प्रत्ययश्च किमर्थ इति चेदुच्यते ।

* * * *

अनुक्तास्समासभेदाः शब्दप्रकाराश्च शब्दशास्त्रेषु द्रष्टव्याः ॥

Colophon:

इति व्युत्पत्तिदीपिकायां समासविवरणं नाम तृतीयपरिच्छेदः ॥

पात्रस्नेहदशायोग्या परा(दा)र्थज्ञानदायिनी ।
व्युत्पत्तिदीपिका जीयात् दीपिकेव तमोऽपहा ॥

The scribe adds:

लोकाचार्येण स्वहस्तलिखिता व्युत्पत्तिदीपिका समाप्ता ॥

Fol. 49*a* contains one stanza of Avyayapadārthanirūpaṇa. Fol. 49*b* is left blank. Fol. 50*a* contains two stanzas addressed to Kṛṣṇa and Rādhā, and fol. 50*b* is left blank. Foll. 51*a*—52*a* contain a few stanzas of Viṣṇustōtra. Fol. 52*b* is left blank. Fol. 53*a* gives the name of the work and fol. 58*b* is left blank.

(*b*) பிரயோகவிவேகம், உரையுடன்.
PIRAYŌGAVIVĒKAM WITH COMMENTARY.

Foll. 54*a*—149*a*. Foll. 142*b* and 149*b* are left blank.

See the Tamil part of this Triennial Catalogue.

R. No. **3147**.

Palm-leaf. $17\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 203. Lines, 8 in a page. Grantha. Good.

Presented in 1919–20 by Alarmēlmaṅgammaṅgār of Āḻvārtirunagarī, Tiruchendur taluk, Tinnevelly district.

पुरुषकारमीमांसा, मणिदीपिकाव्याख्यासहिता.
PURUṢAKĀRAMĪMĀṀSĀ WITH THE COMMENTARY MAṆIDĪPIKĀ.

Same text as that described under No. 5298 of the D.C.S. MSS. Vol. IX. The author of the text Śrīvatsāṅka alias Nārāyaṇamuni, disciple of Vīrarāghava, praises Dēvarājācārya, and his father Varadaviṣṇvācārya of Śrīvatsagōtra who was the nephew of Śrīrāmānujācārya. The commentary is by Śrīśailēśa of Vatsagōtra, son of Rājagōpāla. The commentator praises his elder brother Śrīnivāsaguru, a remote disciple of Ammāḷāryaguru.

Complete.

Beginning:

वन्दे कुरङ्गनाथस्य पादाब्जं श्रीनिषेवितम् ।
यन्मध्वोघस्सुरनदीसहजस्समपद्यत ॥

कुरुङ्गभर्तुर्महिषीं भजेऽहं पद्मसंश्रिताम् ।
यत्साहाय्याद्विभोर्दीक्षा सफला त्राणकर्मणि ॥
भजाम्यहं सैन्यपतिं कुरुङ्गक्ष्माभृतोऽन्वहम् ।
यदीक्षणसुधाबिन्दुस्तत्क्षान् तारयते जनान् ॥
श्रीमच्छठारिपादाब्जं भक्त्या मूर्ध्ना नतोऽस्म्यहम् ।
यस्य चेतसि यन्नित्यं स हृद्यः श्रीपतेस्सदा ॥
यतीन्द्रचरणौ स्यातां श्रेयसे मम सर्वदा ।
यतश्श्रुतीनां हृदयं प्रसन्नं तत्त्ववर्णनात् ॥
वन्दे वरदविष्णवार्यं वत्सवंशविभूषणम् ।
दत्तं यस्मै यतीन्द्रेण भाष्यसिंहासनं निजम् ॥
त्रय्यन्तदेशिकस्याङ्घ्रौ भक्तिः स्यात्सुदृढा मम ।
यत्प्रसादधनाढ्यानां श्रीशो भवति किङ्करः ॥
त्रय्यन्तयुग्मं बहुधा येन सत्सु प्रवर्तितः(म्) ।
श्रीवात्स्यराजगोपालगुरुं मत्तातमाश्रये ॥
यत्सेवया मया लब्धं श्रीशतत्त्वावबोधनम् ।
अम्मालार्यगुरोः पादौ शिरसा प्रणतोऽस्म्यहम् ॥
श्रीवीरराघवमुनेर्वैरिवस्यैकजीवनम् ।
समाश्रयेमहि श्रीमन्नारायणमुनीश्वरम् ॥
नारायणाख्यं मुनिमाश्रयेऽहं त्रय्यन्तविद्यागुरुसूक्तिसारैः ।
निरूपितं येन रमास्वरूपं यथागमन्यायकलापतश्च ॥

इह खलु भगवान् सर्वतन्त्रस्वतन्त्रोभयवेदान्ताचार्यपरमहंस[क]परिव्राजकाचार्यश्रीमच्छठकोपश्रीवत्साङ्कश्रीमन्नारायणमुनिः स्वचिकीर्षितग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनार्थं विशिष्टशिष्टाचारसिद्धं स्वेष्टदेवतानतिरूपं मङ्गलमाचरति—स्वतन्त्र इति ।

स्वतन्त्रस्स्वेच्छया सृष्टिस्थितिसंहारमोक्षणैः ।
यत्समक्षं क्रीडतीशस्तां भजे लोकमातरम् ॥

स्वतन्त्रः अनन्याधीनः न तस्येशः कश्चनेति श्रुतेः । ईशः सर्वनियन्ता । तमीश्वराणां परमं महेश्वरमित्यादिश्रुतेः । स्वेच्छया स्वसङ्कल्पेन

निग्रहानुग्रहोभयात्मकेषु निखिलजगत्सृष्टिस्थितिसंहारमोक्षणादिषु व्यापारेषु तस्यैवासङ्कोचेन साक्षादन्वयस्संभवतीति भावः ।

End:

एवमनेन प्रबन्धेन प्रतिपादितार्थस्य सांप्रदायिकत्वं वक्तृवैलक्षण्यं च कथयन् ग्रन्थनामधेयं च प्रकटयन् निगमयति—

नारायणेन मुनिना श्रीवत्साङ्कविपश्चिता ।
सैषा पुरुषकारस्य मीमांसा निर्मिता मता ॥

श्रीवत्साङ्केत्यनेन पूर्वाश्रमदशायामपि श्रीवत्सवंशाधिपयतिसार्वभौमप्रिय-भागिनेयश्रीभाष्यसिंहासननिर्वाहकश्रीवरदविष्णुमिश्रतथाविधप्रभावतत्कुमारदेव-राजाचार्यतदधिकवैभवशालितया प्रसिद्धहस्तिगिरिनाथकृपालब्धाम्बापदप्रबुद्ध-गुरुतया प्रसिद्धवरदार्यकूटस्थसम्बन्धव्यञ्जकेन तथाविधदेशिककटाक्षलब्धो-द्दाममहिमतया वक्तृवैलक्षण्यं प्रदर्शितम् । नारायणेन मुनिनेत्यनेन सम्प्रदाय-वैलक्षण्यं प्रदर्शितम् ।

* * * *

पुरुषकारस्य मीमांसेति समभिव्याहारेण घटकतया प्रसिद्धलक्ष्मीविषये शारीरकशास्त्रप्रतिपन्नब्रह्मलक्षणभूतकारणत्वादियोगसद्भावविचारात्मिका मीमांसा निर्मितेति । मता । मतेत्यनेनानहंभावद्योतकेन शमदमाद्यनन्तकल्याणगुण-शालिता वक्तॄणां युज्यत इति ॥

Colophon:

श्रीवत्सवंशतिलकश्रीशैलेशाद्विपश्चितः ।
जाता पुरुषकारस्य मीमांसामणिदीपिका ॥
श्रीवीरराघवमुनेर्वरिवस्यैकजीवनम् ।
समाश्रयेमहि श्रीमन्नारायणमुनीश्वरम् ॥
श्रीवात्स्यराजगोपालतनयं तत्पदाश्रयम् ।
अम्मालार्यकृपापात्रं श्रीनिवासगुरुं भजे ॥

Leaves 165—176 are missing.

R. No. **3148.**

Palm-leaf. $17\frac{1}{2} \times 1\frac{3}{4}$ inches. Foll. 55. Lines, 7 in a page. Grantha. Good.

Presented in 1919-20 by Alarmēlmaṅgammaṅgār of Āḻvārtiru-nagarī, Tiruchendur taluk, Tinnevelly district.

(*a*) शठकोपसहस्रम्.

ŚAṬHAKŌPASAHASRAM.

Foll. 1*a*—51*b*.

Same work as that described under R. No. 3116 ante.

Contains the stanzas 1—510 only.

Beginning :

श्रीभट्टेशमुनीन्द्रो जीयादस्मद्गुरुस्स नित्यश्रीः ।
यस्य हि भगवान् शठजित्स्वस्यैवांशावतारतामाह ॥
भद्राणि भावयतु मे भगवान् प्रबोधमुद्राकरो मुनिरसौ वकुलाभिरामः ।
यद्द्राविडागमनयाद्यतिसार्वभौमः विद्रावणं वितनुते स्वविरुद्धवाचाम् ॥
वाचामसीममहिमा वकुलाङ्कसूरिः प्राचामुदारवचसां यदसौ प्रधानः ।
स्वाचारसाधुजनसादरसूक्तियोग्ये धीचापलाद्धि मम तन्नवने प्रवृत्तिः ॥
वृत्तान्त एव शठकोपविभो स्मृतो मे चित्तान्तरावहति हन्त चिरस्य मोदम् ।
सत्तां तदा न हि यदुक्तिसुधासदापनुत्तान्तरायमखिनाभाखिलात्मनां च ॥
भावोऽद्य मे शठरिपो भवति त्वदङ्घ्रौ देवोऽपि दिव्यनिजविग्रहदर्शनेन ।
नैवोपबोद्धुमिममुत्सहते न चान्यसेवोत्सुकः किमुत तं स्थिरमार्य कुर्याः ॥
कुर्यादिदं दशकमार्यकुलावतंसचर्यास्पदं जगति कश्चन वाचनीयम् ।
पर्याप्तभाग्य इह चैष परत्र चैनं धुर्यस्सदा दिविषदां धुरि पूजयेरन् ॥

Fol. 52 contains a repetition of the stanzas 421 to 428.

(*b*) शठकोपसप्तविभक्तिस्तवः.

ŚAṬHAKŌPASAPTAVIBHAKTISTAVAḤ.

Fol. 53. Foll. 54 and 55 are left blank.

A eulogy in eight stanzas addressed to the great Śrī-Vaiṣṇava saint, Śaṭhakōpamuni, whose name is used in all the seven cases nominative, accusative, and so on : by Nārāyaṇa.

Complete.

Name of the scribe ; Aḻagar of Nācciyārtirumāḻigai.

Beginning :

कारुण्यात् कारिसूनुः कमलरुचिरदृक्कान्तजन्मा कलौ त-
त्तारुण्यात्तान्तजीवावनकलितमतिस्ताम्रपर्णीतटेऽस्मिन् ।
आरुण्यात्पादपद्मेऽवनितलकलितस्पर्शजातप्रधीदात ?
. . . सक्तचित्तं कलयतु तरुणीचापलं मां निगृह्य ॥

श्रीमन् श्रीकारिसूनो भववनगमनश्रान्तविश्रान्तिशीता-
सीमच्छायाकरश्रीपतिपदकमलप्रापणप्रेमशालिन् ।
कामाद्याशेषदोषान्धतिमिरनिचयच्छेदकारिस्मितश्री-
कौमुद्युद्भ्राजमानातुलविमलशरत्पूर्णचन्द्रास्य पाहि ॥

End:

भूम्यां निर्निद्रचिञ्चाच्छलरुचिरलसत्पन्नगक्षोणिपाल-
च्छायाराजन्निवासे वकुलसुमनसन्मालिकाराजितांसे ।
श्रेयस्कामैश्च नाथादिभिरपि गुरुभिः पूर्वकैस्संश्रिताङ्घ्रौ
भूयान्मे चित्तवृत्तिः शठमथनमुनौ सन्ततं न्यस्तभक्तिः ॥

Colophon:

श्रीनारायणकृतवकुलाभ(र)णसप्तविभक्तिस्तवमिदं तत् ॥

R. No. **3149.**

Palm-leaf. 15¾ × 1½ inches. Foll. 73. Lines, 9 in a page. Grantha. Good.

Presented in 1919–20 by Alarmēlmaṅgammaṅgār of Āḻvārtirunagarī, Tiruchendur taluk, Tinnevelly district.

(*a*) गरुडपञ्चाक्षरीकल्पः.

GARUḌAPAÑCĀKṢARĪKALPAḤ.

Foll. 1*a*—35*b*. Foll. 35*b*—37*b* contain some Mantraprayōgakrama and Auṣadhaviṣaya with Tamil meaning.

Same work as that described under R. No. 1738*b* ante.

Contains the following Adhyāyas complete :—

१. ऋष्यादिमुद्राबीज—मन्त्रगणविधिः.
२. ध्यानमाहेन्द्रमण्डलविधिः.
३. विनियोगविधिः.
४. नागोपद्रवादिलक्षणविधिः.
५. विषसंहारादित्रयप्रयोगविधिः.
६. सर्पक्रीडालक्षणादिविधिः.
७ शेषादिमन्त्रकथनम्.
८. दर्वीकरविनाशनविधिः.
९. मण्डलिविषचिकित्साविधिः.
१०. राजिलचिकित्साविधिः.
११. मूषिकविषचिकित्साविधिः.
१२. नानाविषनिग्रहविधिः.
१३. अभिषेकयन्त्रधारणविधिः

Beginning:

काश्यपं तं महात्मानमादित्यसमतेजसम् ।
अभिवाद्याभिसङ्गम्य गौतमः पर्यपृच्छत ॥
त्वं हि वेदविदां श्रेष्ठो ज्ञानानां परमो निधिः ।
प्रजापतेरात्मभवो भूतभव्यविदुत्तमः ॥

* * * *

श्रीमद्गरुडपञ्चार्णं श्रोतुमिच्छामि वैभवम् ।
यद्यनुग्रहपात्रं मां मन्यसे गतकिल्बिषम् ॥

* * * *

काश्यपः—

साधु साधु त्वया पृष्टं जगतां हितकाम्यया ।
श्रीमद्गरुडपञ्चार्णमाहात्म्यं तदनन्तरम् ॥
ऋष्यादिमुद्रामन्त्रस्य ध्यानं सर्वार्थसाधकम् ।
पूर्वसेवाविधिं चैवाभ्यर्चनं तदनन्तरम् ॥
नानामन्त्रविधानं च शक्त्यादिकमतः परम् ।

* * * *

Colophon:

इति काश्यपीये गरुडपञ्चाक्षरकल्पे ऋष्यादिमुद्राबीजपिण्डसंज्ञापदादिमन्त्रगणविधिः प्रथमोऽध्यायः ॥

End:

पूर्वोक्तयन्त्रमालिख्य तत्प्रतिष्ठां करोति सः ।
प्राणप्रतिष्ठां कृत्वाथ जपेदष्टसहस्रकम् ॥
तत्समं होममाज्यैश्च हुत्वा सम्पातमाचरेत् ।
अभिषेकात्परं मन्त्री यन्त्रधारणमाचरेत् ॥
पूर्ववद्दक्षिणां दद्यात् पूर्ववत्फलमाप्नुयात् ।
एवंप्रकारं यः कुर्यात् तस्य सिद्धिर्भवेद्ध्रुवम् ॥

Colophon:

इति काश्यपीये गरुडपञ्चाक्षरीकल्पे अभिषेकयन्त्रधारणविधिस्त्रयोदशोऽध्यायः ॥

(*b*) लक्षणामृतम्.

LAKṢAṆĀMṚTAM.

Foll. 38*a*—42*a*.

Same work as that described under R. No. 2748 ante.

Contains one to seven Paṭalas only.

(*c*) गरुडमालामन्त्रकल्पः.

GARUḌAMĀLĀMANTRAKALPAḤ.

Foll. 42*a*—46*a*.

Similar to the work described under No. 6176 of the D.C.S. MSS., Vol. XII.

Deals with the following subjects :—

१. विद्वेषणम्.	५. स्तम्भनम्.
२. मोचनम्.	६. स्तोभनम्.
३. मारणम्.	७. उत्थापनम्.
४. बन्धनम्.	८. उच्चाटनम्.

Complete.

Beginning :

विद्वेषणम्—अग्निमण्डलं वायुमण्डलं विलिख्य तन्मध्ये बीजमण्डलं विलिख्य अग्निवायुसहितं गरुडं ध्यायेत् । मन्त्रः—हा स्वा पक्षि ओम् । अस्य विषादीन् विद्वेषय स्वाहा ।

End :

ओं औं ऐं नमो भगवते रुद्राय सुपर्णपतङ्गप्रेताधिपतये

* * * *

सुपर्णपतङ्गगरुडो ज्ञापयति स्वाहा । सर्पोच्चाटनम्—क्षिपः प्रक्षिपः ओं पक्षि ओं स्वाहा । सर्पोच्चाटनम् ओं तार्क्ष्यहस्तः ॥

(*d*) नारायणीयम् (विषवैद्यम्).

NĀRĀYAṆĪYAM (VIṢAVAIDYAM).

Foll. 46*a*—50*a*.

A treatise on the mode of using, after necessary purification, different kinds of poisonous substances in the preparation of certain medicines : by Nārāyaṇa.

Contains the third Paṭala only.

Beginning :

भृगौ दण्डिनि जीवाख्ये साध्यहृत्पद्मकोशगे ।
तन्मा(मा)र्णा(द्व)ते चन्द्रफ(छ)न्नभूसद्म विन्यसेत् ॥

कण्ठे सुधाढ्यमिन्दुं भ्रूमध्ये बिन्दुं च चिन्तयेत् ।
कार्यादौ जीवरक्षेयं ग(ब)न्धबन्धेति भाषणात् ॥

End :

कान्तं कलाकालयुतं स्वहस्तपद्मस्य मध्ये दलपञ्चके च ।
ध्यात्वामृतीभूतकरो नरेन्द्रः स्पर्शेन सर्वाणि विषाणि हन्ति ॥

Colophon :

इति नारायणीये तृतीयः पटलः ॥

(*e*) नारायणीयव्याख्यानम्.

NĀRĀYAṆĪYAVYĀKHYĀNAM.

Foll. 50*a*--55b.

A commentary on the work described above

Contains the third Paṭala only.

Beginning :

जीवरक्षापूर्वकत्वात् विषसंहारस्य जीवरक्षां प्रथममाह--भृगावित्यादि । भृगुस्सकारः । दण्डोऽनुस्वारः एवं सं इति जीवबीजम् । तन्नामार्णावृते देवदत्तस्य जीवं रक्षेति चन्द्रच्छन्ने ठकारवेष्टिते भूसद्म विन्यसेदिति । तस्योपरि स्थितेन मण्डलेन पिहितं कुर्यात् । इन्दुं ठकारम् ।

End :

कान्तम्—ख कालयुक्तम् । खम् । खगहस्ततलमध्यस्थपद्मकर्णिकायां तदेव कान्तं कालयुतं करतलपद्मस्य क(र)दलीभूतपञ्चाङ्गुलीषु च विन्यस्य ध्यात्वा नरेन्द्रो विषं हरेत् ॥

Colophon :

इति नारायणीये व्याख्याने तृतीयः पटलः ॥

(*f*) पातालगरुडमन्त्रः.

PĀTĀLAGARUḌAMANTRAḤ.

Foll. 55b--56*a*.

Similar to the work described under No. 6601 of the D.C.S. MSS., Vol. XIII.

Complete.

Beginning :

ओं पातालगरुडमन्त्रस्य ब्रह्मा ऋषिः, देवी गायत्री छन्दः, कालाग्निरुद्रो महागरुडो देवता, क्षृ ह्रां बीजं, क्ष ह्रीं शक्तिः, क्ष ह्रूं कीलकं, मम सकलविषसंहरणार्थे विनियोगः ।

End :

ओं क्षृ ह्रीं स्वाहा ओं । पुनष्षडङ्गः ॥

Colophon :

इति पातालगरुडमन्त्रं(न्त्रः) समाप्तम्(ः) ॥

(*g*) गरुडसन्ध्यावंन्दनम्.

GARUḌASANDHYĀVANDANAM.

Foll. 56*a*—57*a*.

Similar to the work described under Nos. 6156 and 6157 of the D.C.S. MSS., Vol. XII.

Complete.

Beginning :

गरुडपञ्चाक्षरमहामन्त्रस्येत्यारभ्यापादादाजानु स्वमित्यन्तं कृत्वा दले पञ्चकं दलं पद्मं विलिख्य मध्ये दलेषु पञ्चार्णं विलिख्य प्राणप्रतिष्ठामन्त्रं त्रिधा जपित्वा

* * * *

परमन्त्रयन्त्रतन्त्रादीन्नाशय हुं फट् स्वाहा इत्यभिमन्त्रितजलं प्राशयेत् । ततः गरुडगायत्र्यार्घ्यत्रयं दद्यात् ।

End :

गरुडगायत्रीं प्राणायामपूर्वकमष्टाविंशतिकृत्वा(त्वो)जपेदन्यत्र चेदष्टोत्तरशतम् ॥

Colophon :

इति गरुडसन्ध्यावन्दनं समाप्तम् ॥

(*h*) गरुडकल्पः.

GARUḌAKALPAḤ.

Foll. 57*a*—65*a*.

Similar to the work described under Nos. 7810 and 7811 of the D.C.S. MSS., Vol. XV. Said to have been copied by Cakrapāṇi Śāstri for Vakula-Bhūṣaṇa on the 10th of Paṅguni in the year 1056.

Complete.

Beginning :

आराधनविधिं वक्ष्ये साधकानां हिताय वै ।
स्नात्वा शुद्धः प्रसन्नात्मा वर्णाश्रमविधिं चरेत् ॥
पादप्रक्षालनं कृत्वा तथाचम्य विधानतः ।
यागभूमिं प्रविश्याथ गुरुवन्दनपूर्वकम् ॥

प्राणायामत्रयं कृत्वा चोर्ध्वपुण्ड्रधरस्तथा ।
न्यासं कृत्वा विधानेन लक्ष्मीशं गरुडोपरि ॥
ध्यात्वा योगोपयुक्तं च द्रव्यं संप्रोक्ष्य मन्त्रवित् ।
पात्रशुद्धिं ततः कृत्वा शुद्धतोयेन पूरयेत् ॥

* * * *

विशेषतिथिषु पूजां कुर्वन् साधकश्श्रीगरुडपदप्रत्याहतशक्तिर्भवति ।
औषधग्रहणं वक्ष्ये तत्क्रमं शृणु गौतम ।
धान्यौषधानि गृह्यन्ते विधानेन विना जपम् ॥
तेषां वीर्यत्वहानिः स्यात् विधिना सङ्ग्रहेत्ततः ।

* * * *

उद्धरे(त्) मनुना मन्त्री औषधं वीर्यवद्भवेत् ।
एकत्र विधिवत्कुर्यात्तज्जातिर्वीर्यवद्भवेत् ॥
गारुडेन शतावृत्त्या सर्वौषधिविधिस्स्मृतः ।

* * * *

अथ यन्त्राणि मुख्यानि वदामि मुनिसत्तम ।
पञ्च यन्त्राणि तार्क्ष्यस्य सद्यः प्रत्ययवन्ति च ॥

End:

आत्मानं गरुडं ध्यात्वा मन्त्रं तु मनसा जपेत् ।
आवेशं चैव संहारं निर्विषीकरणं तथा ॥

अस्य व्याख्यानम्—त्रिकोणं विलिख्य तन्मध्ये रेफं बहिः प्रणवेन वेष्टयेत् । तद्बहिः पञ्चमुखान् परितो विलिख्य षं षं षं षं ओमिति पञ्चमुखं तद्बहिः हकारेण वेष्टयेत् । तद्बाह्ये क्षिं ह्रां ह्रीमिति परिवेष्टयेत् । तद्बहिः नागानां नामभिः परिवेष्टयेत् । तद्बहिः पाशशक्तिभ्यां परिवेष्टयेत् । इदं यन्त्रं स्तोभसंहारकं भवति ।

* * * *

संहारं मारणं चैव अक्षरं रेफमेव च ॥
आपः—शान्तिकं पौष्टिकं चैव स्तम्भनं वश्यकृन्मम—वः ।
पृथिवी—आयुरारोग्यमे(व)मनुग्रहाकर्षणम् लम् ।

Foll. 65*b*—69*b* contain the Ākāśagaruḍayantra with Tamil meaning and 70 and 71*a* some witty stanzas. Fol. 72*b* contains two stanzas on Śaṭhakōpa. Foll. 71*b*, 72*a* and 73 are left blank.

R. No. 3150.

Palm-leaf. $15\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 151. Lines, 6 in a page. Grantha. Injured.

Presented in 1919-20 by Alarmēlmaṅgammaṅgār of Āḻvārtirunagarī, Tiruchendur taluk, Tinnevelly district.

सङ्कल्पसूर्योदयव्याख्यानम्.

SAṄKALPASŪRYŌDAYAVYĀKHYĀNAM.

Foll. 1a—149b. Foll. 150 and 151 are left blank.

Similar to the work described under No. 12715 of the D.C.S. MSS., Vol. XXI. By Bhāṣyanārāyaṇa, who is the brother of Śrīnivāsācārya of Śrīvatsa family, disciple of Ācci Vēṅkaṭācārya.

Contains Aṅkas two to seven complete.

Beginning:

संप्रति वृत्तवर्तिष्यमाणस्वपक्षस्थापनपरमतनिरसने सूचयन् तदर्थं प्रावेशकं प्रकाशयति—तत इत्यादि । श्रमजलबिन्दुनिकरनिर्वासितललाटतटवत् सद(न्द)र्शनोत्सुका वत्सलेव व्रजसि मुखचन्द्रदर्शितसुधासुभगाच्छविफुल्लमल्लिमकरन्दनिभा नवयौवनसौम्यलताकलिकाश्र(श्रि)यमुद्वहन्ति तव स्वेदकणाः । छविरेव फुल्लमल्लि ! प्रियसखीदानीं किलैकमुखप्रतिष्ठापितश्रुतिशिरस्सिद्धान्तस्य परपक्षप्रतिक्षेपभावितप्रतिज्ञस्य भर्तुर्विवेकस्य सहधर्मचा(च)री देवी सुमतिः प्रक्रान्तनिर्वाणदोहलेन परिगृहीतमङ्गलाचारा प्रमदावनपार्श्वरत्नशैलमाश्रिता कमलापतिचरणकमलसमर्चनयोग्यानि काञ्चनपद्मान्युपहर्तुमाज्ञाप्य शोभनैकतानहृदया सुखं तिष्ठति । दोहलेनौत्सुक्येन । एकतानहृदया अनन्यपरमनस्का । तस्मादुपसर्पामि ।

* * * *

Colophon:

इति यतिवरचरणसरोरुहभृङ्गायमाणाच्चिवेङ्कटगुरुकृपालब्धश्रीभाष्याद्यन्वयेन श्रीवत्सकुलतिलकश्रीनिवासार्यावरजेन श्रीभाष्यनारायणसूरिणा विरचितासु कृतिषु सङ्कल्पसूर्योदयविवरणे द्वितीयोऽङ्कः ।

End:

परमपुरुषस्य यत्र क्वचन विग्रहपूर्वोक्तप्रधानावतारेषु पुंसां समाजेन निध्यानहेतुं भावनां ध्यानं साधयिष्यामि ।

पदेति । प्रमाणैः श्रुतिस्मृतीतिहासपुराणादिभिर्भासमानः श्रुत्यादिवेद्य इत्यर्थः । असङ्कल्पा(नुकम्पा)निघ्ननिर्विघ्नलीलः दयाधीनाः निरन्तरायाश्च लीला यस्य सः । प्रभुरीश्वरः ।

* * * *

परिणमयति आविष्करोति । प्रमाणैः पदकमलनतानां भासमान इति वान्वयः, नत्वितरेषामित्यर्थः । कृतमलम् ।

Colophon:

इति यतिवरचरणसरोरुहभृङ्गायमाणाच्चिवेङ्कटगुरुकृपालब्धश्रीभाष्यान्वयेन श्रीवत्सकुलतिलकश्रीनिवासार्यावरजेन श्रीभाष्यनारायणसूरिणा विरचितासु कृतिषु सङ्कल्पसूर्योदयव्याख्याने सप्तमोऽङ्कः ॥

Name of scribe: Sundaradāsa, son of Śaṭhakōpācārya. Date of completion of the copying: First day of the solar month Aippiśi in the Śaka year 851.

R. No. **3151.**

Palm-leaf. 14¼ × 1⅜ inches. Foll. 20. Lines, 7 in a page. Grantha. Good.

Presented in 1919–20 by Alarmēlmaṅgammaṅgār of Āḻvārtirunagarī, Tiruchendur taluk, Tinnevelly district.

अर्थपञ्चकनाटकम्.

ARTHAPAÑCAKANĀṬAKAM.

Same work as that described under No. 12494 of the D.C.S. MSS., Vol. XXI.

Complete.

Foll. 12*b* and 20*b* are left blank.

R. No. **3152.**

Palm-leaf. 18 × 1⅜ inches. Foll. 21. Lines, 7 in a page. Grantha. Injured.

Presented in 1919–20 by Alarmēlmaṅgammaṅgār of Āḻvārtirunagarī, Tiruchendur taluk, Tinnevelly district.

(*a*) अन्यापदेशः.

ANYĀPADEŚAḤ.

Foll. 1*a*—17*b*.

Similar to the work described under R. No. 366(*c*) ante.

Contains 9 to 131 stanzas only.

Beginning:

नित्यश्रीनिलयं नृपालवलयं तूलौघमालोकते
तस्मै श्रीरघुनाथतीर्थगुरवे भूयः प्रयुञ्जे नमः ॥ ८ ॥
जीमूतभास्करसुधाकरशैलसिन्धुधात्रीरुहव्रततिपत्रिमुखापदेशात् ।
कुर्वे पुरोनुतिविधूतिकथासहत्वसम्बन्धसाधुखलभूषणदूषणानि ॥ ९ ॥

End:

अग्रे पश्य चकास्ति काञ्चनलता काचिज्जगन्मोहिनी
मृद्वङ्गी तरुणी महोच्चसुमनोगुच्छद्वयोद्भासिनी ।
एतस्या मधुरामृतद्रवसमास्वादप्रमोदास्पदं
यो भोगो भवति क्षणं स भुवनश्लाघापदं शोभते ॥ १३१ ॥

(*b*) श्यामलादण्डकः.

ŚYĀMALĀDAṆḌAKAḤ.

Foll. 18*a*—20*b*.

Same work as that described under No. 10837 of the D.C.S. MSS., Vol. XIX.

Fol. 21 gives a list of books in Tamil.

R. No. 3153.

Palm-leaf. $17\frac{3}{8} \times 1\frac{5}{8}$ inches. Foll. 95. Lines, 7 in a page. Grantha. Good.

Presented in 1919–20 by Alarmēlmaṅgammaṅgār of Āḻvārtirunagarī, Tiruchendur taluk, Tinnevelly district.

Fol. 95*b* is left blank.

शठवैरिवैभवदिवाकरः.

ŚAṬHAVAIRIVAIBHAVADIVĀKARAḤ.

Foll. 1*a*—95*a*. Fol. 95*b* is left blank.

A treatise describing the greatness and genealogy of Śaṭhakōpamuni. Apparently by Śrīnivāsācārya, whose genealogy is given below :—

- Sādhubhaṭṭāraka
  - Viśva
    - Periyallar
      - Raṅganātha
        - Tīrthavāriguru
          - Jīyar Yāmunācāriyar
            - Mādhavadēśikar
              - Cennaguru and 19 others
                - Tirumala
                - Bhaṭṭāraka
                  - Veṅgalācāriyar
                    - Tirumala
                      - Veṅgala
                      - Narahari
                      - Ananta
                        - Nṛsiṁha
                          - Vēṅkaṭācāriyar
                            - Narasiṁha
                              - Śrīnivāsācāriyar (the author of the work)
                                - Vēṅkaṭācārya
                                - Nṛsiṁhācārya
                                - Anantācārya.
                      - Siṅga
                    - Bhaṭṭāraka
                - Tirumalācāriār

The former owner of the MS. is stated to be Vakulābhūṣaṇācārya alias Ponnaiyaṅgār, who lived in Mēlatirumāḷigai belonging to Tiruvāymoḻippiḷḷai.

Beginning:

श्रीशेषाचलनाथस्य नाभितामरसोदरात् ।
विरिञ्चिरुदभूद्वेणुस्तदीय इव मूर्तिमान् ॥
लेभे यस्तपसा निजेन विजरो दिव्यं वयोवैभवं
यत्सत्यादिगुणो विवेश विलसत्कर्मा सुधर्मान्तरम् ।
यत्सन्तानपरंपराद्रुमततिस्सर्वागमश्लाघिता
मौद्गल्यर्षिपुरन्दरो विरुरुचे तद्ब्रह्मवंशोज्वलः ॥
मौद्गल्यमौलिक्षितिभृद्विशालवंशे मखी श्लाघ्य इवाविरासीत् ।
निर्दोषवृत्तस्सरसस्सुहृद्यः श्रीसाधुभट्टारकनामसूरिः ॥
चक्रे विश्वजयं पुनर्गतवतो रामानुजस्यान्तिकं
पार्श्वे कूरवरेण साकमनघं श्रीसाधुभट्टारकम् ।
दृष्ट्वा रङ्गपतिस्त्वभाषत मरिर्हण्टीति वाचा स्वयं
तस्मात् तत्पदभूषितं कुलमभूदासूरि साधोर्भुवि ॥
विश्वाख्योऽभून्महाविद्वान् साधुभट्टार्यनन्दनः ।
यदुक्तिमुकुरे लक्ष्मीलक्ष्मीनाथौ(?) विचक्षणैः ॥
कुमारस्तस्यासीत् भुवि च पेरियल्लाह्वयगुरुः
गुरुप्रज्ञाटोपप्रकटितयशोवासितदिशः ।
यदीयोपन्यासः कलयत कलापं श्रवणयोः
विधातुः प्रत्यग्रं विगलितसुरद्रुप्रसवगोः ॥
तस्य श्रीरङ्गनाथस्समजनि तनुजो रङ्गनाथोऽतिरिक्तः
त्रय्यन्तस्थापनाय क्षितितलवलये द्राघ(घ)योपात्तयात्रः ।
यस्य श्रीपादपद्मामृतरसविवशात्तत्क्षणात् ब्रह्मरक्षो
दीक्षामोदं वितेने विबुधपरिषदां विष्टपे श्रीसखस्य ॥
तीर्थवारिगुरुर्जज्ञे तस्मात्तीर्थपदो भुवि ।
यतीन्द्रभाष्यसौगन्ध्यकर्णेजपवचोभरः ॥
जीयाह्वयस्ततो जातो जाताकृतिरिवागमः ।
यत्प्रबन्धपरीवाहवेतसा जगतीजनाः ॥
यामुनो यामुन इव प्रयते स्म तदानुजः ।
सेतुसेतोर्विभृत्सीमा सीमन्ताभरणैर्गुणैः ॥

श्रीयामुनादजनि माधवदेशिकेन्द्रो निस्तन्द्रवैभवनिराकृतदुर्जनौघः ।
यः प्राप्य भूर्जगति विंशतिरङ्गजानामेकाङ्गजप्रजनकं प्रसभं निवै(रै)क्षि ॥

तदीयसुतविंशतौ निखिलवेदशास्त्रावली-
स्वयंवरणलक्षितासदृशवैभवाडम्बरः ।
निजोदयवशास्फुरत्फणसहस्रशेषाकृति-
प्रदर्शनमहत्प्रभाज्ज(ज)गति चन्नगुर्वग्रजः ॥

तस्य द्विपार्चितपदाम्बुरुहोपनीत-
शार्दूलदारुणरवः पदतीर्थदानात् ।
रक्षोमहाभुजगयोरदिशद्विकुण्ठं
श्रीचन्नदेशिकवरः कथमुक्तिगण्यः ॥

श्रुतिप्रभृतिविद्यया विजितचक्रवर्तिप्रभो
नृसिंह इव फालदृग्वरवर्षिसाहाय्यकृत् ।
बभौ भुवि नलन्दिकळ्यतिवरेण्यनारायण-
स्वसृप्रियतनूभवस्सपदचन्नयार्यप्रभुः ॥

देवताक्षितिभृत्सीम्नि पर्णराजपलीगिरौ ।
स्वयंव्यक्तो मरिहण्टी चन्नयार्यो विराजते ॥

तस्यात्मजास्तिरुमलाह्वयसूरिवर्यो
भट्टार्यकस्तिरुमलार्य इति प्रतीतः ।
वैश्वानरास्त्रय इवाकलयन् जगत्यां
दुर्वादिवादपदवीवनराजिदावम् ॥

तस्य भट्टारकस्यासीद्वेङ्गलार्यस्सुमङ्गलः ।
यद्यशोराशिकर्पूरकरण्डं काण्डमण्डलम् ॥

वेङ्गलगुरुमौलिमणेस्तिरुमलभट्टार्यकाह्वयौ तनयौ
तत्सदनाङ्गणदेहं परिचरितवती स्वयं गिरां देवी ॥

तिरुमलसूरेरभवन्वेङ्गलनरहर्यनन्तशिङ्गाख्याः ।
चत्वारश्श्रीकमितुर्बाहव इव देहिनां सुखदाः ॥

तत्र । अनन्तगुरुरिन्दिरारमणदर्शनस्थापन-
क्रियासु रुरुचे पदाम्बुरुहनिक्षक्तन्नूपुरम् ? ।

अनन्तमुखसम्मिलद्दरलतापनिर्वारणं
विधातुमिव यन्मुखैर्न्यवसदद्भुतं भारती ॥

नृसिंहस्तत्कुमारोऽभूत् नृसिंह इव मूर्तिमान् ।
परहृद्भेदनं चक्रे न नखैः किन्तु वाङ्मुखैः ॥

नृसिंहगुरुपुत्रोऽभूत् वेङ्कटाचार्यभास्करः ।
यत्प्रकाशाद्गतश्रीका विमतोत्पलमण्डली ॥

तस्माच्च वेङ्कटगुरोर्नरसिंहसूरिः प्रादुर्बभूव निखिलैरवधानभेदैः ।
विद्यावधूटिनटदेशिकसार्वभौमो भूमौ व्यदादनवधिं स्वमहामहत्त्वम् ॥

जातस्तस्य प्रियतनुभवः श्रीनिवासार्यवर्यः
श्रीमद्रामानुजकृतिमखाभीलभेरीरवोक्तिः ।
तस्याभूवंस्तनयमणयो वेङ्कटार्यो नृसिंहा-
चार्योऽनन्ताह्वयगुरुरिति ख्यातिमुर्व्यामुपेताः ॥

* * * *

श्रीमतश्शठकोपस्य गुणरत्नैकसुन्दरैः ।
अलङ्कारैस्सतामग्रे परिचर्यां करोम्यहम् ॥

* * * *

अत्र नायकोऽयं लोकोत्तरः । यथा—

सर्वज्ञः स्वयमीषदप्यतिमहद्दोषं तु नोदीक्षति(ते)
प्रायस्सर्वमपि प्रदाय बहुधा लज्जापरे मज्जति ।
निस्सङ्गोऽपि विकस्वरो गुणगणो यत्रास्ति तत्रादरात्
किं जातश्शठजिद्दुरापमहिमा क्ष्मामण्डलीमण्डनः ॥

सुन्दरश्चतुरो विद्वान् गम्भीरः करुणाकरः ।
कुलीनः कीर्तिमान् दाता जीयाच्छठरिपुस्सदा ॥

* * * *

यत्र द्वयोरुपमानोपमेययोः स(हृदय)हृदयाह्लादत्वेन चारुतरं सादृश्य व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमेत्यर्थः ।

यथा—

कृपासौशील्यसौलभ्यप्रमुखैरखिलैर्गुणैः ।
प्रकाशते शठद्वेषी किरणैरिव भानुमान् ॥

अत्र भानुमानुपमानम् । शठद्वेष्युपमेयम् । प्रकाशस्साधारणधर्मः । इवशब्द उपमावाचकः । एषां चतुर्णामप्युपादानात् पूर्णोपमा । गुणानां किरणानां च

बिम्बप्रतिबिम्बभावः । स्वरूपतोभिन्नयोरप्युपमानोपमेयधर्मयोरन्योन्यसादृश्या दभिन्नयोश्शब्देन पृथगुपादानं बिम्बप्रतिबिम्बभाव इत्यालङ्कारिकाणां सिद्धान्तः ।

End:

बाधान्तरङ्गाम्बुजसम्भृतोदयो जगत्तमोमोचकचारुदर्शनः ।
सुवर्णकान्तिश्शठवैरिवैभवप्रभाकरस्सारदशां प्रकाशताम् ॥

* * * *

सौलभ्यादिगुणाकरं श्रुतिसुखश्रीसूक्तियुक्ताननं
स्नेहोद्दीपकदर्शनीयवपुषं कान्तं शठद्वेषिणम् ।
सम्प्राप्ता विलसद्रसा गुणवती सालङ्कृतिर्मत्कृतिः
कन्या धन्यतरा निरन्तरसमुल्लासैः परं भासताम् ॥

Colophon:

शठवैरिवैभवदिवाकरस्समाप्तः ॥

R. No. **3154.**

Palm-leaf. $13\frac{3}{4} \times 1\frac{5}{8}$ inches. Foll. 68. Lines, 12 in a page. Grantha. Good.

Presented in 1919-20 by Alarmēlmaṅgammaṅgār of Āḻvārtirunagarī, Tiruchendur taluk, Tinnevelly district.

(*a*) सङ्कल्पसूर्योदयः.

SAṄKALPASŪRYŌDAYAḤ.

Foll. 1*a*—4*b*.

Same work as that described under R. No. 1855(*b*) ante.

Contains the first Act incomplete.

(*b*) कर्पूरमञ्जरी.

KARPŪRAMAÑJARĪ.

Foll. 5*a*—17*a*.

Same work as that described under R. No. 2090(*b*) ante.

Wants the beginning in the first Yavanikā; otherwise complete.

(*c*) कर्पूरमञ्जरीव्याख्या.

KARPŪRAMAÑJARĪVYĀKHYĀ.

Foll. 17*a*—33*b*.

Same work as that described under No. 12510 of the D.C.S. MSS., Vol. XXI.

Breaks off in the fourth Yavanikā.

(*d*) वकुलमालिनीपरिणयः.

VAKULAMĀLINĪPARIṆAYAḤ.

Foll. 34*a*—66*b*.

Same work as that described under R. No. 793 ante. Wants the first leaf in the beginning; otherwise complete.

The scribe adds:

श्रीशैलनाथकुलतिलकायमानवकुलभूषणमहादेशिकतनयेन लोकाचार्यापर-नामधेयेन श्रीनिवासेन विलिखिता ॥

Foll. 67 and 68 are left blank.

R. No. 3155.

Palm-leaf. $13\frac{3}{4} \times 1\frac{1}{2}$ inches. Foll. 172. Lines, 8 in a page. Grantha and Tamil. Fair.

Presented in 1919–20 by Alarmēlmaṅgammaṅgār of Āḻvārtirunagarī, Tiruchendur taluk, Tinnevelly district.

(*a*) क्षमाषोडशी.

KṢAMĀṢŌḌAŚĪ.

Foll. 1*a*—2*b*.

Same work as that described under R. No. 173(*o*) ante.

Complete.

(*b*) धाटीपञ्चकम्.

DHĀṬĪPAÑCAKAM.

Fol. 3*a*. Fol. 3*b* is left blank.

Same work as that described under R. No. 173(*q*) ante.

Complete.

(*c*) स्तोत्ररत्नम्.

STŌTRARATNAM.

Foll. 4*a*—9*a*. Fol. 9*b* is left blank.

Same work as that derciibed under R. Nos. 160(*t*) and 173(*g*) ante.

Complete.

(*d*) नक्षत्रमालास्तोत्रम्.

NAKṢATRAMĀLĀSTŌTRAM.

Foll. 10*a*—12*b*.

Same work as that described under R. No. 173(*n*) ante.

Complete.

(*e*) पराङ्कुशपञ्चविंशतिः.

PARĀṄKUŚAPAÑCAVIṀŚATIḤ.

Foll. 13*a*—15*a*.

Same work as that described under R. No. 173(*m*) ante and No. 10567 of the D.C.S. MSS., Vol. XIX, but with an additional stanza as given below in the end.

Complete.

इति वकुलधरं मुनीन्द्रं(निं)वचोभिश्श्रुतिसुखदैरधिकं प्रमोदयन्तम् ।
वरदगुरुवरं विचिन्त्य चेतो मम समुपैतु महत्तरं प्रसादम् ॥

(*f*) प्रार्थनापञ्चकम्.

PRĀRTHANĀPAÑCAKAM.

Fol. 15*b*.

Same work as that described under R. No. 173(*r*) ante, wherein see for the beginning.

Complete.

End :

आमोक्षं लक्ष्मणार्य त्वत्प्रबन्धपरिशीलनैः ।
कालक्षेपोऽस्तु नस्सद्भिस्सहवासमुपेयुषाम् ॥
इत्येतत्सादरं विद्वान् प्रार्थनापञ्चकं पठन् ।
प्राप्नुयात्परमां भक्तिं यतिराजपदाब्जयोः ॥

(*g*) देवराजाष्टकम्.

DĒVARĀJĀṢṬAKAM.

Foll. 15*b*—16*a*.

Same work as that described under R. No. 174(*j*) ante.

Complete.

(*h*) वरवरमुनिदिनचर्या.

VARAVARAMUNIDINACARYĀ.

Foll. 16*a*—17*b* and 19*b*—21*a*.

Same work as that described under R. No. 173(*e*) ante, but wants the last stanza in the Uttaradinacaryā.

(*i*) यतिराजविंशतिः.

YATIRĀJAVIṀŚATIḤ.

Foll. 17*b*—19*b*.

Same work as that described under R. No. 173(*f*) ante.
Complete.

(*j*) रामानुजसुप्रभातम्.
RĀMĀNUJASUPRABHĀTAM.

Fol. 21.
Same work as that described under No. 9701 of the D.C.S. MSS., Vol. XVIII.
Incomplete.

(*k*) आचार्यलक्षणम्.
ĀCĀRYALAKṢAṆAM.

Fol. 22.
On the characteristics of a proper Guru or Ācārya.
Incomplete.

Beginning:

श्रीभगवान्—

आचार्यलक्षणं ब्रह्मन् कथयामि यथातथम् ।
सर्वदोषविनिर्मुक्तमशेषगुणभाजनम् ॥
आचार्यं वरयेत्पूर्वं तदधीना हि सिद्धयः ।
न्यूनातिरेकनिर्मुक्तः कल्याणावयवः शुचिः ॥
कल्याणहस्तश्श्रुतवान् वृत्तवान् शीलवानपि ।
आम्नाय(ती)छन्दसि तथा ब्राह्मणो धर्मवत्सलः ॥
पञ्चकालविधानज्ञः तत्कर्मनिरतः क्षमी ।
जितेन्द्रियः प्रभुर्धीमानूहापोहविचक्षणः ॥

End:

प्रतिष्ठाकर्मणः पूर्वमङ्कुरारोपणं भवेत् ।
न कर्म फलदं ब्रह्मन्नङ्कुरारोपणं विना ॥

Fol. 23 contains the Nityārādhanakrama.

(*l*) अष्टश्लोकी, सव्याख्या.
AṢṬAŚLŌKĪ WITH COMMENTARY.

Foll. 24*a*—31*a*.
Similar to the work described under R. No. 2 ante.
Complete.

Beginning:

श्रीपराशरभट्टार्यः (. . .) मेऽस्तु भूयसे ॥

अकारार्थो विष्णुः (. . .) इममर्थं समदिशत् ॥

उदयश्च रक्षा च प्रलयश्च उदयरक्षाप्रलयाः । जगतां लोकानामुदयरक्षाप्रलयाः जगदुदयरक्षाप्रलयाः तान् करोतीति जगदुदयरक्षाप्रलयकृत् । जगदुत्पत्तिस्थितिसंहारकर्तेत्यर्थः । व्याप्नोतीति विष्णुः । विष्लृ व्याप्ताविति धातुः । व्यापनशीलः श्रियः पतिः । अकारार्थः । अकारस्य अव रक्षणगतिहिंसादिष्विति धातोरुत्पन्नस्य स्रष्टृत्वरक्षकत्वसंहारकत्वादिवाचकस्यार्थो वाच्यः ।

End:

ममाज्ञस्य अशक्तस्याप्राप्तस्य मे । सर्वापराधक्षयं सर्वे च ते अपराधाश्च तेषां त्वत्प्रतिबन्धकानामविद्यादीनां पुण्यपापरूपपूर्वोत्तराघानां च क्षयमश्लेषविनाशरूपवासनानिवृत्तिं कर्तासि करिष्यसीति दृढोऽस्मि । अवसादनिवृत्त्या निर्भरोऽस्मीत्यर्थः ॥

Fol. 31*b* deals with Bhaktisvarūpalakṣaṇa. Foll. 32*a*—34*b* contain Ūrdhvapuṇḍravidhi, Guruparampарā, Ācāryajanmanakṣatradhyāna-ślōkas. Foll. 34—37*a* give the names of Ācāryas, and the authors of Nālāyira-taniyaṅgaḷ (in Tamil). Fol. 37*b* is left blank.

(*m*) ரஹஸ்யத்ரயம்.

RAHASYATRAYAM.

Foll. 38*a*—50*b*.

See the Tamil part of this Triennial Catalogue.

Complete.

(*n*) தத்த்வத்ரயம்.

TATTVATRAYAM.

Foll. 51*a*—61*b*.

See the Tamil part of this Triennial Catalogue.

Complete.

(*o*) ஸ்ரீவசநபூஷணம்.

ŚRĪVACANABHŪṢAṆAM.

Foll. 62*a*—85*b*.

See the Tamil part of this Triennial Catalogue.

Complete.

(p) அர்ச்சிராதி.
ARCCIRĀDI.

Foll. 86*a*--104*a*.
See the Tamil part of this Triennial Catalogue.
Complete.

(q) அர்த்தபஞ்சகம்.
ARTHAPAÑCAKAM.

Foll. 104*a*--110*b*.
See the Tamil part of this Triennial Catalogue.
Complete.

(r) ப்ரபன்னபரித்ராணம்.
PRAPANNAPARITRĀṆAM.

Foll. 111*a*--113*a*.
See the Tamil part of this Triennial Catalogue.
Complete.

(s) நிகமனப்படி.
NIGAMANAPPAḌI.

Foll. 113*a*--116*a*.
See the Tamil part of this Triennial Catalogue.
Complete.

(t) ப்ரமேயசேகரம்.
PRAMĒYAŚĒKARAM.

Fol. 116.
See the Tamil part of this Triennial Catalogue.
Complete.

(u) நவரத்தினமாலை.
NAVARATTINAMĀLAI.

Foll. 117—118*a*.
See the Tamil part of this Triennial Catalogue.
Almost complete.

(v) ஸாரஸங்க்ரஹம்.
SĀRASAṄGRAHAM.

Foll. 118*a*—120*a*.
See the Tamil part of this Triennial Catalogue.
Complete.

(w) ஆத்மவிவாஹம்.

ĀTMAVIVĀHAM.

Foll. 120*b*—121*a*.

See the Tamil part of this Triennial Catalogue.

Complete.

(x) ஸாரார்த்தசதுஷ்டயம்.

SĀRĀRTHACATUṢṬAYAM.

Foll. 121*b*—122*b*.

See the Tamil part of this Triennial Catalogue.

Complete.

(y) முமுக்ஷுக்ருத்யம்.

MUMUKṢUKRUTYAM.

Foll. 122*b*—132*b*.

See the Tamil part of this Triennial Catalogue.

Complete.

(z) அவஸ்தாத்ரயம்.

AVASTHĀTRAYAM.

Foll. 132*a*—135*a*.

See the Tamil part of this Triennial Catalogue.

Complete.

(*a*-1) ஞானஸாரம்.

ÑĀNASĀRAM.

Foll. 135*a*—140*b*.

See the Tamil part of this Triennial Catalogue.

Complete.

(*a*-2) ப்ரமேயஸாரம்.

PRAMĒYASĀRAM.

Fol. 141. Foll. 142*a*—156*a* contain the Vāl̲ittirunāmams of Āl̲vārs and Ācāryas and foll. 147*b*, 156*b* and 157 are left blank.

(*a*-3) இராமாநுசநூற்றந்தாதி.

IRĀMĀNUŚANŪṞṞANDĀDI.

Foll. 158*a*—168*b*.

See the Tamil part of this Triennial Catalogue.

Breaks off in the 89th Pāśuram.

Fol. 169 gives the Caramaślōkārthapraśnavivaraṇa of Emberumānār with Tirukkōṭṭiyūrnambi and 170 the contents of the works in the manuscript. Foll. 171 and 172 are left blank.

R. No. 3156.

Palm-leaf. 16 × 1 inches. Foll. 73. Lines, 7 in a page. Grantha. Fair.

Presented in 1919–20 by M.R.Ry. Vādyār S. K. Kuḻaikāda Ayyaṅgār, son of Veṅkaṭācala Ayyaṅgār, Tentiruppērai, Tinnevelly district.

जैमिनिगृह्यसूत्रव्याख्या—सुबोधिनी.
JAIMINIGṚHYASŪTRAVYĀKHYĀ : SUBŌDHINĪ.

Fol. 37*b* is left blank.

Same work as that described under R. No. 5 ante.

Contains the first Praśna and the first three Khaṇḍas of the second Praśna.

R. No. 3157.

Palm-leaf. $17\frac{3}{8} \times 1\frac{1}{3}$ inches. Foll. 114. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1919–20 by M.R.Ry. Vādyār S. K. Kuḻaikāda Ayyaṅgār, son of Veṅkaṭācala Ayyaṅgār, Tentiruppērai, Tinnevelly district.

सामसंहिता.
SĀMASAṀHITĀ.

Foll. 1*a*—114*a*. Foll. 5*b*, 61*b* and 114*b* are left blank.

Same work as that described under No. 41 of the D.C.S. MSS., Vol. I, Part I, but with a different Svaranyāsa according to Jaiminisūtras.

Contains the Prakṛtisāma complete.

R. No. 3158.

Palm-leaf. $17\frac{3}{4} \times 1\frac{5}{8}$ inches. Foll. 75. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1919–20 by M.R.Ry. Vādyār S. K. Kuḻaikāda Ayyaṅgār, son of Veṅkaṭācala Ayyaṅgār, Tentiruppērai, Tinnevelly district.

सामवेदारण्यकम्.
SĀMAVĒDĀRAṆYAKAM.

Contains the Āraṇyaka portion of the Sāma-Vēda.

Complete.

Beginning:

वाचो व्रते द्वे । हुवे वाचाम । वाचं वाचं हुवे वाकू । शृणोतु
त क्य क्य ट त
शृणोतु वाग्वाक् । समैतु समैतु वाग्वाकू । रमतां रमतां रमात्ता औ हो
च ट ट त क्य क्य ट ख
वा । ईहा ईहा इहा । हुवा इ वाचाम् । वाचं हुवा इ । वाकू शृणोतु
श त च क्यच च्य श त च्य श
शृणोतू वाग्वाक् । सामैतु सामैतु वाग्वाकू । रामतां रमतु वा औ हो
फ प त चश क्यफ ष्ठ त ८ ख
वा मा ई मा इ मा इ । प्रजापतेश्च व्याहृतिः ।
श त श

* * * *

Colophon:

इति सभापतेः कृतौ धरणे व्रतानि पर्व समाप्तम् ॥

अङ्गश्च वैरूपम् । यद्याव ईन्द्र ता आ उ वा । शातम् । हा हा उ वा.
त त्य ट खण थ स्थ

End:

तत्सवितुर्वरेण्योम् । ओ वा ओ वा ओ वा—हिं भा ओ वा ॥
• च श ट ट स्थ स्थ स्थ

Colophon:

आरण्यकं समाप्तम् ॥

R. No. **3159.**

Palm-leaf. $17\frac{7}{8} \times 1\frac{5}{8}$ inches. Foll. 58. Lines, 6 in a page. Grantha. Good.

Presented in 1919–20 by M.R.Ry. Vādyār S. K. Kuaḻikāda Ayyaṅgār, son of Veṅkaṭācala Ayyaṅgār, Tentiruppērai, Tinnevelly district.

सामसंहिता.

SĀMASAMHITĀ.

Same work as that described under No. 41 of the D.C.S. MSS., Vol. I, Part I, but with a different Svaranyāsa according to Jaimini-sūtras.

Contains the Pavamānasāma only.

R. No. **3160.**

Palm-leaf. $16\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 8. Lines, 6 in a page. Grantha. Good.

Presented in 1919–20 by M.R.Ry. Vādyār S. K. Kuḻaikada Ayyaṅgār, son of Veṅkaṭācala Ayyaṅgār, Tentiruppērai, Tinnevelly district.

जैमिनिगृह्यप्रयोगरत्नमाला.

JAIMINIGṚHYAPRAYŌGARATNAMĀLĀ.

On the details of procedure for the performance of household rites and ceremonies as laid down for the Sāma-Vēdins who follow the Jaimini-sūtra.

Incomplete.

Beginning :

नत्वा लक्ष्मीपतिं सर्वक्रतूनां क्रियते स्फुटम् ।
प्रयोगरत्नमालेयं जैमिनेर्गृह्यकर्मणाम् ॥

पाकयज्ञाख्ययोच्यन्ते तेषां रूप(ानुपू)र्वशः ।
हुतोऽहुतः प्रहुतश्च प्राशितश्चेति ताः स्मृताः ॥

पाकयज्ञाः प्रदृश्य(दर्श्य)न्ते तेषां रूपाण्यनुक्रमात् ।
यस्मिन् होम(ः) प्रधानं स्यात्तदङ्गमितरत् (स्मृतम्) ॥

* * * *

आत्मार्थं सान्ध्यकर्मादि सीमन्तादि स्त्रियास्स्मृतम् ।
उभयार्थं पार्वणं स्याज्जातकर्मादि चापरम् ॥

End :

अन्नादिबन्धनं चैव चौलाद्यङ्कुरमिष्यते ।
अस्यां रात्र्यां प्रदोषान्ते कुर्यात्प्रतिसरक्रियाम् ॥

* * * *

निधाय कुम्भमापूर्य शुद्धैर्व . . . . . र्जलैः ।
दूर्वापुष्पाक्षतफलैरवकीर्यार्चयेदिदम् ॥

R. No. 3161.

Śrītāla. 20⅜ × 2 inches. Foll. 176. Lines, 9 in a page. Malayalam. Fair.

Presented in 1919–20 by M.R.Ry. Girivadyar, Vaḍakkēmaṭham, Dēvasvam paramba, Cheriya, Cochin State.

नैषधचरितदीपिका.

NAIṢADHACARITADĪPIKĀ.

Same work as that described under R. No. 2729 ante, wherein see for the end.

This commentary is also called Padavākyārthapañjikā.

Wants the beginning in the first Sarga and breaks off in the 13th Sarga.

Beginning :

. . . . अर्थिसात् याचकाधीनः । देये त्रा चेति सातिः । न क्रति(तः) इति यत्, सिन्धुरुदधिः उत्सर्गजलव्ययैः दानोदकोपयोगैः मरुः

धन्वा न कृत इति च यत् तन्निजायशोयुगं स्वकीयाकीर्तिद्वयं द्वाभ्यां फालाभ्यां भागाभ्यां ञि फला विशरणे इत्यस्य घञि रूपम् । बद्धास्सन्दानिताश्चिकुराः केशाः स्वशिरसि स्थितं तेन नलेनामानि अमन्यत । अजस्रेति ।

* * * *

श्रीहर्षस्य मु(म)नीषिमण्डलशुनासीरस्य सारस्वत-
स्रोतःपूरभरैः परश्शतमुखैर्दीप्यद्भिरव्याहतम् ।
त(क)स्योदेति न विस्मयोऽत्र जगति प्रेक्षावतो यत्पुनः
भङ्गं यान्ति जलाशयाः कतिपये ततस्योस्तुतिं (तत्तस्य किं) दूषणम्॥

Colophon:

इत्याचार्यविश्वेश्वरस्त्यनु(सुधी)विरचितायां नैषधचरितदीपिकायां पदवाक्यार्थपञ्चि(ञ्जि)कायां प्रथमस्सर्गः ॥

R. No. 3162.

Palm-leaf. $14\frac{5}{8} \times 1\frac{1}{4}$ inches. Foll. 95. Lines, 8 in a page. Grantha. Good.

Presented in 1919-20 by M.R.Ry. Gōpālakṛṣṇa Ayyar, Kaḻḻiḍakurichi, Tinnevelly district.

(*a*) आश्वलायनजयन्तकारिका.

ĀŚVALĀYANAJAYANTAKĀRIKĀ.

Foll. 1*a*--14*b*. Foll 1*b*—3*a* give the Ṛsicchandōdēvatās of the Vedic Gṛhyamantras. Foll. 4 and 7 are left blank. Fol. 1*a* (five lines) gives the Āgrayaṇaprayōga.

Similar to the work described under No. 3567 of the D.C.S. MSS., Vol. VII.

Contains the second Adhyāya only.

Beginning:

मधुपर्कदानं प्रवरं च कृत्वा नवांस(वाम्ब)रं मङ्गलसूत्रकं च ।
उद्वाहसङ्कल्पमतः परं तु वह्नेर्मुखान्ते जुहुयाच्च पञ्चकम् ॥
गृह्णानि मन्त्रेण करं गृहीत्वा हुत्वा च लाजानवदानपूर्वकम् ।
वरस्तु वध्वा सह वह्निकुम्भौ दृषद्विहीन(:) परिणीय लाजान् ॥

* * * *

उच्यते श्रावणं कर्म सर्पबल्याख्यकर्म च ।
कुर्वीत श्रावणे मासे पौर्णमास्यामिदं द्वयम् ॥

पूरयेद्वह्निकलशं नवयावकसक्तुभिः ।
निधाय तं नवे शिक्ये दर्वीं वैकङ्कतीं तथा ॥

End :

ततः स्विष्टकृता हुत्वा होमशेषं समापयेत् ।
अन्नेन गृहसिद्धेन ब्राह्मणान् भोजयेदथ ॥
शिवा वास्त्विति मन्त्रस्य बीजस्थापनपूर्वकम् ।
अभयं वोभ(प)यामे(ति)मन्त्रेणौपासनं गृहे ॥

Colophon :

इत्याश्वलायनजयन्तकारिकायां द्वितीयोऽध्यायः ॥

(*b*) आश्वलायनगृह्यसूत्रम्.

ĀŚVALĀYANAGṚHYASŪTRAM.

Foll. 16*a*—39*a*. Foll .1 , 3 *b* and 39*b* are left blank.

Same work as that described under No. 116) of the D.C.S. MSS , Vol. II.

Contains the first four Adhyāyas complete.

(*c*) उद्बाहुपूर्वकारिका.

UDBĀHUPŪRVAKĀRIKĀ.

Foll. 40*a*—51*a*. Fol. 51*b* is left blank.

Similar to the work described under No. 3788 of the D.C.S. MSS., Vol. VII. This procedure is intended for the followers of Āśvalāyanasūtra.

Complete.

Beginning :

श्रीशौनकं सूत्रकृतां वरिष्ठमाश्वलायनं सूक्ष्मविधिप्रवृत्त्यै ।
नमामि वेदान्तिमत्रनालं? भवाभ्रतत्त्वान्धकटाक्षमूर्तिम् ॥
उद्बाहुसौम्यं विदुषां वरिष्ठमाश्वलायनं सूक्ष्मविधिप्रवृत्त्यै ।
प्रणम्य वक्ष्ये शुभकर्मकारिकां पुराग्रजः पित्रियकारिकां नियत् ॥
. . . . संप्रोचिवानित्यापि गोपिनन्दनम् ।
पूर्वेद्युराप्लुत्य विलिख्य भूमिं प्राणांश्च संयम्य यथा प्रकल्प्य ॥
आदौ कृत्वा वरणं सुराणामावाहनं चार्घ्यमथ त्रिषण्णाम् ।

End :

पुनरुपनयनाविधिः—

सावेतपूर्वस्य जलाप्लुतस्य स्वस्त्यादिकं कौतुकबन्धमिष्टम् ।

पश्चात्तु पुण्याहमथोपवीतं कृष्णाजिनं मौञ्ज्यवधारणं स्यात् ॥
प्रधानहोमात् परतो यथावदञ्जल्यवक्षारहकर्मणीत्थम् ।
सावित्रिमन्त्रेण च मन्त्रमेत देव्यस्य न स्यात् परिदानमत्र ॥
पश्चात्तु मेधाजननं च न स्यात् कालं च नेकोदिततत्समानम् ।
ब्रह्मोदनं स्यात्पुनरौपनीत्या कृताकृतं क्षौरमिह प्रदिष्टम् ॥

Colophon:

उद्वाहुपूर्वकारिका समाप्ता ॥

(*d*) आश्वलायनापरकारिका.

ĀŚVALĀYANĀPARAKĀRIKĀ.

Foll. 52*a*—62*b*.

Similar to the work described under No. 3527 of the D.C.S. MSS., Vol. VII. This procedure is intended for the followers of Āśvalāyna-sūtra.

Contains the Saṁskāra, Sañcayana, Ēkōddiṣṭa, Sapiṇḍīkaraṇa, Strīsapiṇḍīkaraṇa, Āhitāgnisaṁskāra, Udakyādisaṁskāra and Punardahana only.

Beginning:

प्रणम्य विष्णुं भगवन्तमादरात् महामुनिं शौनकमाश्वलायनम् ।
वक्ष्ये यथावत्पितृमेधकारिकां प्रसीदतान्मे भगवान्मुरान्तकः ॥
अनाहिताग्नेर्मरणस्य काले कर्णे जपेद्दक्षिणतस्तु सूक्तम् ।
नामानि च द्वादश वैष्णवानि सङ्कीर्तयेत्संसृतिमोचनाय ॥
पुत्रस्तु कुर्याद्दहनादि कर्म पौत्रोऽथ नप्ता तदभावतस्तु ।
भ्राता तु कुर्यात्तदभावतस्तु पिता सपिण्डास्सजलास्सगोत्राः ॥
गृह्याग्निरेवाग्निमतां प्रदिष्टस्तुषाग्निरुक्तो विधुरादिकानाम् ।
उक्तस्तथैवोत्तपनाग्निसंज्ञः कन्यानुपेतानथ (?) बालकानाम् ॥
प्रेतस्य चाधानमतः परस्तात् स्नात्वा विपर्यस्य च यज्ञसूत्रम् ।
सङ्कल्प्य पूर्वं मतगोत्रनाम्ना निधाय च स्थण्डिल एव वह्निम् ॥

End:

वक्ष्ये पुनर्दाहविधिर्मृतानां देशान्तरादिष्वथ पापिनां च ।
अस्थ्नामभावे तु पलाशवृन्तैः कुर्यात्तु तस्य प्रतिरूपकृत्तिम् ॥
शतानि त्रीणि शतैव षष्टिवृन्तानि चाहृत्य पलाशवृक्षात् ।
शिरःप्रकॢप्ताविह विंशतिद्वयं ग्रीवाविधाने दशकं प्रदिष्टम् ॥

* * * *

स्वाहीति मन्त्रेण ततः परेण पिबेति चोक्त्वा च यथाक्रमेण ।
पिण्डप्रदाना(नं)[नि]विदधीत त (तेषां) दृषत्समीपे वटमन्त्रदेशे ॥
श्राद्धेऽहनि नवश्राद्धं पथि पिण्डास्थिहोमकम् ।
दशमेऽहनि होमं च (वर्जयेदाश्वलायनः) ॥
अनग्निकानामथ होमकार्ये हुत्वाथ पाणावनले निदध्यात् ।
हस्ते हुतं तु नाश्नीयादब्दमासानुमासिके ।
अग्नौ प्रक्षेपणं कार्यं सपिण्डीप्रेतकर्मसु ॥ इति धर्मसारे.

(e) आश्वलायनप्रयोगमाला.

ĀŚVALĀYANAPRAYŌGAMĀLĀ.

Foll. 63*a*—94*a*. Foll. 70*b*, 92*b*, 94*b* and 95*b* are left blank. Fol. 95*a* gives some stanzas of Navavastradhāraṇa and Ārātrikaviṣaya.

Similar to the work described under No. 3567 of the D.C.S. MSS., Vol. VII.

Incomplete.

Beginning:

प्रणम्य विष्णुं क्रियतेऽश्वलात्मजप्रणीतगृह्योक्तविधानकर्मणाम् ।
प्रयोगमालात्र निषेकपूर्विका सनित्यनैमित्तिककाद्य(म्य)गंक्रमात् ॥
गर्भलम्भनशब्देन गर्भसंस्कारकर्म यत् ।
कर्तव्यमौपनिषदमित्युक्त्वा तदिहोच्यते ॥
गृह्योक्तेनाप्यनुष्ठेनं(ष्ठेयं) गृह्यशब्दविहीनयोः ।
अनुष्ठेयतमेनोक्तौ युक्तिरन्तेऽभिधास्यते ॥
ज्योतिश्शास्त्रोक्तदिवसे षष्ठीप्रभृतियुग्मके ।
प्रथमर्तौ निशायां तत्प्रथमाद्यामतः परम् ॥

* * * *

अथ पुंसवनं कर्म तथैवानवलोभनम् ।
तृतीये मासि गर्भस्य सावने कर्तुमिष्यते ॥

End:

पठत्वर्यमणं मन्त्रमथ पत्नी स्थिता सती ।
कुर्वन्त्यञ्जलिविच्छेदमङ्गुल्यग्रैर्जुहोति तान् ॥
हविर्भुगम्भःकुम्भौ च दृषद्वर्जं प्रदक्षिणम् ।
वधूं परिणयेन्मन्त्रममो(म)हमिति वै जपन् ।

R. No. **3163.**

Palm-leaf. 16⅝ × 1⅓ inches. Foll. 135. Lines, 9 in a page. Telugu. Fair.

Presented in 1919-20 by M.R.Ry. Yajñanārāyaṇa Ayyagāru, Ravaṇasamudram, Kadayam post, Ambasamudram taluk.

(*a*) आश्वलायनश्रौतसूत्रवृत्तिः.

ĀŚVALĀYANAŚRAUTASŪTRAVṚTTIḤ.

Foll. 1*a*—116*b*. Fol. 21*a* is left blank.

Same work as that described under No. 1031 of the D.C.S. MSS., Vol. II, wherein see for the end.

Breaks off in the 14th Khaṇḍa of the sixth Adhyāya.

Beginning:

अथैतस्य समाम्नायस्य विताने योगापत्तिं वक्ष्यामः—

शाकल्यसंहितैषैका बाष्कलस्य तथापरा ।
ते संहिते समाश्रित्य ब्राह्मणान्येकविंशतिः ॥
एकविंशतिशाखोऽयमृग्वेदो मुनिभिस्स्मृतः ।
महिदासैतरेयोक्तब्राह्मणाश्रयणेन हि ॥
प्रवृत्ति . . . . तदेवान्यैः प्रपूरयेत् ।

अत्र लोक(के)यानि प्रयोगशास्त्राणि कल्पसूत्रकाख्यानि प्रतिवेदं प्रणीयन्ते महर्षिभिः । तानि अनुष्ठानोपायभूततया तस्मात्स्वाध्यायोऽध्येतव्य इत्यध्ययनविध्याक्षिप्तत्वात् प्रतिवेदमङ्गत्वं प्राप(पि)तानि ; अन्यथार्थवादबहुले प्रतिभासेव निष्कृष्य प्रयोगांशस्यानुष्ठातुमशक्यत्वात् । उक्तं च—

प्रयोगशास्त्रं वेदस्य पाणित्वेनोपवर्णितम् ।
मन्त्रब्राह्मणरूपेण . . . . प्रगीयते ॥

अथशब्दोऽनेकार्थः—मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथेति नैघण्टुकाः । अस्य च क्रमेणोदाहरणानि—अथ खलूच्चावचाः, अथ महाव्रतम्, अथ शब्दानुशासनम्, अथाह यथेन्द्रो वै यज्ञः, यावदेवायं विष्णुस्त्रिवि(र्वि)क्रमते तावदस्माकमथ युष्माकमितरदिति । एवमनेकार्थत्वेऽप्यत्रानन्तर्ये । मन्त्रब्राह्मणात्मकमृग्वेदं गुरुमुखात्सम्यगधिगम्यानन्तरं तदनुष्ठानसौकर्यायेदं शास्त्रं वक्ष्याम इति । मङ्गलार्थे वा । एतस्याम्नायस्य ऋग्वेदस्य । वेदश्चायमृग्वेदः । कुतः श्रुतेर्लिङ्गात् प्रसिद्धेश्च ।

* * * *

सर्वे संस्थाजपेनोपतिष्ठन्त उपतिष्ठन्ते । ओं चम इत्यादिरुक्तस्संस्थाजपः । सर्वे ऋत्विजः । द्विरुक्तिरध्यायसमाप्तिसूचनार्था ॥

Colophon :

इति षड्गुरुशिष्यविरचितायामाश्वलायनसूत्रवृत्तौ प्रथमोऽध्यायः ॥

(*b*) कृष्णयजुर्वेदारण्यकम्.

KṚṢṆAYAJURVĒDĀRAṆYAKAM.

Foll. 117*a*—131*b*. Foll. 132*a*—135*b* contain some Vedic Mantra and Brāhmaṇas with Jaṭā. Fol. 134*b* is left blank.

Same work as that described under Nos. 169 and 170 of the D.C.S. MSS., Vol. I, Part II.

Contains the first Praśna only complete.

R. No. 3164.

Palm-leaf. 16¾ × 1¾ inches. Foll. 130. Lines, 9 in a page. Telugu. Good.

Presented in 1919-20 by M.R.Ry. Yajñanārāyaṇa Ayyagāru, Ravaṇasamudram, Kadayam post, Ambasamudram taluk.

(*a*) अग्निष्टोमहौत्रक्लृप्तिः.

AGNIṢṬŌMAHAUTRAKḶPTIḤ.

Foll. 1*a*—38*b*.

Same work as that described under R. No. 164(*a*) ante.

Complete.

(*b*) इष्टिहौत्रम्.

IṢṬIHAUTRAM.

Foll. 41*a*—50*b*. Foll. 39*a*—40*b* give the Vājasanēyahautrabhēda.

Same work as that described under No. 1142 of the D.C.S. MSS., Vol. II.

Complete.

Fol. 51*a* contains some Vedic Ṛks. Foll. 51*b*—53*b* are left blank.

(*c*) अग्निहोत्रप्रयोगः.

AGNIHŌTRAPRAYŌGAḤ.

Foll. 54*a*—56*b*.

Similar to the work described under No. 1097 of the D.C.S. MSS., Vol. II. This work closely follows the Āśvalāyana-sūtra.

Complete.

Beginning :

शुक्लाम्बरधरं विष्णुम् (. . .) ओं भूः (. . .) प्रीत्यर्थं सायमग्निहोत्रं करिष्ये । उत्सर्गेऽपराह्णे गार्हप(त्याग्निं प्र)ज्वाल्य तूष्णीं दक्षिणाग्निं प्रणीय,

उद्धराहवनीयम् । देवं त्वा देवेभ्यः श्रिया उद्धरामि(मे)त्युद्धरेत् । उद्ध्रियमाण
उद्धर पाप्मनो मा यदविद्वान्यच्च विद्वांश्चकार । अह्ना यदेनः कृतमस्ति
किंचित्सर्वस्मान्नोधृ(द्धृ)तः पाहि तस्मात्--इति हरति ।

End :

नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये ।
नम आहवनीयाय महावेद्यै नमो नमः ॥
काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे ।
स्वर्गापवर्गरूपाय यज्ञेशाय नमो नमः ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।

नूनं (. . .) ते । अनेन सायमग्निहोत्रहोमेन जपेन च भगवान् (. . .)
प्रीणातु । न्यूनातिरिक्तं (. . .) मस्तु ॥

Colophon :

इत्याश्वलायनाग्निहोत्रं (समाप्तम्) ॥

(*d*) आश्वलायनश्रौतसूत्रम्.

ĀŚVALĀYANAŚRAUTASŪTRAM.

Foll. 57*a*--100*b*.

Same work as that described under No. 1029 of the D.C.S. MSS., Vol. II.

Contains the Pūrvaṣaṭka only with the Anukramaṇikā.

(*e*) सोमोत्पत्तिः.

SŌMŌTPATTIḤ.

Fol. 101.

Same work as that described under No. 2592 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

Colophon :

इति व्यासोक्तसोमोत्पत्तिस्सम्पूर्णा ॥

(*f*) पशुमैत्रावरुणप्रयोगः.

PAŚUMAITRĀVARUṆAPRAYŌGAḤ.

Foll. 102*a*--109*a*. Fol. 109*b* is left blank.

Complete.

Beginning:

तीर्थेन प्रपा(प)द्य(स्व) मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रा प्रशिषा प्रतिगृह्णाम्यवक्रो विधुरो भूयासम् । उत्तरेण होतारमतिव्रजेद्दक्षिणेन दण्डं हरेन्न चान्येन संस्पृशेत् । आत्मानं वान्यं वा प्रेषवचनात् प्रह्वोपस्थाय वेद्यां दण्डमवष्टभ्य ब्रूयात् । अग्निं तनूनपातं नराशꣳसमग्निमिड ईडितो बर्हिर्दुर उषासानक्ता दैव्या होतारा तिस्रः त्वष्टारं वनस्पतिमग्निं होता यक्षदग्निं समिधा सुषमिधा समिद्धं नाभा पृथिव्यास्सङ्गथे वामस्य । वर्ष्मन् दिव इडस्पदे वेत्त्वाज्यस्य होतर्यज ।

End:

प्राजापत्ये नित्य उपाꣳशु प्रयोक्तव्यान् वक्ष्यामः । आदत्, घनत्, करत्, जुषताम्, आघत्, अग्रभीत्, अवीवृधत--इत्येतानि पदानि देवतावाचीन्युपाꣳशु प्रयोक्तव्यानि ॥

Colophon:

इति त्रिंशत्पशुतन्त्रं समाप्तम् ॥

Fol. 110 contains the Prātaranuvākasūkta.

(*g*) सोममैत्रावरुणप्रयोगः.

SŌMAMAITRĀVARUṆAPRAYŌGAḤ.

Foll. 111*a*—122*b*.

Similar to the work described under R. No. 152(*a*) ante.

Complete.

Beginning:

अनाधृष्टमसि । अंशुरंशुष्टे । एष्टा रायः । अथाग्नीषोमीयेण पशुना चरन्ति पशुवद्दण्ड प्रतिगृह्योत्तरेण हविर्धाने अतिव्रज्य पूर्वया द्वारा सदः प्रविश्य उत्तरेण यथास्वं धिष्ण्यावतिव्रज्य पश्चात्स्वस्य धिष्ण्यस्योपविशति । होतावतिष्ठत उत्तरः प्रेषितो दण्डमवष्टभ्य ब्रूयात् । मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रा प्रशिषा प्रयच्छाम्यवक्रो विद्द(धु) रो भूयासम् । होता यक्षदग्नि-मित्यादि आज्यभागान्तं निरूढपशुवत् । वपायागे विशेषः । अग्नीषोमाविमं सु मे शृणुतं वृषणा हवम् । प्रति सूक्तानि हर्यतं भवतं दाशुषे मयोम । होता यक्षदग्नीषोमौ छागस्य वपाया मेधसो जुषेतां हविर्होतर्यज ।

End:

कस्मै किमरास्थात्सुष्ठु सुवीर्यं यज्ञस्यागुर उद्दचं यद्वद्दचीकमतोतो तत्तथाभू-द्धोतर्यज ॥

Fol. 123 contains a few pithy stanzas. Foll. 125—126*a* contain the Āitarēyabrāhmaṇa. Foll. 126*b*—130*b* are left blank.

R. No. 3165.

Palm-leaf. 16⅝ × 1½ inches. Foll. 62. Lines, 6 in a page. Telugu. Good.

Presented in 1919-20 by M.R.Ry. Yajñanārāyaṇa Ayyagāru, Ravaṇasamudram, Kadayam post, Ambasamudram taluk.

(*a*) पौण्डरीकक्लृप्तिः.

PAUṆḌARĪKAKLṚPTIḤ.

Foll. 1*a*—2*b*.

Similar to the work described under R. No. **116**(*c*) ante.

Incomplete.

Beginning :

पौण्डरीकातिरात्रसर्वतोमुखप्रयोग उच्यते । स च द्विप्रकार आचार्येणोक्तः । तत्र पूर्वप्रकारं ह्याह क्लृप्तिः—

समूळ्होहः बृहद्रथन्तरपुष्यष्षळ(ड)हश्च । गोतमोऽग्निष्टोमो दशममहः विश्वजिदतिरात्रमुक्तम् । द्वादश दीक्षाः । द्वादशोपसदः । दश सुत्यानि । प्रातरनुवाकादि पत्नीसंयाजान्तानि । अन्त्यमहरुदवसानीयान्तम् । तत्रैव द्रप्सप्राशनसङ्ख्याविसर्जने । प्रथमं त्रिवृदग्निष्टोमः । नमः प्रवक्त्र इत्यादि शोचिष्केशस्तमीमहो पृथुपाजान्तं सम्बाधः ।

End :

अश्विना यज्व रीरिषो द्रवत्पाणी शुभस्पती । पुरूभुजा च नस्यतोम् । अश्विना पुरुदंससा नराशवीरया धिया । धिष्ण्यावनतं गिरों दस्रा युवा कवस्सुता नासत्यावुक्तबर्हिषः.

(*b*) सर्वानुक्रमणीवृत्तिः—वेदार्थदीपिका.

SARVĀNUKRAMAṆĪVṚTTIḤ : VĒDĀRTHADĪPIKĀ.

Foll. 33*a*—49*b*.

Same work as that described under No. 1004 of the D.C.S. MSS., Vol. II, but wants two stanzas in the beginning. By Ṣaḍguru.

Breaks off in the 12th Adhyāya.

(c) सोमयाजमानप्रयोगः.

SŌMAYĀJAMĀNAPRAYŌGAḤ.

Foll. 51*a*—62*b*. Fol. 50 gives the Lāli songs in Grantha character.

On the details of procedure laid down for a Yajamāna in a Sōma-sacrifice.

Incomplete.

Beginning:

वसन्तेऽमावास्यायां पौर्णमास्यां वा यथा सुत्या स्यात् तथोपक्रमः कर्तव्यः । तत्रैवं सङ्कल्पः—सोमेन यक्ष्ये । ज्योतिष्टोम . . . . रथन्तरसाम्ना एकविंशतिदक्षिणेन तेन परमेश्वरं प्रीणयानि । दर्भान्निरस्याप उपस्पृश्य विद्युदसि—मुपैमि । द्विः । अस्मिन् ज्योतिष्टोम . . . . . . सोमप्रवाकं त्वां वृणीमहे । सोमप्रवाक सोममृत्विग्भ्यः प्रब्रूहि । मधुपर्कं दद्यात् । कूर्चः आपः पाद्याः ।

End:

प्रेषे भगायर्तमृतवादिभ्यो नमो दिवे नमः पृथिव्यै । अथ यजमानोऽवान्तरदीक्षामुपैति । अग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूरेषा सा त्वयि या तव तनूरियं सा मयि । सह नौ व्रतपते व्रतिनोर्व्रतानि आहवनीयमुपतिष्ठेत् ।

* * * *

पूष्ण इदम्, पूष्णे शिरस इदम्, पूष्णे प्रपथ्यायेदम्, पूष्णे नरन्धिषाये.

R. No. 3166.

Palm-leaf. 16½ × 1⅜ inches. Foll. 37. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1919-20 by M.R.Ry. Vembakōṭa Subrahmaṇya Śrauti, Kallidakurichi, Ambasamudram taluk, Tinnevelly district.

Fol. 37*b* is left blank.

ताम्रपर्णीमाहात्म्यम्.

TĀMRAPARṆĪMĀHĀTMYAM.

Similar to the work described under No. 2430 of the D.C.S. MSS., Vol. IV, Part II.

Contains the Adhyāyas one to eight; as found in the Śiva-purāṇa.

Beginning:

पावने नैमिशारण्ये क्षेत्रे सर्वगुणान्विते ।
ब्रह्मणा निर्मितो नेमिर्यत्र साक्षाद्विकीर्यते ॥

नैमिशेऽनिमिषक्षेत्रे ब्रह्मलोकस्य वर्तिनी।
स्मरणादेव जन्तूनां सर्वपापप्रणाशनः ॥
* * * *

ऋषयः—
पुण्यक्षेत्राणि पुण्यानि तीर्थानि विविधानि च।
त्वत्तश्श्रुतान्यशेषाणि सङ्कोचाद्विस्तरादपि ॥
इदानीं श्रोतुमिच्छामि वैभवं पुण्यदं शुभम्।
ताम्रायाः पुण्यनद्याश्च विस्तराद्वक्तुमर्हसि ॥
* * * *

Colophon:

इति श्रीशैवे पुराणे उपरिभागे तीर्थक्षेत्रवैभवखण्डे ताम्रपर्णीमाहात्म्ये व्यासशुकसंवादो नाम प्रथमोऽध्यायः ॥

End:

लब्ध्वा मनोरथान् सर्वान् देवदेवान्महेश्वरात्।
स्मृत्वा स्मृत्वा सुरनदीं ताम्रपर्णीं मुनीश्वराः ॥
संप्राप्य नैमिशारण्यं मुनीन्द्रेण च संयुताः।
पूर्ववत्स्वाश्रमे पुण्ये ऋषयस्सत्रमासते ॥

Colophon:

इति श्रीमच्छैवपुराणे उपरिभागे तीर्थक्षेत्रवैभवखण्डं नाम मन्त्रसंहितायां व्यासशुकसंवादे ताम्रपर्णीमाहात्म्ये अष्टमोऽध्यायः ॥

R. No. 3167.

Śrītāla. $8\frac{3}{4} \times 1\frac{3}{4}$ inches. Foll. 55. Lines, 7 in a page. Nandināgarī. Much injured.

Presented in 1919-20 by M.R.Ry. Anantanārāyaṇa Śiva, Kallidakurichi, Ambasamudram taluk, Tinnevelly district.

वादरत्नावली.

VĀDARATNĀVALĪ.

A treatise in five Saras narrating the principles of the Dvaita-Vēdānta: by Viṣṇudāsācārya, disciple of Rājēndratīrtha.

Many leaves are lost in the middle. Contains one to five Saras.

Beginning:

प्रपद्ये रघुनाथस्य चरणौ शरणं परम्।
. . . . ॥

विश्वं सत्यं हरिः कर्ता जीवोऽन्यः परमार्थतः।
वेदस्सत्यः प्रमाणं चेत्येवं व्या . . . . . ॥

विश्वस्य सत्यत्वं कुतस्सिद्धम्, श्रुतिस्मृतीतिहासपुराणैरिति ब्रूमः। तथा हि . .

* * * *

(यतो वा) इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तत् विजिज्ञासस्व। तद्ब्रह्मेति . . सर्वेश्वर एष सर्वज्ञ एष सर्वान्तर्याम्येष योनिस्सर्वस्येति च। जन्माद्यस्य यत इत्यादिश्रुतिश्चेति सङ्क्षेपः।

Colophon:

इति श्रीवादरत्नावल्यां प्रथमस्सरः॥

ननु जीवेभ्योऽन्यः परमार्थतः परमात्मेति कुतः। श्रुतिस्मृतीतिहासपुरा . . . . ब्राह्मणैर्वेदस्य प्रमितत्वादिति तावत् ब्रूमः। तथाहि—आथर्वणे श्रूयते—यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्।

End:

परमतत्त्ववादिनां वेदान्तिनां तु वेदः परब्रह्मपरः सत्यः नित्यश्चापौरुषेयः सर्वोऽपि प्रमाणं चेति। श्रूयते च—तस्मै नूनमभिद्यवे वाचा विरूपनित्यया। वृष्टे-(ष्णे)चोदस्व सुष्टुतिम्। नित्यया नि(श्र)त्या स्तौमि ब्रह्म तत्परमं पदम्। श्रुतिर्वाव नित्या।

* * * *

इति षड्दर्शनाचार्यविष्णुदासार्यनिर्मिता।
वादरत्नावलिर्भूयात् प्रीत्यै माधवमध्वयोः॥

Colophon:

इति श्रीमत्सर्वतन्त्रस्वतन्त्रश्रीमद्राजेन्द्रतीर्थश्रीचरणकमल . . . . चरितविष्णुदासाचार्यविरचितायां वादरत्नावल्यां पञ्चमः सरः॥

R. No. 3168.

Palm-leaf. $13\frac{1}{4} \times 1\frac{5}{8}$ inches. Foll. 83. Lines, 8 in a page. Nandināgarī. Very much injured.

Presented in 1919-20 by M.R.Ry. Ānantanārāyaṇa Śiva, Kallidakurichi, Ambasamudram taluk, Tinnevelly district.

(*a*) तार्किकरक्षाविवृतिः.

TĀRKIKARAKṢĀVIVṚTIḤ.

Foll. 1*a*—78*b*.

Same work as that described under No. 4197 of the D.C.S. MSS., Vol. VIII.

Up to the Abhāvaparicchēda. Wants the beginning in the Pratyakṣaparicchēda.

(*b*) लिङ्गनिर्णयकारिका.

LIṄGANIRṆAYAKĀRIKĀ.

Foll. 79*a*—83*b*.

A treatise in verse on gender in Sanskrit.

Wants the beginning and the end.

Beginning:

. . . . स्त्रियामेव प्रकीर्तिताः ।
अथाकारान्तमारभ्य स्त्रियां शब्दा उदीरिताः ॥
ज्या या(मा)सुरा मन्दुरा च मदिरा वागुरा स्त्रियाम् ।

End:

• ऋतौ वर्षाः स्त्रियां भूम्नि शीर्षं च विषमामिषम् ।
पुरीषंपौरुषे वर्षकर्षे च नपुंसके ॥
हिंसाशंसा जिघांसायां कुत्सा विस्रं वया स्त्रियाम् । ?
बिसकीकसमांसानि साध्वसं तरसं तथा ।
निश्श्रेयसं च कार्पासम्.

R. No. **3169.**

Palm-leaf. $17\frac{1}{8} \times 1\frac{5}{8}$ inches. Foll. 212. Lines, 9 in a page. Grantha. Injured.

Presented in 1919-20 by M.R.Ry. Gōpālakṛṣṇa Ayyar, Kalliḍakurichi, Ambasamudram taluk, Tinnevelly district.

(*a*) चम्पुभारतव्याख्या—सरस्वतीविलासः.

CAMPUBHĀRATAVYĀKHYĀ : SARASVATĪVILĀSAḤ.

Foll. 1*a*—207*a*. Fol. 207*b* is left blank.

Same work as that described under No. 12249 of the D.C.S. MSS., Vol. XXI.

Contains one to six Stabakas complete.

(*b*) चम्पुभारतटीका.

CAMPUBHĀRATAṬĪKĀ.

Foll. 208*a*—211*a*. Foll. 211*b* and 212 are left blank.

A commentary on the Campūbhārata which work has been described under No. 12233 of the D.C.S. MSS., Vol. XXI. The name of the commentator is not given.

Breaks off in the 13th stanza of the first Stabaka.

Beginning:

प्रणम्य हेरम्बगुहौ शिवं च शिवां गुरुं वागधिदैवतं च ।
अहं महाभारतचम्पुवर्ये टीकां सुचेतोदयितां करोमि ॥

कल्याणमिति । वेतण्डरत्नं वः कल्याणं विधत्तामिति क्रियाकारकसम्बन्धः । वेतण्डो गजः रत्नं श्रेष्ठम् । वेतण्डद्विरदौ मदावलगजौ दन्तावलः सिन्धुर इति शब्दरत्नावली ।

End:

बलभद्रः दुर्योधनावमानेन तां पुरीं गङ्गाजले क्षेप्तुमाकृष्टवानिति भागवते । चित्रमिति । व्यासः अम्बालिकायां सम्पादयामास ॥

R. No. 3170.

Palm-leaf. $16\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 40. Lines, 7 in a page. Grantha. Fair.

Presented in 1919-20 by M.R.Ry. Gōpālakṛṣṇa Ayyar, Kallidakurichi, Ambasamudram taluk, Tinnevelly district.

महानाटकसुधानिधिः.

MAHĀNĀṬAKASUDHĀNIDHIḤ.

Foll. 1*a*—37*b*.

Same work as that described under R. No. 1504(*a*) ante, but wants the first stanza.

Breaks off in the Yuddhakāṇḍa.

Fol. 38 contains the first five stanzas in the Bālakāṇḍa of this work. Foll. 39 and 40 are left blank.

R. No. 3171.

Palm-leaf. $14\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 145. Lines, 5 in a page. Oriya. Good.

Presented in 1919-20 by M.R.Ry. Rāmakṛṣṇa Rāyaguru, Gaṅgāpuraśāsanam, Dharakota post, Ganjam district.

जैमिनिभागवतम्.

JAIMINIBHĀGAVATAM.

Foll. 1*a*—141*a*. Foll. 141*b*—145 are left blank.

The story relating to the birth of Lord Kṛṣṇa and the part He played in this earth. The work is attributed to Jaimini.

Cmplete in 1 to 69 Adhyāyas.

Beginning:

कृष्णः करोतु कल्याणं कंसकुञ्जरकेसरी ।
कालिन्दीजलकल्लोलकोलाहलकुतूहली ॥
नमो नलिननेत्राय वेणुनादविनोदिने ।
राधाधरसुधापानशालिने वनमालिने ॥

जैमिनिरुवाच—

पुरा देवासुरे युद्धे निहता दैत्यदानवाः ।
कालनेमिर्विप्रचित्तिः हयग्रीवश्च दानवः ॥
अन्ये चैव तथा दैत्या राक्षसाश्च महाबलाः ।
जाताः पृथ्व्यां राजगृहे जरासन्धादयस्तथा ॥
पूतनाबकचाणूरकंसकेशिमहासुराः ।
ब्राह्मणद्वेषिणस्सर्वे सर्वे यज्ञविरोधिनः ॥
सुरापानान्महामत्ता नरमांसबलिप्रियाः ।
देवकार्याणि निघ्नन्तस्तपोयज्ञविनाशिनः ॥
एवं पृथिव्यां तैस्सर्वैराक्रान्ता भूर्निपीडिता ।
गौर्भूत्वा चाश्रुपूर्णाक्षी ब्रह्माणं शरणं ययौ ॥

* * * *

ततो ब्रह्मा ययौ शीघ्रं सर्वैर्देवगणैस्सह ।
क्षीराब्धरुत्तरं कूलं यत्र शेते जनार्दनः ॥
प्रणवेन स्तुवन् विष्णुं निपपात धरातले ।
ब्रह्माणमवदद्विष्णुः वेद्मि ते मानसं ज्वरम् ॥
भारं भुवस्समुद्धर्तुं स्वयं चावतराम्यहम् ।
देवा देवस्त्रियस्सर्वे पृथिव्यां सम्भविष्यथ ॥
इति श्रुत्वा हरेर्वाक्यं ब्रह्मा लोकपितामहः ।
कथयामास देवेभ्यो भयं त्यजत देवताः ॥

* * * *

Colophon:

इति श्रीजैमिनीये भागवते प्रथमोऽध्यायः ॥

End :

सूत उवाच—

जैमिनेरिदमाख्यातं पवित्रं पापनाशनम् ।
कृष्णस्य चरितं दिव्यं कोटिजन्माघनाशनम् ॥
पठतां शृण्वतां वापि हयमेधायुतं फलम् ।
महापातककोटिघ्नं परमानन्दकारकम् ॥
अत्युपद्रवदुःखघ्नं परमायुर्विवर्धनम् ।
वेदवेदान्तसारोऽयं जैमिनेऋ(र्न्यृ)षि(वि)निर्मितम् ॥
विष्णुलोकमनुप्राप्तं कलिकल्मषनाशनम् ।
अन्ते कृष्णस्य स्मरतां भवतापप्रणाशनम् ॥
सकलभुवनमीशं देवदेवा(वेदवेदा)न्ततत्त्वं नवघनरुचिगात्रं मोक्षदत्तैकपात्रम् ।
तमभजत मुनीन्द्राः सुन्दरास्यं सुरेशं नवनलिनसुनेत्रं पीतवस्त्रं पवित्रम् ॥
कृष्णस्य चरितं श्रुत्वा महर्षेस्सनकादयः ।
प्रशशंसुः सुतं सर्वे स्वं स्वमाश्रममाययुः ॥

Colophon :

इति श्रीजैमिनीये भागवते वेदव्यासार्जुनसंवादे अष्टावक्रऋषिशापकथने एकोनसप्ततितमोऽध्यायः ॥ समाप्तोयं ग्रन्थः ॥

The scribe adds :

मुकुन्दे देवस्याष्टादशाङ्केऽथ ज्येष्ठे लिखितं पुस्तकमिदं रामकृष्णरथेन तु ।

R. No. **3172.**

Palm-leaf. 13 × $1\frac{5}{8}$ inches. Foll. 52. Lines, 5 in a page. Oriya. Good.

Presented in 1919–20 by Śrīmān Bṛndāvanaratha, Sergada, Ganjam district.

शिवशतकम् , सव्याख्यानम्.

ŚIVAŚATAKAM WITH COMMENTARY.

A eulogy in 100 stanzas addressed to God Śiva. It is followed by a commentary by Gōpīnātha, elder son of Padmā and Dāśarathi who was the son of Lakṣmīdhara, son of Kṛṣṇāṁbā of Ātrēyagōtra. The author was patronized by the king Śrī Lakṣmīnṛsiṁha.

Complete.

Beginning :

नीलाम्बरानुजं नौमि नीलाम्बरसमद्युतिम् ।
नीलालकावृतमुखं नीलाम्बुजनिभेक्षणम् ॥

प्रपन्नजनसम्मोहानल्पसङ्कल्पदायकम् ।
वन्दे गिरिसुतामन्दानन्दातिशयकारकम् ॥
आसील्लक्ष्मीधराख्यस्सकलगुणगणाधिष्ठितात्रेयवंशः
श्रीकृष्णस्याङ्घ्रिपद्मार्चनविधिनिपुणश्शारदुर्गेशमान्यः ।
कृष्णाम्बागर्भदुग्धार्णवसकलकलापूर्णशुभ्रांशुभूतः
स्वच्छातुच्छार्थसार्थप्रविलसदमलस्वान्तवृत्तिस्सुनीतिः ॥
नाम्ना दाशरथिस्तदादितनयश्श्रीकृष्णभक्तस्सतां
पूज्यस्संसदि गद्यपद्यरचनाचातुर्यधौरेयकः ।
पद्मागर्भसमुद्रशुक्तिजठरप्रोद्भूतमुक्ताफलं
विद्याभूषणराजदत्तपदवीभूषाप्रकर्षान्वितः ॥
गोपीनाथाभिधानो नृपकुलकुमुदारण्यपूर्णामृतांशुः
श्रीश्रीलक्ष्मीनृसिंहद्विपरिपुवसुधाधीशदत्तां प्रसादात् ।
प्राप्तस्साहित्यपञ्चानन इति पदवीमात्मजस्तस्य चाद्यः
चक्रे शैवस्य टीकां सुललितशतकस्यात्मशक्तिक्रमेण ॥
यत्र यत्र पदार्थानां स्खलनं मे भवेदिह ।
तत्र तत्र तु संशोध्यमिति सत्सु निवेदना ॥

अथ तत्रभवान् महाकविः चतुर्वर्गप्राप्तये प्रारिप्सितश्रीमच्छिवप्रत्यङ्गवर्णनशतकरूपखण्डकाव्यस्य निर्विघ्नपरिसमाप्तिकामः तस्यादौ प्राचीनसूरिशिष्टाचारमनुबध्नन् प्रथमं तावत् श्लोकद्वयेनाशीरूपं मङ्गलमाचरति । खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि यत्' इति खण्डकाव्यलक्षणात् । न्यस्तोदस्तेति—

न्यस्तोदस्तादसीयप्रपदगुरुभरन्यञ्चितोदञ्चितोर्वी-
प्रख्यातक्षीरसिन्धूच्चलनमुकुलनान्दोललीलाकलाभिः ।
प्रस्फारस्फारसौख्यप्रसररभसिनश्शेषशय्याशयालो-
राशास्या शश्वदास्तां विषमशरमुषः श्रेयसे लास्यलीला ॥

विषमा अयुग्माः शरा यस्य सः विषमशरः पञ्चबाणः तं मुष्णाति खण्डयतीति विषमशरमुट् । श्रीशिवः तस्य । मुष खण्डन इति धातोः क्विप् । लास्यलीला नृत्यक्रीडा । शश्वत् सर्वदा । श्रेयसे मङ्गलाय । आस्तां भवेत् । (त)व इति शेषः । आसेराशीरर्थे लोट् । किंभूता न्यस्तोदस्तेत्यादि ।

End:

शीर्षाणि न्यञ्चि किञ्चित्त्वयि विदधति ये तेष्ववाञ्चेद्विरिञ्चिः
यस्तावत्स्तावकस्ते तममरपरिषद्व्यस्तमस्ता स्तुवीतात् ।
धत्ते चित्ते प्रमत्ते य इह तव पदं तं च मध्येसमाधि
ध्यायेद्योगीन्द्रबृन्दं प्रणतसुरतरो तं भवन्तं प्रपद्ये ॥

शीर्षाणीति । त्वयि भवति ये जनाः शीर्षाणि मस्तकानि । किञ्चित् न्यञ्चि अवाञ्चि । विदधति कुर्वन्ति । तेषु विरिञ्चिः ब्रह्मा । अवाञ्चेत् न्यञ्चेत् । यः ते तव तावत् साकल्ये(न) स्तवं स्तुतिं करोतीति स्तावकः तं स्तुतिकर्तारं अमरपरिषत् देवश्रेणी । व्यस्तमस्ता न्यञ्चितमूर्धा स्तुवीतात् नुवीयात् । प्रमत्ते अनवहिते चित्ते यः ते तव पदं चरणं धत्ते तं त्वत्पदधारिणं मध्येसमाधि मध्येध्यानं योगीन्द्रबृन्दः मुनीन्द्रसमूहः ध्यायेत् । प्रणतानां सुरतरुः कल्पपादपः तस्य सम्बोधने हे प्रणतवाञ्छितार्थप्रद तं भवन्तं प्रपद्ये शरणापन्नो भवामि ।

Colophon:

इति श्रीशिवशतकम् ॥

R. No. 3173.

Palm-leaf. $5\frac{1}{2} \times \frac{3}{4}$ inches. Foll. 138. Lines, 4 in a page. Grantha and Tamil. Slightly injured.

Presented in 1919–20 by Sundarammāḷ, Āḻvārtirunagarī, Tinnevelly district.

Fol. 1*a* gives the name of Ācāryas.

(*a*) लक्ष्मीहृदयस्तोत्रमन्त्रः.

LAKṢMĪHṚDAYASTŌTRAMANTRAḤ.

Fol. 1*b*.

Same work as that described under No. 7122 of the D.C.S. MSS., Vol. XIV.

Incomplete.

(*b*) लक्ष्मीमन्त्रः.

LAKṢMĪMANTRAḤ.

Foll. 2*a*—4*b*.

Similar to the work described under No. 7111 of the D.C.S. MSS., Vol. XIV.

Incomplete.

Beginning :

अस्य श्रीमहालक्ष्मीमन्त्रस्य गणक ऋषिः, गायत्री छन्दः, महालक्ष्मीर्देवता, श्रीं बीजं, ह्रीं शक्तिः, स्वाहा कीलकं, मम सर्वाभीष्टप्रसादसिद्ध्यर्थे जपे विनियोगः।

End :

पञ्च पूजा। ओं श्रीं ह्रीं ऐं महाष्टकमलधारिणी हंसवाहिनी स्वाहा ॥

(c) இலக்குமிதுதி (வெண்பா).

ILAKKUMITUDI (VEṆPĀ).

Foll. 5*a*—138*a*.

See the Tamil Part of this Triennial Catalogue.

R. No. **3174.**

Palm-leaf. 17¼ × 1⅜ inches. Foll. 66. Lines, 6 in a page. Telugu. Good.

Presented in 1919-20 by M.R.Ry. Appala Narasiṁhamgāru, Cellūr, Vizianagram.

Fol. 1*a* contains a few lines in the beginning of the Mālavikāgnimitra and 1*b* is left blank.

(*a*) वृत्तरत्नाकरम्.

VṚTTARATNĀKARAM.

Foll. 2*a*—10*b*.

Same work as that described under No. 1782 of the D.C.S. MSS., Vol. III.

Breaks off in the third Adhyāya.

(*b*) मुकुन्दाष्टकम्.

MUKUNDĀṢṬAKAM.

Fol. 11.

Same work as that described under No. 10207 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*c*) సకలలక్షణసారసంగ్రహచింతామణి.

SAKALALAKṢAṆASĀRASAṄGRAHACINTĀMAṆI.

Foll. 12*a*—59*b*.

See the Telugu Part of this Triennial Catalogue.

Foll. 60 and 61 are left blank.

(*d*) కవిదర్పణము.

KAVIDARPAṆAMU.

Foll. 62*a*—65*b*. Fol. 66 is left blank.

See the Telugu Part of this Triennial Catalogue.

R. No. 3175.

Palm-leaf. $13\frac{3}{8} \times 1\frac{1}{4}$ inches. Foll. 136. Lines, 5 in a page. Oriya. Good.

Presented in 1919-20 by Śrīmān Narasiṁha Mahanti, Śrīpūrī, Ganjam district.

(*a*) रघुवंशः, टिप्पणीसहितः.

RAGHUVAṀŚAḤ WITH NOTES.

Foll. 1*b*—10*b*. Fol. 1*a* is left blank.

Same work as that described under R. No. 540(*d*) ante.

Breaks off in the first Sarga.

(*b*) वैष्णवस्मृतिसारः, ओढ्रगीतसहितः.

VAIṢṆAVASMṚTISĀRAḤ WITH SONGS IN ORIYA.

Foll. 12*a*—135*a*. Foll. 135*b* and 136 are left blank. Fol. 11*a* contains a few lines on Vāmanajayantī and Śivarātrīvratakalpa and fol. 11*b* contains the meaning of one Śrutivākya in the Oriya language.

Similar to the work described under R. No. 2992 ante.

Deals with the following subjects :—

१—४. श्रीकृष्णतत्त्वनिरूपणम्.
५. गुरुतत्त्वनिरूपणम्.
६. दीक्षाविधिवर्णनम्.
७. वैष्णवनित्याचारकथनम्.
८. वैष्णवाचारकथनम्.
९. नानामाहात्म्यविशेषकथनम्.
१०. तुलस्यादिमहिमवर्णनम्.
११. एकादशीव्रतवर्णनम्.
१२. अरुणोदयवेधादिनिरूपणम्.
१३, १४. उन्मीलन्यादिमहाद्वादशीव्रतकथनम्.
१५. जन्माष्टम्यादिव्रतकथनम्.
१६. मार्गशीर्षादिमासत्रयकृत्यनिरूपणम्.
१७. फाल्गुनादिमासत्रयकृत्यनिरूपणम्.
१८. ज्येष्ठादिमासत्रयकृत्यनिरूपणम्.
१९. भाद्राश्विनकृत्यनिरूपणम्.
२०. कार्त्तिकमासकृत्यम्.
२१, २२. पुष्यमाहात्म्यम्.
२३. स्मृतिसारसङ्कीर्तनम्.
२४. हरिनाममाहात्म्यम्.
२५. वैष्णवमाहात्म्यम्.

२६. भागवतादिमाहात्म्यकथनम्.
२७–२९. बृन्दावनयमुनामाहात्म्यम्.
३०. पुरश्चरणविधिः.

Contains the Adhyāyas 1—30 complete.

Beginning:

दशमे ब्रह्मा देवान् प्रति—

गिरं समाधौ गगने समीरितां निशम्य वेधाः त्रिदशानुवाच ह ।
गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव माचिरम् ॥
पुरैव पुंसावधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यताम् ।
स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयन् चरेद्भुवि ॥

वसुदेवगृहे साक्षात् भगवान्पुरुषः परः ।
जनिष्यते तत्प्रियार्थं सम्भवन्त्यमरस्त्रियः ॥ अस्यार्थः—

* * * *

ब्रह्मवैवर्ते यथा—

नन्दपत्न्यां यशोदायां मिथुनं समजायत ।
गोविन्दाख्यः पुमान् कन्या साम्बिका मधुरां गता ॥

अस्यार्थः—

* * * *

Colophon:

इति श्रीसकलपुराणसारोद्धारे वैष्णवस्मृतिसारे श्रीकृष्णतत्त्वनिरूपणं नाम प्रथमोऽध्यायः ।

End:

गुरुमूलमिदं सर्वं तस्मान्नित्यं गुरुं भजेत् ।
पुरश्चरणहीनोऽपि मन्त्रः सिध्येन्न संशयः ॥

* * * *

तथा हि स्कान्दपुराणे—

चन्द्रसूर्योपरागे तु स्नात्वा प्रयतमानसः ।
स्पर्शादिमुक्तिपर्यन्तं जपेन्मन्त्रं समाहितः ॥

* * * *

Colophon:

इति श्रीसकलपुराणसारोद्धारे वैष्णवस्मृतिसारे पुरश्चरणविधिकथनं नाम त्रिंशोऽध्यायः ॥

R. No. 3176.

Palm-leaf. 10½ × 1⅝ inches. Foll. 71. Lines, 6 in a page. Oriya. Good.

Presented in 1919–20 by Śrīmān Narasiṁha Mahanti, Śrīpūrī, Ganjam district.

(*a*) रागमालिका, ओढ्रगीतसहितः.

RĀGAMĀLIKĀ WITH ORIYA SONGS.

Foll. 1*a*—7*a*.

Similar to the work described under No. 13014 of the D.C.S. MSS., Vol. XXII, but this work contains several similar songs in Oriya language.

Complete.

Beginning:

आदौ मालवमल्लारनाटकर्णाटपश्चमाः ।
तोडीवराडीगान्धारहिण्डोलकुहकोडबाः ॥
धनासीमालसीगौडीराडिकामोदिमाधवाः ।
राकीवसन्तदेशाख्यबङ्गालापटमञ्जरी ॥
वेलावलीगोण्टकीरीगुर्जरीरामिटङ्कुशाः ।
कम्बावतीमधूकीरिशालको देवकीर्यपि ॥
रामकीरिहेमकीरिललिता(चा)थ भैरवी ।
ततो मोटांगिरी चेति रागाष्षट्त्रिंशदीरिताः ॥

End:

अवचित्य कुसुमराशिं रचयन्ती पुष्पदाम कमनीयम् ।
नन्दनवनोपकण्ठे सुष्ठुमना मोटकीरिका(च) स्यात् ॥

* * * *

Colophon:

इति सङ्गीतदामोदरोक्तरागमाला समाप्ता ॥

(*b*) रागमालिका, ओढ्रगीतसहिता.

RĀGAMĀLIKĀ WITH ORIYA SONGS.

Foll. 7*a*—9*b*.

Similar to the work described above. By Kaviratna, who had the title of Kalāṅkura.

Incomplete.

Beginning:

श्रीकण्ठशैलशिखरे शिखिबर्हिवासा मातङ्गमौक्तिकधृतोत्तमहारयष्टिः ।
आकृष्य चन्दनतरोश्शबरी भुजङ्गमाबध्नती वलयमुज्ज्वलनीलकान्तिः ॥

* * * *

प्रियाविरहसन्तापभूषितो धूलिधूसरः ।
केदाररागश्श्यामोऽयं युवा सर्वाङ्गसुन्दरः ॥

End:

दामोदरेण स्वग्रन्थे यथोक्ता रागमालिका ।
कलाङ्कुरेण च तथा कविरत्नेन भाषया ॥
जटाकलापश्रितकुण्डलीधृक्कर्पूरगन्धागरुलेपनाङ्गः ।
सुकङ्कणो रावणहस्तधीरीश्वरप्रियश्शङ्करभूषणोऽयम् ॥

* * * *

सत्यं ब्रवीमि मकरध्वजपीड्यवाण(मानो) नाहं तदर्थमनसा परिचिन्तयामि ।
दास्येऽद्य मे विघटिते तव कर्मरूपी सो(को) वा भवेन(न्न)हि भवेदिति मे वितर्कः॥

(*c*) ସଂଗୀତବୋଲି ।
SAṄGĪTABOLLI.

Foll. 10—26*a*.

See the Miscellaneous Part of this Triennial Catalogue.

Complete in seven Bollis.

(*d*) सङ्गीतप्रकाशः.
SAṄGĪTAPRAKĀŚAḤ.

Foll. 26*a*—55*b*.

Similar to the work described under No. 13016 of the D.C.S. MSS., Vol. XXII.

Deals with the following topics :—

१. प्रबन्धलक्षणम्.
२. छायालगानिरूपणम्.
३. रूपकभेदनिरूपणम्.
४. तालकलाविचार.
५. खण्डविचारः.
६. क्षुद्रगीतनिरूपणम्.
७. गुणगीतविचारः.
८. दोषनिरूपणम्.
९. नृत्यलक्षणम्.
१०. वाद्यलक्षणम्.
११. रागविचारः.
१२. षाडवनिरूपणम्.
१३. गीतप्रशंसा.
१४. नायिकालक्षणम्.
१५. नादविचारः.

Complete in 15 Prakāśas.

Beginning :

वामा(ङ्क)स्थां विपञ्चीं सुवलितललितग्रीवमालोकयन्त्याः
कान्त्याः कर्पूरकुन्दस्फटिकमणिरुचा द्योतयन्ती दिगन्तम् ।
प्रत्यूहव्यूहपङ्केरुहनिवहमहावाहनीहारवृष्टिः
दृष्टिर्वाग्देवतायाः चलदलनलिनश्रीमुडव्याज्जगन्ति ॥

अथ सङ्गीतमाह—

चतुर्वर्गफलावाप्तिः गीतादेव सुखादतः ।
यथाप्रचारं संक्षेपात्तत्स्वरूपं निरूप्यते ॥

अथ किंस्वरूपं गीतमित्याह—

गीतं व्यञ्जकधातुमातुरचितं तच्च द्विधा कीर्तितं
तालाद्यैर्वियुतं त्वयुक्तमिति तत्ख्यातं तथा लिप्तिकम् ।
युक्तं छन्दकतालकादिसहितं शुद्धप्रबन्धाभिधं
तच्च स्यात् त्रिविधं तु शुद्धमिति तत् छायालगं क्षुद्रकम् ॥

End :

अथ तानमाह—

प्रयोगविस्तारविचित्रभावात्ताना मताः स्युः किल मूर्छनासु ।
संपूर्णतः षाडबतस्स्युरौडबात् प्रस्तारभेदात् बहवस्तु तानाः ॥

इति नादविचारः ।

Colophon :

इति गीतप्रकाशः समाप्तः ॥

(*e*) ସଂଗୀତସାରବୋଲି ।

SAṄGĪTASĀRABOLLI.

Foll. 56*a*—65*b*.

See the Miscellaneous Part of this Triennial Catalogue.

Complete.

(*f*) गीतादिदोषविचारः.

GĪTĀDIDŌṢAVICĀRAḤ.

Foll. 65*b*—67*b*.

A discussion as to what is considered flaws or mistakes in musical songs.

Complete.

Beginning:

आद्या गणाश्च चत्वारो देवतादिषु वर्णने ।
शेषा गणाश्च चत्वारो विपक्षदनुजादिषु ॥
दुष्टं पदस्यादिशमर्थवाक्यं क्लिष्टप्रयुक्तोऽनुचितार्थता च ।
भाषान्तरे स्यात्पुनरन्यभाषा वर्गग्रहांशक्षितिरेव भाषा ॥
* * * *

भाषागीते दोषमाह—

शुक्लो वर्णो ब्राह्मणानां क्षत्रियाणां च पाटलः ।
वैश्यानां धूमलो ज्ञेयः शूद्राणां कृष्ण एव च ॥

अथ गणानाह—

युक्तस्यास्मिन्नक्षरस्यापि युक्तं तयै(स्मै)प्रोक्तं चाप्रयुक्तं सयुक्तम् ।
ह्रस्वस्यैवं दीर्घता दीर्घकस्य भाषागीते ह्रस्वता नैव दोषः ॥

End:

ध्रुतौ लघुचतुष्कं च गुरुषट्कं लघुद्वयम् ।
वृतौ लघुचतुष्कं च तालोऽयं वादकाकुलैः ॥

Fol. 68 contains a few stanzas of Viṣṇustōtra. Foll. 69—71*b* contain the Gītaviṣaya in Oriya language.

R. No. 3177.

Palm-leaf. 10 × 1 inches. Foll. 106. Lines, 6 in a page. Oriya. Fair.

Presented in 1919-20 by Śrīmān Narasiṁha Mahanti, Śrīpūrī, Ganjam district.

(*a*) राधारसमञ्जरी.

RĀDHĀRASAMAÑJARĪ.

Foll. 1*a*—6*a*.

Same work as that described under R. No. 3053(*a*-75) ante, wherein see for the beginning. By Kṛṣṇacaitanyadēva. This is also called Nikuñjavihārastōtra.

Complete.

End:

सौन्दर्यस्मरकेलिपौरुषरसं गायन्ति तास्सुस्वरं
वीणावेणुमृदङ्गतालमहतीः संपादयन्त्यो भृशम् ।
राधा नृत्यति दक्षिणे रसवती वामे च चन्द्रावली
मध्ये श्यामलसुन्दरो रसकलामुद्दीपयन्नुत्तमाम् ॥

* * * *

राधा नित्येश्वरी श्रीमान् सर्वे लावण्यवैभवम् ।
कृष्णस्य वभैवं यत्र नास्ति प्रेमाधिकस्स्वयम् ॥

Colophon:

इति श्रीकृष्णचैतन्यदेवविरचितं श्रीराधारसमञ्जर्यां निकुञ्जविहाराख्यं स्तोत्रं सम्पूर्णम् ॥

(*b*) एकान्तनिकुञ्जविलासः.

ĒKĀNTANIKUÑJAVILĀSAḤ.

Foll. 6*b*—10*b*.

A eulogy on Rādhā and Kṛṣṇa conceived as enjoying in solitude each other's company in a shady bower: by Rūpagōsvāmin.

Complete.

Beginning:

धृतकनकसुगौरस्निग्धमेघौघनीलच्छविभिरखिलवृन्दारण्यमुद्भासयन्तौ ।
मृदुलनवदुकूले नीलपीते वसानौ स्मरनिभृतनिकुञ्जे राधिकाकृष्णचन्द्रौ ॥

End:

स्तवमिममतिरम्यं राधिकाकृष्णचन्द्रप्रमदभरविलासैरद्भुतं भावयुक्तः ।
पठति य इह रात्रौ नित्यमव्यग्रचित्तो विमलमति स राधालीषु सख्यं भजेत ॥

Colophon:

इति श्रीराधिकाकृष्णयोरेकान्तनिकुञ्जविलासे श्रीरूपकृतं सम्पूर्णम् ॥

Foll. 10*b*—12*a* contain the Pradakṣiṇavidhi of Rādhā and Śrī-Kṛṣṇa. Fol. 12*b* is left blank.

(*c*) ସାଧନସୁଧାକରଃ ।

SĀDHANASUDHĀKARAḤ.

Foll. 13*a*—47*b*.

See the Miscellaneous Part of this Triennial Catalogue.

Complete.

(*d*) ମନଶିକ୍ଷାପକ୍ଷାରଃ ।

MANAŚIKṢĀPAKṢĀRAḤ.

Foll. 48*a*—50*a*.

See the Miscellaneous Part of this Triennial Catalogue.

Complete.

(*e*) ସ୍ମରଣମଙ୍ଗଳ ।

SMARAṆAMAṄGALA.

Foll. 50*a*—55*a*.

Complete.

See the Miscellaneous Part of this Triennial Catalogue. By Gōvindadāsa.

(*f*) ବୃନ୍ଦାବନବିହାରଃ ।

BṚNDĀVANAVIHĀRAḤ.

Foll. 55*a*—73*a*.

See the Miscellaneous Part of this Triennial Catalogue.

Contains the Paṭalas one to five complete and wants the beginning; otherwise complete in the tenth Paṭala.

(*g*) ପ୍ରେମଭକ୍ତିଚିନ୍ତାମଣିଃ ।

PRĒMABHAKTICINTĀMAṆIḤ.

Foll. 73*a*—81*b*.

See the Miscellaneous Part of this Triennial Catalogue.

Complete.

(*h*) कृष्णनामदशकम्.

KṚṢṆANĀMADAŚAKAM.

Fol. 81*b*.

A eulogy addressed to Lord Kṛṣṇa by the repetition of His Ten significant names.

Complete.

Beginning:

राधिकाहृदयोन्मादिवंशीकाणमधुच्छटः ।
राधापटिमलीलारगरिमाक्षिप्तमानसः ॥

End:

इति गोकुलपालस्य सूनुलीलामनोहरम् ।
यः पठेन्नामदशकं सोऽवश्य लभतां व्रजेत् ॥!

Colophon:

इति श्रीकृष्णदशनाम समाप्तम् ॥

(*i*) राधानामदशकम्.

RĀDHĀNĀMADAŚAKAM.

Foll. 81*b*—82*a*.

Ten significant names relating to Rādhā, a beloved consort of Kṛṣṇa. Complete.

Beginning :

राधा दामोदरप्रेष्ठा राधिका वार्षभानवी ।
समस्तवल्लवीबृन्दधम्मिल्लोत्तंसमल्लिका ॥

End :

स क्लेशरहितो भूत्वा भूरिसौभाग्यभूषितः ।
त्वरितं करुणापात्रं राधामाधवयोर्भवेत् ॥

Colophon :

इति श्रीवृषभानुकिशोरीदशनाम समाप्तम् ॥

Foll. 82*a*—84*a* contain the Nāyakanāyikābhēda (in Oriya language). Fol. 84*b* is left blank.

(*j*) श्रीकृष्णयुगलप्रकाशः.

ŚRĪKṚṢṆAYUGALAPRAKĀŚAḤ.

Foll. 85*a*—104*a*. Foll. 104*b*, 105*b* and 106 are left blank. Fol. 105 contains some stanzas relating to the different kinds of Ēkādaśī.

Brings out the greatness and importance of the two-syllabled Mantra relating to Lord Kṛṣṇa.

Complete.

Beginning :

एकदा यमुनातीरे समासीनं जगद्गुरुम् ।
नारदः प्रणिपत्याह देवदेवं सदाशिवम् ॥

नारद उवाच—

देवदेव महादेव सर्वज्ञ जगदीश्वर ।
भगवन् धर्मतत्त्वज्ञ कृष्णमन्त्रविदां वर ॥
कृष्णमन्त्रा मया लब्धास्त्वत्तो ये च पितुः परे ।
ते सर्वे साधिता यत्नात् मन्त्रराजादयो मया ॥

* * * *

भगवन् केन मन्त्रेण संसारोत्तारणं नृणाम् ।
तन्ममाचक्ष्व तत्त्वेन सर्वलोकहितं यतः ॥
को मन्त्रस्सर्वमन्त्राणां पुरश्चरणवर्जितः ।
विना न्यासैः विना योगैस्संस्कारावैर्विना प्रभो ॥
सकृदुच्चारणान्नृणां ददाति फलमुत्तमम् ।

* * * *

वक्ष्याम युगलं तुभ्यं कृष्णमन्त्रमनुत्तमम् ।
मन्त्रचिन्तामणिर्नाम युगलं द्वयमेव च ॥

End:

श्री अम्बरीष उवाच—

कृतकृत्योऽभवं साक्षात् त्वत्प्रसादादहं गुरो ।
रहस्यानां रहस्यं यत् त्वया मह्यं प्रकाशितम् ॥

श्रीसनत्कुमार उवाच—

धर्मानेतानुपातु(वि)ष्टो जपन्मन्त्रमहर्निशम् ।
अचिरादेव तद्दास्यमवाप्स्यति न संशयः ॥
मयापि गम्यते राजन् गुरोरायतनं मम ।
बृन्दावने यत्र नित्यं गुरुर्मेऽस्ति सदाशिवः ॥

Colophon:

इति श्रीसनत्कुमाराम्बरीषसंवादे श्रीकृष्णयुगलप्रकाशकः षट्त्रिंशः पटलः ।

R. No. **3178.**

Palm-leaf. $13\frac{5}{8} \times 1\frac{1}{8}$ inches. Foll. 150. Lines, 4 in a page. Oriya. Much injured and in disorder.

Presented in 1919-20 by M.R.Ry. Śrī-Gōvinda Dās, Barua, Ganjam district.

(*a*) **सिद्धान्तचन्द्रिका.**

SIDDHĀNTACANDRIKĀ.

Foll. 1*a*—66*b*.

A commentary on the grmmatical Sūtras of Sarasvatī referred to under No. 1546 of the Descriptive Catalogue of MSS., Vol. III.

Incomplete.

Beginning:

नमस्कृत्य महेशानं मतं बुद्ध्वा पतञ्जलेः ।
वाणीप्रणीतसूत्राणां कुर्वे सिद्धान्तचन्द्रिकाम् ॥

अ इ उ ऋ ऌ समानाः । अनेन क्रमेण (एते वर्णा ज्ञेयाः । ते च समानसंज्ञाः स्युः ।) नैतेषु सूत्रेषु सन्धिरनुसन्धेयोऽविवक्षितत्वात् । विवक्षितस्तु सन्धिर्भवतीति नियमात् । ह्रस्वदीर्घप्लुतभेदाः सवर्णाः । एतेषां

ह्रस्वदीर्घप्लुताः (सजातीयाः परस्परं सवर्णा भण्यन्ते) । ऋऌवर्णौ च । एकमात्रो ह्रस्वः । द्विमात्रो दीर्घः । त्रिमात्रः प्लुतः ।

End:

ईष्टे । ईशिषे । ईशिध्वे । ईष्टाम् । ईशांचक्रे । ऐशिष्ट । आस उपवेशने । से । आस्ते । आस्ताम् । आसांचक्रे । आसिष्ट । वस आच्छादने । से । वस्ते । वसाताम् ।

(*b*) ज्योतिर्मुक्तावलिः.

JYŌTIRMUKTĀVALIḤ.

Foll. 67*a*—147*b*.

A treatise on astrology: by Śrī-Mahōpādhyāya.

Contains 1 to 14 Adhyāyas only.

Beginning:

इन्दीवरदलश्यामं पीताम्बरधरं हरिम् ।
नत्वा तु क्रियते यत्नात् ज्योतिश्शास्त्रमनुत्तमम् ॥

अथ ग्रहाभिधानं लिख्यते—

. . . . . . भास्करोऽर्को दिवाकरः ।
तिग्मांशुस्तपनो भानुस्सहस्रांशुः प्रभाकरः ॥
शीतांशुश्चन्द्रमास्सोमो मृगाङ्केन्दू निशाकरः ।
शीतरश्मिर्निशा(नाथो) . . . . रोहिणीधवः ॥

* * * *

कृष्णतृतीया दशमी च रात्रौ दिवा सप्तमी चतुर्दशी च ।
शुक्ला चतुर्थी एकादशी निशि पौर्णमी अष्टमी दिवा च विष्टिः ॥

इति विष्टिकथनम् ॥

Colophon:

इति श्रीमहोपाध्यायविरचितायां ज्योतिर्मुक्तावल्यां . . . नाम प्रथमोऽध्यायः ॥

End:

लग्ने वा पञ्चमे वा नवमे द्वादशे तथा ।
भानुभौमकिटिं दृष्ट्वा पितृहतो न संशयः ॥

Colophon:

इति श्रीमहोपाध्यायविरचितज्योतिर्मुक्तावल्यां चतुर्दशोऽध्यायः ॥

Fol. 148*a* contains one stanza on Tithinirṇaya. Foll. 148*b*—150 are left blank.

R. No. **3179.**

Śrītāla. 21½ × 2 inches. Foll. 123. Lines, 10 in a page. Malayalam. Injured.

Purchased in 1919–20 from M.R.Ry. Kuññuṇṇi Menon **Assan**, Lōcamalēśvaram village, Cranganore post, Cochin State.

Fol. 1 is left blank.

शिशुपालवधः, सन्देहविषौषधिव्याख्यासहितः.

ŚIŚUPĀLAVADHAḤ WITH THE COMMENTARY SANDĒHAVIṢAUṢADHI.

Foll. 2*a*—119*b*. Fol. 120*a* contains a few lines of Aṣṭāṅgahṛdaya. Foll. 120*b*—123*b* are left blank.

Same commentary on the Śiśupālavadha as that described under R. No. 2688 ante. By Vallabhadēva, grandson of Ānandadēva.

Breaks off in the 11th Sarga.

Beginning:

यस्य भृङ्गावलिः कण्ठे मददानाम्बुभूषिते ।
भाति रुद्राक्षमालेव स वः पायाद्गणाधिपः ॥

* * * *

श्रीशब्दमादौ प्रयुङ्क्ते—

श्रियःपतिश्श्रीमति (. . .) मुनिं हरिः ॥

हरिः मुनिं ददर्शेति वाक्यार्थः । को हरिरित्याह—श्रियःपतिः ।

* * * *

Colophon:

आनन्ददेवायनिवल्लभदेवविरचितायां माघकाव्यसारटीकायां सन्देहविषौषधिव्या(समा)ख्यायां प्रथमस्सर्गः ॥

End:

लज्जयाधोमुखीव नम्रवक्रेव । कीदृशान् । इति उक्तेन प्रकारेण स्वंसमानकरा च भवति । इन्दोर्मुखमुपमानं रजन्यास्तु नायिकोपमानत्वं प्रतीयते । उत्प्रेक्षाश्लेष . . . . .

Colophon:

आनन्ददेवायनिवल्लभदेवविरचितायां [माघकाव्य]शिशुपालवधसारटीकायां सन्देहविषौषधिव्या(समा)ख्यायां दशमस्सर्गः ॥

श्रुतिसमधिकमुच्चैः (. . .) मा गृधा माधवाय ॥

अथ भगवतो विष्णोः । . . . . . . इति वक्ष्यमाणेन प्रकारेण। रात्रेः परिणतिं निशाविपर्य(य)मभिजगदुः पेठुः । कथमुच्चैस्तराम् ।

* * * *

माधवायेति । क्रियाग्रहणमपि कर्तव्यमिति संप्रदानसंज्ञा । मालिनी-वृत्तम् : . . . . मालिनी नौ मयौ यः । प्रणिजगदुरित्युक्तम्.

R. No. 3180.

Śrītāla. 11⅓ × 1¼ inches. Foll. 79. Lines, 9 in a page. Malayalam. Good.

Purchased in 1919–20 from M.R.Ry. Kuññuṇṇi Menon Assan, Lōcamalēśvaram village, Cranganore post, Cochin State.

Foll. 1, 15*b*, 63 and 79 are left blank.

कुमारसम्भवः, सव्याख्यः.

KUMĀRASAMBHAVAḤ WITH COMMENTARY.

Foll. 2*a*—78*b*.

A commentary on the Kumārasaṁbhava, which work has been described under Nos. 11494—11509 of the D.C.S. MSS., Vol. XX: by Jayasiṁhācārya.

Breaks off in the second Sarga.

Beginning:

वाग्मिनो वागधीशाद्या व्यापाराणामुपक्रमे ।
यं प्रणम्य कृतार्थाः स्युस्तं प्रणौमि गणेश्वरम् ॥

* * * *

यत्प्रातिभप्रभावेन जगदेतत्सुखायते ।
कलये कालिदासं तं कविमौलिमहामणिम् ॥
अभिप्रायोपलम्भार्थमभिवन्द्यादराद्गुरून् ।
कुमारसंभवं नाम काव्यं व्याकर्तुमारभे ॥

अथ श्रीमान् महाकविमहेश्वरो महेश्वरचरितप्रतिपादकं कुमारसम्भवाख्यं काव्यं चिकीर्षन् आदौ वस्तुनिर्देशं करोति—

अस्त्युत्तरस्यां दिशि (. . .) मानदण्डः ॥ इति ।

उत्तरस्यां दिशि हिमालयो नाम नगाधिराजः अस्तीत्यन्वयः । उत्तरस्यामुदीच्याख्यायाम् । उत्तरा दिगुदीची स्यादित्यमरः । दिशि काष्ठायाम् । दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ता इत्यमरः ।

End:

इत्युक्तश्रमावस्थाः । सुलभश्शोभाविशेषः । प्रत्यास्यते ॥

Colophon:

इति जयसिंहाचार्यविरचितायां कुमारसंभवव्याख्यायां प्रथमस्सर्गः ॥

अथैतत्प्रकरणोपयोगितया प्रकरणान्तरमारभते—

तस्मिन् विप्रकृताः काले (. . .) धाम स्वायंभुवं ययुः ॥ इति ।

तस्मिन् काले दिवौकसः स्वायंभुवं धाम ययुरित्यन्वयः ।

* * * *

स्थाणुर्भगश्च भगवान् रुद्रास्त्वेकादश स्मृता इत्युक्तानामेकादशरुद्राणां दे.

R. No. **3181.**

Śrītāla. $13\frac{5}{8} \times 2$ and $10\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 122. Lines, 11 in a page. Malayalam. Good.

Purchased in 1919–20 from M.R.Ry. Kuññuṇṇi Menon Assan, Lōcamalēśvaram village, Cranganore post, Cochin State.

Fol. 1 is left blank.

(*a*) विष्णुपादादिकेशान्तस्तुतिः.

VIṢṆUPĀDĀDIKEŚĀNTASTUTIḤ.

Foll. 2*a*—6*a*. Fol 6*b* is left blank.

Same work as that described under R. No. 2590(*d*) ante.

Complete.

(*b*) पार्वतीस्तोत्रम्.

PĀRVATĪSTŌTRAM.

Fol. 7*a*. Fol. 7*b* is left blank.

A eulogy addressed to Goddess Pārvatī.

Complete.

Beginning:

बालार्कायुतसत्प्रभां करतले लोलम्बमालाकुलां
मालां सन्दधतीं मनोहरतनुं मन्दस्मितोद्यन्मुखीम् ।
मन्दं मन्दमुपेयुषीं वरयितुं शंभुं जगन्मोहिनीं
वन्दे देवमुनीन्द्रवन्दितपदामिष्टार्थदां पार्वतीम् ॥

End:

चक्रं शङ्खमसिं च चर्म सशरं चापं गदां शूलकं
बिभ्राणां वरदाभयामृतघटान् रत्नौघपात्रं तथा ।

भूषाभिर्मकुटादिभिस्त्रिनयनां पीताम्बरामम्बिकां
ध्याये चन्द्रकलान्वितां सुरगणैरीड्यां जगन्मङ्गलाम् ॥

(c) विष्णुपादादिकेशान्तस्तुतिव्याख्या.
VIṢṆUPĀDĀDIKĒŚĀNTASTUTIVYĀKHYĀ.

Foll. 8a—57a. Fol. 57b is left blank.

A commentary on the Viṣṇupādādikēśāntastuti, which is described under R. No. 2590(d) ante: by Pūrṇasarasvatī. The commentary is called Bhaktimandākinī.

Wants the beginning; otherwise complete.

Beginning:

सदा तदधिदेवतारूपामुरसा धारयति । भक्तेषु धनधान्यादिरूपेण ज्ञानरूपेण च पोषयति च यः तस्येत्यर्थः । विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्ताविति लक्षणात् लक्ष्मीभर्तुरित्युक्त्यैव विशेष्यस्य विष्णोरञ्जसा(प्रतीते)रनुपचरितस्य च लक्ष्मीधारणस्य भगवत्येव संभवात् विशेषणमेव प्रयुक्तमित्यवगन्तव्यम् ।

End:

तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहमिति स्मृतिवचनैरित्यशेषमतिमङ्गलमित्यर्थः ।

(इत्थं) पादादिकेशस्य भगवत्पादनिर्मिते ।
भक्तिमन्दाकिनीं व्याख्यां चक्रे पूर्णसरस्वती ॥
मृद्वङ्घ्रिश्लिष्टजङ्घं विकटकटितटं निम्ननाभिस्थपद्मं
(सत्)कुक्षिव्यूढवक्षः पृथु[ज]लभुजमुर(रु)स्कन्धमुद्दामकण्ठम् ।
बिम्बोष्ठं सुष्ठुगण्डं सितरदमरुणापाङ्गमुत्तुङ्गघोणं
शोणाक्षं सुभ्रु चोक्षा(त्था)लिकलुठदलकं पातु विष्णोर्वपुर्वः ॥

Colophon:

इति पूर्णसरस्वत्याः कृतिः श्रीमत्पादादिकेश(शान्तस्तुति)व्याख्या भक्तिमन्दाकिनी नाम सम्पूर्णा ॥

(d) कुमारसंभवः, सव्याख्यः.
KUMĀRASAMBHAVAḤ WITH COMMENTARY.

Foll. 58*a*—96*b*. Foll. 75*b*, 77*b*, 80*b*, 82*b* and 97 to 107 are left blank.

Same work as that described under R. No. 3180 ante, wherein see for the beginning.

Contains the third Sarga only.

End :

अनुकम्पा तु सा ज्ञेया दुःखितान्प्रति दोहिनः ।
उपकारपरत्वं या कुरुते चित्तवि(क्रि)या ॥ इति दिवाकरः ।

Colophon :

इति जयसिंहाचार्यप्रियशिष्यविरचिते कुमारसंभवव्याख्याने तृतीयस्सर्गः ॥

Foll. 108 to 110*a* and 111*a* contain a few philosophical stanzas and household accounts in Malayalam language. Foll. 110*b* and 111*b* are left blank. Foll. 112 to 116*a* contain certain grammatical points. Fol. 116*b* gives the Dharmaśāstravacana. Foll. 117 and 118 contain some Prahēlikā stanzas. Foll. 119 and 121 contain some Nighaṇṭuvacanas. Fol. 122 is left blank.

R. No. **3182.**

Śrītāla. 16¼ × 1⅝ inches. Foll. 185. Lines, 14 in a page. Malayalam. Injured.

Purchased in 1919-20 from M.R.Ry. Kuññuṇṇi Menon Assan, Lōcamalēśvaram village, Cranganore post, Cochin State.

योगरत्नसमुच्चयः.

YŌGARATNASAMUCCAYAḤ.

Foll. 1 and 2 are left blank.

Similar to the work described under No. 13239 of the D.C.S. MSS., Vol. XXIII.

Breaks off in the 28th Adhikāra.

Beginning :

मिथ्याहारविहारोत्था दोषा ह्यामाशयाश्रयाः ।
बहिर्निरस्य कोष्ठाग्नी ज्वरदाः स्यु रसानुगाः ॥
स चाष्टधा पृथक् द्वन्द्वसङ्घातागन्तुजः स्मृतः ॥

सिद्धसारे—

ज्वरो रोगपतिः पाप्मा मृत्युराजोऽशनान्तकः ।
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्ध्वनयनोद्भवः ॥

* * * *

प्रत्यावृत्तौ कुनिम्बाब्दामृतातिक्ताम्बुपर्पटैः ।
शुण्ठीधान्यबलापाठा सेव्याब्दैर्वा जलं पिबेत् ॥

इति ज्वरचिकित्सा ॥

* * * *

Colophon:

इति योगरत्नसमुच्चये कासहिध्माचिकित्साधिकारो दशमः ॥

End:

कटुकारोहिणीकृष्णाविलङ्गमरिचानि च ।
अक्ताङ्कुरं वेश्मम . नालीव्रणमपोहति ॥

Colophon:

इति योगरत्नसमुच्चये भगन्दरग्रन्थ्यर्बुदश्लीपदापचीनालीव्रणचिकित्साधिकारस्सप्तविंशतितमः ॥

अथातः क्षुद्ररोगेङ्ज्ञानीयं वातकफाभ्यां स्निग्धा सवर्णा मुद्गसमाननीरुजा पिलका पननिकाख्याः ।

* * * *

वातदूषितेन मणिसक्तेन चर्मणा.

R. No. 3183.

Śrītāla. 14 × $1\frac{5}{8}$ inches. Foll. 97. Lines, 10 in a page. Malayalam. Good.

Purchased in 1919–20 from M.R.Ry. Kuññuṇṇi Menon Assan, Lōcamalēśvaram village, Cranganore post, Cochin State.

Foll. 1, 34*b*, 41*b*, 69*b* and 97*b* are left blank.

युधिष्ठिरविजयव्याख्या—बालव्युत्पत्तिकारिणी.

YUDHIṢṬHIRAVIJAYAVYĀKHYĀ : BĀLAVYUTPATTIKĀRIṆĪ.

Foll. 2*a*—97*a*.

Same commentary as that described under No. 11635 of the D.C.S. MSS., Vol. XX, but with the additional stanza in the middle of the beginning.

यस्यानुजो देवमनुष्यभाषाप्रबन्धपाथोनिधिपार्विकेन्दुः ।
अश्रान्तमन्नं वितरन् प्रजाभ्यः श्रीदक्षिणामूर्तिरिति प्रतीतः ॥

Contains the Āśvāsas one to three.

Colophon :

इति भारद्वाजकुलतिलकच्छन्दोगप्रवरश्रीसुदर्शनभट्टात्मजेन आच्चियम्बा-गर्भसंभवेन मन्वादिस्मृतिमर्मज्ञरामचन्द्रभट्टानुजेन संस्कृतान्ध्रद्रमिडभाषात्रयसाहित्यधौरेयदक्षिणामूर्तिनाम्नोऽग्रजेन हस्तिगिरिभट्टशिष्येण शात्तनूरग्रमवासिना श्रीकण्ठनाथेन विरचितायां बालव्युत्पत्तिकारिण्यां युधिष्ठिरविजयव्याख्यायां प्रथम आश्वासः ॥

R. No. **3184.**

Śrītāla. 13¾ × 2 inches. Foll. 223. Lines, 11 in a page. Malayalam. Good.

Purchased in 1919-20 from M.R.Ry. Kuññuṇṇi Menon Assan, Lōcamalēśvaram village, Cranganore post, Cochin State.

Fol. 1 is left blank.

(*a*) गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.

GĪTAGŌVINDAM WITH THE COMMENTARY ŚRUTI-RAÑJAṆĪ.

Foll. 2*a*—12*b*.

Same text and commentary as that described under No. 22 of M. Seshagiri Sastri's Report No. 2.

Contains the first Sarga incomplete.

(*b*) नैषधव्याख्या—अक्षरदीपिका.

NAIṢADHAVYĀKHYĀ: AKṢARADĪPIKĀ.

Foll. 14*a*--223*a*. Foll. 13, 60*b*, 109*b*, 135*b*, 159*b* and 223*b* are left blank.

Same work as that described under R. No. 2753 ante, wherein see for the beginning.

Contains from the 56th stanza of the 6th Sarga to the end of the 11th Sarga and the 1st stanza of the 12th Sarga.

This commentary is also called Akhilarañjana and Śrīdharīya.

End :

श्रीहर्षमिति । शृङ्गारस्यैवामृतस्य शीतगौ सुधाकरे । तस्य निषधेश्वरस्य चरिते तस्य श्रीहर्षस्य काव्ये । एकादशोऽयं सर्गोऽगात् समाप्तः

यं प्रासूत वसिष्ठवंशतिलकश्श्रीकेशवार्यस्सुधीः
सावित्री च वधूरसूत विभवं विद्यानिधिं श्रीधरम् ।

तस्याशेषविशेषमन्त्रभजनावाप्तार्थरूपे महा-
व्याख्यानेऽखिलरञ्जने समगमत् सर्गोऽयमेकादशः ॥
ओंकारादिविभूषणा गुरुगुणा वाच्या सुवाक्योज्ज्वला
रम्या साधुपदक्रमाञ्चितगतिश्श्रीदेवताप्रीतिदा ।
एषा सत्पुरुषार्थसाधनपरा स्वान्ते चिरानन्ददा
श्रीहर्षोक्तिरियं परश्रुतिरहो देदीप्यते सत्प्रिया ॥
येनाधारि धरा धराधरवराधारा रिपूरः परं
धीरोदारमदारि च त्रिभुवनं चाक्रामि यद्विक्रमैः ।
राजन्ती बलिराजसंपदविचा(ख्या)हारि जन्मत्रये
यच्चक्रे स हरिर्व्यकारि तदहो श्रीसाल्वमल्लेन च ॥

Colophon:

इति श्रीधरीये नैषधव्याख्याने एकादशस्सर्गः ॥
नमो गुणवतीनाथपादाम्भोजालिमौलये ।
मुक्तिभट्टार्यगुरवे शास्त्राम्भोजालिहेलये ॥

सद्वृत्तरत्नबहुलस्सर्गः काव्यस्य भूषणमिति चिरन्तनालङ्कारमार्गमनुसर्गं-निसर्गोज्ज्वलवृत्तवर्गदुर्गमं राजचाटुलं द्वादशं सर्गं वाक्पाटवप्रदर्शनाय कविश्चकार । संप्रति व्याख्यायते । तत्र भावागतानां निराकरणस्य सूचितत्वात् भूयो नूतनतया गतानां विशिष्टानां नृपाणां निषेधमभिधातुं तदागमनं तावदाह—प्रियेति ।

* * * *

विद्याधरेणोक्तत्वात् अयमर्थोऽपि विद्वत्सन्निधिमधिगन्तुं क्षमते । अत्र शृङ्खलितं नाम वर्णानुप्रासः । यदुक्तं प्रदीपिकायां स्फुरितस्यानुस्फुरितम्

R. No. 3185.

Śrītāla. $11\frac{1}{4} \times 1\frac{5}{8}$ inches. Foll. 66. Lines, 14 in a page. Malayalam. Fair.

Purchased in 1919-20 from M.R.Ry. Kuññuṇṇi Menon Assan, Lōcamalēśvaram village, Cranganore post, Cochin State.

Foll. 55*b*, 65*b* and 66*b* are left blank.

अंशुमद्भेदः—काश्यपीयः.

AMŚUMADBHĒDAḤ: KĀŚYAPĪYAḤ.

Same work as that described under No. 13032 of the D.C.S. MSS., Vol. XXII.

Breaks off in the 63rd Patala.

R. No. **3186**.

Śrītāla. 9¼ × 1½ inches Foll. 123. Lines, 8 in a page. Malayalam. Slightly injured.

Purchased in 1919-20 from M.R.Ry. Kuññuṇṇi Menon Assan, Lōcamalēśvaram village, Cranganore post, Cochin State.

Foll. 1, 20*b*, 106*b*, 122*b* and 123 are left blank.

बालभारतम्.

BĀLABHĀRATAM.

Foll. 2*a*—120*b*.

Same work as that described under No. 11608 of the D.C.S. MSS., Vol. XX. By Agastya.

Contains the Sargas 1—19 complete.

Fol. 121 gives some pithy stanzas. Fol. 122*a* contains a few lines on medicine in Malayalam language.

R. No. **3187**.

Śrītāla. 12½ × 1⅝ inches. Foll. 155. Lines, 10 in a page. Malayalam. Slightly injured.

Purchased in 1919-20 from M.R.Ry. Kuññuṇṇi Menon Assan, Lōcamalēśvaram village, Cranganore post, Cochin State.

Foll. 1, 143*b* and 155 are left blank.

शिशुपालवधव्याख्या.

ŚIŚUPĀLAVADHAVYĀKHYĀ.

Same work as that described under R. No. 2732 ante.

The commentary is called Bālabōdhikā. By Śrīkaṇṭha, son of Śrīkaṇṭha and grandson of Śrīkaṇṭha.

Breaks off in the third Sarga.

R. No. **3188**.

Palm-leaf. 14¼ × 1¼ inches. Foll. 91. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1919-20 from M.R.Ry. A. Narasiṁhācārya, Triplicane, Madras.

तैत्तिरीयोपनिषद्वृत्तिः—मिताक्षरा.

TAITTIRĪYŌPANIṢADVṚTTIḤ: MITĀKṢARĀ.

Foll. 1*a*—90*a*. Foll. 90*b* and 91 are left blank.

Same work as that described under R. No. 17 ante. By Gōvindarāja of Kauśikagōtra.

Complete.

R. No. 3189.

Palm-leaf. $14\frac{1}{4} \times 1\frac{1}{8}$ inches. Foll. 216. Lines, 7 in a page. Grantha. Good.

Purchased in 1919-20 from M.R.Ry. A. Narasiṁhācārya, Triplicane, Madras.

Fol. 1*a* contains a few eulogistic Ślōkas. Fol. 1*b* is left blank.

(*a*) सिद्धान्तसिद्धाञ्जनम्.

SIDDHĀNTASIDDHĀÑJANAM.

Foll. 2*a*—98*a*.

Same work as that described under No. 5069 of the D.C.S. MSS., Vol. X. By Anantācārya.

Almost complete.

Foll. 98*a* and 98*b* contain some philosophical discussions.

(*b*) शास्त्रारम्भसमर्थनम्.

ŚĀSTRĀRAMBHASAMARTHANAM.

Foll. 99*a*—177*a*. Foll. 177*b* and 178 are left blank.

Same work as that described under Nos. 5048 and 5049 of the D.C.S. MSS., Vol. X. By Anantācārya.

Complete.

(*c*) आकाशाधिकरणविचारः.

ĀKĀŚĀDHIKARAṆAVICĀRAḤ.

Foll. 179*a*—215*b*. Fol. 216 is left blank.

Same work as that described under R. No. 54 ante. By Anantārya.

Complete.

R. No. 3190.

Śrītāla. $11\frac{1}{2} \times 1\frac{5}{8}$ inches. Foll. 39. Lines, 7 in a page. Grantha. Good.

Purchased in 1919-20 from M. R. Ry. A. Narasiṁhācārya, Triplicane, Madras.

नक्षत्रमालिका.

NAKṢATRAMĀLIKĀ.

Foll. 1*a*—28*b*. Foll. 11*b* and 29 to 39 are left blank.

Same work as that described under No. 4322 of the D.C.S. MSS., Vol. VIII. By Kuricci Raṅganāthācārya.

Contains from Puṣyanakṣatra to the end.

Beginning:

केचिदित्यादिमते अनुमितिकारणीभूताभावप्रतियोगित्वस्यैव लक्षणत्वसंभवात् तत्प्रकार(क)यथार्थज्ञानविषयत्वविशेषणं व्यर्थमिति कथं तस्य लक्षणत्वमित्याशङ्कितमिति चेत् यथा सन्निवेशे न वैयर्थ्यमित्याशयेन तथोक्तेः ।

* * * *

Colophon:

इति पुष्यनक्षत्रमुक्तम् ॥

End:

आधेयता तु स्ववृत्तिधर्मावच्छिन्ने विषयतान्तर्गतविषयतावछिन्नाधेयतानिरूपितत्वसम्बन्धेन

* * * *

स्वविशिष्टनिश्चयत्वसम्बन्धेन प्रतिबध्यतावृत्तित्वं व्यापकतासम्बन्धेन इत्यवधेयम् ॥

Colophon:

एवं विशिष्ट . . . . ।
सरणी दर्शिता रङ्गनाथेन सुधियां मुदे ॥

R. No. **3191.**

Palm-leaf. 16 × 1⅓ inches. Foll. 61. Lines, 10 in a page. Grantha. Good.

Purchased in 1919–20 from M.R.Ry. A. Narasiṁhācārya, Triplicane, Madras.

(*a*) सामान्यनिरुक्तिक्रोडपत्रम्.

SĀMĀNYANIRUKTIKRŌḌAPATRAM.

Foll. 1*a*—20*b*.

Same work as that described under No. 4321 of the D.C.S. MSS., Vol VIII, wherein see for the beginning. By Śaṅkarabhaṭṭa.

End:

तादृशविशिष्टद्वयाविषयकप्रतीतिविषयतानवच्छेदकं यद्यत्स्वं तदन्यत्वस्य विवक्षितत्वात् । उक्तसम्बन्धज्ञानप्रतिबन्धक(ता) न तादृशसाध्याभावरूपविशिष्टविषयकत्वव्यापिकेत्याहुः ॥

Colophon:

इति सामान्यनिरुक्तौ भट्टिवादार्थस्समाप्तः ॥

(*b*) नव्यमतवादार्थः.

NAVYAMATAVĀDĀRTHAḤ.

Foll. 22*a*—27*b*. Foll. 20*b* and 21 contain the Sāmānyaniruktidīdhitiviṣaya.

Same work as that described under R. No. 18(*a*) ante.

Wants the beginning ; otherwise complete.

(*c*) ज्ञानद्वयकारणताविचारः.

JÑĀNADVAYAKĀRAṆATĀVICĀRAḤ.

Foll. 28*a*—33*b*.

Same work as that described under R. No. 792(*b*) ante.

(*d*) सामान्यनिरुक्तिपत्रम्.

SĀMĀNYANIRUKTIPATRAM.

Foll. 34*a*—52*b*.

Similar to the work described under No. 4323 of the D.C.S. MSS., Vol. VIII.

Beginning :

प्रकृतानुमितिप्रतिबन्धकतानिरूपितस्वरूपसंबन्धरूपावच्छेदकत्ववत् यद्रूपावच्छिन्नविषयत्वं प्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नत्वमित्युक्तौ यदेकत्र द्वयमिति रीत्या ज्ञानं यच्च वह्न्यभावधर्मितावच्छेदक(क)ह्रदत्वप्रकारकज्ञानं तदादाय नासंभवः ।

End :

अत्रवदन्तिकल्पे एतेनेत्यादिना एतत्कल्पो(ल्प उ)पन्यस्तो भट्टाचार्येण । अत्र कल्पे प्रतिबध्यतायामनुमितित्वानाहार्यत्वाद्यवच्छिन्नत्वकथनमुभयथापि तादृशावगाहित्वावच्छिन्नत्वमक्षतमेव (इति) दर्शयितुं स्वरूपकीर्तनमात्रम् ॥

(*e*) चन्द्रनारायणीयम्.

CANDRANĀRĀYAṆĪYAM.

Foll. 53*a*—55*a*. Fol. 55*b* is left blank.

Same work as that described under No. 4241 of the D.C.S. MSS., Vol. VIII.

Contains the Atravadantikalpa only.

Foll. 56*a*—58*a* and 59 contain the Sāmānyaniruktiviṣaya. fol. 60*b* contains some letter written by a Śrī-Vaiṣṇava. Foll. 58*b*, 60*a* and 61 are left blank.

R. No. **3192.**

Palm-leaf. 15½ × 1⅜ inches. Foll. 190. Lines, 9 in a page. Grantha and Tamil. Fair.

Purchased in 1919–20 from M.R Ry. A. Narasiṁhācārya, Triplicane, Madras.

Foll. 1—3 are left blank.

(*a*) திருவாய்மொழி.

TIRUVĀYMOḺI.

Foll. 4*a*—24*b*.

See the Tamil part of this Triennial Catalogue.

Contains the first Pattu.

(*b*) तैत्तिरीयोपनिषद्भाष्यम्.

TAITTIRĪYŌPANIṢADBHĀṢYAM.

Foll. 25*a*—180*a*. Foll. 81 to 85, 152*a* and 175 are left blank.

A commentary on the Taittirīyōpaniṣad, which work has been described under Nos. 486—504 of the D.C.S. MSS., Vol. I, Part III: by Kūranārāyaṇamuni. This work is printed in Vol. XXIV of the Śāstra-Muktāvalī series, Conjeeveram.

Complete.

Beginning:

यस्य ह्यानन्दपर्यन्ता युवत्वप्रमुखा गुणाः ।
अप्रमेयतयाम्नातास्तं श्रीशं संश्रयेमहि ॥
सांहितीष्वपि सन्धाता सर्वेशः प्रतिपाद्यते ।
वरिता वरणीयो वा वरुणो वारुणीष्वपि ॥

इह खलु संसारावर्तपरिश्रान्तमानसैस्तदुत्तर(ण)प्रकारबुभुत्सुभिस्सर्वैश्चेतनैस्सर्वपुरुषार्थसार्थवाहका नित्यनिर्दोषा वेदास्तावत्समाश्रयणीयाः । तत्रापि मुमुक्षुभिः त्रय्यन्तस्संसेव्यः । तत्रापि तैत्तिरीयारण्यकमध्यपातिन्यस्सांहित्यो वारुण्यो याज्ञिक्यस्संसारिणां शरणम् ॥

* * * *

Colophon:

इति नारायणदासीये तैत्तिरीयोपनिषद्भाष्ये सांहितीषूपनिषत्सु प्रथमोऽनुवाकः ॥

End:

सर्वोऽपि विद्वान् सूर्याचन्द्रमसोर्महिमानमभिजयति । तस्मादेव हेतोर्ब्रह्मणो महिमानं प्राप्नोतीत्युपनिषदिति गतम् ॥

इति चतुष्षष्टितमोऽनुवाकः ॥

Colophon:

इति नारायणदासीये तैत्तिरीयोपनिषद्भाष्ये याज्ञिक्य उपनिषदस्समाप्ताः ॥
तैत्तिरीयोपनिषद्भाष्यं समाप्तम् ॥

(c) ईशावास्योपनिषद्भाष्यम्.

ĪŚĀVĀSYŌPANIṢADBHĀṢYAM.

Foll. 180a—188b Foll. 189 and 190 are left blank.

Same work as that described under No. 319 of the D.C.S. MSS., Vol. I, Part III. By Vēdāntadēśika.

Incomplete.

R. No. 3193.

Palm-leaf. $17\frac{7}{8} \times 1\frac{1}{8}$ inches. Foll. 139. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1919-20 from M.R.Ry. A. Narasiṁhācārya, Triplicane, Madras.

Foll. 138 and 139 are left blank.

रसमञ्जरीव्याख्या—आमोदः.

RASAMAÑJARĪVYĀKHYĀ: ĀMŌDAḤ.

Same work as that described under R. No. 802 ante and No. 12941 of the D.C.S. MSS., Vol. XXII, but with additional stanzas as given below.

Complete.

सम्पूर्णा चेयं व्याख्या ॥

गुरुजालपादसरसीजपूजनाद्गुरुजालभूतकवितामनोहरः ।
गुरुजालकाकृतियशःप्रकाशितो गुरुजालशायिकविरेष राजते ॥
आमोदो रसमञ्जरीगतलसत्स्वारस्यसन्धुक्षकः
विद्वद्भृङ्गमनोविकासकरणाद्विद्योतमानो भृशम् ।
स्वीयान्यापुरकामिनीप्रमुखसत्कान्तास्वभावादिका-
दर्शोदा . . लसत्परिमलच्छेदो मुदापादितः ॥

R. No. 3194.

Palm-leaf. $17\frac{1}{8} \times 1\frac{1}{2}$ inches. Foll. 102. Lines, 11 in a page. Grantha. Good.

Purchased in 1919-20 from M.R.Ry. A. Narasiṁhācārya, Triplicane, Madras.

Foll. 1 and 2 are left blank.

(*a*) वेदार्थसङ्ग्रहः.

VĒDĀRTHASAṄGRAHAḤ.

Foll. 3*a*—29*b*.

Same work as that described under No. 5029 of the D.C.S. MSS., Vol. X, but with additional stanzas as given below.

Complete.

रामायणोक्तिनिरतं रामाद्रिगुरुतोषकम् ।
रामानुरागरहितं रामानुजमुनिं भजे ॥
मायोपाधिविकारवादिकुमतिस्वोत्प्रेक्षितार्थान् क्षिपन्
क्षिप्रं वेङ्कटशैलनाथपुरतः प्राचीकशद्यस्सुधीः ।
सद्विद्याविवृतिस्वरूपमनघं गम्भीरवाक्योज्ज्वलं
वेदार्थस्य च सङ्ग्रहं गुणनिधिं वन्दे यतीन्द्रं गुरुम् ॥

(*b*) वेदार्थसङ्ग्रहव्याख्या—तात्पर्यदीपिका.

VĒDĀRTHASAṄGRAHAVYĀKHYĀ: TĀTPARYADĪPIKĀ.

Foll. 30*a*—97*b*.

Same work as that described under No. 5033 of the D.C.S. MSS., Vol. X, but with the additional stanzas as given below.

Complete.

शरणागतरक्षित्री गुरुस्नेहदशां श्रिता ।
सुदर्शनोद्भवा भाति स्थिरा तात्पर्यदीपिका ॥
बाह्यान्तरतमोहन्त्री बाह्यवात्याविचालिनी ।
अनन्यगोप्रतिहता द्योतते भावदीपिका ॥

(*c*) திருவாய்மொழி.

TIRUVĀYMOḺI.

Foll. 98*a*—101*b*. Fol. 102 is left blank.

See the Tamil part of this Triennial Catalogue.

R. No. **3195.**

Palm-leaf. 17 × 1¼ and 10¾ × 1⅜ inches. Foll. 60. Lines, 8 in a page. Grantha and Telugu. Slightly injured.

Purchased in 1919–20 from M.R.Ry. A. Narasiṁhācārya, Triplicane, Madras.

Foll. 1 to 3 are left blank.

(*a*) मुकुन्दमाला.

MUKUNDAMĀLĀ.

Foll. 4*a*—6*b*.

Same work as that described under R. No. 174(*d*) ante.

Complete.

(*b*) कस्तूरीतिलकस्तवः.

KASTŪRĪTILAKASTAVAḤ.

Foll. 7*b*—9*b*.

Same work as that described under No. 9877 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*c*) यतिराजसप्ततिः.

YATIRĀJASAPTATIḤ.

Foll. 10*a*—13*a*.

Same work as that described under No. 9678 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*d*) यथोक्तकारिस्तोत्रम्.

YATHŌKTAKĀRISTŌTRAM.

Fol. 13*b*.

Same work as that described under No. 10212 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*e*) अध्यात्मचिन्ता.

ADHYĀTMACINTĀ.

Foll. 13*b*—17*b*.

Same work as that described under No. 4864 of the D.C.S. MSS., Vol. X.

Complete.

(*f*) श्रीस्तुतिः.

ŚRĪSTUTIḤ.

Foll. 17*b*—19*a*

Same work as that described under No. 9776 of the D.C.S. MSS., Vol. XVIII.

Complete.

(g) गरुडपञ्चाशत्.

GARUḌAPAÑCĀŚAT.

Foll. 19*a*—23*a*.

Same work as that described under No. 9394 of the D.C.S. MSS., Vol. XVIII.

Complete.

Foll. 23*a*—24*b* contain Mahānārāyaṇōpaniṣad, Varāhōpaniṣad and Dvayōpaniṣad.

(h) यदुगिरिनारायणस्तवः.

YADUGIRINĀRĀYAṆASTAVAḤ.

Foll. 25*a*—26*a*.

A eulogy addressed to God Nārāyaṇa as worshipped in the sacred hill called Yadugiri at Mēlukōṭe, Mysore State.

Complete.

Beginning:

श्रियः पत्युश्शीर्षे यदुशिखरिनाथस्य कलये
समस्तस्वामित्वप्रकटनकिरीटोत्तमयुतम् ।
अनन्यार्हं यद्धि प्रकटयति नारायण इति
प्रशस्ता तस्याख्या प्रकटिततदैश्वर्यविभवा ॥

End:

शिरोमुख्यैरङ्गैः पदकमलपर्यन्तमधुरैः
समेतां श्रीमूर्तिं यदुगिरिपतेस्साध्वनुभवन् ।
सतां प्रीत्यै श्रीमत्कुशिककुलशुद्धार्यतनयो
वरान् श्लोकान रामानुजगुरुरुव(ा)चार्यवचनात् ॥

Colophon:

यदुगिरिनारायणस्य विग्रहानुभवस्तोत्रं संपूर्णम् ॥

(i) वेङ्कटेशसेवाक्रमः.

VĒṄKAṬĒŚASĒVĀKRAMAḤ.

Foll. 26*b*—30*a*.

Same work as that described under No. 10387 of the D.C.S. MSS., Vol. XVIII.

Complete.

Foll. 30*a*—31*a* contain Vēṅkaṭēśaprātassmaraṇīyastōtra.

(*i*) अथर्वशिखाविलाससङ्ग्रहस्तुतिः.
ATHARVAŚIKHĀVILĀSASAṄGRAHASTUTIḤ.

Foll. 31*a*—37*b*.

By Rāmānujācārya, son of Śuddhasattvaguru of Viśvāmitra family.

Deals with the following Paddhatis :—

१. भगवद्ध्येयत्वसमर्थनम्.
२. प्रणवकरणताविधानसमर्थनम्.
३. प्रणवप्रतिपाद्यतासमर्थनम्.
४. भगवतः परब्रह्मत्वसमर्थनम्.
५. भगवतः परब्रह्मत्वसमर्थनम्.
६. Do.
७. नारायणस्य भगवत्परत्वसमर्थनम्.
८. अष्टर्चस्य भगवत्परत्वसमर्थनम्.

Contains the first Śataka only.

Beginning:

विस्तारनः कृतमथर्वशिखाविलासं हस्तागतं कलयितुं स्तुतिमातनिष्ये ।
स्रस्तान्प्रमाणनयतश्शिवपक्षनिष्ठान् त्रस्तान् विधातुमपि सन्नयपुष्टिजुष्टान् ॥

* * * *

Colophon:

इति श्रीमदथर्वशिखाविलाससङ्ग्रहस्तुतौ द्वितीयादिप्रश्नत्रयेण भगवद्ध्येयत्वसमर्थनपद्धतिः प्रथमा ॥

End:

शतोद्वलितविंशतिश्रुतियुगत्र विष्णुर्यतः
स जैमिनिरगाद्बलं चरमलक्षणे भूयसाम् ।
निरीतिकबहूद्बलोपनिषदैककण्ठ्यं च नः
यतिक्षितिपतिः क्षिपेन्निजनयैस्स शैवान्नवान् ॥

अमेयपरमेव किंपदमनादिसंज्ञा हरे-
र्विधेस्तु न (तथा)ततो न हि घटेत कस्मा इति ।
श्रुतिस्मृतिनिघण्टुभिः कपदमात्मभूवाचकं
यतिक्षितिपतिः क्षिपेन्निजनयैस्स शैवान्नवान् ॥

Colophon:

इति श्रीमदथर्वशिखाविलाससङ्ग्रहस्तुतौ अष्टर्चस्य भगवत्परत्वसमर्थनपद्धतिरष्टमी ।

इति श्रीमत्कुशिककुलतिलकश्रीशुद्धसत्त्वगुरुचरणतनुजरत्नस्य तत्प्रसाद-लब्धसकलविद्यावैशि(श)द्यस्य रामानुजदासस्य कृतिषु श्रीमदथर्वशिखा-विलाससङ्गहस्तुतिसहस्रे प्रथमशतकं संपूर्णम् ॥

(*k*) ऋद्धिस्तवः.

ṚDDHISTAVAḤ.

Fol. 38.

Same work as that described under No. 9873 of the D.C.S. MSS., Vol. XVIII, but with the additional stanzas given below.

Complete.

पन्नगाधीशपर्यङ्के रमाहस्तोपधानके ।
सुखं शेष्व वृषाद्रीश सुदर्शनसुरक्षितः ॥
शङ्खचक्रगदामुख्या दिव्यायुधगणास्सदा ।
श्रीशरक्षाविधानाय शक्त्या जागृत जागृत ॥

Fol. 38*b* gives the Raṅganāthastōtra.

(*l*) रामचन्द्रदिनचर्यावैभवम्.

RĀMACANDRADINACARYĀVAIBHAVAM.

Foll. 39*a*—40*a*.

Describes the greatness of the daily duties of Rāma.

Complete, as found in the eighth Adhyāya of the Pādmapurāṇa.

Beginning:

वैदेहीमधिरोप्य जातपुलकां वामाङ्कमाश्लेषिणीं
वामेन स्तनचूचुकं पुलकिना वामं करेण स्पृशन् ।
तत्त्वं दक्षिणपाणिना कलितया धीमुद्रया बोधयन्
रामो मारुतिसेवितः स्फुरतु मे साम्राज्यसिंहासने ॥
अथ रामस्तु वैदेह्या राजभोगान्मनोरमान् ।
बुभुज सानुजो नित्यं मन्त्रिभिश्चारुलोचनः ॥

End:

एवं प्रशासतो भूमिं राघवस्य महापुरि ।
अत्ययाद्वर्षसाहस्रं रममाणस्य सीतया ॥

Colophon :

इति श्रीमत्पाद्मपुराणेोमामहेश्वरसंवादे श्रीरामचन्द्रदिनचर्यावैभवं नाम अष्टमोऽध्यायः ॥

(*m*) रामायणसारसङ्ग्रहः.

RĀMĀYAṆASĀRASAṄGRAHAḤ.

Foll. 40*a*—41*b*.

Similar to the work described under No. 1904 of the D.C.S. MSS., Vol. IV, Part I.

Beginning :

श्रीरामचन्द्रस्य द्वादशे वर्षे विवाहः । अयोध्यायां द्वादशसंवत्सरवासः, श्रीरामचन्द्रस्य पञ्चविंशे वर्षे देव्याः अष्टादशे वर्षे वनवासयानम् । मुनीनामाश्रमेषु दश वर्षाः ।

End :

रामचन्द्रस्य एकोनचत्वारिंशे सीतायास्त्रयस्त्रिंशे वर्षे चैत्रशुक्लसप्तम्यां पुष्यनक्षत्रे श्रीरामचन्द्रस्य पट्टाभिषेकः ॥

(*n*) वेङ्कटेशस्तोत्रम्.

VĒṄKAṬĒŚASTŌTRAM.

Foll. 41*b*—42*b*.

Similar to the work described under No. 10389 of the D.C.S. MSS., Vol. XVIII. By Varadācārya, son of Vēṅkaṭēśa of Kauśikagōtra.

Complete.

Beginning :

कौशिकश्रीनिवासार्यतनयं विनयोज्ज्वलम् ।
वात्सल्यादिगुणावासं वन्दे वरददेशिकम् ॥

* * * *

श्रीमच्छेषमहीधरेशचरणौ प्राप्यौ च यौ प्रापका-
वस्मद्देशिकपुङ्गवैः करुणया सन्दर्शितौ तावकौ ।
प्रोक्तौ वाक्ययुगेन भूरिगुणकावार्यैश्च पूर्वैर्मुहुः
श्रेयोभिश्शठवैरिमुख्यमुनिभिस्तौ संश्रितौ संश्रये ॥

End :

श्रीमत्कौशिकवंशवारिधिविधोश्श्रीवेङ्कटेशाख्यया
विख्यातस्य गुरोर्विशुद्धमनसो विद्यानिधेस्सूनुना ।

भक्त्यैतां वरदाभिधेन भणितां श्रीवेङ्कटेशस्तुतिं
भव्यां यस्तु पठेदमुष्य वितरेच्छ्रेयः परं श्रीसखः ॥

(*o*) दशावतारस्तोत्रम्.

DAŚĀVATĀRASTŌTRAM.

Foll. 43*a* and 43*b*.

Similar to the work described under No. 10013 of the D.C.S. MSS., Vol. XVIII. By Agastya.

Complete.

Beginning :

श्रीहरेर्वाक्यमाकर्ण्य कुम्भयोनिः प्रणम्य तम् ।
बद्धाञ्जलिपुटो भूत्वा स्तोत्रयामास केशवम् ॥

* * * *

श्रीकेशवाद्य पुरुषोत्तम पूर्णकाम मत्स्यावतार निगमोद्धर भो मुरारे ।
लोकेशसन्नुत हयास्य जगन्निवास नारायणाखिलगुरो भगवन्नमस्ते ॥

End :

अगस्त्येन कृतं स्तोत्रं पठत्यनुदिनं नरः ।
स सर्वपापनिर्मुक्तो ब्रह्मलोके महीयते ॥

Fol. 43*b* gives two stanzas of Bhagavadrāmānujaviṣaya.

(*p*) अञ्जनशैलनाथस्तोत्रम्.

AÑJANAŚAILANĀTHASTŌTRAM.

Foll. 43*b*—44*a*.

Same work as that described under No. 9819 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*q*) वेङ्कटेशाष्टोत्तरशतनामस्तोत्रम्.

VĒṄKAṬĒŚĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 44*a*—45*a*.

Same work as that described under Nos. 9084 and 9085 of the D.C.S. MSS., Vol. XVII.

Complete.

(r) वेङ्कटेशाष्टोत्तरशतनामावलिः.

VĒṄKAṬĒŚĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 45*a*—46*b*.

Same work as that described under No. 9088 of the D.C.S. MSS., Vol. XVII.

Complete.

(s) वेङ्कटेशमहिषीमहालक्ष्मीचतुर्विंशतिनामस्तोत्रम्.

VĒṄKAṬĒŚAMAHIṢĪMAHĀLAKṢMĪCATURVIṀŚATI-NĀMASTŌTRAM.

Fol. 46*b*.

A eulogy containing the 24 names of Goddess Mahālakṣmī, the queen of Lord Vēṅkaṭēśa.

Complete.

Beginning:

नमः श्रियै लोकधात्र्यै ब्रह्ममात्रे नमो नमः ।
नमस्ते पद्मनेत्रायै पद्ममुख्यै नमो नमः ॥
प्रसन्नमुखपद्मायै पद्मकान्त्यै नमो नमः ।
नमो बिल्ववनस्थायै विष्णुपत्न्यै नमो नमः ॥

End:

ऋग्यजुस्सामरूपायै विद्यायै ते नमो नमः ॥
प्रसीदास्मान् कृपादृष्टिपातैरालोकयाब्धिजे ।
[1]ये स्थानहीनाः स्वस्थानात् श्रुत्वा स्वस्थानमाप्नुयुः ॥

(t) वेङ्कटेशमहिषीमहालक्ष्मीचतुर्विंशतिनामावलिः.

VĒṄKAṬĒŚAMAHIṢĪMAHĀLAKṢMĪCATURVIṀŚATI-NĀMĀVALIḤ.

Foll. 46*b*—47*a*.

Similar to the work described under subdivision(*s*) above.

Complete.

Beginning:

श्रीवेङ्कटेशमहिषीमहालक्ष्मीप्रीत्यर्थं श्रीवेङ्कटेशमहिषीमहालक्ष्मीचतुर्विंशतिनामभिः श्रीवेङ्कटेशमहिषीमहालक्ष्म्यर्चनं करिष्ये । अस्य श्रीमहालक्ष्मीचतुर्विंशतिनाममन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीर्देवता ।

---

[1] दृष्ट्वा नरा ये ब्रह्मत्वशिवत्वेन्द्रत्वमाप्नुयुः—इति पाठान्तरम्.

* * * *

ओं श्रियै नमः, ओं लोकधात्र्यै श्रियै नमः, ओं जगन्मात्रे श्रियै नमः, ओं पद्मनेत्रायै श्रियै नमः ।

End :

ओमृग्यजुस्सामरूपायै श्रियै नमः । एवं चतुर्विंशतिनामभिः बिल्वपत्रैर्लक्ष्म्यर्चनं कुर्यात् । सर्वाभीष्टसिद्धिर्भवति ॥

Fol. 47*a* contains the Mantrōddhāra.

(*u*) यदुगिरिनारायणाष्टोत्तरशतनामस्तोत्रम्.

YADUGIRINĀRĀYAṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 47*b*—48*a*.

Similar to the work described under No. 8960 of the D.C.S. MSS., Vol. XVII.

Complete.

Beginning :

श्रुत्वा तु सकलान् धर्मान् प्रह्लादो मुनिपुङ्गवात् ।
पुनः पप्रच्छ हृष्टात्मा तमृषिं दीप्ततेजसम् ॥
श्रोतुमिच्छाम्यहं योगिन् यदुशैलनिवासिनः ।
नाम्नां श्रेष्ठतमं विष्णोर्भगवन् वक्तुमर्हसि ॥

नारदः—

कदाचिद्भगवान् ब्रह्मा यदुशैलदिदृक्षया ।
सम्प्राप्तस्सरसस्तीरं कल्याणस्य महात्मनः ॥

* * * *

श्रीमान् यदुगिरीशश्च यादवान्वयनायकः ।
यज्ञभोक्ता यज्ञकर्ता यज्ञरूपो यदूद्वहः ॥

End :

शङ्खचक्रगदापाणिः दिव्यभूषणभूषितः ।
एवं यदुगिरीशस्य स्तवो ह्यतिमनोहरः ॥

* * * *

एतत्सर्वं स भगवान् प्रह्लादाय महामुनिः ।
उक्त्वा तु नारदः प्रीत्या ययौ यत्र स माधवः ॥

Colophon:

इति ब्रह्माण्डपुराणे क्षेत्रकाण्डे प्रह्लादनारदसंवादे श्रीयदुगिरिनारायणाष्टोत्तरशतस्तोत्रं नाम चतुरशीतितमोऽध्यायः ॥

(*v*) रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 48*a*—50*a*.

Similar to the work described under No. 8973 of the D.C.S. MSS., Vol. XVII.

Complete.

Beginning:

एवमुक्ता तु सा देवी पतिना शूलपाणिना ।
प्रणिपत्य महात्मानमुवाच प्राञ्जलिस्तदा ॥

* * * *

श्रीरामो रामचन्द्र(श्च) रामभद्रश्च शाश्वतः ।
राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः ॥

End:

इति श्रीरामचन्द्रस्य नाम्नामष्टोत्तरं शतम् ।
गुह्याद्गुह्यतमं देवि तव प्रीत्या प्रकीर्तितम् ॥

* * * *

तस्मादिक्ष्वाकुपूज्येन नराणामपि पार्थिव ।
एष जातोऽपि भगवान् रामो राजीवलोचनः ॥

Colophon:

इति श्रीपाद्मपुराणे उत्तरखण्डे वसिष्ठदिलीपसंवादे एकोनषष्टितमोऽध्यायः ॥

(*w*) हयग्रीवोपनिषद्.

HAYAGRĪVŌPANIṢAD.

Foll. 50*b*—51*a*. Foll. 51*b*—56*b* are left blank.

Same work as that described under No. 851 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*x*) वरवरमुनिदण्डकम्

VARAVARAMUNIDAṆḌAKAM.

Foll. 57*a*—59*a*.

A eulogy in Daṇḍaka metre, addressed to the great sage Varavara-muni or Maṇavāḷamāmuni, also called Ramyajāmātṛmuni.

Complete.

Beginning:

रम्यजामातृयोग्यङ्घ्रिकमलभ्रमरायताम् ।
भावना विषयारण्ययाव(त)नायासिताद्य मे ॥

अखिलभुवननायक . . . . . लोके मणीमण्डिते मण्टपे कुण्डलीक्ष्मापतौ दिव्यपर्यङ्कात्मानुरूपश्रिया साकमासीनः

* * * *

श्रीरसज्ञावदीशानदासाग्रजातात् पितुः प्रादुरासीन्मुदा रम्यजामातृसूरिः ।

End:

स्वपादाश्रितैरष्टभिर्दिग्गजैर्दर्शनं निर्वहन्नात्मपादाश्रयायागतं सानुजं मित्रतातं कृतार्थं विधायान्वशात् यादवक्ष्माधरे वस्तुमेवं मुनिः पूरयामास वैकुण्ठनाथेप्सितम् ॥

प्रपन्नहृदि सद्वृत्तहारनायकमणिभिर्गणैः (?) ।
जनकैर्हरतु स्फीतो रम्यजामातृदण्डकः ॥

Foll. 59*b*—60*a* contain the Lōkācāryastōtra. Fol. 60*b* is left blank.

R. No. 3196.

Palm-leaf. 8 × 1¼ inches. Foll. 67. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1919–20 from M.R.Ry. A. Narasiṁhācarya of Triplicane, Madras.

(*a*) इतिहासोपनिषद्.

ITIHĀSŌPANIṢAD.

Foll. 1*a* – 19*b*.

Same work as that described under No. 298 of the D.C.S. MSS., Vol. I, Part III.

Wants the first leaf in the beginning; otherwise complete.

Foll. 20 and 21 are left blank. Fol. 22 contains some Dharma-śāstravacanas.

(b) यतिनित्यानुष्ठानविधिः.

YATINITYĀNUṢṬHĀNAVIDHIḤ.

Foll. 23a—28a.

On the daily duties to be observed by a Sannyāsin from the time he gets up from his bed in the morning till he goes to the bed at night.

Complete.

Beginning:

नित्यकर्मविधिरुच्यते—

शयनादुत्थाय उत्तिष्ठ ब्रह्मणस्पते । देवयन्तस्त्वेमहे । उपप्रयन्तु मरुतस्सुदानवः । इन्द्रप्राशूर्भवा सचा इति जपेत् ।

* * * *

तीर्थं गत्वा शुचौ देशे विष्णोस्थानमसीति मन्त्रेण त्रिदण्डं संस्थाप्य बहिर्भूमिं गत्वा । ततश्शौचक्रमः ।

* * * *

अनन्तरं कृताञ्जलिपुटस्सन् । ओं भूं तर्पयामि, ओं भुवं तर्पयामि, ओं सुवं तर्पयामि, ओं भूर्भुवस्सुवर्महर्न्नमस्तर्पयामि । इति चतुर्मन्त्रैः देवतीर्थेन तर्पयेत् ।

End:

ततश्शयनकाले—

वासुदेव प्रसुप्तोऽस्मि यावन्नोदयते रविः ।
अहं तावन्निवत्स्यामि सर्वभूतहिताय वै ॥

इत्युक्त्वा स्वपेत् ।

Colophon:

सन्यासिनित्यानुष्ठानविधिस्समाप्तः ॥

(c) चातुर्मास्यविधिः.

CĀTURMĀSYAVIDHIḤ.

Foll. 28b—32b.

Same work as that described under No. 2937 of the D.C.S. MSS., Vol. V, but with the additional portion given below :—

ततः परमिदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम् । समूढमस्य पांसुरे ।

* * * *

रक्षा च नो अधि च देव ब्रूहि । इति मन्त्रान् पठन् प्रागुदग्वा गच्छेत् । अवस्थितश्चेत् प्राजापत्यव्रतं चरेत् ॥

(*d*) यतिसंस्कारप्रयोगः.

YATISAṀSKĀRAPRAYŌGAḤ.

Foll. 33*a*—35*b*.

Similar to the work described under No. 3765 of the D.C.S. MSS., Vol. VII.

Complete.

Beginning:

संहितोक्तप्रकारेण यतीन्द्राणां महात्मनाम् ।
प्रथमेऽहनि कैङ्कर्यमारभ्यान्त्यं निरूप्यते ॥

पुत्रो वा शिष्यो वा अन्यो वा स्नात्वा जागरूकस्तिष्ठेत् । ततः कतिचित् श्रीवैष्णवाः मज्जनघटानादाय

* * * *

मठद्वारं प्राप्य प्रबन्धं परिसमाप्य भगवत्प्रेषितं तदुपभुक्तशेषं दिव्यमाल्यवस्त्रादिकं प्रतिगृह्य तेन यतिं सम्यगलङ्कृत्य ।

End:

वाहनादिकं कुर्वतां सर्वेषां पदे पदे अश्वमेधफलं भवेत् । इत्याह भगवान् बोधायनः ॥

Colophon:

इति यतिसंस्कारविधिः ॥

(*e*) यत्येकोद्दिष्टविधिः.

YATYĒKŌDDIṢṬAVIDHIḤ.

Foll. 35*b*—38*a*.

On the rules of procedure for the ceremony to be performed on the 11th day after death of Yatis or Hindu ascetics.

Complete.

Beginning:

एकादशेऽह्नि सम्प्राप्ते यस्य नोत्सृज्यते वृषः ।
पिशाचत्वं स्थिरं तस्य दत्तैश्श्राद्धशतैरपि ॥

चेति वृषोत्सर्जनात्तदभावे अहन्येकादशे प्राप्ते पार्वणं तु विधीयते । सर्वत्र नारायणोद्देश एकोद्दिष्टवदाचरेदिति स्मरणात् एकोद्दिष्टकल्पं पार्वणमेकादशेऽह्नि कुर्यात् ।

* * * *

अमुष्य यतेर्नारायणस्यैकादशेऽहनि पार्वणश्राद्धं करिष्ये इति सङ्कल्प्य ।

End:

एतत्ते असौ यते आत्मनारायणान्तरात्मनारायणपरमात्मनारायणाय इति क्रमात् पि(ण्ड)त्रयं दत्वा तेष्वपि पिण्डेषु अपो निनीय तान् भोजिष्टि(?) विप्रेभ्यः अप्सु वा दत्वा पुण्याहं वाचयित्वा इष्टैस्सह भुञ्जीत । सन्तिष्ठते पार्वणश्राद्धं द्वितीयः खण्डः ॥

Colophon:

एकोद्दिष्टविधिस्समाप्तः ॥

(*f*) नारायणबलिः.

NĀRĀYAṆABALIḤ.

Foll. 38*a*—40*b*.

Similar to the work described under No. 3655 of the D.C.S. MSS., Vol. VII; but this is intended for Yatis or Hindu ascetics. By Śaunaka.

Complete.

Beginning:

अथ शौनकीयो नारायणबलिः—

द्वादशेऽह्नि तदसम्भवे द्वादश्यां श्रवणनक्षत्रे वा गृहस्थान् यतीन् वा द्वादश[ना]हूय तैरभ्यनुज्ञातः अमुष्य यतेर्नारायणबलिं करिष्य इति सङ्कल्प्य पुण्याहं वाचयित्वा प्राङ्मुखानुदङ्मुखानासनेषूपवेश्यामुष्य यतेर्नारायणबलौ केशवार्थे भवता क्षणः कर्तव्य इति वृत्वा ।

End:

यतीनां चैव योगिनामन्येषां मोक्षकाङ्क्षिणाम् ।
पुण्यपापक्षयार्थाय द्वादशेऽहनि कारयेत् ॥

Colophon:

इति शौनकीयस्तृतीयः खण्डः ।

नारायणबलिस्समाप्तः ॥

(*g*) यतिधर्मसमुच्चयः.

YATIDHARMASAMUCCAYAḤ.

Foll. 41*a*—44*b*.

Same work as that described under Nos. 2949 and 2950 of the D.C.S. MSS., Vol. V.

Contains the eighth Parvan complete and the ninth incomplete.

Foll. 45*a*—46*a* contain the Jīvacchrāddhaprayōga.

(*h*) सन्न्यासविधिप्रयोगः.

SANNYĀSAVIDHIPRAYŌGAḤ.

Foll. 46*a*—50*a*.

Similar to the work described under No. 3841 of the D.C.S. MSS., Vol. VII, but with slight difference in the beginning.

Complete.

Beginning:

अथ सन्न्यासप्रयोगः—

यथोक्तकारिणं भिक्षुं भगवन्तं वा गुरुत्वेन नत्वा स्वीकृत्य सङ्कल्पते । ओं सन्न्यासाश्रममाश्रयिष्यामीति सङ्कल्प्य तदङ्गं पुण्याहं कृत्वा केशश्मश्रुनखलोमानि वापयित्वा ।

See under the work described under No. 3841 for the end.

Foll. 50*a* and 51*a* contain the Kramasannyāsaprayōga. Fol. 51*b* is left blank.

(*i*) यतिसंस्कारविधिः.

YATISAṀSKĀRAVIDHIḤ.

Foll. 52*a*—55*b*.

Similar to the work described under No. 14213 of the supplemental D.C.S. MSS.

Complete.

Beginning:

सर्वसङ्गनिवृत्तस्य ज्ञानयोगरतस्य च ।
नैतस्य दहनं कार्यं नाशौचं नोदकक्रिया ॥
शुचौ देशेऽथ गायत्र्या देहं प्रक्षाल्य वारिणा ।
मधुना सर्पिषाभ्युज्य प्रक्षाल्य च सुगन्धिभिः ॥
हिरण्यवर्णमित्यादिरापो हिष्ठादिभिः परम् ।
मा नोऽनुवाकेन ततः शुद्धवत्यान्तरन्तनः(?) ॥

* * * *

भूमिर्भूमिमगादिति नारिकेलफलादिना मूर्धानं भिन्द्यात् । प्रणवेन देवयजनं पांसुभिः पूरयेत् ।

End:

आदशाहान्तरं पुत्रः नारायणबलिं ततः ।
पार्वणं च यथाशास्त्रं पितुरात्मन्यतां व्रजेत् ॥

Colophon:

यतिसंस्कारविधिस्समाप्तः ॥

(*j*) अनुग्रहगद्यम्.

ANUGRAHAGADYAM.

Foll. 56*a*—66*b*. Fol. 67 contains the Muhūrtaśakuna (in Tamil language).

Prose passages wishing benedictions upon a married couple, bachelor and others.

Contains the Daṁpatyanugraha, Vaṭvanugraha and Dēvānugraha only.

Beginning:

स्वामिनः स्वस्तिमन्त्रार्थास्सत्यास्सफलास्सन्त्विति भवन्तः । अनयो-र्दम्पत्योर्वेदोक्तं दीर्घमायुष्यं भूयादिति भवन्तः ।

* * * *

अस्य कुमारस्य वेदोक्तं दीर्घमायुष्यं भूयादिति भवन्तः ।

End:

रङ्गनाथप्रियापाङ्गसमृद्धिर्भूयादिति (. . .) न्तु ॥

R. No. **3197.**

Palm-leaf. 12⅞ × 1⅛ inches. Foll. 102. Lines, 6 in a page. Grantha. Good.

Purchased in 1919-20 from M.R.Ry. Sāmu Śāstri, Negapatam.

कायारोहणमाहात्म्यम्.

KĀYĀRŌHAṆAMĀHĀTMYAM.

Vol. I.

Foll. 1*a*—101*a*. Foll. 101*b* and 102 are left blank.

On the greatness of the Śaiva shrine situated between Puṇḍarikapura (Cidambaram) and Vēdāraṇya and dedicated to the worship of Kāyārōhaṇa. It is stated that the कायारोहणक्षेत्र is on the eastern seashore (Bay of Bengal) between the places referred to above.

Contains the Adhyāyas 61—81 complete.

Beginning:

शौनकाद्या महात्मान ऋषयो ब्रह्मवादिनः ।
नैमिशाख्ये महापुण्ये तपस्तेपुर्मुमुक्षवः ॥

* * * *

सूतः—

श्रृणुध्वमृषयस्सर्वे सन्दिष्टः प्रवदाम्यहम् ।
गीतं सनत्कुमाराय कुमारेण महात्मना ॥
कायारोहणनाथस्य माहात्म्यं परमाद्भुतम् ।
सर्वपापप्रशमनं दुष्टग्रहनिवारणम् ॥
दुस्स्वप्ननाशनं दिव्यं भुक्तिमुक्तिफलप्रदम् ।
तदेवाहं प्रवक्ष्यामि भवतामिह विस्तरात् ॥

* * * *

क्षेत्रराजपुरं चेति पूर्वाम्भोधितटे शुभे ।
पुण्डरीकपुरस्यापि वेदारण्यस्य मध्यगे ॥

* * * *

स्वाश्रमं सम्प्रकुल्प्याथ तस्मिन् कायाधिरोहणम् ।

* * * *

शिवाख्या राजधानीति त्रिषु लोकेषु विश्रुतं(ता) ।
एवमादिपुराणाख्या लिङ्गोत्पत्तिरुदाहृता ॥
स्थलाधिक्यमहं वक्ष्ये शृणु लोकेषु विश्रुतम् ।

Colophon :

इत्यादिशैवपुराणे सनत्कुमारसंहितायामुपरिभागे कायारोहणमाहात्म्ये एक-षष्टितमोऽध्यायः ॥

See under the next number for the end.

R. No. **3198.**

Palm-leaf. 12⅝ × 1¼ inches. Foll. 86. Lines, 8 in a page. Grantha. Good.

Purchased in 1919-20 from M.R.Ry. Sāmu Śāstri, Negapatam.

Foll 85 and 86 are left blank.

कायारोहणमाहात्म्यम्.

KĀYĀRŌHAṆAMĀHĀTMYAM.

Vol. II.

Fol. 1*a* gives the last portion of the 81st Adhyāya with the colophon.

Same work as the above. This volume contains the further portion of the work described above.

Contains the Adhyāyas 82—117 complete.

See under the previous number for the beginning.

End :

कायारोहणदेवस्य माहात्म्यं परमाद्भुतम् ।
शृणोति सततं भक्त्या नियमात् मानवो भुवि ॥

तस्याभीष्टं करोत्येव कायारोहण ईश्वरः ।
कन्यार्थी लभते कन्यां धनार्थी धनमाप्नुयात् ॥
विद्यार्थी लभते विद्यां पुत्रकामो लभेत्सुतम् ।
फलानपेक्षी सततं मोक्षमाप्नोत्यसंशयम् ॥

Colophon:

ओमित्यादिशैवपुराणे सनत्कुमारसंहितायामुपरिभागे कायारोहणमाहात्म्ये शताधिकसप्तदशोऽध्यायः ॥

R. No. **3199.**

Palm-leaf. $15\frac{3}{8} \times 1\frac{1}{2}$ inches. Foll. 196. Lines, 6 in a page. Oriya. Good.

Purchased in 1919–20 from Śrīmān Gōpīnātha Tripāṭhi, Boyrani, Ganjam district.

Foll. 1 and 2 are left blank.

ज्योतिश्चन्द्रोदयः.

JYŌTIŚCANDRŌDAYAḤ.

Foll. 3*a*—196*a*. Fol. 196*b* is left blank.

A treatise in astrology dealing with the following subjects: by Dhanañjaya of Vatsa family, who mentions Garga, Parāśara and Varāhamihira as well as the works Suprakāśa and Rājamārtāṇḍa:—

१. राशिनिर्णयः.
२. कालज्ञानलग्नादिनिर्णयः.
३. ग्रहयोनिभेदादिसङ्ग्रहः.
४. गोचारनिर्णयः.
५. ग्रहजातिनिर्णयः.
६. चन्द्रताराशुद्धिनिर्णयः.
७. नाडीनक्षत्रादिशुभाशुभलक्षणादिनिरूपणम्.
८. रविगुरुशुद्धिकालशुद्धिनिर्णयः.
९. वारादिनिर्णयः.
१०. योगादिनिर्णयः.
११. करणप्रकरणम्.
१२. दशमेलकप्रमाणम्.
१३. कन्यावरलक्षणम्.
१४. विवाहनिर्णयः.
१५. स्त्रीशुद्धिनिर्णयः.
१६. गर्भकालनिर्णयः.
१७. जातकर्मादिनिर्णयः.
१८. व्यवहारनिर्णयः.
१९. वास्तुनिर्णयः.

२०. वास्तुपुरुषोत्पत्तिनिर्णयः.
२१. गृहारम्भनिर्णयः.
२२. गृहप्रवेशः.
२३. मठमण्टपपुष्करिण्यारम्भप्रतिष्ठा.
२४. अरामारोपणादिनिर्णयः.
२५. कृषिप्रकरणम्.

Breaks off in the 25th Prakāśa.

Beginning:

श्रीनीलाचलकन्दरोदरगतं निर्निद्रनीलोत्पल-
प्रेक्ष्यं दैत्यगजेन्द्रदर्पदलनं स्वर्वासिपञ्चाननम् ।
शक्त्याचञ्चलया परीतममलं पक्षीशसन्मण्डनं
तं वन्दे हृतपारिजातमजरं चक्रायुधं माधवम् ॥

* * * *

यद्भावः खरभाद(बाध)के जलमये सम्मूर्च्छिता भास्वरा
ध्वान्तं तच्छमयन्ति नैशमनिशं यस्सर्वदा भासते ।
कालात्मा खलु कालकृत्समय(व)ादिग्देशयोर्व्यञ्जकः
तस्मै चन्द्रतनोः क्षयोपचययोः कर्त्रे सवित्रे नमः ॥
श्रीमद्वत्ससुवंशपङ्कजवनप्रोद्बोधचण्डद्युतिः
दैवज्ञप्रवरो धनञ्जय इति ख्यातस्तु यो भूतले ।
ज्योतिश्शास्त्रमिदं समीक्ष्य बहुधा सोऽहं तु नत्वा गुरून्
कुर्वे ज्यौतिषचित्तकैरववनप्रोल्लासचन्द्रोदयम् ॥

सुप्रकाशे—

पूर्वं पूर्वमुनिं ससर्ज विविधं यज्ज्योतिषां विश्वसृट्
सारोद्धारपरौ ततोऽप्यभिमतां दैत्येन्द्रयोर्मन्त्रिणौ ।
तस्माद्गर्गपराशरादिमुनिभिः प्रोक्तं तदल्पं पुनः
सङ्क्षिप्तं कृतवान् वराहमिहिरोऽर्कांशावतारोऽखिलम् ॥

राजमार्तण्डे—

यच्छास्त्रं सविता चकार विपुलं स्कन्धैस्त्रिभिर्ज्यौतिषं
तस्योच्छित्तिभयाय नः कलियुगे संश्रित्य यो भूतलम् ।
भूयस्स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधा-
दित्थं संप्रवदन्ति योगकुशलास्तस्मै नमो भास्वते ॥

* * * *

Colophon :

इति श्रीज्योतिश्चन्द्रोदये राशिनिर्णयो नाम प्रथमः प्रकाशः ॥

End :

पुष्पोपगान्वापि फलोपगान्वा यः पादपान् स्पर्शयते द्विजाय ।
स स्त्रीसमृद्धं बहुरत्नपूर्णं प्राप्नोत्यपायोपनतं गृहं वै ॥

Colophon :

इति श्रीज्योतिश्चन्द्रोदये आरामारोपणादिनिर्णयो नाम चतुर्विंशः प्रकाशः ॥

अथ कृषिप्रकरणं लिख्यते । कृषिप्रशंसामाह—पराशरः—

कृषिर्धन्या कृषिर्मेधा जन्तूनां जीवनं कृषिः ।
हिंसादिदोषयुक्तेऽपि मुच्यतेऽतिथिपूजनात् ॥

* * * *

लग्नाचन्द्रमसस्तु सप्तमगृहे शून्ये विवाहः शुभः
कुर्यान्न व्यतिपातवैधृतिदिने नो विष्टिदुष्टेऽहनि ॥
नोत्पातपापदिवसे न तिथौ च रिक्ते
नास्तङ्गतेऽमरगुरौ भृगुनन्दने च ।

R. No. **3200.**

Palm-leaf. 19¼ × 1 inches. Foll. 141. Lines, 5 in a page. Oriya. Slightly injured.

Purchased in 1919–20 from Śrīmān Gōpīnātha Tripāṭhi, Boyrani, Ganjam district.

पुरुषार्थरत्नाकरः.

PURUṢĀRTHARATNĀKARAḤ.

Foll. 1*b*—140*b*. Foll. 1*a* and 141 are left blank.

Similar to the work described under No. 5774 of the D.C.S. MSS., Vol. XII. By Puruṣōttamatīrthamuni.

Incomplete.

Beginning :

निर्णेतुं पुरुषार्थतत्त्वमखिलं (. . .) शक्त्यावगाहं सताम् ॥

* * * *

Colophon :

इति श्रीपुरुषोत्तमतीर्थविरचिते पुरुषार्थरत्नाकरे पुराणप्रामाण्यविवेकः प्रथमस्तरङ्गः ॥

End :

परमा(त्मा)राधने सम्यक् प्रणिधातव्यमित्यशेषमतिमङ्गलम् ॥

निर्णेतुं सकलार्थतत्त्वमखिलं ज्ञातुं च तत्साधनं
(. . .) शक्त्यावगाहं सताम् ॥
. . . . तेन निखिलं विश्वं भवेद्ब्रस्मसा-
द्यस्साक्षादकरोत्समाधिषु परं ब्रह्माद्वयं निर्मलम् ।
सोऽयं श्रीपुरुषोत्तमाभिधमुनिः श्री . . तीर्थोत्तमः
चक्रे श्रीपुरुषार्थरत्ननिलयं ग्रन्थं सतां प्रीतये ॥
विद्यासागरपारगं जडजनाभिज्ञत्वसंपादकं
शुद्धं श्रीपुरुषोत्तमाभिधमहातीर्थं च ये संश्रिताः ।
ते नि . . . .
. . . यान्ति सुखेन तस्य महसा निर्धूतपापा नराः ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीपुरुषोत्तमतीर्थमुनिविरचिते पुरुषार्थ-रत्नाकरे पञ्चदशस्तरङ्गः ॥

समाप्तोऽयं पुरुषार्थरत्नाकरः ॥

R. No. **3201.**

Palm-leaf. 17½ × 1⅜ inches. Foll. 119. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1919–20 from M.R.Ry. Kulattu Śrautigaḷ, Kallidakuricchi, Tinnevelly district.

लघुयोगवासिष्ठम्, तत्त्वबोधिनीव्याख्यासहितम्.

LAGHUYŌGAVĀSIṢṬHAM WITH THE COMMENTARY TATTVABŌDHINĪ.

Foll. 1*a*—112*b*.

A commentary on the Laghuyōgavāsiṣṭha, which work has been described under No. 1982 of the D.C.S. MSS., Vol. IV, Part I: by Rāmabrahmēndrayōgin, disciple of Upēndramahāyōgivarya.

Contains from the beginning of the 35th Sarga to the end of the 43rd Sarga in the Nirvāṇaprakaraṇa.

Beginning:

सच्चिदानन्दमद्वैतमुपेन्द्रगुरुरूपिणम् ।
मम वाग्भूतये नित्यं स्वात्मा . . . . ॥

उक्तं हि (तच्च) वैताल उपाख्याने विशेषतः ।
क्षुत्पिपासादिसंशान्तिश्चित्तत्त्वश्रवणाद्भवेत् ।
इति वक्तुं पुनस्तत्र तदुपोद्घात उच्यते ॥

अत्र ता(व)दाख्याने हि मुक्तिप्रतिबन्धकचित्तोल्लासकस्तु लीलयापि भिक्षुणा क्वचित् कदाचिदपि न कर्तव्य इत्युक्तम् । अतस्तद्विहाय स्वरूपनिष्ठो भवेत्याह ।

वसिष्ठः—

सुषुप्तमौनवान् भूत्वा त्यक्त्वा चित्तविलासिताम् ।
कल्पनामलनिर्मुक्तस्तिष्ठावष्टब्धतत्पदः ॥

चित्तविलासितां त्यक्त्वा यतः कल्पनामलनिर्मुक्तः सङ्कल्पादिरूपमलविमुक्तः । त्वम्, अतस्सुषुप्तमौनवान् भूत्वा । अवष्टब्धः अवलम्बितस्तत्पदः स्वात्मपदो येन तथाभूतः तिष्ठेति ।

*   *   *   *

Colophon:

इति सव्याख्यानवासिष्ठतत्त्वबोधिन्यां मोक्षोपायनिर्वाणप्रकरणे बेतालोपाख्यानं नाम पञ्चत्रिंशस्सर्गः ॥

End:

योगसिद्ध्यनन्तरं श्रीरामः विश्वामित्रेण साकं सिद्धाश्रमं प्रति मारीचसुबाहुनिग्रहार्थं भगवान् . . . अनुसन्धेयः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदुपेन्द्रेन्द्रमहायोगिवर्यान्तेवासिना श्रीरामब्रह्मेन्द्रयोगिवर्येण विरचितायां सव्याख्यानवाल्मीकीयवासिष्ठतत्त्वबोधिन्यां मोक्षोपाये त्रिचत्वारिंशस्सर्गः ॥

इयं वासिष्ठतत्त्वबोधिनी समाप्ता ॥

Foll. 113 and 114 are left blank. Foll. 115*a* to 119*b* contain the Āvaraṇapūjā of the goddess Śakti.

R. No. 3202.

Palm-leaf. 16 × 1½ inches. Foll. 20. Lines, 10 in a page. Grantha. Much injured.

Purchased in 1919–20 from M.R.Ry. Kulattu Śrautigal, Kallidakuricchi, Tinnevelly district.

शब्दखण्डसारमञ्जरी.

ŚABDAKHAṆḌASĀRAMAÑJARĪ.

Foll. 1a—16b.

Same work as that described under No. 4309 of the D.C.S. MSS., Vol. VIII. By Bhavānandatarkavāgīśa.

Wants the beginning; otherwise complete.

Fol. 17 contains the first portion of Vikramōrvaśīya. Fol. 18 contains the Śarabhamālāmantra. Foll. 19 and 20 contain Śarabhasāluvapakṣirājamantra.

R. No. 3203.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 84. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1919–20 from a MS. of M.R.Ry. Tippan Nambūdirippaḍ, Ponnūrkoṭṭamana, Perumbavur, Travancore State.

(a) पद्यवाहिनी.

PADYAVĀHINĪ.

Foll. 1a—36b.

A treatise on Śāktism dealing with the Tantric Sandhyāvandana, Dhyāna, Yantrōddhāra, Pūjā, etc., in accordance with the views of Sōmānanda, who was the preceptor of Śaṅkara, the author of this work.

Contains chapters one to four complete.

Beginning:

. . . . ख्युत्पलाख्यगुरुणा भणितं पुरा ।
अतः क्रियाक्रमाभ्यासः कर्तव्यस्सर्वथा . . ॥
. . . . ।
. . . . . योगीन्द्रः पृथ्वीं पद्भ्यां पवित्रयन् ॥
ततस्तेन प्रयत्नेन पञ्चस्रोतस्समन्वयः ।
सन्ति पद्धतयस्तेषु खण्डशः खण्डशः कृताः ॥
श्रीशाम्भवोदयेत्यादितत्तन्नाम्नानुरञ्जिताः ।
मन्त्रोद्धारभवद्ध्यानसन्ध्यान्यासार्चनादिकाः ॥
क्वापि क्वापि प्रयुक्तत्वादृजूकर्तुं न शक्यते ।
मन्दैश्च मतिहीनैश्च गुरुसेवादिवर्जितैः ॥
अतस्सर्वहितान्वेषी तत्प्रशिष्यपदे स्थितः ।
परमेष्ठी गुरोर्हार्दमालोच्यालोच्य यत्नतः ॥

शङ्करोऽयं द्विजः कश्चिद्वीतरागो बिविक्तधीः ।
करोति पद्धतिं पद्यैः स्रोतसामैक्यवाहिनीम् ॥
जीवः क्रियायाः कालस्य क्रम एव स तत्त्वतः ।
क्रमः क्रमिक एवात्र द्वैतापत्तिः कथं भवेत् ॥
अस्मात्पूर्वमिदं त्वेवमस्मात्पश्चादिति क्रमः ।
क्रमसाङ्कर्यराहित्यप्रयोक्ता शिव एव सः ॥

* * * *

Colophon:

श्रीसोमानन्दशिष्येण शङ्करेण शरीरिणा ।
कृतायां पद्यवाहिन्यां पूर्णा प्रथमवाहिनी ॥

End:

इति पूर्वसप्तविंशतिमन्त्रितस(न्त)र्पणं दीपम् ।
दीपं प्राश्य महाचक्रयोगमुद्घोषयेत्ततः ॥
दिनार्धकृपणानां च दद्याद्विभवयुक्तितः ।
ततस्समापयेद्यागं महापर्वविधिस्त्वयम् ॥

Colophon:

श्रीसोमानन्दशिष्येण शङ्करेण शरीरिणा ।
कृतायां पद्यवाहिन्यां पूर्णं चतुर्थमा(तुर्यमथा)ह्निकम् ॥

Foll. 36*b* and 37*a* contain the Ṣōḍaśamantranirūpaṇa of the goddess Śakti.

(*b*) श्रीविद्याक्षरमालास्तोत्रम्.

ŚRĪVIDYĀKṢARAMĀLĀSTŌTRAM.

Foll. 37*b*—38*b*.

Similar to the work described under No. 10769 of the D.C.S. MSS., Vol. XIX.

Wants the beginning; otherwise complete.

Beginning:

. . . .
. . . . . सलिलस्थगितेऽपि नेत्रे ।
सान्निध्य . . . . तसोदरस्य
तद्विग्रहस्य पर . . . . तस्य ॥
ईशित्वभावकलुषाः कति नाम सन्ति
ब्रह्मादय . . . . चाभिभूताः ।

एकस्स एव जनिभिः स्थिरसिद्धिरास्ते
यः पादयोस्तव सकृत्प्रणतिं करोति ॥
लब्ध्वा सकृत् त्रिपुरसुन्दरि तावकीनं
कारुण्यकन्दलितकान्तिहरं कटाक्षम् ।
कन्दर्पहावसुभगाः खलु भक्तिभाजः
सम्मोहयन्ति तरुणीं भुवनत्रयेऽपि ॥
ओ(ह्रीं)ङ्कारमेव तव नाम गृणन्ति वेदा
मातस्त्रिकोणनिलये त्रिपुरे त्रिनेत्रे ।
यत्संस्कृता यमभटाभिभवं विहाय
दीव्यन्ति नन्दभवने सह लोकपालैः ॥

End:

ह्रीङ्कारत्रयसम्पुटेन महता मन्त्रेण सन्दीपितं
स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मन्त्रवित्
तस्य(स्येन्द्राद्यमरा)भवन्ति वशगा लक्ष्मीश्चिरस्थायिनं
वाणी निर्मलसूक्तिभावभरिता जागर्ति दीर्घं वयः ॥

Colophon:

श्रीमदक्षरमाला संपूर्णा ॥

(*c*) शम्भुनिर्णयः.
ŚAMBHUNIRṆAYAḤ.

Foll. 39*a*—66*a*.

A Tantric work dealing with the procedure and other details to be observed in connection with the worship of Śakti and Śiva: by Krōḍa muni.

Contains the Avacchēdas 1 to 26 complete.

Beginning:

(स्वाराज्यहाटकेशानमृज्जीवन्मुक्ति)साधनम् ।
यतस्तमव्ययं शम्भुं नत्वाहं स्याद्धिमात्मजा ॥
व्यासभयाल्लघुसाध्यां पृच्छामि त्वां जगत्पते ।
सपर्यां सर्वचित्तेच्छादायिनां(नीं)श्रीशिवात्मनः ॥

* * * *

ओं ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हू स्वाहा ॥

* * * *

Colophon :

श्रीशम्भुनिर्णयेऽपर्णे पञ्चवर्गाप्तिदायकम् ।
गतं मण्डलमर्चायां सन्तु ते दिव्यसिद्धयः ॥
प्रथमोऽवच्छेदः ॥

End :

सौम्ये तु क्रोडमुनिना चिश्चेन पश्चिमार्थिना ? ।
माहेश्वराः परास्सन्तु महेशतां कुर्वैष्णवाः ॥
. . लाश्शान्ता भवन्त्यार्ये कथां यच्छन्तु साधवः ।

Colophon :

श्रीशम्भुनिर्णयेऽपर्णे पञ्चवर्गाप्तिदायकः ।
शिखायोगो गतस्सिद्धयै सन्तु ते दिव्यसिद्धयः ॥
इति षड्विंशोऽवच्छेदः सम्पूर्णः ॥

(*d*) शम्भुनिर्णयदीपिका.

ŚAMBHUNIRṆAYADĪPIKĀ.

Foll. 66*b*—82*b*.

A commentary on the work of Krōḍamuni described above: by Śivānandanātha, disciple of Vidyānandanātha and son of Pratiṣṭhānanda. The commentator herein states that he wrote the commentary at the request of his disciple Cidānanda.

Breaks off in the eighth Avacchēda.

Beginning :

धराक्षीरबृहद्भानुसमीरव्योममानसे ।
व्यापकं परमोदारं संविद्रूपं शिवं भजे ॥
अजेशप्रभुपात्रेण प्रतिष्ठानन्दसूनुना ।
लध्वी व्याख्या मतेशस्य शिवानन्देन लिख्यते ॥
सर्वानुग्राहकं शम्भुं तन्त्रं सर्वावभासकम् ।
सर्वाधिकारसंसिद्धयै बह्ववातारयत्प्रभुः ॥
क्रियोत्तराणि शास्त्राणि तथा ज्ञानोत्तराणि च ।

* * * *

शिवानन्दमुनि(योगी) शिष्येणाचिरसेविना ।
अकरोदर्थितो व्याख्यां चिदानन्देन धीमता ॥

प्रतिष्ठानन्ददुग्धाब्धेश्शिवानन्देन्दुरुत्थितः ।
तनुते श्रीसहस्रार्धव्याख्यां ज्योत्स्नां भुवस्तले ॥
गुरुस्मृतिदशाभक्तिस्थालिधीस्नेहगर्भिणी ।
स्पष्टा विरचिता व्याख्या शम्भुनिर्णयदीपिका ॥

* * * *

तत्र श्रीसहस्रार्धशासनं षड्विंशत्यर्थप्रतिपादनपरं तत्सङ्ख्यावच्छेदात्मकम्। तत्र प्रथमेनावच्छेदेनार्चामण्डलकल्पनमुच्यते । द्वितीयेनार्चनस्य पर्यायः । तृतीयेन नवेश्वरार्चनम् । चतुर्थेन दूत्यर्चनम् । पञ्चमेन नवेश्वरहोमः । षष्ठेन रोगसंहारः । सप्तमेन श्रीवैभवध्यानम् । अष्टमेन शक्तिध्यानम् । नवमेनैन्दवध्यानम् । दशमेन प्राभाकरध्यानम् । एकादशेन बीजषोढा । द्वादशेन श्रीसमयाशम्बरोद्धारः । त्रयोदशेन क्षेत्रेशशम्बरोद्धारः । चतुर्दशेन श्रीसाधनम् । पञ्चदशेन सर्वसमीहितप्रदं चक्रम् । षोडशेन कुमारिकावेशः । सप्तदशेन श्रीक्रमसपर्या । अष्टादशेन परमाणूनामर्चनम् । एकोनविंशेन मतिविकासोपायः । विंशेन श्रीशिखेश्वरसाधनम् । एकविंशेन श्रीतद्धहन्यासः । द्वाविंशेन पुरक्षोभः । त्रयोविंशेन मृत्युञ्जयो योगः । चतुर्विंशेन पारलौकिकसमुत्क्रान्तिः । पञ्चविंशेन शरीरसिद्धिसाधनम् । षड्विंशेन शिखायोगः । तदिदं दिव्यं शासनं दुरवगाहमतिगूढं सम्प्रदायैकगम्यं गुरुवक्त्राद्यथाश्रुतं व्याख्यायते ।

* * * *

स्वाराज्येत्यादितस्सूत्रद्वयमेकवाक्यार्थम् ।
स्वाराज्यहाटकेशान (. . .) स्याद्धिमात्मजा ॥
व्यासभयाल्लघुसाध्यां (. . .) श्रीशिवात्मनः ॥

स्वशब्देन स्वर्गवाचिना धर्मो लक्ष्यते । राज्यशब्देनार्थः । हाटकेशानशब्देन कामः ।

* * * *

Colophon:

श्रीमदाचार्यविद्यानन्दनाथशिष्यश्रीमदाचार्यशिवानन्दनाथविरचितायां श्रीशम्भुनिर्णयदीपिकायां प्रथमोऽवच्छेदः ॥

End:

शिवे इदमा(म)न्त्रितम् शम्भोर्गुणभागी । सर्वज्ञत्वादिधर्मनिष्ठं श्रीवैभवं श्रीशम्भुसम्बन्धीति शिवम् ॥

Colophon:

श्रीमदाचार्यविद्यानन्दनाथशिष्यश्रीमदाचार्यशिवानन्दनाथविरचितायां श्रीशम्भुनिर्णयदीपिकायां सप्तमोऽवच्छेदः ॥

तत्तद्ध्यानविशेषेण तत्तद्वैभवविग्रहम् ।
तत्तत्फलप्रदाता यस्सर्वदा तं स्तुमश्शिवम् ॥

श्रीवैभवध्यानानन्तरं शक्तिध्यानमुच्यते—शाक्तमित्यादि । शाक्तं शक्तिसम्बन्धि ध्यानमिति सम्बन्धः ॥

* * * *

चक्रवत् चक्रावर्तक्रमेणावहतः . . . . वने क्रमात् शनैश्शनैः

Fol. 83*a* gives the owner's name of the original manuscript. Foll. 83*b* and 84*a* contain the table of contents of this work. Fol. 84*b* is left blank.

AGENTS FOR THE SALE OF MADRAS GOVERNMENT PUBLICATIONS.

IN INDIA.

THE BOOK COMPANY, Calcutta.
THE BURMA BOOK CLUB (LTD.), 240-A, Merchant Street, Rangoon, Burma.
BUTTERWORTH & CO. (LTD.), 6, Hastings Street, Calcutta.
R. CAMBRAY & CO., Calcutta.
The Superintendent, DIOCESAN PRESS, Vepery, Madras.
E. M. GOPALAKRISHNA KONE, Pudumantapam, Madura.
HIGGINBOTHAMS (LTD.), Mount Road, Madras.
V. KALYANARAMA IYER & CO., Vellala Street, Vepery, Madras.
M. C. KOTHARI, Bookseller, Publisher and Newspaper Agent, Raopur Road, Baroda.
THE LAW BOOK DEPOT (LTD.), 15 and 16, Francis Joseph Street, Madras.
G. C. LOGANADHAM BROTHERS, Madras.
THE MODERN STORES, Salem.
S. MURTHY & CO., Madras.
G. A. NATESAN & CO., Madras.
The Superintendent, NAZAIR KANUN HIND PRESS, Allahabad.
NIVASARKAR, Manager, "Hitawada," Nagpur.
P. R. RAMA IYER & CO., Madras.
RAMAKRISHNA & SONS, Lahore.
THE SRIVILLIPUTTUR CO-OPERATIVE TRADING UNION (LTD.), Srivilliputtur.
SUNDER PANDURANG, Kalbadevi Road, Bombay.
D. B. TARAPOREVALA SONS & CO., Bombay.
THACKER & CO. (LTD.), Bombay.
THACKER, SPINK & CO., 3, Esplanade East, Calcutta.
THE THEOSOPHICAL PUBLISHING HOUSE, Adyar.
THE UNIVERSAL PUBLISHING CO., Bezwada.
THE UPPER INDIA PUBLISHING HOUSE (LTD.), Lucknow.
S. VAS & CO., Madras.

IN STRAITS SETTLEMENTS.

THE FEDERAL RUBBER STAMP CO., Penang.

NOTICE.

Official publications may be obtained in the United Kingdom either direct from the office of the High Commissioner for India, 42, Grosvenor Gardens, London, S.W. 1, or through any bookseller.